वि. अन्तःपदिक ओकार एकारहकारयोः प्रत्यययोः **आ भवति ग्रहणात्** । यावद्ग्रहणम् । ऐडकावे (ऊ. सं. ३२४) ऐडयामे (ऊ. अ. ६७६) **चाभि प्रियाण्यसा-विसोमयोः** । नामतृताऽ२इ । यमधिरा । एऽ७ । **दुरितासाऽ२३** । एऽ३ । **वाम्रे** (ऊ.-अ.६०४) सुषाहोऽ२इ । वसाहोऽ२ । **सोमसाम्नि** (ऊ.स.७८१)**श्येनोनयाऽ२३हाइ** ॥ १० ॥

भा. पूर्वलक्षणमेवाधिक्रियते । आभावः । प्रासङ्गिकानां यावद्वचनत्वात् ओकारः सन्नन्तःपदिकग्रहणादा भवत्येकारहकारयोः प्रत्यययोः । तदुदाहृतम् ॥ ऐडकावे ऐडयामे च अभिप्रियाणि-(ऊ.सं.३२४)असाविसोमयोः (ऊ.अ.६७६) । वाम्रे परी-तोष्याम्(ऊ. अ. ६०४) । अध्यर्धैडे च सोमसाम्नि (ऊ.स.७८१) असाव्यꣳशुर्मदायाम् ॥ १० ॥

दी. ओकारोऽन्तःपदिकः पदमध्ये वर्तमान **आ भवति** । **ग्रहणात्** । संग्रह-णात् । यावद्ग्रहणं तावत् । एकारे प्रत्यये हकारे वा प्रत्यये । **एऽ५** । **अभिप्रिया ऽ२णि प्रवताइ** इत्यैडकावे द्वितीयायाम् । **नामतृताऽ२इ** । **यमधिरा** । **एऽ५** । अत्र **रो**मध्ये ओकारान्तःपदिक आ भवति एकारे प्रत्यये । **असावाई सोऽ२३** । **मोअरूषाऽ२३ः** (ऊ. अ. ६७६) इत्यैडयामे तृतीयायां **दुरितासाऽ२३** । **ए** । अत्र **सो**-मध्ये आ भवति एकारे प्रत्यये । **परीतोषिश्वता** । हाऽ३हाऽ३इ (ऊ. अ. ६०४) इति वाम्रे द्वितीयायां **सुषाहोऽ२इ** । **वसाहोऽ२** । अत्र **सो**-मध्ये आ भवति । हकारे प्रत्यये । **असाव्यꣳशुर्मदायाऽ३ए** (ऊ. स. ७८१) इत्यर्धैडसोमसाम्नि **श्येनोनयाऽ२३हाइ** । अत्र **यो**-मध्ये आ भवति हकारे प्रत्यये ॥ १० ॥

अभ्रिगवित्यत्रात्वमौकारे प्रत्यये रयिष्ठे ॥ ११ ॥

---

2. M[1]-[3] om. एकार; A[2] om. प्रत्यययोः;

3. S[1] यावद्ग्रहणात् S[2]KM[1] यावद्ग्रहणा for यावद्ग्रहणम्

17. My[2]-[3] आभावः for आ भवति

वि. रयिष्ठे औकारे प्रत्यये स्यामसुम्ने ते अध्रिगो इत्यत्रात्वम् ॥ ११ ॥

भा. स्यामसुम्ने ते अध्रिगो इत्यत्र औकारे प्रत्यये रयिष्ठे ॥ ११ ॥

दी. अभीनोवा । जसाताऽ२माम् (ऊ. द. १६७) इति रयिष्ठे द्वितीयायां ते आध्राऽ२इगा । औऽ३होऽ२वा । अत्र गो-मध्ये आभावः औकारे प्रत्यये ॥ ११ ॥

अवृद्धं सर्वमा भवत्यौहोस्तोभे सस्वरे प्रत्यये ॥ १२ ॥
रेवतीर्नाऔहोप्राणा शिशाऔहो । साऔहो ॥ १३ ॥

वि. अवृद्धं सर्वमा भवत्यौहोस्तोभे समानस्वरे प्रत्यये॥ १२ ॥

भा. अवृद्धं सर्वमा भवति औहोस्तोभे समानस्वरे प्रत्यये ॥ १२ ॥

दी. अवृद्धं ह्रस्वं दीर्घं वा सर्वं स्वरव्यञ्जनसहितमा भवति । सस्वरे समानस्वरे पूर्वस्य औस्तोभे प्रत्यये । पूर्वस्य चौकारस्य च समानस्वर इत्यर्थः । रेवतीनाऔहोहाइ (ऊ. द. ६०८) इति बारवन्तीये नः आ भवति । प्राणाशिशाऔहोहाइ (ऊ. अ. ६०८) इति वारवन्तीये शु-मध्ये आ भवति । साऔहोहाइ (ऊ. ए. ५२७) इति वारवन्तीये सु-मध्ये आ भवति समानस्वरे औस्तोभे परे सति ॥ १ ॥

नेन्द्रस्तेसो नहितेपू विश्वस्यदू ज्योतिष्कृणो चोदेथाऽसू
रागश्च पुशब्दश्चेलान्दे ॥ १४ ॥

वि. अनन्तरस्य विधेरपवाद इति संज्ञा । **इन्द्रस्ते सोमसुतस्य** (ऊ. सं. ३५२) **नहिते पूर्तिमक्षिपत्** (ऊ. ए. ५०७) । **विश्वस्य दूतम्** (ऊ. प्रा. ८२७) ।**ज्योतिष्कृणोति**

---

2. PV² आकारे for औकारे
4. L¹ om. औहोवा; L¹ आकरे for औकारे
5. A² सर्वं वृद्धमिति, M¹-² सर्वत्र वृद्धम् for अवृद्धं सर्वम्; A³ om. सस्वरे
7. M¹-² om. समानस्वरे
8. P सस्वरे for समानस्वरे
15. S¹M¹-² रङ्गश्च for रागश्च
16. S¹ om. इति संज्ञा

(ऊ. प्रा. ८२८) **चोदिथां सूनृतावते** (ऊ. प्रा. ८२९)। **अग्नेविवस्वा**- (उ. प्रा. ८३६) द्वितीयायां रागः। **अद्यादेवा**ः। **इलान्दे** (र. सं. ७०) **पुशब्दश्च**। **सदर्शतस्य वपु**- इत्येते न आ भवन्ति ॥ १४ ॥

भा. अनन्तरविधिरपवादः। परिप्रधन्वायाम् (ऊ. सं, ३५२) **इन्द्रस्ते सोमे**-त्यनाभावः। एह्युष्वायां (ऊ. ए. ५०७) **नहितेपू**। एनावयां (ऊ. प्रा. ८२७) **विश्वस्य दूतम्**। प्रत्युअदर्श्यायां (ऊ. प्रा. ८२८)। **इमाउवान्त्यायां** इमाउवान्त्यायां(ऊ. प्रा. ८२९) **चोदेथाश्सू** इति। **अग्ने विवस्व**-(ऊ. प्रा. ८३६) द्वितीयायाम् **अद्यादेवा**ः इति रागः। **पुशब्दश्चेलान्दे** (र. सं. ७०) सदर्शतस्य वपुष इत्यनाभावः ॥ १४ ॥

दी. नकारः प्रतिषेधार्थः। **परिप्रधाऔहोहाइ** (ऊ. सं. ३५२) इति वारवन्तीये तृतीयायाम् **इन्द्रस्तेसोऔहोहाइ**। अत्र सोमध्ये न आभावः। **एहि युषाऔहोहाइ** (ऊ. ए. ५०७) इति वारवन्तीये तृतीयायां **नहितेषूऔहोहाइ**। अत्रपू-मध्ये न आभावः। **एनावो आ औहोहाइ** (ऊ. प्रा. ८२७) इति वारवन्तीये द्वितीयायां **विश्वस्यदूऔहोहाइ**। अत्र दूमध्ये न आभावः। **प्रत्युवदाऔहोहाइ** (ऊ. प्रा. ८२८) इति वारवन्तीये द्वितीयायां **ज्योतिष्कृणोऔहोहाइ**। अत्र **णो**-मध्ये न आभावः। **इमाउवाऔहोहाइ** (ऊ. प्रा. ८२९) इति वारवन्तीये तृतीयायां **चोदेथाश्सूऔहोहाइ**। अत्र **सू**-मध्ये न आभावः। **अग्नेविवाऔहोहाइ**। इति वारवन्तीये द्वितीयायां **अद्यादेवॅ औहोहाइ**। अत्र वान्-मध्ये **रङ्गो** जातः। **अग्नेतवश्र**। **इडा**। **सुवाः**। **इडा** (र. सं. ७०)इति इलान्दे द्वितीयाय- **वपू औहोहाइ**। अत्र **पू**-मध्ये न आभावः ॥ १४ ॥

---

2. S[1]M[1-2] रङ्गः for रागः

4. A[1] विघे: for विघि:

8. pv[2] रङ्गः for रागः

9. L[1]My[2-3] प्रतिषेधे for प्रतिषेधार्थः

रथन्तरे सर्वमा भवाति स्पर्शगभस्त्योर्वर्जमोस्तोभे प्रत्यये ॥ १५ ॥

वि. रथन्तरे सर्वमा भवति ओस्तोभे प्रत्यये सर्वस्पर्शवर्जम् । नदीष्वा गभस्त्योर्वर्जे च । उदाहरणानि–एनाद्यायाम् (र. द. २) वाइश्वस्यदू ऽ२३ता ऽ३म । आमा ऽ२३४र्ताम् । ओवा ऽ६ । दाइवं ऽ राधो ऽ२३जा ऽ३ । ना ऽ२३४नाम् । ओवा ऽ६ ॥ नादीषुवा ऽ२३गा ऽ३ । भास्ता ऽ२३४योः । ओवा६ (र. क्षु. १८३) ॥ १५ ॥

भा. रथन्तरे सर्वमाभवति ओस्तोभे प्रत्यये । विधिमध्ये अपवादः । स्पर्शवर्जम् । सर्वे स्पर्शा नदीष्वागभस्त्योरिति विसर्जनीयस्य नाभावः । उदाहरणानि- एनाद्यायां (र. द. २) विश्वस्य दूतममृतम् । देवश्राधोजनानाम् ॥ उद्यन्नक्षत्रमर्चिवत् रथन्तरे (र. द. ३) ॥ १५ ॥

दी. आभित्वाशूरनोनुमोवा (र. द. १) इत्यादिरथन्तरे सर्वं स्वरव्यञ्जनसहितमा भवति ओस्तोभे प्रत्यये । सूर्म्यू ऽ२३४षा । ओवा ऽ६ । विधिमध्ये प्रतिषेधः स्पर्शवर्जम् । रथन्तरे स्पर्शानां न आभावः । उदाहरणानि—आइनावोअग्निंनमसोवा (र. द. २) इति रथन्तरे आमा ऽ२३४र्त्ताम् । ओवा ऽ६ । अत्र र्ता-मध्ये न आभावः । एवं सर्वरथन्तरेषु । प्रासोमदेववीतयोवा (र. क्षु. १८३) इति रथन्तरे तृतीयायां भास्ता ऽ२३४योः । ओवा ऽ६ । अत्र ओकारसहितविसर्जनीयस्य न आभावः ॥ १५ ॥

अश्विनोर्व्रतपूर्वे च तालव्यम् ॥ १६ ॥

वि.&भा. अश्विनोर्व्रतपूर्वे च पुनानयां तालव्यम् आ भवति । ओस्तोभे प्रत्यये ॥ १६ ॥

---

2. A^{3} om. रथन्तरे....प्रत्यये

4. S^{2} after ओवाऽ६ adds: हाउवा and $A^{2}M^{1-2}$ हा; $A^{3}M^{1-2}S^{1}$ न जातोना for दइवं राधो; A^{2} इष्युतःदेवां ह, $M^{1-2}S^{1}$ इष्याऽ२३४ ता ओवाऽ६हा for नाम् । ओवा

6. PV^{2} स्पर्शगभस्त्योर्वजम् for स्पर्शवर्जम्

दी. पुनानःसोमधारायाओहाउ (र. प्रा. १३९) इति पूर्वे अर्धिनोर्व्रते अपोवसानोअर्षसाओहाउ । अत्र सि-मध्ये आभावः ओस्तोभे प्रत्यये । एवमादि तालव्यमा भवति ॥ १६ ॥

शाक्वरर्षभे त्वोष्ठ्यस्पर्शवर्जमेस्तोभे प्रत्यये ॥ १७ ॥

वि &भा. शाक्करर्षभे पवस्ववाजायां (र. द. १५) ए-स्तोभे प्रत्यये ओष्ठ्यस्पर्शवर्जमा भवति । इन्द्राएयसोएमवाए । ओष्ठ्यत्वादनाभावः । तुवामेरिहाए इति स्पर्शत्वादनाभावः ॥ १७ ॥

दी. ओ॰३१म् । पवाएस्ववाएजसाएतयआ (र. द. १५) इति शाक्वरऋषभे तु ओष्ठ्यस्पर्शवर्जम् एस्तोभे प्रत्यये आ भवति । उदाहरणम्—इन्द्राएयसोएमावाएष्णवाआ । अत्र वि-मध्ये आभावः एस्तोभे प्रत्यये । एवमादिषु आ भवति । ओष्ठ्यवर्जम् । उदाहरणम् । यसोए । अत्र सो-मध्ये न आभवाः । उकारस्य ओष्ठ्यत्वात् । स्पर्शवर्जम् । तुवामेरिहाए । अत्र वाम् इति मकारस्य न आभावः । स्पर्शत्वात् ॥ १७ ॥

वृष्णि सर्वमा भवत्योवायामनन्तर-
स्वरनीचाद्यायां प्रत्यये । प्रत्यये ॥ १८ ॥

वि. वृष्णि अनन्तरस्वरनीचाद्यायां प्रत्ययभूतायां सर्वमा भवति । अभ्यासः प्रकरणसमाप्त्यर्थः ॥ १८ ॥

---

2. My[3] भवति for °भाव:

5. भा. om. शाक्वर्षभे; भा. trans. एस्तोभे प्रत्यये after ओष्ठ्यस्पर्शवर्जम्

6. A[2]M[1-2]S[1] after भवति add: सर्वे । पा एवा एता एया and trans. इन्द्राएयसोए after अनाभावः

9. E om. उदाहरणम् ...ओष्ठ्यवर्जम् (L. 11)

16. A[2]M[1-3]S[1] om. अभ्यासः प्रकरणसमाप्त्यर्थः ।

इति फुल्लसूत्रविवरणे आभावे चतुर्थस्य प्रपाठकस्य चतुर्थः खण्डः ॥ ४ ॥

आभावान्ताः समाप्ताः ॥

भा. वृष्णि सर्वभा भवति । पदान्तीयमन्तःपदिकं च । **ओवायामनन्तरस्वर-नीचाद्यायां** प्रत्ययभूतायामिति ॥ १८ ॥

इति पुष्पसूत्रभाष्ये चतुर्थस्य प्रपाठकस्य चतुर्थः खण्डः ॥ ४ ॥

भावाभावाः समाप्ताः ॥

दी. ३ २र ३रर **अभाओवा ।** १र ३रर **प्रवाओवा** (र. प्रा. १३७) इति वृष्णि सर्वं पदान्तीयमन्तः-पदिकं **चा भवति ।** ओवायामनन्तरस्वरे अग्रिमस्वरे नीचाद्यायां प्रत्ययभूतायाम् । उदाहरणम् । ३ २र ३र र **अभाओवा ।** अत्र भि-मध्ये आभावः । नीचस्वरे ओवास्तोभे प्रत्यये । एवमादिषु आ भवति । अभ्यासः प्रकरणसमाप्त्यर्थः ॥ १८ ॥

इति फुल्लदीपे अष्टमप्रपाठकस्य चतुर्थः खण्डः ॥ ४ ॥

आभावः समाप्तः

पञ्चमः खण्डः

अथ विकाराः

ऊहगाने योनिवत्स्वराः स्तोभाभ्यासविरामाः ॥ १ ॥

वि.&भा. कोऽस्याभिसंबन्धः । उच्यते । **तालव्यमाइ** (पु. सू. ३. १. १) इत्येतस्मिन् सूत्रे उक्तमेतत् । **ऊहगाने योनिवत्** स्वरा इत्येतत् पूर्वं वक्तव्यम् ।

20. A^2 एव तत् for एतत्

प्रकृतिमापद्य विकारवचनं युक्तमिति। तत्र च परिहार उक्तः। **यथाग्निष्टोमप्रकरणे प्रथमं** गायत्रं साम भवति। तत्रास्यानधिकारः। कुतः। ऊहशास्त्रानुसारित्वात्। ततोऽनन्तरममाहीयवं भवति। तत्र च तालव्यस्य विकारो दृष्टः। **उच्चाताइ** (ऊ. द. १) इति। तेन प्रसङ्गेन **तालव्यमाइ** इत्युक्तम्। तेन प्रसङ्गेन सर्व एव भावा अनुपरिक्रान्ताः आभावान्ताः। इदानीं विकारा वक्तव्याः इत्यत आह। **ऊहगाने योनिवत्स्वरा** इति प्रकृत्युपादानं कृतम्। ऊहगीतौ स्वराः क्रुष्टादयः योनिवद्भवन्ति। स्तोभाश्च तत्समा भवन्ति। अभ्यासविरामाश्च तादृशा एव भवन्ति। विरामाः पर्वावसानानि। योन्युपादानं विकारार्थम् इत्युक्तम्। स्वरस्तोभाभ्यासविरामा इति वक्तव्ये विसमासः प्रकृतिपर्वनियमार्थम्। अन्यसंघतोद्देशेऽपि प्रकृतिवद्विरामः स्यादिति। यथा वार्त्रतुरे (ऊ. क्षु. ९१०) **तन्त्वादेशः। माꣳश्च त्व इन्दो सरसि। तन्त्वा गिरः** संघातः॥ १॥

दी. इदानीं विकारा उच्यन्ते **ऊहगान** इति। कोऽस्य संबन्धः? उच्यते। **ऊहगाने योनिवत् स्वराः** इत्येतत् पूर्वं वक्तव्यम्। प्रकृतिमापद्य विकारवचनं युक्तम्। तत्र च परिहार उक्तः। यथा अग्निष्टोमप्रकरणे प्रथमं गायत्रं साम भवति। तत्र

1. S[1]A[2] ०पद्यते for ०पद्य; M[1-2] ०वर्धनः for० वचनं; B[4]A[1] प्रयुक्तम् A[2] वृत्तम् for युक्तम्; V[2]P प्रतिहारः for परिहारः
2. A[2] तत्र स्यामहीयवेऽधिकारः for तत्रास्यानाधिकारः; K कृतः, भा. उक्तः for कुतः
3. My[1] द्रष्टव्यः for द्रष्टः
4. भा· after इति adds: उक्तम्; A[2] after तेन adds: योनिवत्; वि. स तेन प्रसङ्गेन सर्वे आइभावादयोऽनुक्रान्ताः for तेन प्रसङ्गेन सर्व एव...क्रान्ताः
5. M[1-2] om. आभावान्ताः; A[2]M[1-2] om. अतः
6. PV[2] after स्वराः add: भवन्ति; भा. अपादानं for उपादनं; भा· after ०गीतौ adds: योनिवत्; भा· om. योनिद्भवन्ति;
7. भा· तद्देशाः for तत्समाः; PV[2]B[4]A[1] वि· तद्देशीयाः for तादृशा एव; भा· विरामाश्च पर्वाणि प्रकृतिवद्भवन्ति for विरामाः पर्वावसानानि
8. भा· अपादनम् for उपादानम्
9. My[1] नियमार्थः for नियमार्थम्; KS[1-2]M[1-2]A[2] संघातादेः My[1] ०संघाताद्यैः for संघातोद्देशे;
10. भा. om. माँश्च...संघातः

अस्यानधिकारः । ऊहशास्त्रानुसारित्वात् । ततोऽनन्तरमामहीयवं भवति । तत्र च तालव्यस्य विकारो दृष्टः । उच्चाताऽ३इ इति । तेन प्रसङ्गेन तालव्यमाइ (पु. सू. ३. १.१) इत्युक्तम् । तेनैव प्रसङ्गेन सर्वे भावा अनुपरिक्रान्ताः । इदानीं विकारा वक्तव्या इत्यत आह । **ऊहगाने योनिवत्स्वरा** इति प्रकृत्यापादनं कृतम् । ऊहगाने ऊहगीतौ योनिवत् ग्रामेगेयवत् स्वराः क्रुष्टादयः । ऊह्यगाने अरण्येगेयवत् स्वरा क्रुष्टादयः भवन्ति । स्तोभा हाउ इत्यादयो योनिवद्भवन्ति । अभ्यासाः ण्यो । ण्यो ।
५र २ ४र ५
ण्यो इत्यादयो योनिवद्भवन्ति । विरामाः । उच्चाताऽ३इजातमन्धसाः (ऊ. ८ १) । इत्यादीनि अवसानानि योनिवद्भवन्ति ॥ १ ॥

अनभ्यासस्तु तच्छन्दसाम् ॥ २ ॥

वि.&भा. योनिवदभ्यासे प्राप्तेऽपवादः । योनौ यान्यभ्यासेनान्यच्छन्दः संपद्यन्ते गौरीवितादीनि तेषु यत्तच्छन्दोऽभ्यासेनापन्नं तद्यथा छन्द आपद्यते तदा योनिवदभ्यासो न भवति । गौरीवितौदलकौत्सत्रैककुभवैखानसादिषु । वैतहव्यौर्ध्वसद्मनाष्टादंष्ट्रणामयोनौ नाभ्यासः । वैतहव्ये उत्तरयोः । और्ध्वसद्मने सर्वत्रैव । अयोनौ आष्टादंष्ट्रे
१र २ २
आत्वाविशन्ति (ऊ. अ. ५३४) इति । एतेषु पर्वनियमादभ्यासः प्रकृतिपर्वनियमार्थम् । अप्रकृतादेरपि प्रकृतिः । आनुष्टुभी रात्रिरिति । षपडन्ते च दद्राणायां स्वासुवत् अक्षरपरिमाणनियमार्थे । षट्संप्तति[:] शतानि चत्वारि सहस्राणि पञ्च च ज्योतिष्टोमे अग्निष्टोमान्ते संपत् । तस्मात् अभ्यास एव योनावेव श्यैतनौधसापेक्षया ॥ २ ॥

---

11. भा. तानि यदा तच्छन्दः अनभ्यासेनापन्नं तस्मिन् पदाच्छन्दसि चोद्यन्ते । (P after चोद्यन्ते adds: अनभ्यासेनापन्नम्)तदा नाभ्यासः । for तेषु...न भवति
12. A^2M^{1-2} om. न; M^{1-2} आष्टादंष्ट्रोर्ध्वसद्मनानाम् for और्ध्वसद्मनाष्टादंष्ट्राणाम्
13. KA^2S^{1-2} My^1 योनौ for अयोनौ
14. PV^2 पूर्वनियमाद् for पर्वनियमाद् वि. om. प्रकृतिपर्व...प्रकृतिः; My^1 नियमार्थः for नियमार्थन्
15. My^1 om. अप्रकृतादेरपि प्रकृतिः A^2M^{1-2} अनुष्टुभि; for आनुष्टुभी; A^2 रात्रिषडन्ते, M^{1-2} रात्रीरति च षडन्ते for रात्रिरिति । वषडन्ते
16. S^2 नियमार्थः; A^2M^{1-2} नियमः वृद्धस्याइभाव विधानार्थे for नियमार्थे; $M^{1-2}A^2$ om. शतानि स्वाचरि
17. My^1 योनौ for योनावेव; A^2M^{1-2} सापेक्षसान्यायाभ्यासे यान्यन्यानि छन्दांसि सपद्यन्ते तेषु विषयेषु योनिवदभ्यासो नास्तिः for सापेक्षया

दी. छन्दसां योनिवदभ्यासे प्राप्ते **तच्छन्दसां** योनिच्छन्दसां **तु अनभ्यासः**। न अभ्यासो भवति। तच्छन्दसाम् **अनभ्यासस्तु** लात्यायनेनोक्तः। **योनौ यान्यभ्यासेनान्यच्छन्दः संपद्यन्ते। यथा गौरीविनौदले कौत्सं त्रैककुभवैखानसे तदापन्नेषु गौतमसादांगवावनभ्यासम्** (द्रा. श्रौ. २०. ४. २५)। अस्यार्थः। **योनौ** योनिसामनि पादानामभ्यासेनान्यच्छन्दः छन्दोऽन्तरं **संपद्यन्ते** प्राप्नुवन्ति। यथा **अभि। प्रगो**ऽ३। **पतिं** गिरा (ग्रा. ५. ६. १६८. ३) इति गौरीवितं **च सुरूपकृ**। त्नूमूऽ२तयाइ (ग्रा. ४. ५. १६०. ३) इत्यौदलं च गायत्र्यां गीयमानं पादाभ्यासेन अनुष्टुभं संपद्यते। यथा **याहीन्द्राऽ२३। चमसेषुवाईया** (ग्रा. ५. ५. १६२. १) इत्यैडकौत्सं गायत्र्यां गीयमानं पादाभ्यासेनानुष्टुभं संपद्यते। यथा **यएकइद्विदाया**ऽ३ताइ (ग्रा. १०. ४. ३८९. ३) इति **त्रैककुभम्** उष्णिहि गीयमानं पादाभ्यासेन बृहतीं संपद्यते। यथा **नकिष्टाऽ२इ्कर्मणानशात्** (ग्रा. ६. २. २४३. १) इति **वैखानसं** बृहत्यां गीयमानं पादाभ्यसेन जगतीं संपद्यते। **तदापन्नेषु** तेषां गौरीवितादीनां छन्दस्सु आपन्नेषु प्राप्तेषु सामसु न पादाभ्यासं मन्येते **गौतमसार्दागवौ**॥ २॥

विकारा हि प्रत्यक्षपरोक्षादयः॥ ३॥

वि. योनिवद्भाव उक्तः। अतः परमपवादः कृतः। अनेन प्रसङ्गेन विकाराः परामृश्यन्ते आइभावादयः। **योनौ** व्यपेतं यद्गीतं तद्विकारः। प्रत्यक्षं प्रकृतिः॥ ३॥

भा. योनिवद्भाव उक्तः। अनन्तरं चापवादः कृतः। **अनभ्यासस्तु तच्छन्दसाम्** (पु. सू. ८. ४. २) इति। तेन प्रसङ्गेन **इदमुच्यते। विकारा हि प्रत्यक्षपरोक्षादयः**। ते च आइभावादयः। योनिव्यपेतं यद्गानं स विकारः। प्रत्यक्षं प्रकृतिः॥ ३॥

---

2. EL[1]My[2-3] लोपाय नोक्तः, R लोघायनेनोक्तः for लात्यायनेनोक्तः

13. E भाद्दिवौ, L[1] सादगिवौ for सार्दागवौ

15. A[3] om. अतः परमपवादः कृतः

16. KS[3]M[1-3] यदगीत for यत् गीत; A[3] प्रत्यक्ष M[1-3] प्रत्यक्षः for प्रत्यक्ष

17. P om. योनिवद्भाव उक्तः...परोक्षादयः(L.19)

दी. प्रत्यक्षं प्रकृतिभावः । परोक्षादयः आइभावादयः । ईतिनिश्चये । एते सप्तदश विकारा ऊहगाने । क्वचिदवृद्धस्याप्याइभावः । क्वचिदन्यदेव । यथा ऐहोइमाऽ२-३स्या (ऊ. द. २२) इति दैवोदासे भवन्ति ॥ ३ ॥

।तेषामुक्तो नियमः ॥ ४ ॥

वि.&भा. तेषामाइभाषादीनां विकाराणामुक्तं लक्षणम् । लक्षणानियमः उच्यतेनुप कथमनियमः इति । उच्यते । क्वचित् प्रकृतिभावः । क्वचिदाइभावः । क्वचिदाभावषु क्वचिल्लोपः । एवंलक्षणोनियमः [उक्तः] । क्वचिदन्यदेव । यथा ऐहोइमा (ऊ. द. २२) इति; इहवद्दैवोदासे । क्वचिदवृद्धस्याप्याइभावः । यथा ईशानं कण्वतर इति । ते च किं-रूपा विकारा ये प्रक्रान्ता इति ।

आइत्वं प्रकृतिं चैव वृद्धं चावृद्धमेव च ।
गतागतं च स्तोभानामुच्चनीचं तथैव च ।
संधिवत्पदवद्गानमत्वमाभाविमेव च ।
प्रश्लेषांश्चाथ विश्लेषानूहे त्वेव निबोधत ।
संकृष्टं च विकृष्टं च व्यञ्जनं लुप्तमतिहृतम् ।
आभावांश्च विकारांश्च भवानूहेऽभिलक्षयेत् ॥

तेषां भावानां सप्तदश प्रसाधिताः । अतः परं विकारान् साधयिष्यामः ॥ ४ ॥

---

2. E वृद्धस्य for अवृद्धस्य

5. K [2]A[2]M[1-2] My[1] उक्तो लक्षणनियमः । कथमिति for उक्त लक्षणम् कथमनियम इति; V[2] उक्त-लक्षणो नियमः ।, L[2] लक्षणोऽनियमः for लक्षणानियमः

6. B[4] आभाव: for आभाव:; वि. om. क्वचिदाभावः;

7. वि. क्वचिदन्यदेवेत्येवंलक्षण नियमरूपविकारा येप्रक्रान्ताः for एवंलक्षणो°...प्रक्रान्ता इति

8. PB[4]V[2] adds: इति after दासे

13. P om. प्रश्लेषांश्च...निबोधत; A[2]M[1-2] प्रश्लेषं च स्वराणां तु विश्लेषं संधिनां तथा for प्रश्लेषांश्च...निबोधत

14. P. आहृतम् for अतिहृतम्; S[2] प्रकृष्ट for विकृष्ट

15. भा. A[2]M[1-2] भावा अष्टादश स्मृताः for भावानूहेऽभिलक्षयेत्; KS[2] आभावान् for भवान्

16. KS[2] My[1] आभावान्ताः सप्तदश प्रसाधिताः for भावानां....प्रसाधिताः

दी॰ तेषामाइभावादीनां विकाराणां **नियम उक्तः** । लक्षणमुक्तम् । क्वचित् प्रकृतिभावः । क्वचिदाइभावः । क्वचिदाभावः । क्वचिल्लोपः । क्वचिदवृद्धस्याप्याइभावः । क्वचित् अन्यदेव । यथा ऐहो[२१]इमा[२]ऽ२३स्या (ऊ. द. २२) इति दैवोदासे । एवंलक्षणो नियमः उक्तः ॥ ४ ॥

अतोऽन्ये नियमाश्रयाः पर्वाश्रयाश्च ॥ ५ ॥

वि.&भा.&दी. अतः एभ्यो विकारेभ्यो येऽन्ये विकारास्ते द्विविधा भवन्ति । नियमाश्रयाः पर्वाश्रयाश्च वक्ष्यमाणाः । तदेतत्प्रतिज्ञासूत्रमधिकारार्थमित्यर्थः ॥ ५ ॥

तेषां नियमाश्रयाणाम् ॥ ६ ॥

वि. नियमाश्रयाः पूर्वं वर्तिष्यन्ते । **तेषामाभावान्तानां नियमाश्रयाणां** पूर्वं लक्षणं वक्ष्यामः । नियमो नाम तुल्यलक्षणभेदः । तेभ्यो वैरूपमित्यर्थः । आइत्वादीनां भेददर्शनादित्युक्तम् ॥ ६ ॥

भा. पूर्वं लक्षणं वक्ष्यामः । नियमो नाम तुल्यलक्षणो भेदः । एकरूपमित्यर्थः । आयित्वादीनां भेददर्शनादित्युक्तम् ॥ ६ ॥

दी. ऊहगाने नियमाः उदूहादयः । यं विधिमाश्रित्य नियमाः क्रियन्ते ते नियमाश्रयाः । **तेषां** नियमाश्रयाणां विकाराणां विधानमुच्यते ॥ ६ ॥

यथैतच्चतुर्थमन्द्रातिस्वार्याणाम् स्वराणां द्व्यन्तरमुच्चमुच्चमुदूहः ॥ ७ ॥

---

6. वि. om. अतः

7. KA[2]S[2] before वक्ष्यमाणाः add: इति; M[1-2] after वक्ष्यमाणाः add: भवन्ति ते; T तेन तु नियमाश्रयः पूर्वं वर्तिष्यते for तदेतत्....इत्यर्थः; दी. om. वक्ष्यमाणाः....इत्यर्थः

9. T om. नियमाश्रयाः...नियमाश्रयाणां; A[2] om. पूर्वं लक्षणं

10. A[2]नियमानां for नियमो नाम; T om. तेभ्यः; M[1-2] om. तेभ्यो....इत्युक्तम्

12. P after वक्ष्यामः adds: इत्यर्थः; P पूर्व° for तुल्य°

16. M[1-2] om. यथैतत्....उदूहः

वि. चतुर्थमन्द्रातिस्वार्याणां स्वराणां द्व्यन्तरं यथा संहितोपनिषत्सु सिद्धम् उदूहमुच्चमुच्चीभवतीति । यथा चतुर्थोदात्ततमान् स्वरान् द्व्यन्तरानुदूहन्ति प्रागुपाया । चेत् समानपुरुषवचने ॥ तृतीयप्रभृतीनामुदात्ततमः कश्चित्स्वरो भवति तमुदूह इत्याचक्षते ॥ तथा च यज्ञे क्रियते ॥ अरण्येगेय चाधीमहे (सं. उ. ब्रा. ३. २–५) इति । चतुर्थो येषामुदात्ततमस्तेषां चतुर्थादीनां स्वराणां द्व्यन्तरं द्वे स्वरे अतिक्रम्य उदूहो भवति यथासंख्यम् । अतिस्वार्यस्य तृतीये मन्द्रस्य द्वितीये चतुर्थस्य प्रथमे इत्येवमुदूहो भवति यदेतदुक्तं तदुपद्रवात् प्राग्भवति । समानपुरुषवचने एकपुरुषवाच्ये प्रस्तावप्रभृतिभक्तौ तृतीयप्रभृतीनां स्वराणामुदात्ततमः कश्चित् स्वरो न भवति चेत् एवदुक्तं भवति । एकस्मिन् भक्तौ तृतीयद्वितीयप्रथमकुष्टा न भवन्ति चेत् तस्मिन्नेव भक्तौ उदूहं भवति । [एवं] संहितोपनिषत्सु उक्तस्यानुवादः । वाराहवात्सप्रमरायादिषूदाहरणम् । गौरीवितीभ्यासत्वाष्ट्रीसामत्रासदस्यवादिषु प्रत्युदाहरणम् । उदूहारम्भः कस्मादिति चेत् उच्यते । विभाग्यत्वात् एतेषां सस्तोभपदगीतिः कर्तव्या भवति । ते च समानपुरुषवचने तृतीयप्रभृतीनामन्यतमस्वरो भवति । तस्मादुदूहभावः । सत्यम् । अरण्येगेयसामान्याद्रथन्तरे उपद्रवविषये ओवाहाउवाशब्दयोरुदूहे प्राप्ते [तत्] न भवति । विभाग्यत्वात् । धर्मविधर्मणोस्तु आद्यस्तोभस्याभ्युदूहप्रवृत्तिरेव । पञ्चाक्षरशः स्तोभविभाग्ये धर्मविधर्मणीत्येतस्मिन् पक्षे । अन्यथाद्यस्तोभस्याभ्युदूहो न प्राप्नोति । अत एव वाराहादिष्वभ्युदूहः ॥ ७ ॥

---

1. M^{1-2} om. चतुर्थ...यथा; A^2 om. द्व्यन्तरं....स्वराणां (L.5)
2. M^{1-2} इति for स्वरान् ; M^{1-2} om. द्व्यन्तरान्...चाधीमहे इति (L.5)
7. KS^1 My^1 om. एतत् ; M^{1-2} यथा for यत्; A^2T यथेदम् for यदेतत्; A^2M^{1-2} om. तत्; T प्राक् for तत्; T प्रस्तावे प्रकृति for प्रस्तावप्रभृति
8. KM^{1-2} om. न; M^{1-2} before चेत् add इति; A^2 एतस्मिन् for एकस्मिन्
9. S^2K om. कुष्टाः; A^2T कृष्टः, M^{1-2} कृष्यः for कुष्टाः
10. $S^1M^{1-2}T$ om. वाराहवात्सप्र०, S^2K My^1 om. ०भ्यास त्वाष्ट्रीसामत्रासदस्यव०
11. $S^1M^{1-2}A^2T$ om. उदूहारम्भः....अभ्युदूहः (L. 16); KS^2 संस्तोभाः for संस्तोभ०
12. KS^2 My^1 अपि for तस्मात्

भा. यथैतच्चतुर्थमन्द्रातिस्वार्याणां स्वराणां चतुर्थस्य प्रथमो द्व्यन्तरः । मन्द्रस्य द्वितीयः । अतिस्वार्यस्य तृतीयः । इति । तदेतत्सांहितीषूपनिषत्सु उदात्ततमान् स्वरानुदूहन्ति । स्वसिद्धत्वात् । **चतुर्थोदात्ततमान् स्वारान् द्व्यन्तरानुदूहन्ति प्रागुपायान्न चेत् समनपुरुषवचने ॥ तृतीयप्रभृतीनामुदात्ततमः कश्चित् स्वरो भवति तमुदूह इत्याचक्षते ॥ तथा च यज्ञे क्रियते** (सं. उ. ब्रा. ३. २-४) इति । वाराहवात्सप्रमरायादिषु उदूहारम्भः । कस्मादिति । कथं चानारम्भ इति चेत् । उच्यते । विभाग्यत्वादेतेषां सस्तोभा पदगीतिः कर्तव्या भवति । ते च समानपुरुषवचने तृतीयप्रभृतीनाम् अन्यतमः स्वरो भवति । तस्मादुदूहाभावः । सत्यमुच्यते । अत्र अरण्येगेयसामान्याद्रथन्तरस्तोभाभावादुदूहप्रवृत्तिः । मराये च वाशब्दस्य कर्षणप्रवृत्तिरेव । धर्मविधर्मणोराद्यस्य स्तोभस्य अभ्युदूहप्रवृत्तिरेव । अन्यथा पञ्चाक्षरशः स्तोभविभाग्ये धर्मविधर्मणी इत्येतस्मिन् पक्षे आद्यस्य स्तोभस्य अभ्युदूहो न प्राप्नोति । अतः अभ्युदूहारम्भो वाराहादिषु ॥ ७ ॥

दी. यथा संहितोपनिषदि एतदूहविधानं वर्तते तथोहगाने **चतुर्थमन्द्रातिस्वार्याणां स्वराणां** द्व्यन्तरं द्वयोः स्वरयोरन्तरम् **उच्चमुच्चं स्वरम् उदूहो** भवति । चतुर्थस्य द्व्यन्तरं प्रथमं स्वरम् । मन्द्रस्य द्व्यन्तरं द्वितीयं स्वरम् । अतिस्वार्यस्य द्व्यन्तरं तृतीयं स्वरम् । तथा च श्रुतिः— **चतुर्थोदात्ततमान् स्वरान् द्व्यन्तरानुदूहन्ति । प्रागुपायान्न चेत् समानपुरुषवचने । तृतीयप्रभृतीनामुदात्ततमः कश्चित् स्वरो भवति । तमुदूह इत्याचक्षते । तथा च यज्ञे क्रियते ॥** (सं. उ. ब्रा. ३ २-४) इति । प्रागुपायात् उपद्रवोपायात् प्राक् प्रस्तावादिभक्तिषु गौरीवितादीनामुदूहो न भवति । भक्तौ उदूह-

2. V[1] om. उपनिषत्सु उदात्ततमान् स्वरानुदूहन्ति । स्वसिद्धत्वात्; P सुसिद्धत्वात् B[4] सिद्धत्वात् for स्वसिद्धत्वात्

5. P after आदिषु adds: तम्

6. A[1] नारम्भः for अनारम्भ; P om. चेत्; PB[4] सस्तोभाः पादाः प्रतिकर्तृ, L[1] सस्तोभाः पादा गीतिः कर्तव्या, A[1] सस्तोभपदा गीतिः कर्तव्या for सस्तोभा पदगीतिः कर्तव्या

7. B[4]P भवन्ति for भवति; B[4] before ते च add: गीतिः कर्तव्या भवति and P ते च पादा गीतिः कर्तव्या भवति

9. B प्रकर्षण for कर्षण; A[1] om. ०प्रवृत्ति····अभ्युदूहं

12. E ऊहगाने adds: भवन्ति

14. My[3] ०स्वार्यस्य for ०स्वारस्य

17. E उपद्रवतो for उपद्रवो०;

18. My[3] प्रस्तावादिर्भक्तिः for प्रस्तावादिभक्तिषु

त्वात् । धर्मविधर्मादीनां साम्नां समानपुरुषवचने समानभक्तौ । तेषु उदूहो भवति । अनेनोपद्रव-निधनयोस्तु उदूहो न भवति । यथा वाशादिषु । तृतीयद्वितीयप्रथमस्वरवतां साकमश्व-पौरुमीढा[दी]नां विभाग्ये उदूहो भवति । उदूहस्योदाहरणम् । प्रातू (ऊ. द. ४) इत्यौशने प्रा-मध्ये प्रथमस्वरो द्व्यन्तरः । तू मध्ये द्वितीयस्वरो द्व्यन्तरः । प्रेष्ठं वाः (ऊ. द. १७१) इत्यौशने प्रे-मध्ये प्रथमस्वरो द्व्यन्तरः । ष्ठं-मध्ये द्वितीयस्वरो द्व्यन्तरः । वा-मध्ये प्रथमस्वरो द्व्यन्तरः । एवमादीनि ॥ ७ ॥

दीर्घकर्षणस्य वृद्धिः ॥ ८ ॥

वि. योनिवद्भावस्य प्रतिषेधः । द्विमात्रिकस्य प्रथमद्वितीयस्य वृद्धिर्भवति । ऊहगाने सर्वत्र श्रायन्तीययज्ञायज्ञीयादिषु **दीर्घकर्षणेषु आत्तकर्षणादीनि** (cp.सं. ब्रा.२.१२) इति यत् तत् ॥ ८ ॥

भा. योनिवद्भावे प्राप्ते प्रतिषेधः । ऊहगीतौ तालव्यादेर्मे इत्यधिकृत्य चित्रश्राधो ज्येष्ठममर्त्यम् । शंमध्यममिति उदूहे तु श्रायन्तीययज्ञायज्ञीयनैपातिथसौमित्रादिषु । **दीर्घकर्षणेष्वात्तकर्षणानि** (cp.सं.उ.ब्रा.२.१२) इति च श्रुतेः ॥ ८ ॥

दी. योनिवद्भावे प्राप्ते प्रतिषेधः । ऊहगाने **दीर्घकर्षणस्य** दीर्घाक्षरेण कर्षणस्य वृद्धिर्भवति । ऊहे उदाहरणम्– **श्रायन्तइवसूऽ१रायाम्** (ऊ. द. १८९) इति श्रायन्तीये **प्रतिभागन्नदीऽ२धिमः** । अत्र दी-मध्ये वृद्धिः । **यदिन्द्रप्रागपागुदाऽ३गे** (ऊ. द. १५५) इति नैपातिथे **समाऽ२पु** । अत्र मामध्ये वृद्धिः । एवमादीनि ॥ ८ ॥

नन्दायाः **त्सिब्यकर्षणम्** ॥ ९ ॥

वि. **नन्दायाः** त्सिबास्वरे प्रत्यये कर्षणप्रतिवेधः । **नन्दाइ** । **वाऽ३अर** ।

8. A[2]S[1] after °गाने add: योनिवत् and T यानि
9. T समत्व for सर्वत्र; A[2]T °कर्षगादिषु for °कर्षणादीनि
14. E °क्षरे for °क्षरेण

घृतनिधनसांवर्तादिषु । **ग्रामेगयं च लाङ्गलानमेवैके** (सं. उ. ब्रा. ३.६) इति वचनात् । **हव्ये त्सिबायाम्** (पु. सू. ५. २. ३७) इति वृद्धिविधानात् अनन्दाया अपि कर्षणनिवृत्तिः । **श्यैते हुम्भाज्ञीयवत्** (पु. सू. ९. ८. २३) इति नियमात् स्तौभिकस्य सुतास्वरस्यापि निवृत्तिः । वृद्धत्वाच्च गत्यन्तम् । **तालमाइ** (पु. सु. ३. ११) इति वचनात् ॥ ९ ॥

मा. **नन्दायाः** त्सिबास्वरे प्रत्यये कर्षणप्रतिषेधः । घृतनिधनसांवर्तादिषु । **ग्रामेगेयं च लाङ्गलानामेवैके** (सं. उ. ब्रा. ३.६) इति वचनात् । वैतहव्यश्यैतोत्तरजनित्रादिषु नन्दासादृश्यात् प्रतिषेधः । वृद्धत्वाच्च गत्यन्तम् । **तालव्यमायि यद्वृद्धम्** (पु.सू.३.११) इति वचनात् ॥ ९ ॥

दी. **नन्दाइ** । इति नन्दापर्व । **त्साऽरइबाऽर३४औहोवा** इति त्सिबापर्व । नन्दायाः त्सिबास्वरे प्रत्यये न कर्षणं भवति । उदाहरणम्– **इद꣡ꣳह्यनूऽ३ओजसा** (ऊ. द. ७२) इति घृतश्चुन्निधने स्वगाइः । वाऽरनाऽर३४औहोवा । अत्र इ-मध्ये कर्षणं न भवति । **एन्द्रनोऽरगधिप्राया** (ऊ. द.१७२) इति सांवर्ते **श्वताः** । **पाऽरथूंऽर३४औहोवा** । अत्र ता-मध्ये कर्षणं न भवति ।। ९ ।।

गतेरेकारभावप्राप्ताया एकारनिवृत्तिः ॥ १० ॥

वि. **एकारभावप्राप्ताया गतेरेकारनिवृत्तिर्भवति** । **उतोपर्वान्त** एव भवतीस्थं कृष्टमित्यधिकारः । **अस्याइभावे गत्यन्तं तालव्यमाईति** एत्वमापद्यते । **गत्यन्तमित्येकारा** पत्तिः । तस्य निवृत्तिः **तैरश्च्यादिषु चेत्** । त्सिबाभावात् **कर्षणं भवति** । **एकारनिवृत्तिश्च** ॥ १० ॥

---

2. A[2]M[1-2]T नन्दायाः for अनन्दायाः
4. M[1-2]TS[1] वृद्धं चोच्च for वृद्धत्वाच्च
7. B[4]A[1] बृहद्रथा च V[2] वृद्धत्वं च for वृद्धत्वाच्च
15. K उत्त्न S[2] उतुः My[1] उच्च for उतो; M[1-2]A[2]TS[1] om. स्थं
16. A[2]M[1-2]TS[1] आभावे for अस्याइभावे; KS[2]My[1] तत एम् for एत्वम्
17. A[2] T om. तस्य निवृत्तिः

भा. **गतेरेकारभावप्राप्ताया** एकारस्य निवृत्तिः । उतोपर्वान्त एव भवतीत्थं कुष्टमित्यधिकारः इति आभावे गत्यन्तं तालव्यमाइ इति तत एत्वमेवमापद्यते । **गत्यन्तमिति** एकारापत्तिः । तस्य एकारस्य निवृत्तिः तैरश्चयज्ञायज्ञीयनिधनसौहविषगौपूक्तवैश्वमनसादिषु च । नन्दात्सिबाभावात् कर्षणं भवत्येव । एकारवृत्तिस्तु भवति ।। १० ॥

दी. **एत्यम्** । श आपद्यते गत्यन्तामित्यनेन गतेरेकारभावः । एकारभावं प्राप्ताया गतेरेकारस्य निवृत्तिः । उदाहरणम्– श्रुधीहाऽ३वान्तिरश्रियाः (ऊ. द. ६७) इति तैरश्च्ये **सपर्यताऽ२३४इ** । अत्र गतेरेकारस्य निवृत्तिः । अभिप्रवःसुरा (ऊ. द. ४३) इति श्यैते **हुम्माइ** । अत्र गतेरेकारस्य निवृत्तिः । एवमादीनि ॥ १० ॥

स्तोभानामुद्धारः ॥ ११ ॥

वि.&भा. सामान्त्यवर्जं ग्रामेगेयेषु अरण्येगेयेषु च वक्ष्यत्युपरिष्टात् । तथाप्युक्तम् । शेष उद्धारः ॥ ११ ॥

दी. **हाउहाउहाउ** । **आग्नीम्** (ऊ. क्षु. ९००) इति मराये साममध्ये हाउहाउ-**हाउस्तोभानामुद्धारः** । निष्काशनम् । **हयाइ** । **हयाऽ३** । **ओहाओहा** । **असाविशो** (ऊ. द.९८)इति महावैश्वामित्रे साममध्ये **हयाइ** । इत्यादिस्तोभानामुद्धारः । एवमादीनि ॥ ११ ॥

गणगीतीनामन्ते निधनम् ॥ १२ ॥

---

1. A[1] om. उतो ... एकारस्य निवृत्तिः (L. 3) ; B[4] यप्रान्त for पर्वान्त

2. B[4] एवं एवं, V एतं एवम् , L[2] एत्यं एम् for एत्वमेवम्

4. B[1]PV[2] भावोत्कर्षणम् for भावात् कर्षण

5. My[2-3] गत्यन्तामे० for गत्यन्तामि०

10. सामान्य for सामान्त्य; Pv[2] ताद्युक्ते for तथाप्युक्तम् ;

11. वि. उक्तशेषम् । for उक्तम् । शेषः

वि. येषां गानं गणशो भवति तेषां **गणगीतीनां** साम्नाम् **अन्ते निधनं** भवति । वारवन्तीयवामदेव्यश्रुध्यानाम् **एना**दितृचेषु । वारवन्तीयस्य यज्ञायज्ञीयादिषु । विशेषस्तूच्यते **प्रतिस्तोत्रीयमार्चिकानि निधनानि** (पु. सू. ८. ९. १) इति ॥ १२ ॥

भा. गणेन स्तोमेन येषां गानम् । यथा वारवन्तीयवामदेव्यश्रुध्यानाम् **एनादिषु** तृचेषु । वारवन्तीयस्य च **यज्ञा-ए**हियूषाहिषु । तच्च विशेषयिष्यति **प्रतिस्तोत्रीयमार्चिकानि निधनानि** (पु. सू. ८. ९. १) इति ॥ १२ ॥

दी. गणेन स्तोमेन गीतिः येषां साम्नां ते गणगीतयः । तेषां **गणगीतीनां** साम्नामन्ते सर्वेषामन्ते **निधनं** भवति । उदाहरणम्—**यज्ञायज्ञाऔहोहाइ** ॥ **एहियूषाऔहोहाइ** ॥ **तन्तेमदाऔहोहाइ** ॥ **श्रुधीहवाऔहोहाइ** (ऊ. ए. ५०६-९) ॥ इति चतुर्णाम् वारवन्तीयानामन्ते निधनम् । एवम् **एनावो आऔहोहाइ** ॥ **प्रत्युवदाऔहोहाइ** ॥ **इमाउवा औहोहाइ** ॥ इति त्रिषु तृचेषु वारवन्तीय- (ऊ.प्रा.८२७-८) वामदेव्य- (ऊ. प्रा.८२०-२) श्रुध्यानां (ऊ. प्रा. ८३३-५) त्रयाणम् अन्ते निमेनम् ॥ १२ ॥

एवमादयो नियमाश्रयाः ॥ १३ ॥

वि.&भा. शास्त्रान्तरसिद्धा अपि प्रत्येतव्याः । यथा बृहति रोहप्रत्यवरोहौ । यज्ञायज्ञीयबृहद्रथन्तराणां ककुबुत्तरयोर्द्व्यक्षरः प्रस्तावस्तृचेषु द्व्यक्षरसंसर्गः । प्रथमच्छन्दः क्रियाविवेकः । ऊनाक्षरोपधिरित्येषा जातिः । एवमादयो नियमाश्रयाः ॥ १३ ॥

दी. **नियमाश्रया** विकारा **एवमादय** इत्यादयो ज्ञातव्याः । आदिग्रहणात् शास्त्रान्तरसिद्धा अपि ज्ञातव्याः । यथा **औहोइत्वामिद्धिहवामहाऽ३ए** (र. द. ५) इति बृहति प्रथमायां त्रीन् रोहान् रोहति । **सातौवाजा** । एकः । **वृत्राइषुवाइ** । द्वितीयः । **सूऽरअर्वाऽ२३४** । तृतीयः । एवं मध्यमायां त्रीन् रोहान् रोहति । एवमेव तृतीयायां

1. M[1-2] ०गीतानां for ०गीतीनां

2. KS[2]My[1] ०श्रुध्यबृहद्रथन्तराणाम् for ०वामदेव्यश्रुध्यानाम्

4. P after ०श्रुध्यानां adds: प्रसिद्धस्वराणाम्

15. A[3] after उत्तरयोः adds: समनन्तरयोः; A[2] पृथक् for प्रथम

16. PV[2]A[2] ऊनाक्षरो for उच्चाक्षरो; भा. om. एवमादयो नियमाश्रयाः

त्रीन् रोहान् रोहति। उत्तमायां नाऽ२जिग्यूऽ२३४ इति प्रत्यवरोहः। अन्येऽपि शास्त्रान्तर-सिद्धा विकाराः। यज्ञायज्ञीयबृहद्रथन्तराणां ककुभावुत्तरे स्तोत्रीये भवतः। तयोर्द्व्यक्षरः प्रस्तावः अक्षरस्य संसर्गेण संयोगेन भवति। प्रथमायामुत्तममक्षरं द्वितीयायाः प्रथममक्षरं संसृज्य ताभ्यां प्रस्तावो भवति। द्वितीयायामुत्तममक्षरं तृतीयायाः प्रथममक्षरं संसृज्य ताभ्यां प्रस्तावो भवति। उदाहरणानि—अदाऽ५र्शि (ऊ. ए. ४०७) इति यज्ञायज्ञीये द्वितीयायां राया। अत्रोभयोर्ऋचोरक्षरसंयोगेन प्रस्तावः। तृतीयायां ताम्रा। अत्राप्येवमेव। औहोइमत्स्यपायितेमहाऽ३ए (र. सं. ३७) इति बृहति द्वितीयायाम् औहोइमआऽ३ए। अत्राप्येवमेवाक्षरसंयोगः। तृतीयायाम् औहोइयस्तूऽ३ए। अत्राप्येवमेव। कायानश्चित्र आभुवोवा (र. द. २९) इति रथन्तरे द्वितीयायां ताकोवा। अत्राप्येवमेवाक्षरसंयोगः। तृतीयायां स्वोवा। अत्राप्येवमेव ॥ १३ ॥

अथ पर्वाश्रयाः ॥ १४ ॥

वि. अथ अनन्तरं पर्वाश्रयान् व्याख्यास्यामः ॥ १४ ॥

भा. अधस्तात् प्रतिज्ञातं **नियमाश्रया** पर्वाश्रयाश्च (पु. सू. ८. ५. ५) इति। तत्र नियमाश्रया व्याख्याताः। **अथे**दानीं पर्वाश्रयान् व्याख्यास्यामः ॥ १४ ॥

दी. **अथ** अनन्तरं **पर्वाश्रयाः**। यं विधिमाश्रित्य पर्वाणि क्रियन्ते ते पर्वाश्रया विकारा उच्यन्ते ॥ १४ ॥

कृतस्वराणि पर्वाणि परिमिताक्षराणि छन्दसि ॥ १५ ॥

वि. **छन्दसि** वेदे **पर्वाणि कृतस्वराणि** नियतस्वराणि प्रसिद्धस्वराणि **परि-मिताक्षराणि** भवन्ति ॥ १५ ॥

---

6. L[1] om. ताम्रा...०संयोगः। तृतीयायां(L. 8)
18. A[2]M[1-2] om. नियतस्वराणि···परिमित; T om. नियतस्वराणि:

भा. **कृतस्वराणि ।** नियतस्वराणीत्यर्थः । प्रसिद्धस्वराणीत्येव । **परिमिताक्षराणि पर्वाणि ।** छन्द इत्युपपत्तिगानं लक्ष्यते । वेद इत्यर्थः ॥ १५ ॥

दी. पर्वस्वरूपमाह—**कृतस्वराणीति** । कृताः स्वराः क्रुष्टादयः । स्वराः अकारादयः ये वृद्धाः येषामक्षराणां तानि **कृतस्वराणि** नियतस्वराणि । परिमितानि परिगणितानि अक्षराणि पर्वाणि ज्ञातव्यानि । छन्दसि वेदे ॥ १५ ॥

तेषामूहे ज्यायसि छन्दसि यथान्यायमावापः ॥ १६ ॥

वि&भा. **तेषां** पर्वणामूहे [ज्यायसि] योन्यधिके **छन्दसि यथान्यायमावापः** न्याय्यः सूत्रे उक्तः। **प्रस्तावप्रतिहारनिधनानामक्षरपरिमाणं सर्वत्र यथायोनि चिकीर्षेद्वैच्छन्दसेषु** (द्रा.श्रौ२०.४.७) इति । परिशेषादुद्गीथ आवापो भवति । **शिशुं**(ऊ.ए.३८१) वामदेव्यवत् । मा । जन्तिशुम्भन्तिविप्रंमरुतोगणेनकविर्गीर्भिःकाव्येनाकविस्सन्त्सोमः । **पा** । औऽ३हो-हाइ । अथवा लक्षणन्यायादृचि पादगीतिरभ्यस्यते इत्यधिकृत्य ॥ १६ ॥

दी. ऊहे ऊहगाने ज्यायसि योनितोऽधिके **छन्दसि तेषां पर्वणां यथान्यायमावापः** प्रक्षेपः न्याय्यः सूत्रे उक्तः । **प्रस्तावप्रतिहारनिधनानामक्षरपरिमाणं सर्वत्र यथायोनि चिकीर्षेद्वैछन्दसेषु** (द्रा. श्रौ. २०. ४. ७) इति । परिशेषादुद्गीथे आवापः । उदाहरणम्—शाऽ५इशुम् (ऊ. ए. ३८१) इति वामदेव्ये । **मा** । **जन्तिशुम्भन्ति विप्रम्मरुतोगणेन कविर्गीर्भिः काव्येनाकविस्सन्त्सोमः** । **पा** । **औऽ३होहाइ** ॥ १६ ॥

कनीयस्यादितो लोपः पर्वणां संघातानां च ॥ १७ ॥

---

7. वि. यथान्यायमभ्यधिके छन्दस्यावापः for योन्यधिके छन्दसि यथान्यायमावापः

8. A[2]M[1-2]TS[1] om. न्याय्यः My[1] .om. सर्वत्र; भा. ins. उपद्रव after प्रतिहार; A[2]M[1-2]TS[1] ०हाराक्षरनियमः स्यात् (S[1] om. स्यात्) इति for ०हारनिधनानाम्···वैच्छन्दसेष्विति; वि. देव्यो-द्गीथे आवापलक्षणन्यायात् । for देव्यवत् ...अथवा लक्षणन्यायात् (L. 11)

9. L[1] आभावः for आवापः

वि.&भा. **कनीयसि** छन्दसि **पर्वणा**माद्यानामक्षराणां **लोपः संघातानां** चाद्यानां पर्वणां लोपः कर्तव्यः । यथा यज्ञायज्ञीये आद्ये द्वे पर्वणी ज्ञातः संघातः । ज्ञातश्च यत् प्रकृतं तृतीयोच्चात्संहन्यत इति परे च पर्वणि द्वितीयपूर्वा च दधिषातन्त्रणामित्यादौ संघातः । आदौ संघातपर्वणां लोपः । उत्तरयोर्दधिपेरदावतिष्ठते । आद्यं पर्व च । पर्वणां चाद्यानामक्षराणां लोपो भवति । यथा रथन्तरे प्रस्तावे न तावत् प्रस्तावः । तत्रोत्तरयोर्द्व्यक्षरेण प्रस्तौतीति वचनात् षण्णामाद्यानामक्षराणां लोपः । ईशोवा एतदन्तद्व्यक्षरमवशिष्यते । एषब्रह्मा (ऊ. प्रा. ८०७) कालेये **सुमन्मा**-(ऊ. ए. ५२८) वारवन्तीयादिषु च ॥ १७ ॥

दी. **कनीयसि** योनिच्छन्दसो न्यूने छन्दसि पर्वणामादितः आद्यक्षराणां लोपः । संघातानां च आदितः आद्यपर्वणां लोपः । उदाहरणानि– एषब्रह्मा-कालेये । एषाऽ३-

---

1. भा· योनौ छन्दस ऊने छन्दसि for कनीयसि छन्दसि ; भा. after अक्षराणां add: च; $PB^{4}V^{2}L^{2}$ before संघातानां add: कर्तव्यः;
2. भा· om· यथा; A^{2} ज्ञाता: संघातः,, M^{1-2} ज्ञातसंघातः, T. ज्ञानिनसंधाताः, $V^{2}P$ ज्ञाव संधातः, B^{4} यज्ञायसंघातः, L^{2} यज्ञावसंधातः for ज्ञातः संघातः; A^{2} ज्यायसि चाश्रियः प्रकृतः, M^{1-2} जायचाणी प्रभृतयः कृतः· T जायचश्रिप्रभृत, S^{1} जायासि प्रकृतिः for ज्ञातश्च यत् प्रकृतम्; P क्षातश्च for ज्ञातश्च
3. भा· उच्चा for उच्चात्; $A^{2}M^{1-2}TS^{1}$ तृतीयत्वं for तृतीयोच्चात्; भा. $A^{2}M^{1-2}T$ om. आदौ संघातः
4. $A^{2}M^{1-2}TS^{1}$ उत्तरे for उत्तरयोः; भा. संहतपर्वणां; for संघातपर्वणां; $A^{2}S^{1}M^{1-2}T$ °पर्वणः for °पर्वणां; S^{1} नन्दाव, KS^{2} रदेव, My^{1} रेव PV^{2} धारादेवाव, A^{2} नदोतावदि, $M^{1-2}T$ ददावादि for रदाव; $KS^{2}My^{1}$ प्रायां, A प्राया, S^{1} प्राय, M^{1-2} प्रयां, T प्रधा भा. आधां for आद्यं; भा· after पर्व om: च; M^{1-2} om. पर्व च; $KS^{1-2}My^{1}$ before पर्व add: कृत; $M^{1-2}T$ पर्वाणां for पर्वणां; भा. om· पर्वणां च; $KS^{1-2}My^{1}$ आदौ for आद्यानम्; A^{2} चातमक्षराणां, T चातामक्षराणां for चाद्यनामक्षराणां
5. $A^{2}M^{1-2}TS^{1}$ om· न; $A^{2}TS^{1}$ तावान् for तावत्; $A^{2}M^{1-2}TS^{1}$ ककुबुत्तरयोः for तत्रोत्तरयोः
6. भा. om· षण्णां; V^{2} after लोपः । adds: एषा३ब्रह्मा इति प्राप्ते आद्यास्याक्षरस्य लोपः; M^{1-2} om. एतदन्तः...°वन्तीयादिषु च। शुमेदायास्तु...वारे $KA^{2}M^{1-2}TMy^{1}$ om· अन्तः; PV^{2} अन्त for अन्तः
7. $B^{4}P$ after वारवन्तीयादिषु च । add: आद्यानामक्षराणां लोपः । ए२षा३३ ब्रा३ह्मा३ इवि प्राप्ते आद्यमक्षरस्य पर्वलोपः । तथा वारवन्तीये अश्विन इत्येषां पर्वलोपः । उच्चारः । सुमन्नावारवन्ती आद्याक्षरलोपः ।

ब्रह्मा (ऊ.प्रा.८०७) अत्रचतुरक्षरलोपः । याऽ२३ः । अत्र सप्ताक्षरलोपः । आऽ३ । अत्र त्र्यक्षरलोपः ॥ [सुमन्मा-(ऊ.ए.४२८) वारवन्तीये] माऽ२३४ । अत्र द्व्यक्षरलोपः । वाऽ२३४हाइ । अत्र द्व्यक्षरलोपःस्वाइराऽ३४ । औहोवा । अत्र द्व्यक्षरलोपः । इहाऽ२३-४हाइ । उहुवाऽ२३४न्ती । सूनाऽ३४ । औहोवा । अत्र पञ्चाक्षरलोपः ॥ एवमादीनि ॥

शुर्मदायास्तु त्र्यक्षराया उपाद्यलोपो वारे ॥ १८ ॥

वि. वारवन्तीये त्र्यक्षरायाः शुर्मदाया उपादेः आदेः परस्याभिगीतिनो लोपः । एना-(ऊ. प्रा. ८२७) यज्ञा-(ऊ. ए. ५०६)न्त्ययोर्वारवन्तीये कनीयस्यादितः (पु. सू. ८ ५. १७) इति आद्यक्षरे प्राप्ते असाव्यंशु (ग्रा. १३. १. ४७३. ३.) तृतीयायां शूर्मदाया । ओऽ२३४ वा इति शुर्मदा ॥ १८ ॥

भा. आदिलोपे प्राप्ते उपाद्यस्य अर्थात् द्वितीयस्य लोपः । एना-(ऊ. प्रा. ८२७) यज्ञा-(ऊ. ए. ५०६)न्त्ययोर्वारवन्तीये देवश्शाधो-उतत्रातेति च । असाव्यंशु-(ग्रा. १३. १. ४७३. ३) तृतीये शुर्मदा ॥ १८ ॥

दी. असाव्यंशु-तृतीये (ग्र. १३.१.४७३.३)शूर्मदाया इति शुर्मदापर्व । ए-नावोआऔहोहाइ (ऊ. प्रा. ८२७) इति वारवन्तीये तृतीयायां धोजनाऽ३४ । औहोवा । अत्र शुर्मदायास्तु त्र्यक्षराया उपाद्यस्याक्षरस्य लोपः । आद्यस्याक्षरस्य उप समीपे अक्षरमुपाद्यम् । द्वितीयमित्यर्थः । एवमादीनी ॥ १८ ॥

लेयप्रस्तावसदृशेष्वविकारः ॥ १९ ॥

---

7. A[1]M[2-2]S[1] om. एनायज्ञान्त्ययोर्वारवन्तीये. ; A[1]T कनीयस्यादिति, M[1-3] तृतीयस्यादिति for कनीयस्यादित इति

10. PV[1] आदिलोपः for आलिलोपे; PV[3]y[2]A[1] after लोपः । add: आदिकनीयस्थस्य (A[2]कनीयस्य) सगीत (B[4] अभिगीत) लोपः ।

15. L[1]My[2-3] om. औहोवा

16. RMy[3] om. द्वितीयमित्यर्थः

वि.&भा. कालेयप्रस्तावसदृशेषु सामसु विकारो न भवति । सिद्धोपन्यासो विशेषविवक्षया ॥ १९ ॥

दी. तरोभाऽ२३इर्वोविदद्वसूम् (ग्रा.२३७.४) इति कालेयस्य प्रस्तावसदृशेषु सामसु न प्रस्तावे विकारः । सिद्धोपन्यासो विशेषविवक्षया ॥ १९ ॥

गायन्त्याद्यायामाष्कारणिधनवत् ॥ २० ॥

वि.&भा. गायन्त्याद्यायां कालेये (ऊ. प्रा. ८२४) आष्कारणिधनवत् प्रस्ताव-स्वरो भवति । चतुर्थस्वरे अक्षरद्वयं भवतीत्यर्थः ॥ २० ॥

दी. गायन्ता३इत्वागायत्रिणो (ऊ प्रा. ८२४) इति कालेये प्रथमायां वयंघाऽ३त्वासुतावन्ताः (ग्रा. गे. ७. ३. २६१. १) इति आष्कारणिधनवत् प्रस्तावे स्वरो भवति ॥ २० ॥

इन्द्रायाह्युत्तरयोर्वयमुत्वावत् ॥ २१ ॥

वि.&भा. इन्द्रायाह्युत्तरयोः कालेये (ऊ.प्रा. ८२३) वयमुत्वावत्(ग्रा. १५७. २) प्रस्तावो भवति । काण्ववदित्यर्थः ॥ २१ ॥

दी. इन्द्रायाऽ३हिधियेषिताः (ऊ. प्रा. ८२३) इति कालेयस्योत्तरयोः स्तोत्रीययोः इन्द्रायाऽ३हिचित्रभानाउ ॥ इन्द्रायाऽ३हितूतुजानाः ॥ अत्र वयमुत्वावत्। वयमूऽ३-त्वातदिदर्थाः (ग्रा. १५७. २) इति काण्ववत् प्रस्तावस्वरो भवति ॥ २१ ॥

काक्षीवत उच्चावत् ॥ २२ ॥

---

1. M[1-3] काल्येये for कालेय०; A[2] प्रस्तावे for प्रस्ताव०; भा. अविकारः for विकारो न भवति

6. A[2]T om. गायान्त्याद्यायां...०णिधनवत्

7. भा. आष्कारणिधनवत् for अक्षरद्वयं भवति ; My[1]KS[1-3]A[2]T om. इत्यर्थः M[1-3] om. अर्थः

12. A[2]M[1-2]TS[1] प्रस्तावः काण्वे वयमुत्वादिवत्, KS[3]My[1] प्रस्तावः काण्ववत् for वयुमुत्वावत्...इत्यर्थः ॥

वि. काक्षीवते आमहीयववत् प्रस्तावस्वर इति ॥ २२ ॥

भा. काक्षीवते उच्चावत् (ग्रा. ४६७. १३) प्रस्तावस्वरो भवति । आमहीयववदित्यर्थः । यस्तेमदः-(ऊ. ए. ४८३) पवस्वादिषु (ऊ. द. १५९) ॥ २२ ॥

दी. पवस्वाऽ३देव आयुषाक् (ऊ. द. १५९) इति काक्षीवते उच्चावत् । उच्चाताऽ३इजातमन्धसाः (ग्रा. ४६७. १३) इत्यामहीयववत् प्रस्तावे स्वरो भवति । एवं यस्ते मदादिषु (ऊ. ए. ४८३) काक्षीवते ॥ २२ ॥

देव्य आकाराकारयकाराभ्यास एनातंवोऽग्निमिति ॥ २३ ॥

वि. वामदेव्ये (ऊ. प्रा. ८३०) एनान्त्यायां देवंराधोजनानामिति आकारस्य अभ्यासो भवति । तंवोवाजानाम् (ऊ. अ. ५९८)इत्यत्र देव्ये यज्ञेभिर्वावृधेन्यमित्यत्राकाराभ्यासो भवति । तमग्निमस्तायां (ऊ. द. २३२) योदमआसनित्य इति यकाराभ्यासो भवति । ओवाकारयोरेकीभावलोपे (पु. सू. ७. १०. २७) प्राप्ते नान्यन्त्य इत्येतेषामाकाराकारयकारा भवन्ति । अभ्यासात् स्वरसंप्राप्तिः । [तंवोवाजायां (ऊ. अ. ५९८) वृधौहोऽ३ । हुम्माऽ२ । न्योऽ२३५ हाइ इति प्राप्ते अनेनाकाराभ्यासः । न्याऽ२मोऽ३५हाइ । एवमितरावपि ॥ २३ ॥

भा. वामदेव्ये (ऊ. प्रा. ८३०) एनादिषु स्वरसंप्राप्त अभ्यास उच्यते । जनौहो३ । हुम्मा२ । नामोहाइ इति प्राप्नोति । औवौकारयोरेकीभावे लोपः (प्र. सू. ७. १०. २६) इति । यथा विश्वा२३स्यद् । तमौहो३ । हुम्मा३ । माऽ२तों३हा३३ इति मकारलोपः । एवं परयोरपि द्रष्टव्यम् । अत्र आकाराभ्यासः । अभ्यासे सति जनानामेतद्रूपं भवति ।

---

1. M[1]-[3]TA[3]S[1] after इति ॥ add: सेधे प्रत्नंपीयूषायां श्यैतवत् ॥ प्रत्नंपीयूषायायाम् उत्सेधे श्यैतवत् प्रस्तावः मध्यमस्य पर्वणो लोपः इत्यर्थः ॥

3. V[2] om. यस्तेमदः—पवस्वादिषु

12. KS[2]MY[1] after ०यकाराः add: एव and A[3]T द्वे

15. B[1]स्वरासंप्राप्तः, V[2] स्वराप्राप्तः, A[1] स्वरसंघातप्राप्तः, L[3] स्वरामप्राप्तः, for स्वरसंप्राप्तः

तत ओत्वम् । एदु- (ऊ. अ. ५९८) तृतीयायाम् आकाराभ्यासः वावृधेन्यमिति पूर्ववत् । अग्निंनर- (ऊ. द. २२२) द्वितीयायां दक्षाय्यो यो दम आस नित्य इत्यत्र यकाराभ्यासः सनित्यय इति ॥ २३ ॥

दी. आऽ५इना । वो आऽ३ग्नाऽ३इन्नमसा (ऊ. प्रा. ८३०) इति वामदेव्ये तृतीयायां नाऽ२मोऽ३५ । अत्र नांशब्दे आकाराभ्यासः । नाम् । ओ । एवम् । एऽ४दु । मघोऽ३र्म्माऽ३दिन्तराम् (ऊ. अ. ५९८) इति वामदेव्ये तृतीयायां ताऽ५ म्वः । इत्यस्यां न्याऽ२मोऽ३५ । अत्र न्यंशब्दे आकाराभ्यासः । न्यम् । आ । एवम् । आऽ५ग्निम् । नरोऽ३दाऽ३इधीतिभाइः (ऊ. द. २२२) इति वामदेव्ये द्वितीयायां त्याऽ२योऽ३५हाइ । अत्र त्यशब्दे यकाराभ्यासः । त्यः । य एवम् । वृधेन्यञ्जनानां सनित्य इत्येभ्यः परोऽ२-भ्यासश्च देव्ये (पु. सू. १०. २. १६) इत्यनेनाकाराकारयकाराणामभ्यासानामो भवति ॥

निधने च नित्यमोत्वम् ॥ २४ ॥

वि.&भा. सिद्धग्रहणं वैकृतत्वाल्लक्षणान्तरपरामर्शार्थम् । मेघोषेदुह्यक्ष इति । वामदेव्ये निधने प्रत्यये नित्यमोत्वं भवति ॥ २४ ॥

दी. वकारात् हाइ-निधने प्रत्यये पूर्वस्य नित्यमोत्वम् ओकारो भवति । काऽ५या (ऊ. द. ५) इत्यादिवामदेव्ये वाऽ२र्त्तोऽ५हाइ । अत्र हाइ-निधने प्रत्यये तकारस्य औभावः ॥ २४ ॥

गौषूक्ते तूच्चातायामूने षाशब्दाभ्यासात् संप्राप्तिः ॥ २५ ॥

---

1. P उत्वम् for ओत्वम्; V^2 om. तत ओत्वम्; P तदु for एदु

12. A^2M^1-$^2TS^1$ om. मेघोषेदुह्यक्ष इति; भा. om. वामदेव्ये...भवति; भा. मेघोषेउह्य for मेघोषेदुह्यक्ष

13. A^2M^1-$^3S^1T$ तत्र for प्रत्यये नित्यमोत्वम्

17. A^2T उच्चान्त्यायां for उच्चातायां; A^3M^1-^3T स्वरसंप्राप्तिः for संप्राप्तिः

वि.&भा. उच्चान्त्यायां **गौषूक्ते** (ऊ. ए. ४५६) **ऊने द्युम्नानि मानुषाणामिति षाशब्दभ्यासात्** स्वरसंप्राप्तिः । संप्राप्तिवचनादन्यत्राप्यूने पादे पादपूरणार्थमभ्यासः स्यात् । यथा अग्नेस्त्रिणिधने **अक्षारिति** ॥ २५ ॥

दी. **उच्चातेजातमौ । हौहोवाहाइ । धसाः** (ऊ. ए. ४५६) इति **गौषूक्ते तु** तृतीयायाम् ऊने पादे **द्युम्नानिमनुषौऽ२ । हुवाइ । हुवाऽ२इ । षाणाऽ२म् ।** अत्र षाशब्दस्याभ्यासात् षाशब्दस्य **संप्राप्तिः** । संप्राप्तिरिति वचनात् अन्यत्राप्यूने पादे पूराणार्थमुपान्त्यस्याभ्यासः स्यात् । उदाहरणम्– **सोमउष्वा । णःसो** (ऊ. द. ८८) इत्यग्नेस्त्रिणिधने द्वितीयायां **सोमोदूऽ२३४ग्धा । भिराऽ३१उवाऽ२३ । आ२३४क्षाः ।** अत्रोने पादे उपान्त्यस्याभ्यासः ॥ २५ ॥

क्रौञ्चे च हिशब्दाभ्यासात् ॥ २६ ॥

वि. एन्द्रयाहि (ऊ. क्षु. ८९१) **क्रौञ्चे हिशब्दाभ्यासात्** स्वरसंप्राप्तिः ॥ २६ ॥

भा. **क्रौञ्चे एन्द्र याहि हरिभिरिति** हिशब्दाभ्यासात् स्वरसंप्राप्तिः ॥ २६ ॥

दी. **एन्द्रयाहौहो । हीहरिभाइः** (ऊ. क्षु. ९९१) इति **क्रौञ्चाद्ये** । अत्र **हिशब्दाभ्यासात्** हीशब्दस्य संप्राप्तिः ॥ २६ ॥

वर्ते चेकाराभ्यासात् ॥ २७ ॥

वि. त्वमिन्द्रयशान्त्यायां **वर्ते** (ऊ. सं. २८०) **महीव कृत्तिः शरणात** इति **इकाराभ्यासात् स्वरसंप्राप्तिः** ॥ २७ ॥

---

1. भा. om. उच्चान्त्यायां; T om. गौषूक्ते;
2. A[2]M[1-2]TS[1] om. षाशाब्दाभ्यासात् स्वरसंप्राप्तिः; भा. after वचनात् add: च; KM[1-2]S[1-2]-My[1] om. स्यात्
3. A[2] अक्षरातीति for अक्षारिति
10. A[2]M[1-2]T om. च; T शब्दोऽ for शब्दा०

भा. अभीवर्ते च त्वमिन्द्रयशाअसी-(ऊ. सं. २८०)ति अन्त्यायामिकाराभ्यासात् स्वरसंप्राप्तिः । शरणात इन्द्रेति ॥ २७ ॥

दी. तुवाऽ३माऽ३इन्द्रयशाअसोवा (ऊ. सं. २८०) इत्यभीवर्ते तृतीयायां त-आआऽ१इन्द्राऽ२ । अत्र इकारस्याभ्यासात् इकारस्य संप्राप्तिः ॥ २७ ॥

साहीयगूर्दपुत्रेषु च ॥ २८ ॥

वि. सत्रासहीय-(ऊ. ए. ४८९) गूर्द-(ऊ. द. ११९) उद्वंशपुत्रेषु (ऊ.द.१२०) च इकाराभ्यासात् स्वरसंप्राप्तिः । अच्छा नक्षि द्युमत्तमो रयिं दा (सा. ११०८) आ स्तोभति श्रुतो युवा स इन्द्रः (सा. १११४) इति ॥ २८ ॥

भा. एतेषु सामसु अधिकारात् इकाराभ्यासात् स्वरसंप्राप्तिः । साहीये (ऊ. ए. ४८९) अग्ने त्वं नोअन्तम-द्वितीयायां द्युमत्तरो रयिं दा इति । गूर्दे (ऊ.द.११९)ऽप्येतदेव उदाहरणम् । उद्वंशपुत्रे (ऊ. द. १२०) आ स्तोभति श्रुतो युवा स इति ॥ २८ ॥

दी. अग्नाऽ३४इ । त्वंनोअन्तमः । ओऽ३वा (ऊ. ए. ४८९) इति सत्रासहीये द्वितीयायां रयौऽ३हो । वाहाऽ३४३इ । आऽ२३४इ । [अत्र] रयिम् इतीकारस्याभ्यासात् इकारस्य संप्राप्तिः । ओग्नाइ । त्वन्नोऽ२३आ (ऊ. द. ११९) इति गूर्दे द्वितीयायां रयो वा । आऽ५इ । अत्र रयिम् इति इकारस्याभ्यासः । प्रवाः । आइन्द्रायवृत्र हन्तमाऽ२३या (ऊ. द. १२०) इत्युद्वंशपुत्रे द्वितीयायां सआऽ२३उवाऽ२३ । उप् । आऽ२-इ । अत्र सइम् इति इकारस्याभ्यासः ॥ २८ ॥

अतः परं पर्वविकारान् वक्ष्यामः ॥ २९ ॥

वि. भा.&दी. अथ पर्वोश्रया (पु. सू. ८. ५. १४) इति पर्वाधिकारात् पुनः पर्वग्रहणं किमर्थम् । उच्यते । पूर्वत्र पर्वैकदेशस्य अधिकारः । इह तु कृत्स्नस्य

---

6. $A^2M^{1-2}TS^1$ om. सत्रा

19. वि. before अथ adds: अतः; परं पर्वणां विकारान् वक्ष्यामः; PV^2B^4 after किमर्थम् add: इत्यर्थः $A^2M^{1-2}T$ अथवा, S^1 अथ च for अथ

20. वि. पर्वाधिकारे; for पर्वाधिकारात्

पर्वणो विकारो वक्ष्यत इति कृत्स्नपर्वविकारार्थं पुनर्ग्रहणम् । अतोऽनन्तरं कृत्स्नस्य पर्वणो विकारान् वक्ष्यामः कथयिष्यामः ॥ २९ ॥

यदधिकृतं स्वरतः पर्व तद्यथायोनि ॥ ३० ॥

वि.&भा. उहगीतौ यदधिकृतं पर्व तद्योनिवत् स्वरतो भवति । तस्य योनिवद्गानमेव लक्षणम् । तत्तथैव भवतीत्यर्थः । यथायोनीति सिद्धग्रहणं कचिदुत्पत्तिपर्वोपसंग्रहणार्थम् । यथा आदितो लोप इति नैतत् पर्व योनिवद्भवति सर्वत्रेति ज्ञापनार्थम् । यथा स्वास्वामहीयवोत्तमायां तृतीयं पर्व नुषाणाम् । तत्र पूर्वोक्तेन न्यायेन आदितो लोपे कृते नूऽ२३षाणाम् इति प्राप्नोति । अत्र तु तृतीयस्याक्षरस्य लोपं कृत्वा आदिर्योनिवत् कृतः । तथा दैवातिथे (ऊ. द. २८) साखायस्तोम इति प्रथमायां प्रथमस्याक्षरस्य वृद्धिः कृता । उत्तरयोस्तु प्रथमोच्चस्याभ्यासः एव कृतः । ऋक्स्वरवदिति ॥ ३० ॥

दी. ऊहगाने यदधिकृतं पर्व तत् यथायोनि योनिवत् स्वरतो भवति । तस्य योनिवत् गानमेव लक्षणम् । तत्तथैव भवतीत्यर्थः । ऊहगाने सर्वाणि पर्वाण्युदाहरणानि ॥

---

1. भा. पर्वविकारः for पर्वणो विकारः वि. om. वक्ष्यते; दी. after इति adds: हेतोः; वि.&भा. om. अतः....कथयिष्यामः
3. $S^{2-1}M^{1-2}A^{2}T$ यदविकृतं for यदधिकृतं
4. $S^{1-2}M^{1-2}A^{2}T$ विकाररहितं for अधिकृतं; $A^{2}M^{1-2}TS^{1}$ after तत् add: पर्व; $S^{1}A^{2}M^{1-2}A^{2}T$ om. स्वरतः वि. योनिगानमेव for योनिवद्गानमेव; S^{1} om. तस्य योनिवत्...नैतत् (L.6) भा. एवं for एव; वि. om तत्तथैव भवतीत्यर्थः; वि. ऊन for उत्पत्ति; भा. संग्रहार्थम् for संग्रहणार्थम्
6. भा. om. पर्व योनिवद्भवति
7: $S^{1}A^{2}M^{1-2}T$ om. स्वासु
8. A^{2} भा. तृतीया for तृतीयस्या
9. KS^{1-2} यथा for तथा; भा. प्रथमोच्च for प्रथमायाम्; B^{4} after कृता adds: स ; ३खायस्तोम । अत्र साशब्दः प्रथमाक्षरः । तस्य वृद्धिः ।
10. A^{2} प्रथमोच्चान्त्यः, T प्रथमोच्चान्त्यम् S^{1} प्रथमोच्चान्त्या for प्रथमोच्चस्य; B^{4} उत्तरयोस्तु प्रथमोच्चान्त्यात् । आ३ओ२३हो३आशब्दः प्रथमोच्चः [त] स्यभ्यासः for उत्तरयोस्तु प्रथमोच्चस्याभ्यासः; $KS^{1}A^{2}M^{1-2}S^{2}$ कृता for कृतः; $A^{2}M^{1-2}S^{2}$ योनि for ऋक्; T योनिवत् for ऋक्स्वरवात्
12. E om. ऊहगाने...उदाहरणानि

स्वरविकाराद्यदन्यत् पर्वापद्यते तत्तेनैवोपदेक्ष्यामः ॥ ३१ ॥

वि. अतः परं पर्वविकारान् (पु. सू. ८. ५. २९) इत्यत्र पर्वग्रहणं कृत्स्नपर्वविकारार्थमित्युक्तम् । स्वरविकाराद्यदन्यत् पर्व अन्यस्य साम्नः पर्वापद्यते तत् पर्व तेनैवान्यस्य पर्वणा उपदेक्ष्यामः ॥ ३१ ॥

भा. उक्तम् अतः परं पर्वविकारान् इति । तत्र पर्वग्रहणं कृत्स्नपर्वविकारार्थमित्युक्तम् । तत्र स्वरविकाराद्यदन्यत्पर्व । आदेशादित्यर्थः । तत्र यद्वैकारिकं पर्वोपदेक्ष्यते उच्चरन्न तेनैव वैकारिकपर्वणा उच्चारयिष्यामः ॥ ३१ ॥

दी. पर्वविकारान् वक्ष्याम इत्युक्तम् । तत्र पर्वविकारेषु स्वराणां विकारात् यत् पर्वान्यदापद्यते वैकारिकं पर्व प्राप्नोति तत् पर्व तेनैव वैकारिकपर्वणा उपदेक्ष्यामः । कथयिष्यामः ॥ ३१ ॥

आमहीयवमध्यमायामुग्रं
शर्मा ररिमातां स्वासु ॥ ३२ ॥

वि.&भ. स्वास्वामहीयवमध्यमायामुग्रं शर्मा ररिमातास्वरमापद्यते । गारे (ग्रा. गे. १२४) आनाभाऽ२३यीन् । ररिमाता इति ररिमाता ॥ ३२ ॥

दी. उच्चाताऽ३इजातमन्धसाः (ऊ. द- १.) इति स्वासु आमहीयवे मध्यमायाम् उग्रश्शर्मा ररिमातामापद्यते । वरिवोवाइत् इति ररिमातास्वरवत् पर्व

3. M^{1-2} अन्यस्य पर्वणां तेनैव, T अन्यस्य पर्व एतेनैव; S^1 अन्यस्य पर्वणः तेनैव for तेनैव अन्यस्य पर्वणा

4. T वक्ष्यामः for उपदेक्ष्यामः

5. B^4 °विवेकार्थम् for °विकारार्थम्

13. $A^2M^{1-2}T$ om. ररिमातास्वरमापद्यते; भा. गारे for स्वरमापद्यते

14. om. आनाभा... ररिमाता

भवति । इदंवसोसुतमन्धाऽ३ए (ग्रा. १२४.३) इति गारे ररिमाता पर्व भवति । उच्चा-महीयवे तृतीयायां नुषाऽ२३णाम् । अत्रोपान्त्यस्य लोपः ॥ ३२ ॥

स्वासु कमश्वोत्तरयोरेभिर्वर्धा प्रवइन्द्राम् ॥ ३३ ॥

वि. स्वासु साकमश्वोत्तरयोरेभिर्वर्द्धा प्रवइन्द्रामापद्यते द्वितीये शाक्त्ये (ग्रा. ४. ५. १५६.२) प्र व इन्द्राय मादनमिति ॥ ३३ ॥

भा. स्वासु स्वारसाकमश्वे उत्तरयोरेभिर्वर्धा प्रवइन्द्रामापद्यते । प्र व इन्द्राय माद-नम् (३. द. ४. ५. १५६. २) इति द्वितीये साम्नि ॥ ३३ ॥

दी. एह्यूषूऽ३ब्रवाणाऽ६इताइ (ऊ. द. १५.) इति स्वासु साकमश्वे एभाऽ२इ-र्वर्धा इति पर्व प्रवइन्द्रामापद्यते । द्वितीयायाम् तत्राऽ२योनाइम् इति पर्व । प्रवाऽ२इ-न्द्रा (ग्रा. ४. ५. १५६. २.) इति स्वरवत् भवति । तृतीयायाम् एभाऽ२इर्वर्धा इति पर्व प्रवइन्द्रामापद्यते । अथाऽ२दुवाः इति पर्व प्रवाऽ२इन्द्रा । अस्य स्वरवत् भवति ॥ ३३ ॥

आयःपुमध्यमायां तु मराम् ॥ ३४ ॥

वि. आयःपुर-(ऊ. प्रा. ८२५) मध्यमायामेभिर्वर्द्धा मरामापद्यते । तवाहंसोम-(ग्रा. १५. ४. ५१६. १) प्रथमे मरारण ॥ ३४ ॥

भा. आयःपु-(ऊ. प्रा. ८२५.) मध्यमायां तु साकमश्वे एभिर्वर्द्धा मरामापद्यते । यजा३इष्ठो आ३इव इति तवाहंसोम-प्रथमे मरा ॥ ३४ ॥

दी. आयःपूऽ३रन्नार्मिणीऽ६मा (ऊ. प्रा. ८२५) इति साकमश्वे मध्यमायां तु एभिर्वर्धा मरामापद्यते । यजाऽ२इष्ठो आ इति पर्व । माराऽ२रणा । अस्य स्वरवत्

3. $A^2M^{1-2}T$ इन्द्रायां for इन्द्राम्

4. $KS^{1-3}T$ कमश्वोत्तरयोः for साकमश्वोत्तरयोः

भवति । तवाहँसो (ग्रा. १५. ५. ५१६. १) इति प्रथमे मराऽ२रणा इति मरापर्व भवति ॥ ३४ ॥

आग्निष्टुन्नौधसे मध्यमायां मागायता-
न्धाञ्जास्वरोत्पत्तिश्च प्राक् प्रहूयसायाः ॥ ३५ ॥

वि. अग्निष्टुन्नौधसे अग्न आयाह्य-मध्यमायां मागायतान्धामापद्यते । योनौ त्र्यक्षरो द्व्यक्षरो भवति । वात्सन्न । आन्धा भवति । हाइत्वा । प्रहूयसायाः प्राक् पूर्वं जास्वरोत्पत्तिश्च भवति । योनौ नास्ति ॥ ३५ ॥

भा. अग्निष्टुन्नौधसे अग्न आयाहि (ऊ. ए. ४१६) इति मध्यमायां मागायता आन्धामापद्यते । योनौ मागायता त्र्यक्षरा आसीत् । मा३गायत इति । अस्या रूपमापद्यते । वात्सन्न इति । स इह आन्धा भवति । हाइत्वा सह आइही । निहवे असाविदेवायाम् । (ग्रा. ८. ६. ३१३. १) आन्धास्वरः जास्वरोत्पत्तिश्च प्राक् प्रहूयसायाः । स्रू इति ॥ ३५ ॥

दी. अग्निष्टुत्सु यज्ञेषु । आऽ२३४ । ग्रआयाहिया । ग्राइभाइः (ऊ. ए. ४१६) इति नौधसे मध्यमायां योनौ वात्सन्न इति त्र्यक्षरा मागायता आन्धास्वरमापद्यते । हाइत्वा इति पर्व । आन्धाः । अस्य स्वरवत् भवति । नोअङ्गाऽ२३४इराः । इति प्रहूयसापर्वणः प्राक् जा इति स्वरस्योत्पत्तिश्च भवति । एष जास्वरः । इन्द्रायसा (ग्रा. १०. ४. ३८८. १) इति प्रथमे मागायत इति पर्व भवति । आईहीऽ३ | आइही इत्यादि असाविदेवङ्गोऋजीकाऽ३मान्धाऽ३ः (ग्रा. ८. ६. ३१३. २) इति निहवे आन्धाः इति मध्यमं पर्व भवति । प्रतित्याऽ२२श्चारुमध्वराम् (ग्रा. १. २. १६. १) इति साम्नि प्राहूयाऽ२३४साइ इति पर्व भवति । उदुत्यम् । ओहाइ (ग्रा. १. ३. ३१. १) इति साम्नि जा इति पर्व भवति ॥ ३५ ॥

---

5. A^2 om. योनौ त्र्यक्षरो...नास्ति (L.7)

10. PV^2A^1 om. आइही; V^2A^1 om. असाविदेवायां आन्धास्वरः

श्यैतधसतृतीयायां च ॥ ३६ ॥

वि. श्यैतनौधसतृतीयायां मागायतान्धा भवति । प्रहूयसायाः पूर्वं जास्वरोत्पत्तिश्च भवति । गाऽ२३इरेः । आइव । प्रर । साःआ । इति ॥ ३६ ॥

भा. श्यैतनौधसतृतीयायां च मागायता आन्धामापद्यते । जास्वरोत्पत्तिश्च प्राक् प्रहूयसायाः । गा३३इरेः । आइव । प्रर । सा३ःआ । एष जास्वरः ॥ ३६ ॥

४ ३ ४ ५र ३२ ३र ४र५
दी. अभिप्रवःसुरा धसाऽ३४औहोवा (ऊ. क्षु. ८६०) इति श्यैतनौधसे तृतीयायां योनौ वात्सप्र इति त्र्यक्षरा मागायता आन्धास्वरमापद्यते । आइव इति पर्व । आन्धाः । अस्य स्वरवद्भवति । आ । स्यापिन्वाऽ२३४इराइ इति प्रहूयसापर्वणः प्राक् जा इति स्वरस्य उत्पत्तिश्च भवति । आ । एष जास्वरः ॥ ३६ ॥
(स्वराङ्काः: आइव — १ २; स्यापिन्वा — २ ३ ५)

अनुष्टुप्सु वाइश्पता तयाम् ॥ ३७ ॥

वि. अनुष्टुप्सु नौधसे वाइश्पताइ नित्वानक्ष्यार्थां तयामापद्यते । वात्सप्र इत्येषा मागायता । स्वसरा इत्येषा वाइश्पता । अनुष्टुप्सु मागायतालोपः । वाइश्पता इति पर्व तयामापद्यते । अनुष्टुप्स्विति बहुवचनं ककुप्सु चेति यथा नौधसस्य षट्ककुभ इत्यत्र ॥ ३७ ॥

भा. पुरोजित्याद्यान्त्ययोः नौधसे वाइश्पता तयामपद्यते । योनौ वात्सप्र । एषा त्र्यक्षरा मागायता । स्वसरा एषा वाइश्पता द्विपर्वा । पुरोजित्याद्यान्त्ययोस्तु मागायतालोपः । आइ-न्द्राम् । एषा आइन्द्रा । श्वानाम् । एषा वाइश्पता द्विपर्वा । तया निधने च । अनुष्टुप्सु इति बहुवचनं ककुप्सु चेति । यथा नौधसस्य षट् ककुभ इत्यत्र ॥ ३७ ॥

---

1. A[2] om. श्यैत…भवति; S[2] om. श्यैत…आ इति (L·3)
2. T om. श्यैतनौधसतृतीयायां
3. M[1-2] om. भवति
10. A[2]M[1-2] after तयाम् add: ककुप्सि च
11. T कक्ष्य अनुत्तर for अनुष्टुप्सु
12. A[2]M[1-2]T वाइश्पताइ for वाइश्पता इति
13. A[2] अनुष्टुप् for षट्; A[2]M[1-2]TS[1] om: अत्र

दी. **पूऽ२३४ । रोजितीवो अ । धासाः** (ऊ. क्षु. ८५८) इति नौधसे प्रथमायां वाइ३पताइ इति पर्व तयास्वरमापद्यते । वाइ३प । ताइ । एवमस्य योगविभागः । तया । इ । अस्यापि योगविभागः । द्विपर्वा वाइ३पता द्विपर्वं तयास्वरं प्राप्नोतीत्यर्थः । श्वा । नाम् एवं द्विपर्वं भवति । योनौ वात्सन्न अस्य लोपः । स्वस । राइ एषा वाइ३पता द्विपर्वा । **आऽ२३४इ दुरश्वोनक** । त्वाया: (ऊ.क्षु.८५१) इति नौधसे द्विपर्वा वाइ३पता द्विपर्वं तयास्वरमापद्यते । वि । श्वा । एतद् द्विपर्वं भवति । अन्यत् सर्वं पूर्ववत् । अनुष्टुप्स्विति बहुवचनम् । **आऽ२३४इ । द्रङ्गीर्भिनवा । माहाइ । घूऽ३क्षांसूऽ२दा ।** (ऊ. द. ६b) इत्यादि नौधसस्य ककुप्सु च द्व्यक्षरा वाइ३पता द्व्यक्षरं तयास्वरमापद्यते । **नित्वा । होऽ३इ । न । क्षिया** (ग्रा. ४५) इति साम्नि वाइ३पताइ इति पर्व भवति । **अग्न आयाहि वी** (ग्रा. २) इति द्वितीये तयाइ इति पर्व भवति ॥ ३७ ॥

कावे स्वासु भिशब्दादकारागम उदपप्तायां च वाशब्दे च नित्यमोत्वम् ॥ ३८ ॥

वि.&भा. **स्वासु कावे** (ऊ द. १३) भिशब्दात् परमकारागमो भवति । अभिअ एवं स्थिते इकारस्यान्तस्थापत्तिः । अभ्य एवं स्थिते वाशब्दे च नित्यमोत्वं भवति । अभ्योवा एतद् रूपं सिद्ध्यति । इतरथा ओवौकारयोरेकीभावे लोप इति अभ्योवा इति प्राप्नोति । यथा **प्रवोवा** (ऊ.ए.४७७) । अत्र कथं विशब्दादकारागमं कृत्वा इकारस्यान्तस्थापत्तिर्न क्रियते इति।

---

3. E om. अस्यापि योगविभागः

8. E ककुप् for ककुप्सु

11. $A^2M^{1-2}T$ om. उदपप्तायां च

14 B[4] एकारस्य for इकारस्य; A^2M^{1-2} om. अभ्य एवं स्थिते;

15 वि. om. एतद्रूपं सिध्यति; वि. अन्यथा for इतरथा; वि. औहोकार लोपः for ओवौकारयोरेकीभावे लोपः

16. A^2M^1-$^2TS^1$ om. कथं; A^2T आकारागमं for अकारागमं भा. अप्रेगोराजा इत्यत्र अप्रोवेति गीतिः । अत्र कथमकारागमत्वादिकारस्यान्तस्यापत्तिः क्रियत इति for प्रवोवा....क्रियत इति ।

उच्यते। उपसर्गाभावात्। एवं हि स्मरत्यौदव्रजिः। नाम्यन्तादुपसर्गादेवेत्यकारः पर्वाङ्गत्वम् इन्द्रमहावैश्वानरव्रतयोश्चेति **नित्यमोत्वमिति** नित्यग्रहणं लक्षणान्तरप्रदर्शनार्थम्। मेघोषेदुह्यक्ष इति। **एताउत्याम्** कावे मध्यमायामुच्छब्दात् परमकारो भवति **उत् अ**। एवं स्थिते तकारस्य जस्त्वम्। वा-शब्दे चौत्वम्। ओवौकारलोपः। **उदोवा**। इति ॥ ३८ ॥

दी. अ[२]भ्यो[१]वा। ग्रियाणिपवताइ (ऊ. द. १३) इति **स्वासु कावे** अभि इति भि-शब्दादकारस्यागमः। **अभि अ** इति स्थिते इकारस्यान्तस्थापत्तिः। अभ्य इति स्थिते वाशब्दात् प्रागतेः पूर्वस्य नित्यमोत्वं तु भवति। एवम् **अभ्योवा** इत्येतत् रूपं सिध्यति। **उदपन्नायां** (ऊ.स.७३४b) च उत् अ इति स्थिते वाशब्दे चागते पूर्वस्य नित्यमोत्वम्। ओ भवति। **एवमुदोवा**। एतत् रूपं सिध्यति। **ऋतोवा** इत्यादीना**मोवौकारयोरेकीभावे** लोप इत्यनेन रूपं सिध्यति। **नित्यमोत्वमिति** नित्यग्रहणं लक्षणान्तरप्रदर्शनार्थम् ॥ ३८ ॥

पौरुहन्मने स्तोत्रा मागायताञ्जास्वरोत्पत्तिश्च

प्राक्तरुतायाः ॥ ३९ ॥

वि **पौरुहन्मने अभिसोमादिषु** योनिदृष्टा **स्तोत्रा मागायता**मापद्यते। **तरुतायाः**

1. $S^1A^2M^{1-3}T$ एव for एवं; $M^{1-2}TS^{1-2}My^1$ ins. इति after स्मरति; M^{1-3} औदुव्रजर्षिः for औदव्रजिः; S^1 आदौपूव्रजिना for औदव्रजिः; $S^1A^2M^{1-2}T$ तृतीयान्तात् for नाम्यन्तात्; $A^2M^{1-2}TS^1$ ०सर्गादौ भावेश्वा (S^1 स्वा, T त्वा) कारः; B^4 ०सर्गा उवेत्यकारः P ०सर्गा३चेत्येकारः for ०सर्गा देवेत्यकारः
2. $B^4A^2M^{1-3}T$ पूर्वाङ्गत्वम् for पर्वाङ्गत्वम्; $A^2M^{1-2}TS^1$ प्रत्ययोश्चेति K स्तयोश्चेति for ०व्रतयोश्चेति; $A^2M^{1-2}TS^1$ प्रदर्शनम् for प्रदर्शनार्थम्
3. B^4P ज्यो२तो२वा१ उत्वस्य निन्यग्रहणम् for एताउत्यां...उदोवा इति ॥
9. L^1My^2 तदाशब्दे for वाशब्दे

प्राक् जास्वरोत्पत्तिश्च योनिवर्जम् । स्तोत्रा कदावसो-(ग्रा. ६. १२. २२८. १) प्रथमायाम् ॥ ३९ ॥

इति फुल्लसूत्रविवरणे चतुर्थस्य प्रपाठकस्य पञ्चमः खण्डः ॥ ५ ॥

भा. पौरुहन्मने अभिसोमादिषु (ऊ.द.१४८) स्तोत्रा योनिदृष्टा मागयतामापद्यते । स्तोत्रा कदावसो (ग्रा. ६. १२. २२८. १) इत्यत्र योराजायां (ग्रा. ७. ५. २७३. १) तु वाइश्वासाम् । एषा स्तोत्रा सर्ववृद्धेत्यर्थः ।मागायता आदिवृद्धा । मागायताया आदिर्वृद्धत इत्यर्थः । जास्वरोत्पत्तिश्च प्राक् तरूतायाः । अभिसोमादिषु धाइ इति ॥ ३९ ॥

इति पुष्पसूत्रभाष्ये चतुर्थस्य प्रपाठकस्य पञ्चमः खण्डः ॥ ५ ॥

दी. अभिसोऽ३मास आयवाः (ऊ. द. १४९) इति पौरुहन्मने स्तोत्राऽ३म् इति पर्व मागायतामापद्यते । योराजाऽ३चर्षणाइनाम् (ग्रा. ७. ५. २७३. १) इति योनौ पौरुहन्मने तु वाइश्वासाऽ३म् । एषा स्तोत्रा भवति । समुद्रस्या इति पर्व मागायता । अस्य स्वरवद्भवति । धाइ । विष्टपाऽ३इ इति तरुतायाः प्राक् जास्वरस्योत्पत्तिश्च भवति । धाइ इति जापर्व । ओऽ२होऽ१इ कदावसो (ग्रा. ६. १२. २२८ १) इति साम्नि स्तोत्राऽ३म् इति पर्व भवति । इन्द्रायसा (ग्रा. १०. ४. २८८. १) इति साम्नि मागायता इति पर्व भवति । यो राजाऽ३चर्षणाइनाम् (ग्रा. ७. ५. २७३.१) इति साम्नि तरुताऽ३ इति पर्व भवति । उदुत्यम् ओहाइ (ग्रा. १. ३. ३१. १) इति साम्नि जा इति पर्व भवति ॥ ३९ ॥

इति फुल्लदीपे अष्टमप्रपाठकस्य पञ्चमः खण्डः ॥ ५ ॥

1. s[1] trans स्तोत्रा after प्रथमायाम्

षष्ठः खण्डः

पृश्निनि तृतीयपादान्ते चदक्षसा पतिःकवीम् ॥ १ ॥

वि. पृश्निनि योराजादिषु (ऊ. द. ७४) तृतीयपादान्ते चदक्षसा पतिःकवि-मापद्यते । यज्ञायज्ञा-तृतीये गिरागिरा चदक्षसे (ग्रा. १. ४. ३५. ३) । परिवाज-पतिः कविः (ग्रा. १. ३. ३०. १) ॥ १ ॥

भा. पर्वविकारान् वक्ष्यामः (पु. सू. ८. ५. २९) इति प्रतिज्ञातम् । तत्र केचिदुक्ताः केचिदनुक्ता अवशिष्यन्ते । तान् वक्ष्यामः । पृश्निनि योराजादिषु (ऊ. द. ७४) तृतीयपादान्ते योनिदृष्टा चदक्षसा । ऊहगीतौ पतिःकवीमापद्यते ।। १ ।

दी. योराजाऽ२३चर्षणीनांऽहाउ (ऊ. द. ७४) इति पृश्निनि द्वितीयायां तृ-तीयपादस्यान्ते चादक्षसाऽ२इ इति योनिदृष्टं पर्व पतिःकवीमापद्यते । न्मन्नावाऽ१-साऽ२३इ । एवं भवति । बृहाद्भीऽ२३ग्ने अर्चिभिर्हाउ (ग्रा. गे १. ४. ३७.१) इति योनौ पृश्निनि तृतीयपादान्ते याविष्ठियाऽ२३ इति पर्व भवति । पर्यौ । होइ-वाजा (ग्रा. १. ३. ३०. १) इति साम्नि पताइःकाऽ१वीरः इति पर्व भवति । १ ॥

पृतातूतद्विषाम् ॥ २ ॥

वि. योराजायायां (ऊ. द. ७४) पृश्निनि पृतनानामित्यत्र चदक्षसा पतिःकविं प्राप्ता पृतना तु उतद्विषा भवति । योनिवद्भावाद् वृद्धिप्राप्तस्य पूर्वसूत्रेणावृद्धिप्राप्तस्य आद्याक्षरस्य नीचीभावप्राप्तस्योच्चत्वं विधीयते । उतद्विषोमर्त्यस्य (ग्रा. १. १. ६. १) ॥

भा. योराजायायां तृतीयपादान्ते चदक्षसा उतद्विषामापद्यते । पृतनानामित्यत्र ॥

---

3. A[2] विकारम् K कवीम् for कविम्
14. P पृतरुत for पृतातूत
15. A[2] कविः, M[1]-[2]T कवि for कविम्
16. A[2]M[1-2]T पृता for पृतना
17. A[2] द्व्यक्षरस्य for आद्याक्षरस्य

दी. **योराजा**-पृश्निनि **तृतीयपादान्ते** **चादक्षासा**ऽ२३इ । इति पर्व **उतद्विषा**मापद्यते । **पृतना**ऽ१**ना**ऽ२३**म्** । एवं भवति । **त्वन्नोया** (ग्रा. १. १. ६. १) इति साम्नि **उताद्वा**ऽ१**इषा**ऽ२: इति पर्व भवति ॥ २ ॥

पतिःकव्युत्तमे च ॥ ३ ॥

वि. **उत्तमे च** पादादौ पतिःकविरुतद्विषामापद्यते । योनावुत्तमपादादौ नीचत्वम् । ऊहगीतौ न ॥ ३ ॥

भा. उत्तमे च पादे योनिदृष्टा पतिःकवी ऊहगीतौ सर्वत्र उतद्विषामापद्यते । **रेवत्या** वेति पतिःकवी ॥ ३ ॥

दी. ऊहगाने पृश्निनि **उत्तमे** पादे योनिदृष्टा **पतिःकवी** उतद्विषामापद्यते । उदाहरणम्– **योराजा**-पृश्निनि (ऊ. द. ७४) उत्तमे पादे **ज्येष्ठांयो**ऽ१**वा**ऽ२३ । एवं भवति ॥ ३ ॥

जमवर्ते ध्यमायां रनोनुमा चदक्षसाम् ॥ ४ ॥

वि. **जमदग्नेरभीवर्ते** (ऊ. स. ७१५) **मध्यमायां** **रनोनुमा** चदक्षसामापद्यते । **अभित्वाशूर**-प्रथमायां (ग्रा. ६. १ १३२. १) **रनोनुमा**ऽ२: । **सूमतौवा**ऽ२ ॥ ४ ॥

भा. **जमदग्नेरभीवर्ते**(ऊ. स ७१५) 'मध्यायां स्तोत्रीयायां **रनोनुमा** **चदक्ष**सामापद्यते । **सुमतौवा** । **रनोनुमा** अभित्वाशूर-प्रथमे (ग्रा. ६. १. २३३. १) ॥४॥

दी. **पिबासु**...**यरसिनोमत्स्वाहाउ** (ऊ. स. ७१५) इति **जमदग्नेरभीवर्ते** **मध्यमायां** स्तोत्रीयायां **रनोनुमा**ऽ२: इति पर्व **चदक्षसामापद्यते** । **सूमतौवा**ऽ२: इति पर्व भवति । **यज्ञायज्ञा**ऽ२ (ग्रा. १. ४. ३५.३) इति साम्नि **चादक्षसा**ऽ२इ इति पर्व भवति ॥ ४ ॥

5. M[1]-[3] पादे नीचत्वम् । नीचत्वात् for 'पादादौ नीचत्वम्

पुत्र उत्तरयोर्नेमिस्त्वन्नाम् ॥ ५ ॥

वि. उद्वंशपुत्र उत्तरयोर्नेमिस्त्वन्नामापद्यते। योनावुत्तमपादादौ दधन्वेवाय-दीमन्वि-(ग्रा. ३. १०. ८)ति। नाइमिश्च क्रौवा। ग्रामेगेय इन्द्रन्नरायाम् (ग्रा. ८. ९. ३१८. १) त्वंनोऽ३उवाऽ३ ॥ ५ ॥

भा. उद्वंशपुत्रे उत्तरयोः स्तोत्रीययोः नेमिः। नेमीति नेमिश्चक्रमिवाभुवत्। आगोमति व्रजे भजात्वंन त्वन्नामापद्यते। त्वन्ना३३उवा। नाइमिश्चक्रौवाइवाभुवात् ॥

दी. प्रवाः। आइन्द्राय (ऊ. द. १२०) इत्युद्वंशपुत्रे उत्तरयोः स्तोत्रीययोः नेमिः। नाईमिश्चक्रौवा इति पर्व त्वन्नामापद्यते। त्वन्नाऽ२३उवाऽ३। इति। द्वितीयायां सआऽ२उवाऽ३। इति। तृतीयायां तआऽ३उवाऽ३ दधन्वेवाऽ५यदीमनु (ग्रा. ३. १०. ९४. १) इति साम्नि नाइमिश्चक्रौवा इति पर्व भवति। इन्द्रन्नाऽ२३४रो (ग्रा. ८. ९. ३१८. १) इति साम्नि त्वन्नाऽ२३उवाऽ३ इति पर्व भवति ॥ ५ ॥

यशस्युत्तमायामुत्तरा तया नन्दाम् ॥ ६ ॥

वि. इन्द्रस्ययशसि (ऊ. सं. ७१३) उत्तमायामुत्तरा तया नन्दामापद्यते। राधोभागमिवेमह इत्यभ्यासे ॥ ६ ॥

भा. इन्द्रस्ययशसि (ऊ. स. ७१३) उत्तमायाम् उत्तरा द्वितीया तया नन्दामापद्यते ॥ ६ ॥

दी. त्वमिन्द्रा। यशाः (ऊ. स. ७१३) इतीन्द्रस्ययशसि तृतीयायां द्वितीये तयाइ पर्व नन्दामापद्यते। नन्दाइ। एवं महाइ। इति नन्दापर्ववत्

3. A[2] om. इति

5. P om. नेमिः; V[2] om. नेमिः। नेमीति

6. B[4] नयिमिश्चत्रौ (क्रौ ?) वा। आगोमतिव्रजे भजारत्वंनामापद्यते for त्वन्ना····भुवात्

8. My[3] एवं for इति

भवति । योनौ **तयाइ** पर्वद्वयं भवति । **मूर्धानंदिव** (ग्रा. २. ७. ६७. २) इति द्वितीये नन्दापर्व भवति । **अग्न आयाहि**—द्वितीये (ग्रा. १. १. १. २) **तयाइ** पर्व भवति ॥ ६ ॥

अयं दासोत्तरयोर्जरिसंघातम् ॥ ७ ॥

वि. अयंतदैवोदासे (ऊ. द. २२) **उत्तरयोर्जरिसंघातमापद्यते** । यद्योन्यां तदुत्तरयोरिति प्राप्ते जरिसंघातः । **जनाऽ३** । **नपाऽ३त्** । एष विशेषः । **अग्नेजरितर्वि**—(ग्रा. १. ४. ३८. २) द्वितीयायाम् ॥ ७ ॥

भा. विधीयते **अग्ने जरितर्विश्पति**-(ग्रा. १. ४. ३८. २) रिति **अयंदासोत्तरयोर्जरिसंघातं** रात्रिदैवोदासे उत्तरयोः स्तोत्रीययोः पर्वविकारः । अधिकपर्वत्वाज्जरिसंघातमापद्यते । जरिसंघातस्य द्वितीयं पर्व **श्पतिरिति** ऊहगीतौ । जनाऽ३ । नपाऽ३त् । अस्य विधानार्थं **गमित्वसहाइ** इति अभ्यासविषये ॥ ७ ॥

दी. अयंत इन्द्रसोऽ४मः (ऊ.द.२२) इति रात्रिदैवोदासे उत्तरयोस्तोत्रीययोः जरि-पर्वणः **संघातं** सहचरं पर्व विधीयते । विधानं क्रियते । द्वितीयायां **शाचिगोशाचिपू** इत्यादि **तेसुता** इत्यन्तं **जरिसंघातं** पर्व भवति । तृतीयायां **यस्तेशृङ्गवृषः** इत्यादि **पायिया** इत्यन्तं जरिसंघातं पर्व भवति । अग्नेजरितर्वि (ग्रा. १. ४. ३८. २) इति जरिपर्व **श्पतीऽ३ः** । **ताऽ२३४** । **पानोदेवर** । क्षसाः इति संघातपर्व ॥ ७ ॥

कार्णश्रवसोत्तरयोर्नुषेजनासदावृधाम् ॥ ८ ॥

वि.&भा. कार्णश्रवसोत्तरयोः स्तोत्रीययोर्नुषेजनासदावृधामापद्यते । द्वितीयायां **दोमतिभाऽ२३इः** । (ऊ. द. ११३) तृतीयायां **भ्योमधुमाऽ२३** ॥ **नुषेजना** त्वमग्नेयज्ञायाम् (ग्रा. १. १. २. १) ॥ ८ ॥

---

5. यत्यत् for यत्
6. A²M¹-²TS¹ om. जना नपात् । एष विशेषः
7. T विवस्व द्वितीयायां for जरितर्वि
18. S¹ °श्रवस उत्तरयोः for °श्रवसोत्तरयोः A²M¹-² त वः सखायां, TS¹ तं वः सखा for स्तोत्रीययो
20. भा. om. धुमयभ्योम....ज्ञायाम्

दी. ताऽ२३४म्वः । साऽ२३४खा (ऊ. द. ११३) इति कार्णश्रवसे उत्तरयोः स्तोत्रीययोः नुपेजनापर्वसदावृधामापद्यते । द्वितीयायां दोमतिमाऽ२३इः । तृतीयायां म्योमधुमाऽ२३ इति पर्व भवति । त्वमग्ने यज्ञानाम् । त्वमग्नाइ (ग्रा. १. १. २. १) इति साम्नि नुपेजना इति पर्व भवति । नकिष्टा२ङ्कर्मणानशात् (ग्रा. ६. २. २४३. १) इति साम्नि सदावृधाऽ२३म् इति पर्व भवति ॥ ८ ॥

मार्गीयवे मागायताप्रथमोच्चं
प्रसोमप्रथमायामस्य प्रत्नाद्ययोश्च ॥ ९ ॥

वि. मार्गीयवे प्रसोमासोवि-(ऊ. स. ६८९) प्रथमायाम् अस्यप्रत्ना-(ऊ. अ. ५५२) द्ययोश्च मागायताप्रथमोच्चमापद्यते । कस्मिन्विषये । उच्यते । अपोनय । शुक्रं दुदु ॥ ९ ॥

भा. मार्गीयवद्वितीयपादादौ मागायताप्रथमोच्चमापद्यते । कस्मिन् विषये । उच्यते । प्रसोम-(ऊ. स. ६९८) प्रथमायामपोनय इति । अस्यप्रत्ना-(ऊ. अ. ५५२) द्ययोश्च । शुक्रं दुदुह्रे । अयंस्सराऽसीति च ॥ ९ ॥

दी. प्रसौहोवा (ऊ. स. ६८९) इति मार्गीयवे प्रथमायां द्वितीयपादादौ मागायत इति पर्व अप्रथमोच्चम् । न प्रथमोच्चमापद्यते । अपोनय इति पर्व भवति । अस्यौहोवा (ऊ. अ. ५५२) इति मार्गीयवे आद्ययोः स्तोत्रीययोः द्वितीयपादादौ मागायत इति पर्व न प्रथमस्योच्चमापद्यते । प्रथमायां शुक्रंदुदु द्वितीयायां अयंसरा इति पर्व भवति । अपोनयेत्यादिषु ऋक्स्वरवृत्तिः । इन्द्रायसा (ग्रा. १०. ४. ३८८. १) इति साम्नि मागायतपर्व भवति ॥ ९ ॥

वृषाजिग प्रथमायां च ॥ १० ॥

---

9. M[1-2] om. मगायता…शुक्रंदुदु ॥

17. L[1]R after पर्व add: अप्रथमोच्च

20. M[1-3] om. वृषा…च ॥

वि. मागायताप्रथमोच्चमापद्यते । मरुत्वते (ऊ. ए. ४४८) ॥ १० ॥

भा. वृषापबस्वेति (ऊ. ए. ४४८) च आजिगे प्रथमायां मागायताप्रथमोच्चमापद्यते । मरुत्वते इति । एतेषु च ऋक्स्वरवृत्तित्वात् प्रथमोच्चता ।। १० ।

दी. वृषाषावा (ऊ. ए. ४४८) इत्याजिगे प्रथमायां च मागायता इति पर्व अप्रथमोच्चमापद्यते । मरुत्वते इति पर्व भवति ॥ १० ॥

घृतनिधने छतानुवामित्यत्र स्वरागमः ॥ ११ ॥

वि. घृतनिधने द्वितीयायां छतानुवमित्यत्र स्वरागमो भवति । अन्यथा छतानुवौ इति प्राप्नोति औवोकारयोः (पु. सू. ७. १०. २७) इति । तस्मादकारागमो भवति ॥ ११ ॥

भा. घृतनिधने इदंह्यनु-(ऊ. द. २७) द्वितीयायां छतानुवमित्यत्र [स्वरागमो भवति । अन्यथा] कथं प्राप्नोति छतानुवौ इति । वमित्यत्र कथम् । उच्यते । ओवौकारयोरेकीभावात् (cp. पु. सू. ७. १०. २७) । तेनात्र अकारस्वरागमो भवति ॥११॥

दी. इदंह्यनूऽ३ओजसा (ऊ. द. २७) इति घृतश्चुन्निधने द्वितीयायां छतानुवमौ । होवाऽ३हाइ । नुवमित्यत्र स्वरस्य अकारस्यागमो भवति ।। ११ ।।

हवि ॥ १२ ॥

वि. [हवि] होशब्दे प्रत्यये औमहि इति औभावः । अत्र घृतनिधने स्वरागमम् इति वक्तव्ये अन्यत्रापि स्वरागमं दर्शयति । यथा अग्निंनर-(ऊ. द. २२२)

---

1. M$^{1-2}$ om. मागा····आपद्यते
7. B^{2} सुताइनियाछा; M$^{1-2}$ सुतेन्यच्छता, TS^{1} सुते नियच्छता for छता०
11. PV^{2} after कथं add न
16. P^{2}T before होशब्दे add: वृषाजिगप्रथमायां; A^{2}M$^{1-2}$TS^{1} महि इति औ० for औमहि इति औ० A^{2}M$^{1-2}$ST^{1} होभावः for औभावः

शिशुं (ऊ. ए. ३८१) देव्ययोः । **यन्त्यौहोऽ३** । अन्यथा यन्तौहो इति प्राप्नोति । तथा **एत्यौहोऽ३** इत्युक्तम् ॥ १२ ॥

भा. हवि होशब्दे प्रत्यये **औमहीति** औभावः । **अत्र** किम् । घृतनिधने छतानुवमिति स्वरागम इति वक्तव्ये अत्रेति अन्यत्रापि स्वरागमं दर्शयति । **अग्निनर-** (ऊ. द. २२२) **शिशुं** (ऊ. ए. ३८१) देव्ययोः । अग्निनरतृतीयायां **यन्त्यौहोऽ३** [इति] यन्तौहो इति प्राप्ते । तथा शिशुप्रथमायाम् एतौहो इति प्राप्ते **एत्यौहोऽ३** इति उक्तम् ॥ १२ ॥

दी. हवि होशब्दे प्रत्यये । [औमहीत्यौभावः । अन्यथा] ओवौकारयोरेकीभावे अकारलोपः ॥ १२ ॥

वंशब्दस्य चोच्चभावः ॥ १३ ॥

वि. वंशब्दस्य च उच्चैर्भावो भवति । **सुते नियच्छ तन्वम्** (ऊ. द. २७) इत्यत्र । अन्यथा स्वरितत्वान्निघातः प्राप्नोति ॥ १३ ॥

भा. वंशब्दस्य च उच्चीभावः । इतरथा स्वरितत्वान्निघातः प्राप्त इति छतानुवमिति च ॥ १३ ॥

दी. छतानुवमौ (२१ २र) । अत्र वंशब्दस्य उच्चभावः ॥ १३ ॥

---

1. A^2M^{1-2} यन्त्यौ for यन्तौ

8. R °स्तोभे for °शब्दे

9. E after °भावे adds: अत्र; M^4ES^4 after लोपः । add: अजा° । घृतनिधने द्वितीयायाम् छतानुवमित्यत्र स्वरागमो भवति । अन्यथा छतानुवौ इति प्राप्नोति । ओवौकारयोरिति । तस्मादकारागमो भवति । हवि होस्तोभे प्रत्यये । औमहीत्यौभावः । अत्र घृतनिधने स्वरागममिति वक्तव्यम् । अन्यत्रापि स्वरागमं दर्शयति । यथाग्निनरशीशुंदेव्ययोः । यन्त्यौहो । अन्यथा यन्तौहोऽ३इति प्राप्नोति । तथा एत्यौहोऽ३ इत्युक्तम् ॥ This is vivarana of अजातशत्रु added hereto evidently by the owner

12. $A^2M^{1-2}TS^1$ उद्घातः for निघातः

15. EM^4S^4 after °भावः । add: अजा° वंशब्दस्य च उच्चैर्भावो भवति । सुते नियच्छ तन्वमित्यत्र अन्यथा स्वरितत्वान्निघातः प्राप्नोति ।

इदं संघातस्त्रिष्टुप्सु पार्थवाराहवासिष्ठकुत्सरथीयादिषु ॥ १४ ॥

वि. एतेष्विदंसंघातो भवति । विशेषविवक्षया सिद्धोपन्यासः । **वृधन्तां । का-ऽ३म्परः ।** **ऊतएकाम् ।** इतीदंसंघातः ॥ १४ ॥

भा. त्रिष्टुभि पार्थादिषु **इदंसंघातः** प्रकृत्या भवति । अधिकारात् त्रिष्टुबन्तादेशादिदंसंघातान्ता विधेति । विशेषविक्षया सिद्धोपन्यासः । वृधन्ता । काम्पा । ऊतएका चेति इदंसंघातः ॥ १४ ॥

दी. **त्रिष्टुप्सु पार्थादिषु** सामसु **इदं**पर्वणः **संघातः** प्रकृतिर्भवति । इदन्तए । **काऽ३म्परः ।** **ऊतएकाम् ।** इति पर्वत्रयमिदंसंघातो भवति । अत्र इदंसंघातानां विधिर्विशेषविवक्षया सिद्धोपन्यासः । पार्थे उदाहरणम्—ओऽ३होऽ३होइ । **प्रकावियाम्** (ऊ. सं. २२७) इति पार्थे । **देवोदेवा । नाऽ३ज्ञनि ।** **माविवक्ती** । अक्षरे द्वे पार्थे नीचे भवतः ॥ **हाउहाउ । हुपू ।** **प्रकावियाम्** (ऊ. अ. ६५१) इति वाराहे तृतीयायाम् । **वृथाक्रिडा । ताऽ३म्मिम । तेनगावाः ॥** **औहोवाहाऽ३होइ । इहा वृषोशोगो** (ऊ. द. ४२) इति वासिष्ठे **नदयन्नाइ । पीऽ३पृथि । वीमुतद्याम् ॥** **होऽ३वा । उहुवाऽ३ । होवा । प्रकावियाम्** (ऊ. क्षु. ९१५) इति कुत्सस्याधिरथीये । **पदावरा । होऽ३अभि । एतिरेभान् ।** आदिशब्दात् आज्यदोहे **तिस्रोवाचाः ।** **ईऽ३रय ।** **तिप्रवह्नीः** (र. अ. ९६) एवमादीनि ॥ १४ ॥

वाराहे शुचिबावृधन्ता तरुताम् ॥ १५ ॥

---

1. A[2]M[1-3] कुत्सस्याधि; T कौत्सस्य for कुत्स

2. M[1-3] r om. एतेषु; T after संघातः adds: त्रिष्टुप्सु पार्थवाराहवासिष्ठकौत्सस्याधिरथीयादिषु इदंसंघातः; Ks[2] after भवति add: आदिशब्देन संक्रोशौशनप्रगायतवैश्वज्योतिषपूर्वोत्तरवासिष्ठाज्यदोहराजनादयो गृह्यन्ते; T विशेषापेक्षया for विशेषविवक्षया; A[1]S[1]M[1-2]T इदं संघातः (A[3] om. इदं संघातः) । इदए । काऽ३परः (A[2]M[1-3] पारः) ऊत (A[2]T ता) एकामिति for वृधन्तां ....संघातः

3. My[1] after संघातः । adds: संक्रोशव्योत्तरवासिष्ठराजनादयो गृह्यन्ते

4. P त्रिष्टुबन्तादेशः; V[2] त्रिष्टुबन्तातेशः; B[4] त्रिष्टुबनादेशात् for त्रिष्टुबन्तादेशात्

वि. वाराहे शुचिबन्धुः पावकः (ऊ. अ. ६५१) इत्यत्र प्राप्ता वृधन्ता तरुतामापद्यते ॥ १५ ॥

भा. वाराहे शुचिवा । सा वृधन्ता तरुतामापद्यते ॥ १५ ॥

दी. हाउ हाउ । हुप् । प्रकाविवियाम् (ऊ. अ. ६५१) इत्यादिवाराहे तृचेषु शुचिवा३ इति पर्व वृधान्तामापद्यते । प्रथमायां योनौ सा वृधन्ता तरुतामापद्यते । उदाहरणम्– वाराहे द्वितीयायां पवसा । एवम् । शुचिवास्थाने वृधन्ता भवति । तृतीयायां कृणुते । एवं शुचिवास्थाने वृधन्ता भवति । प्रथमायां तु शुचि वा३ एवं तरुता भवति । अग्निवा३६ए (ग्रा १. ३. २१. २) इति साम्नि वृधन्ताम् इति पर्व भवति । योराजा३चर्षणाइनाम् (ग्रा. ७. ५. २७३. १) इति साम्नि तरुता३ इति पर्व भवति ॥ १५ ॥

पार्थे तु वृण्याद्ये हीषीं प्रकृतौ ॥ १६ ॥

वि. पार्थे योनौ वृण्याद्ये द्वे अक्षरे हीषीमापद्यते ॥ १५ ॥

भा. पार्थे तु वृण्याद्ये अक्षरे योनौ सुष्वाणास इति हिषिमापद्यते । प्रकृतौ योनावित्यर्थः ॥ १६ ॥

दी. ओ३हो३होइ । सू३२३४ष्वा (ग्रा. ८. ९. ३१६. २) इति योनौ पार्थे तु वृणीमहाइ । इति पर्वग आद्ये द्वे अक्षरे हीषीमापद्यते । सू३२३४ष्वा । णासः । एवं योनौ भवति ॥ १६ ॥

ऊहे द्वितीयम् ॥ १७ ॥

---

2. A^{2}M$^{1-2}$TS^1 भवति for आपद्यते

11. A^{2}M$^{1-2}$T वृण्या द्वे for वृण्याद्ये

12. KS^{2}..^{2} वृण्यां, M$^{1-2}$T वृण्या for वृण्याद्ये

वि.&भा. ऊहगीतौ ते अक्षरे द्वितीयस्वरमापद्येते । आज्यदोहौशनप्रगाथतावैश्वज्योतिषवृषाशोणादिषु ॥ १६ ॥

दी. ऊहगाने पार्थे वृण्याद्ये द्वे अक्षरे द्वितीयं स्वरं गान्धारमापद्येते । ओऽ३होऽ३होऽइ । अयःसोमाः (ऊ. सं. ३४७) एवमादीनि ॥ १६ ॥

अनुष्टुप्सु त्वृभुसंघातम् ॥ १८ ॥

वि. **अनुष्टुप्सु पार्थे पवस्ववाजायाय** (ऊ. द. ९४) ऋभुसंघातमापद्यते । **इन्द्रइषेददातु**–(ग्रा. ५. ९. १९९. १) प्रथमाथामृभुसंघातम् ॥ १८ ॥

भा. अनुष्टुप्सु **पवस्व वाजसातये** (ऊ. द. ९४) ऋभुसंघातमापद्यते । **इन्द्रइषे ददातु नः** (ग्रा. ५. ९. १९९. १) इति प्रथमे ऋभुलक्षणम् ॥ १७ ॥

दी. ओऽ३होऽ२होइ । पव । स्वाऽ२जसाताऽ२३४याइ (ऊ. द. ९४) इत्याद्यनुष्टुप्सु पार्थे वृण्याद्ये द्वे अक्षरे ऋभुसंघातमापद्येते । इन्द्रइषेददातुनः । ओहाइ (ग्रा. ५. ९. १९९. १) इति साम्नि ऋभु । क्षणाऽ२म् । ऋभुऽ२ऽाऽ२३-४इम् इति ऋभुसंघातो भवति ॥ १८ ॥

आज्यदोहद्यौतानयोर्जुहूसंघातम् ॥ १९ ॥

वि. **आज्यदोहद्यौतानयो**रिदंसंघातो **जुहूसंघात**मापद्यते । सुरूपकृत्नु (ग्रा. ४. २. १६०. ३) तृतीयायां **जुहूमसाऽ२इ** इति ॥ १९ ॥

---

3. L[1] द्रितीयांश्वरं गास्वरम् My[2] द्रितीय च स्कास्वरम् for द्वितीयं स्वरं गान्धारं

8. P after अनु adds: अदावावयो भवति । कथं विकार इति । उच्यते । चदक्षसाया अन्त्यात् तृतीयं दीर्घमक्षरं प्रत्युत्क्रामति ह्रस्वस्तु अतीन.यनभिगीयते । कृप्यवा पूर्ववत् सर्वोतद्विषेभ्यश्च पुरात्तम्यत्तत च दक्षसा संहश्यत इति । पुरुत्राधरषऽ३दाधाइतदि ष्ठु न्नियमदासुताऽ२ इगामाऽ३ इति एवंद्रष्टव्यम्मदावात्रीपर्वादित्युक्तम् । अन्तहि उभयाहि द्वितीया चतुरयां विकारप्रतिषेधः । तऽहिस्वरा२जंत्रृषमन्ता२मा-२२

14. My[2] जुह्व० for जुहू०

15. A[2]M[1]-[3]TS[1] इदसंघातं for इदसंघातः

भा. आज्यदोहद्यौतानयोः इदंसंघातः जुहूसंघातमापद्यते । आज्यदोहप्रसुन्वानायां (र. अ. ९४) द्यौताने अयाहीन्द्र (ऊ. ए. ४०२) उत्सोदेवयोः (ऊ प्रा. ८४९) ॥

दी. च्योहम् । प्रसुन्वानाऽ२ (र. अ. ९४) इत्यनुष्टुभि आज्यदोहे इदंसंघातो जुहूसंघातमापद्यते । मर्तोनवाऽ२ । ष्टतद्वाऽ२३४चाः । सुरूपकृत्नूऽ३मूताऽ२३४याइ (ग्रा. ४. ५. १६०. ३) इति साम्नि जुहूमसाऽ२इ । द्यविद्याऽ२३४वी इति जुहूसंघातो भवति । हाऽ३ । ओऽ३हाऽ३ । ओऽ३हाऽ३ । हाइ । अयाहियाऽ२इ (ऊ. ए. ४०२) इति द्यौताने इदंसंघातो जुहूसंघातमापद्यते । उपत्वाकाऽ२ । मईमाऽ२३४हाइ । एवमुत्सोदेवो (ऊ प्रा. ८४९) द्यौताने ॥ १९ ॥

विच्छन्दस्सु च वैराजर्षभारिष्टयोः ॥ २० ॥

वि. विच्छन्दस्सु विसदृशच्छन्दःसु वैराजर्षभारिष्टयोश्च जुहूसंघातो भवति । तवाहंसो–(र. क्षु. १७७) सुतासोमादिषु (र. क्षु. २००) सर्वामहित्रीणे अरिष्टे भवतः । योनिवद्भावात् जारा भवति । प्रकृतौ ग्रहणात् अरिष्टे साखे इति । इतरथा यदि सर्वा अधिकृतैव स्यात् । तथा सति । साखेन्द्रस्याऽ२ । दिवेदाऽ२३४इवाइ इति स्यात् । एवं च सति खेशब्दस्य वृद्धिर्न भवति । तस्मादेतस्माद् ज्ञापकान्न सर्वा यथाप्रकृति जारैवेति सिद्धम् ॥ १९ ॥

भा. विच्छन्दस्सु वैराजर्षभे तवाहंसोम-(र. क्षु. १७७) पुरोजित्योः (र.क्षु. १. ७८) अरिष्टे सुतासोमायाम् (र. क्षु. २००) इदंसंघातः जुहूसंघातमापद्यते । सुरूपकृत्नु-(ग्रा. ४. ५. १६०. ३) तृतीये जुहूसंघातः सर्वामहित्रीणे अरिष्टे भवतः । योनिवदेव

10.$A^3V^3M^{1-2}T$ om. विसदृशच्छन्दःसु; after °च्छन्दस्सु M^{1-3} add: च;

11. $M^{1-2}TS^1$ समहित्रीगा, A^2 महित्रीगा, KS^2 सार्वामहित्रीणे for सर्वामहित्रीणे; $S^1M^{1-3}A^2$ तु सर्वे (S^1 °र्वा) T सर्वे for भवतः

12. $M^{1-3}A^2TS^1$ after प्रकृतौ add: यावत्; $M^{1-2}A^3TS^1$ om. इति

13. S^1 असिगीतैव, A^2T अभिगीतेव; M^{1-3} अभिगीत्येते for अधिकृतैव

14. $A^2M^{1-3}TS^1$ om. न

जारा भवति । प्रकृतिग्रहणात् अरिष्टे सखे । इतरथा यदि सर्वा अधिकृतैव स्यात् । तथा सखेन्द्रस्या । एवं सति खेशब्दस्य वृद्धिर्न स्यात् । तस्मादेतज्ज्ञापकान्न सर्वा यथाप्रकृति जारैवेति सिद्धम् ॥ १९ ॥

दी. प्रकृतिच्छन्दसोऽन्यच्छन्दस्सु इयाहाउ । तवाहंसोऽ२ | (र. क्षु. १७७) इति वैराजर्षभे इदंसंघातो जुहूसंघातमापद्यते । परिधीꣳराऽ२ । तितꣳ आऽ२ ३४इहाइ ॥ हाह | होईयाप्लुता (र. क्षु. २००) इति अरिष्टे सोमाः । इन्द्राऽ२ । यमन्दाऽ२ ३४इनाः । अत्र इदंसंघातो जुहूसंघातमापद्यते ॥ १९ ॥

वाशे ध्यमपादयोश्चदक्षसोताद्विषाम् ॥ २१ ॥

वि. वाशे कईवेदो-(ऊ. अ. ६५२)त्तरादिषु या योनिदृष्टा चदक्षसामिगीयते सा ऊहे उतद्विषामापद्यते । एतयोश्चदक्षसोतद्विषयोरादावावापो भवति । कथं विशेष इति चेत् । उच्यते । चदक्षसाया द्वितीयं प्रत्युत्क्रामति | तृतीयं प्रथमोच्चं चतुर्थं कृष्यते । उतद्विषायास्तु तृतीयं प्रत्युत्क्रामति | चतुर्थं कृष्यते पूर्ववत् । सर्वोतद्विषेभ्यश्च पुराकृतं चदक्षसामापद्यत इति । पुरुत्राचरथाऽन्दाऽ१ पाऽ२इ नकिष्टांनियमदासुताइगाऽ१ माऽ२ः । इत्येवं द्रष्टव्यम् | आवापादित्वात् इत्युक्तम् ॥ २१ ॥

भा. वाशे कईवेदो-(ऊ. अ. ६५२)त्तरादिषु योनिदृष्टा चदक्षसा गीयते । या चदक्षसा सा उतद्विषामापद्यते । एतयोश्चदक्षसोतद्विषयोश्च आदावावापो भवति । कथं विकार इति । उच्यते । चदक्षसाया अन्त्यात् तृतीयं दीर्घमक्षरं प्रत्युत्क्रामति |

9. M$^{1-2}$ वेदादिषु for °वेदोत्तरादिषु; M$^{1-2}$ यथा for या
10. T तद्विषाग् अहिश्च परा यत् प्रकृतं for भवति···उच्यते
11. T चदक्षसामपत्यन्दनी for चदक्षसाया द्वितीयं प्र° and om. त्युत्क्रामति...आपद्यत इति (L. 12)
12. M$^{1-2}$ चतुर्थः for चतुर्थं; A^{1} before उत adds: पूर्ववत्; S^{3} स्वरे M$^{1-2}$ सर्वे for सर्वो° A^{2} तरिषाभिश्च परायात् प्रकृतं for सर्वोत...पुराकृतम् S^{1}M$^{1-2}$ उतद्विषोभिश्च परायात् प्रकृतं for उत····पुराकृतम्;
13. M$^{3-2}$ अंह for आपद्यत°; A^{2} om. इति;
16. PV^{2}L^{2}A^{4} om. सा; P एव तयोश्च for एतयोश्च;
17. B^{4} चदक्षसायां for चदक्षसायाः B^{4}V^{2} अन्त्या for अन्त्यात्;

ह्रस्वस्तु अन्त्यात् द्वितीयमभिगीयते । कृष्यते वा पूर्ववत् । सर्वोतद्विषेभ्यश्च पुराकृतप्रकृतं चदक्षसा संहन्यते इति । पुरुत्राचरथाऽ३दा३३धा३इ । नकिष्ट्वानियमदासुता२इगा२माऽ२ः इति । एवं द्रष्टव्यम् । आदावावापत्वादित्युक्तम् ॥ २१ ॥

दी. कइंवेदा (ऊ. अ. ६५२) इति वाशे मध्यमपादयोः योनिदृष्टा चदक्षसोतद्विषामापद्यते । पुरुत्राचरथान्दाऽ१धाऽ२इ । सुताइगाऽ१मा१२ः । एवमुतद्विषा भवति । योनौ वायोऽ१दाधाऽ२इ । ताओऽ१जसाऽ२ । एषा चदक्षसा भवति । चदक्षसायाः अन्तात् पूर्वं तृतीयमक्षरं ह्रस्वमभिगीतं भवति । उतद्विषायाः अन्तात् पूर्वं तृतीयमक्षरं दीर्घं प्रत्युत्क्रामति । याज्ञायज्ञाऽ२ (ग्रा. १. ४. ३५. ३) इति साम्नि चादक्षसाऽ२इ इति पर्व भवति । त्वन्नोया (ग्रा. १. १. ६. १) इति साम्नि उताद्वाऽ१इषाऽ२ः इति पर्व भवति ॥ २१ ॥

अतँ हि ॥ २२ ॥

वि. तंहिस्वराजम् (ऊ. स. ७०६) इति चदक्षसैव । अस्य तृतीयस्य प्रत्युत्क्रान्तत्वात् ॥ २१ ॥

भा. उभयंशृ-(ऊ. स. ७०६) द्वितीयायां विकारप्रतिषेधः । तंहिस्वराजं वृषभंता३मो३जा३सा३ । चदक्षसैव । अन्त्यात् तृतीयस्य प्रत्युत्क्रान्तत्वात् ॥ २२ ॥

दी. अकारः प्रतिषेधे । उभयंश्रा (ऊ. स. ७०६) इति वाशे दितीयायां तंहिस्वराजं वृषभन्तामोऽ१जासाऽ२ । अत्र उतद्विषा न भवति । अन्तात् पूर्वस्य तृतीयाक्षरस्य प्रत्युत्क्रान्तत्वात् ॥ २२ ॥

---

3. PB[4] मदावावायत्वात् V[3] मदावावी पर्वात् for आदावावापत्वात्
6. L[1] om. एषा...भवति
7. L[1]My[2-3] चदक्षसायाः for उतद्विषायाः
9. E om. इति पर्व भवति
12. A[3] अतं for तं; K तस्य for अस्य
14. PV[3] उभयोर्हिं, B[4] उभयं हि for उभयंश्र
17. M[4]ES[4] चदक्षसा for उतद्विषा

मद्रे प्रथमोच्चस्य चतुरक्षरमाद्यं पिबासोमां परं योनिवत् ॥ २३ ॥

वि.&भा. पौरुमद्रे अभिसोमा-(ऊ. द. ५४) पुनानयोः (ऊ अ. ६६२) प्रथमोच्चस्य चतुरक्षरमाद्यं पिबासोमाम् (ग्रा. ६. १२. २२९) आपद्यते । पवन्तेमाऽ२ । अपोवसाऽ२ । योनौ तु तपानोद्देऽ२ । परं योनिवत् भवति । वरक्षसः (ग्रा. १. ४. ३९. १) दियम्मदम् । इति । ब्राह्मणादिन्द्रराधसः (ग्रा. ६. १२. २२९. १) इति ॥

दी. अभिसोमासआयवः । औहोवा । एहिया । हाउ (ऊ. द. ५४) इति पौरुमद्रे तपानोद्देऽ२ । अत्र प्रथमस्वरपर्यन्तमुच्चस्य पर्वणः आद्यं चतुरक्षरं पिबासोमामापद्यते । पवन्तेमाऽ२ । एवं वृद्धकर्षणं भवति । चतुरक्षरस्य परम् अग्रिममक्षरं योनिवत् । वरक्षसः । दियम्मदम् । एवं भवति । पुनानस्सोमधारया । औहोहा (ऊ. अ. ६६२) इति परुमद्रे अपोवसाऽ२नोअर्षसि । एवमेवेदं पर्व भवति । ब्राह्मणादि (ग्रा. ६. १२. २२९. १) इति साम्नि पिबासोमाऽ२म् इति पर्व भवति ॥

पाष्ठौहोत्तरयोर्वृण्यौ तद्विविद्ढाम् ॥ २४ ॥

वि. पाष्ठौहे (ऊ. द. ६०) उत्तरयोरुतरे वृण्यौ तद्विविद्ढामापद्यते । अग्निंदूताम् (ग्रा. १. १. ३. १) वृणीमहाइ । जराबोधीये (ग्रा. १. २. १५. १) प्रथमे तद्विविद्ढाइ । गात्रोमिम । इत्येगाथा वृणी । तिश्वेनवः । इति द्वितीया । एवं द्विवचनं द्रष्टव्यम् । द्वितीयायां स्यमातरः । तृतीयायां मविश्वता इति ॥ २४ ॥

---

1. A²M¹⁻²T प्रथमोच्चं for प्रथमोच्चस्य
2. वि. om. अभिसोमापुनानयोः; A²T प्रथमोच्चं for प्रथमोच्चस्य; A¹ om. प्रथमोच्चस्य
3. KMy¹ चतुर्थम् for चतुर A² om. आद्यं पिबासोमाम्; A¹ after आपद्यते adds: ब्राह्मणा ही इत्यत्र तृतीयं पर्व पिबा सोमाऽ२म्
4. वि. om. भवति; K वदक्षतः भा. वदक्षसावात् M¹⁻² वाक्षसः for वरक्षसः
5. भा. इय, M¹⁻² मादीय for दिय; B⁴ after इति adds: पिबा सो३मा३३३म्; PV² om. ब्राह्मणात्...इति
13. S² पाष्ठौहोत्तरयोः for पाष्ठौहे उत्तरयोः
15. KS² द्विवचनात् for द्विवचनम्

भा. पाष्टौहे (ऊ. द. ६०) वृणीद्वयं योनौ पर्वभेदं कृत्वा । **गावोमिमम्** एका । तिथेनव इति द्वितीया । उत्तरयोस्तौत्रीययोः उत्तरा या **वृणी तद्विविद्ढा**-मापद्यते । एवं द्विवचनं द्रष्टव्यम् । द्वितीयायां **स्यमातर** इति । तृतीयायां **मवि-श्वता** इति ॥ २३ ॥

दी. तिस्रोवाचाऽ२उदीरताइ (ऊ. द. ६०) इति **पाष्टौहे** योनौ वृणीद्वयं पर्व-भेदं कृत्वा । गावोमिमम् एका वृणी । तिथेनवः द्वितीया वृणी । उत्तरयोः स्तोत्रीययोः या द्वितीया वृणी सा **तद्विविद्ढामापद्यते** । एवं द्विवचनं द्रष्टव्यम् । द्वितीयायां स्तोत्रीयायां स्यमातरः । तृतीयायां मविश्वताः । एवं तद्विविद्ढा भवति । जारा । वोधाऽ२ (ग्रा. १. ५. १५. १) इति साम्नि **तद्विद्ढाइ** इति पर्व भवति ॥ २३ ॥

प्रमँहिद्वितीयायां वाघाद्वीर्योदेवाम् ॥ २५ ॥

त्रि. प्रमंहि-द्वितीयायां वाघाद्वीर्योनिदृष्टा **योदेवामापद्यते** । **ऊर्ध्वऊषुणायाम्** (ग्रा. २. ६. ५७. १) **वाघाद्वीऽ२ः** । **ववत्यन्नर्यायां** (ग्रा. १२. १२. ४६६. १) **योदेवास्याऽ२** ॥ २४ ॥

भा. **प्रमंहिष्टीय**–(ऊ. द. ६५) द्वितीयायां स्तोत्रीयायां **वाघाद्वी**स्त्र्यक्षरा योनि-दृष्टा **योदेवामापद्यते** । **ववत्यन्नर्य**–(ग्रा. १२. १२. ४६६. १) मित्यत्र ॥ २५ ॥

दी. **प्रमँहाऽ३इष्टायगायता** (ऊ. द. ६५) इति साम्नि **द्वितीयायां वाघाद्वी-ऽ२ः** इति त्र्यक्षरं योनिदृष्टं पर्व **योदेवामापद्यते** । **आवँसाताऽ२इ** एवं **योदेवास्या** भवति । ऋताऽन्ने इति त्र्यक्षरं योनौ पर्व भवति । **ऊर्ध्वऊषुणाऽ३ऊताऽ२३४याइ** (ग्रा. २.

---

3. PV[2] स्यमातरम् for स्यमातरः

6. L[1] द्वितीयया for द्वितीया

11. A[2] प्रमंहिष्ठी, M[1-2]T प्रमंहिष्ट for प्रमंहि; A[2]M[1-2] वाघद्विः T वाघन् for वाघाद्वीः

16. My[2] प्रमंहिष्टीये for साम्नि

17. My[2-3] अक्षरं for त्र्यक्षरं;E इति for एवं

६. ५७. १) इति साम्नि वाघाद्धीऽ२ः इति पर्व भवति । ताऽ२३४वत्यन्नाऽ५रियन्नृताउ (ग्रा. १२. १२. ४६६. १) इति साम्नि योदेवास्याऽ२ इति पर्व भवति ॥ २५ ॥

तद्विविद्ढावृणीमहाम् ॥ २६ ॥

वि. **तस्यां** प्रमंहिष्ठीय-(ऊ. द. ६५) द्वितीयायां तद्विविद्ढावृणीमहामापद्यते **बृहतेशू** इति **तद्विद्ढा** । **मघवावाइ** । इत्येषा वृणीमहा ।। २६ ॥

भा. प्रमंहिष्ठीय (ऊ. द. ६५) एव द्वितीयायां योनिदृष्टा तद्विविद्ढावृणीमहामापद्यते । **बृहतेशू** एषा तद्विविद्ढाद्वितीयायां **मघवा** इति वृणीमहाम् ॥ २६ ॥

दी. **प्रमंऽहाऽ३इष्ठायगायता** (ऊ. द. ६५) इति प्रमंऽहिष्ठीये द्वितीयायां योनिदृष्टा **तद्विविविद्ढा वृणी**महामापद्यते । **बृहतेशूक्राऽ३ज्ञोऽ२** इति योनौ तद्विविद्ढा भवति । द्वितीयायां **मघवाइ** इति **वृणी**महाइ भवति । जारा (ग्रा. १. २. १५. १) इति साम्नि तद्विविद्ढापर्व भवति । **अग्निं दूतम्** (ग्रा. १. १. ३. १) इति साम्नि **वृणी**महाइ इति पर्व भवति ॥ २६ ॥

वात्सप्रे वृधन्तादेः कर्षणप्राप्तस्याकर्षणम् ॥२७ ॥

वि. त्रैष्टुभे **वात्सप्रे सोमःपवतायां** (ऊ. द. ७९) यस्यादिः पूर्वा **वृधन्ता** तस्य पर्वणः **काम्पात्वात्** कर्षणप्राप्तिं वक्ष्यत्युपरिष्टात् । इदंसंघाते पदान्ते **काम्पापदादौ** च दीर्घ इति । एवं कर्षणप्राप्तिः । **तस्य** कर्षणप्रतिषेधः ।। २७ ॥

भा. त्रैष्टुभे **वात्सप्रे सोमःपवतायां** (ऊ. द. ७९) **वृधन्तादेः** पर्वणः।वृधन्ता आदौ यस्य पर्वणः तद् वृधन्तादिपर्व । वृधन्तात् परस्येत्यर्थः । तच्च पर्व **काम्पा** ।

3. वि.; E before तद्विविद्ढा add: तस्यां
5. A^2M^1-^2T om. इति
6. P प्रमंहिष्ठीयायां for प्रमंहिष्ठीय एव; V^2 om. प्रमंहिष्ठीय...वृणीमहाम् (L. 7)
12. EL^1My^{2-3} महावात्सप्रे for वात्सप्रे
14. S^1 इति for इदं
16. B^4 त्रिष्टुभि for त्रैष्टुभे

तस्य काम्पात्वात् कर्षणप्राप्तिः। वक्ष्यत्युपरिष्टादिदंसंघाते पदान्ते काम्पापदादौ च दीर्घ इति। एवं कर्षणप्राप्तिः। तस्य कर्षणप्रतिषेधः ॥ २७ ॥

२र र र १ २ र १

दी. हाउहाउहाउ। ओ। होहोवा (त्रिः)। सोमः पवा (ऊ.द.७९) इति महावात्सप्रे वृषन्तादेः काम्पापर्वणः कर्षणप्राप्तस्य प्रतिषेधः। कर्षणं न भवति। तेजनि। एवं भवति ॥ २७ ॥

२१

ऊतएका च द्वितीयम् ॥ २८ ॥

वि.&भा. एतस्मिन्नेव वात्सप्रे (ऊ. द. ७९) ऊतएका द्वितीयस्वरमापद्यते ॥

र १

दी. सोमः पवा (ऊ. द. ७९) इति वात्सप्रे ऊतएकामिति पर्व द्वितीयस्वरमापद्यते। तामवीनाम् ॥ २८ ॥

२ र र र

अभ्यासश्च ॥ २९ ॥

वि. वात्सप्रे अभ्यासश्च द्वितीयस्वरमापद्यते ॥ २९ ॥

२ र र र

दी. ऊतएकायाः अभ्यासश्च द्वितीयं स्वरमापद्यते। मतीनाम्। मतीनाम् ॥ २९ ॥

क्षौद्रे तु वृणी प्रथमम् ॥ ३० ॥

वि. क्षौद्रे वात्सप्रे (ऊ. क्षु. ८९८) वृणीमहा प्रथमस्वरमापद्यते। वृषन्ता वृणी ॥ ३० ॥

भा. क्षौद्रे वात्सप्रे पुरोजित्यां (ऊ. .क्षु ८९८) प्रथमम्। सैव वृषन्ता सैव वृणी। सा प्रथमं स्वरमापद्यते ॥ ३० ॥

---

1. B[4] उत्कमधस्तात् for वक्ष्यत्युपरिष्टात्; P om. वक्ष्यति....कर्षणप्राप्तिः

7. भा. तस्मिन् for एतस्मिन्

12 ,L[1] ०एका for ०एकायाः

दी. क्षौद्रे तु । क्षौद्रे पर्वणि भवे वात्सप्रे । हाउहाउहाउ । ओ । हो होवा(त्रिः) । पुरोजिताइ (ऊ क्षु. ८९८) इति वात्सप्रे सुतायमा । अपश्वानम् । सखा योदी । इत्यादिवृणीमहापर्व प्रथमस्वरमापद्यते ॥ ३० ॥

अपुरोजि ॥ ३१ ॥

वि. तस्मिन्नेव वात्सप्रे (ऊ. क्षु. ८९८) पुरोजितीत्यस्मिन् वृणी प्रथमस्वरं नापद्यते । द्वितीयस्वरादारम्भः ॥ ३१ ॥

भा. तस्मिन्नेव क्षौद्रे (ऊ. क्षु. ८९८) पुरोजितीत्यत्र या वृणी तस्याः द्वितीयस्वरापत्तिर्भवति ॥ ३१ ॥

दी. अकारः प्रतिषेधे । (ऊ. क्षु. ८९८) इति वृणीमहापर्व न प्रथमस्वरमापद्यते ॥

ऊतएकायाश्च त्र्यक्षरं साभ्यासम् ॥ ३२ ॥

वि. तस्मिन्नेव ऊतएकायास्त्र्यक्षरमभ्याससहितं प्रथमस्वरमापद्यते । परिशेषादूतएकायाः प्रथमं द्वितीयस्वरस्थमेव भवति ॥ ३२ ॥

भा. ऊतएकायाश्च त्र्यक्षरं साभ्यासं प्रथमस्वरमापद्यते । वृणीवो३एतदक्षरम् । ऊतएकाया आद्यमिति । आद्यत्वाद् द्वितीयस्वरस्थमेव भवति । अन्धस इति त्र्यक्षरोऽभ्यासः प्रथमं स्वरमापद्यते ॥ ३२ ॥

दी. ऊतएकापर्वणि अन्धस इति त्र्यक्षरं साभ्यासं अभ्यासेन सह वर्तमानं प्रथमस्वरमापद्यते । अन्धसो । धसो । धसः । एवं प्रथमस्वरः ॥ ३२ ॥

---

6. M^{1-3} ०स्वरारम्भः S^{1} ०स्वरादाभावः for ०स्वरादारम्भः

10. My^{3} अक्षरं for त्र्यक्षरं

11. A^{3} एकायां for एकायाः; M^{1-3} संहितं for सहितं; A^{3} ०शेषायाः for ०शेषात्

12. PV^{2} स्वरत्वम् for स्वरस्थम्

16. My^{2-3} अक्षरं for त्र्यक्षरं

मानवयोः पूर्वे चदक्षसा पातिःकवीम् ॥ ३२ ॥

वि. पूर्व मानवे (ऊ. सं. ३६३) द्वितीये पादे द्वितीयं **चदक्षसा** । तृतीये पादे उपान्त्यं यत् पर्व सा **शुर्मदा** । एवं स्थिते ब्रवीति । ऊहे **चदक्षसा पतिःकवी**मापद्यते । शग्ध्यूष्वा-(ऊ. स. ७१०)दिषु ॥ ३२ ॥

भा. पूर्वे च मानवे (ऊ. सं. ३६३) द्वितीये पादे द्वितीयं चदक्षसापर्व पतिः-कवीमापद्यते । पताऽइ:काऽ१वीऽ२: । चा३दक्षासा३इ । इत्येवमापद्यते **चदक्षसा**-पर्व । तृतीये पादे उपान्त्यं यत् पर्व सा **शुर्मदा** । एवं स्थिते ब्रवीति । उह-गीतौ चदक्षसा **पतिःकवी**मापद्यते । शग्ध्यूष्वादिषु ॥ ३२ ॥

दी. पूर्वोत्तरयोर्मानवयोर्विशेष उच्यते । **इन्द्रक्रतुम्** । **नशभाऽ२३४रा** (ऊ. सं. ३६३) इति **पूर्वे** मानवे द्वितीये पादे द्वितीयं **चादक्षसाऽ२इ** इति पर्व पतिःकवीमापद्यते । **पताइःकाऽ१वीऽ२:** । **भियोयाऽ१थाऽ२** इत्येवं भवति । **पर्यो** । **होइबाजा** (ग्रा. १. ३. ३०. १) इति साम्नि **पताइःकाऽ१वीऽ२:** इति पर्व भवति ॥ ३२ ॥

शुर्मदा चैकर्चे लुप्तोपान्त्या ॥ ३३ ॥

वि. **एकर्चे** मानवे **मन्द्रयाये**-(ऊ. सं. ३५५)ति या **शुर्मदा** व्याख्याता तस्या उपान्त्यस्यान्त्यात्पूर्वस्य लोपः ॥ ३३ ॥

---

1. A^2 before मानवयोः adds: माविवि;, M^{1-3} मावि and T महर्वि; T मानानवयोः for मानवयोः
2. $A^2M^{1-3}TS^1$ after चदक्षसा add: पतिः
3. $My^1KS^2A^2$ ब्रवीमि for ब्रवीति; A^2 om. पतिः कवीम्
5. P द्वितीये for द्वितीयं; A^1 trans पर्व after द्वितीयं; PV^2 om. पर्व
6. A^1 after आपद्यते adds: चदक्षसापर्व
14. EV^2P लुप्तोपान्त्यः for लुप्तोपान्त्या

भा. एकर्चे पूर्वे मानवे मन्द्रयाये-(ऊ. सं. ३५५)ति या शुर्मदा व्याख्याता तस्याः उपान्त्यमक्षरं लुप्यते। आदिलोपे प्राप्ते उपान्त्यस्य अक्षरस्य लोपः ॥ ३३ ॥

दी. मन्द्रयाया (ऊ. सं. ३५५) इत्येकर्चे च पूर्वे मानवे तृतीये पादे शुर्मदाया इति पर्वण उपान्त्यमक्षरं लुप्यते। योनौ ण्वा ऋतजाऽ३। ऊहे गोमानूगो ऽ३। अस्योपान्त्यमक्षरं लुप्तं भवति ॥ ३३ ॥

उत्तरे चैतस्यामेव ॥ ३४ ॥

वि. एतस्याम् ऋचि उत्तरे मानवे (ऊ. द. ८५) शुर्मदे लुप्तोपान्त्ये भवतः। उत्तरे मानवे तृतीये पादे आद्ये द्वे पर्वणी शुर्मदे भवतः ॥ ३४ ॥

भा. उत्तरे च मानवे एतस्यामेव मन्द्रयायां (ऊ. द. ८५) शुर्मदा लुप्तोपान्त्या भवति। उत्तरे मानवे योनौ तृतीयपादोपान्त्यपर्व शुर्मदा ॥ ३४ ॥

दी. मन्द्रयाया इत्येतस्यामेव स्तोत्रीयायाम्। होवाइ। मन्द्रयायातिधारया। होवाइ। (ऊ. द. ८५) इत्युत्तरे मानवे तृतीये पादे शुर्मदयोः उपान्त्यमक्षरं लुप्यते। योनौ दाइदेऽ१थक। ण्वाऋतजाऽ३१ इति द्वे शुर्मदे। ऊहे आनूपे। गोमान् गोऽ६१। अत्रोपान्त्यमक्षरं लुप्यते ॥ ३४ ॥

अन्यत्र शुर्मदायाः ॥ ३५ ॥

पूर्वस्या उपान्त्यं नीचम् ॥ ३६ ॥

वि. मन्द्रयाया अन्यत्रोत्तरे मानवे तृतीये पूर्वस्याः शुर्मदायाः अन्त्यात् पूर्वमक्षरं नीचं भवति। आश्वयेव ॥ ३५–३६ ॥

भा. उत्तरे एव मानवे अन्यत्र मन्द्रयायाः सोमउष्वादिषु शुर्मदा अलुप्तोपान्त्या। लोपो न भवतीत्यर्थः ॥ ३५ ॥

---

11. My[2-3] om. इति

12. शुर्मदायाः for शुर्मदयोः

17. A[2]S[1] om. मन्द्रायायाः; M[1-2] trans. मन्द्रायाया अन्यत्र after मानवे and again repeat the sutra and the commentary; M[1-2] om. तृतीये

19. PV[2] उष्वदिशुर्मदाय T: for उष्शुदिषु शुर्मदा

20. भा. no bhasya on sutra 36 is available

दी. मन्द्रयायातोऽन्यत्र अन्यस्मिन सोमउष्वा-(ऊ. द. ८५)ग्युत्तरे मानवे (ऊ. द. ८५) शुर्मदायाः । आश्वयेव । हारितायाऽ३१ । अतोपान्त्यमक्षरं न लुप्यते ॥ ३५ ॥

होवाइ । सोमउष्वाणस्सोतृभिः । होवाइ (ऊ. द. ८५) इत्युत्तरे मानवे पूर्वस्या शुर्मदायाः उपान्त्यमक्षरं नीचं भवति । आश्वयेव । योनौ उपान्त्यमुच्चं भवति ॥ ३६ ॥

ध्यूरश्वत्वाष्ट्रीसाम्नोश्चदक्षसा पतिःकवीम् ॥ ३७ ॥

वि. वाध्यूरश्वे ईङ्खयन्ती-त्वाष्ट्रीसाम्नि च चदक्षसा पतिःकवीमापद्यते । द्राते-ऽ१साखाऽ२ । दायाइताऽ१वाऽ३इ । ईङ्खयन्त्याम् । ऊपाऽ१साताऽ२इ । तयाइहा ऽ१राऽ२इ । परिव्राजपतिः कविरिति ॥ ३७ ॥

भा. वाध्यूरश्वे सोमउष्वादिषु (ऊ. द. ८६) गायत्रीत्वाष्ट्रीसाम्नि च पवस्वदक्ष-साधनायां (ऊ. अ. ६३३) चदक्षसा योनिदृष्टा ऊहगीतौ पतिःकवीमापद्यते । वाध्यूरश्वे योनौ द्वितीयपादद्वितीयं पर्व चदक्षसा । द्रा२ते२सा२खा२३ (ग्रा. ७५. २७७. १) इति । त्वाष्ट्रीसाम्न्यपि द्वितीयपादद्वितीयमेव पर्व चदक्षसा । ऊ२पा२सा२ताइ इति ॥ ३७ ॥

दी. सोमाः सोमाः । उष्वाणाऽ३ःसोतृऽ१भीऽ२ः (ऊ. द. ८६) इत्यादि-वाध्यूरश्वे योनिदृष्टा चदक्षसा पतिःकवीमापद्यते । द्वितीयायां पताइःकाऽ१वीऽ२ः । तिधाराऽ१याऽ२ । इत्येवं भवति । योनौ अश्वी अश्वी (ग्रा. ७. ५. २७७. १) इति साम्नि द्रातेऽ१साखाऽ२ । इति चदक्षसा पर्व भवति । पवस्वादा । क्षसाऽ२धानाऽ२ः (ऊ.अ.६३३) इति त्वाष्ट्रीसाम्नि योनिदृष्टा चदक्षसा पतिःकवीमापद्यते । तयाइहाऽ१राऽ२इ । इत्येवं भवति । ईङ्खयन्तीः (ग्रा. ५. ७. १७५. १) इति साम्नि ऊपाऽ१साताऽ२इ इति चक्षसापर्व भवति ॥

---

1. My[2] मानवोत्तरे for उत्तरे मानवे

7. S[1]M[1-2] om. च

10. B[4] योनिदृष्ट' ऊहगीतौ चदक्षसा पतिःकवीमापद्यते, A[1] योनिदृष्टा पतिःकवीमापद्यते ऊहगीतौ for °दक्षसाधानायां चदक्षसा योनिदृष्टा ऊहगीतौ पतिः कवीमापद्यते

17. E om. भवति

रन्ध्रोत्तरे शुर्मदोत्तरयोर्जातःपृच्छाम् ॥ ३६ ॥

वि. औक्ष्णोरन्ध्रोत्तरे (ऊ. द. १०३) तृतीयपादाद्यं पर्व **शुर्मदा**। **रायिंपिशा॰३**। एषा **उत्तरयोर्जातःपृच्छामापद्यते**। **पुनानोवा॰३**। **आबुन्दं वृत्राहादद** (ग्रा. ६. ११. २१६. १) **जातः पृच्छा॰३त्** ॥ ३६ ॥

इति फुल्लसूत्रविवरणे चतुर्थप्रपाठकस्य षष्ठः खण्डः ॥ ६ ॥

भा. उत्तरे औक्ष्णोरन्ध्रे (ऊ. द. १०३) तृतीयपादाद्यं पर्व योनौ **शुर्मदा रायिंपिशा३३**। एषा **उत्तरयोः** स्तोत्रीययोः जातःपृच्छामापद्यते। जातःपृच्छा **आबुन्दं वृत्र** (ग्रा. ६. ११. २१६. १) इत्यत्र। कोऽनयोर्विशेष इति। उच्यते। शुर्मदायाः द्वितीयमक्षरमभिगीयते। जातःपृच्छाया यथर्चं भवतीति एष विशेषः। पुनानोत्रा एका। द्वितीया **देवाना॰सो** इति ॥ ३६ ॥

इति पुष्पसूत्रभाष्ये चतुर्थस्य प्रपाठकस्य षष्ठी खण्डिका ॥ ६ ॥

दी. मृज्यमानस्सुहस्त्या। **समुद्रेवोवा** (ऊ. द. १०३) इत्यौक्ष्णोरन्ध्रोत्तरे **उत्तरयोः** स्तोत्रीययोः **शुर्मदा-पर्व जातःपृच्छामापद्यते**। योनौ **रायिंपिशा॰३**। एषा शुर्मदा। द्वितीयायां **पूनानोवा॰३**। तृतीयायां **दाइवाना॰सो॰३**। एवं जातःपृच्छा-पर्व भवति। **आबुन्दं वृ** (ग्रा. ६. ११. २७६. १) इति साम्नि **जातः पृच्छा॰३त्** इति पर्व भवति। अत्र कोऽनयोर्विशेष इति। उच्यते। शुर्मदाया द्वितीयमक्षरमभिगीतं भवति। जातःपृच्छाया यथर्चं भवतीत्येष विशेषः ॥ ३६ ॥

इति फुल्लभाष्ये अष्टमप्रपाठकस्य षष्ठः खण्डः ॥ ६ ॥

सप्तमः खण्डः

शने प्रेष्ठं वाजुहोताम् ॥ १ ॥

वि. गायत्रीसामौशने प्रेष्ठं वाः (ऊ. द. १७१) योनिदृष्टा अन्यत्र **आजुहोताम्** आपद्यते । **कविमिवा** ॥ १ ॥

भा. गायत्र्यौशने प्रेष्ठं वा (ऊ. द. १६१) योनिदृष्टा उत्तरादि **आजुहोता-** मापद्यते । मध्ये द्वितीया भवति ॥ १ ॥

दी. प्रेष्ठंवाः । अताऽ२३ इथीम् (ऊ. द. १७१) इति **गायत्र्यौशने** योनि-दृष्टा प्रेष्ठंवा आजुहोतामापद्यते । द्वितीयायां **कविमिवा** । तृतीयायां **तुवंयवाइ** । एवमाजुहोता भवति ॥ १ ॥

अयोनौ ॥ २ ॥

वि.&भा. योनौ तु प्रतिषेधः ॥ २ ॥

दी. योनौ **आजुहोता** इति पर्व न भवति । **प्रेष्ठंवाः** (ग्रा. १. १. ६. १) एवं भवति ॥ २ ॥

उष्णिक्षु च क्रूलीये ॥ ३ ॥

वि. उष्णिक्षु रोहितकूलीये (ऊ. द. २१७) योनिदृष्टा **प्रेष्ठंवाजुहोता**मापद्यते **इन्द्रमच्छा** ॥ ३ ॥

भा. **रोहितकूलीये** (ऊ. द. २१७) योनिदृष्टा **प्रेष्ठंवा** इन्द्रमच्छायाम् आ-जुहोतामापद्यते ॥ ३ ॥

दी. **इन्द्रमच्छा । सुताइमे** (ऊ. द. २१७) इत्युष्णिक्षु **रोहितकूलीये** योनि-दृष्टा प्रेष्ठंवाआजुहोतामापद्यते । **इन्द्रमच्छा** । एवमाजुहोता भवति । **योनौ** **एन्द्रसा** इति पर्व प्रेष्ठंवा भवति ॥ ३ ॥

---

2. My[1] इन्द्रमच्छा for कविमिवा
7. My[2] after °होता ins. पर्व
8. A[2]M[1-3]TV[1]My[1] om. अयोनौ ॥ ....प्रतिषेधः ॥
13. T om. उष्णिक्षु... इन्द्रमच्छा ॥
14. M[1-3]T om. इन्द्रमच्छा

वैश्वमनसे राथीतमा सख्यइन्दाम् ॥ ४ ॥

वि. **वैश्वमनसे** योनिदृष्टा **राथीतमा** सख्यइन्दामापद्यते । **साखायस्तोऽ२ । आइन्दोधाराऽ२** । **राथीत**मायास्तृतीयमक्षरं नीचम् । **सख्याइन्दा**यास्तृतीयमक्षरमुच्चम् । एष विशेषः । **रथीतमं रथीनां** तृतीये (ग्रा. ९. १२. ३४३. ३) **सख्यइन्दो दिवेदिवे** (ग्रा. १५. ५. ५१६. ४) चतुर्थे ॥ ४ ॥

भा. **वैश्वमनसे** द्वितीयपादादौ **राथीतमा पवस्वदेवायां** (ऊ. द. १९.७) **सख्य-इन्दा**मापद्यते । एतयोः को विशेषः । राथीतमायाः तृतीयमक्षरं नीचम् । **राथीतमा ३३ । ओवो३सख्य इन्दा**यास्तृतीयमुच्चम् । सा३ख्य इन्दो३३ । तवाहꣳसोम (ग्रा. १५. ५. ६१६. ४) चतुर्थे । एव विशेषः ॥ ४ ॥

दी. **पवस्वदेववीताऽयाइ** (ऊ. द. १९७) इति वैश्वमनसे द्वितीयपादादौ **राथीतमा**-पर्व **सख्यइन्दा**मापद्यते । **आइन्दोधाराऽ२** इति सख्यइन्दो-पर्व भवति । **एतोन्विन्द्रँस्तवाऽ६मा** (ग्रा. ९. १२. ३८७. १) इति साम्नि योनौ **साखायस्तोऽ२** । इति **राथीतमापर्व** । **इन्द्रंविश्वाअवीवृधन्** (ग्रा. ९. १२ ३४३. ३) इति तृतीये साम्नि **राथीतमाऽ२म्** इति पर्व भवति । **तवाहँसोमरौ । होऽ५रणा** (ग्रा. १५. ५१६. ४) इति साम्नि **साख्यइन्दो** इति पर्व भवति ॥ ४ ॥

वंशीये गायन्त्याद्यायामच्छाहोतारंव्यौ चतुरक्षरशः ॥ ५ ॥

वि. **उद्वंशीये** (ऊ. द. २०८) **गायान्त्याद्यायामच्छहोतारंवी** च चतुरक्षरैर्गेये भवतः । **ब्रह्माणस्त्वाऽ२होऽ१इ । अग्निंवो** (ग्रा. १. ३.२१. २) द्वितीयायामच्छान-प्त्रेशतक्राऽ२३ताऽ२ । **अग्निंदूतायां** (ग्रा. १. १. ३. १) **होतारं विश्ववेदसम्** ॥

---

1. M[1]-[2] इन्द्रमच्छा for इन्दाम्
2. T before वैश्व adds: इन्द्रमच्छा
4. A[2]M[1]-[2]TS[1] तृतीयायां for तृतीये
13. E om. योनौ
16. A[2]M[1]-[2]I उद्वंशीये for वंशीये; A[2]TP आच्छा for अच्छा

भा. उद्वंशीये (ऊ. द. २०८) गायन्त्या(?)ायामच्छ होतारंन्यौ चतुरक्षरशो भवतः । अग्निर्वोवृधन्तायां (ग्रा. १. ३. २१. १) प्रथमे अच्छाहोतारंवी । अग्निदूतायां (ग्रा. १. १. ३. १) विशेषार्थं चतुरक्षरश इत्युक्तम् । ब्रह्माणस्त्वाहो३अच्छा शतक्रा३ता३उहोता ॥ ५ ॥

दी. गायन्तित्वागायत्रिणआ (ऊ. द. २०८) इत्युद्वंशीये आयायाम् अच्छा ऽ२हो ऽ१इ । होताराऽ२३म्वी । इति पर्वद्वयं चतुरक्षरं भवति । ब्रह्माणस्त्वाऽ२होऽ१इ इत्यच्छापर्व । शतक्राऽ२३ताऽ२उ । इति होतारंवीपर्व । अग्निवाऽ६ए (ग्रा. १. ३. २१ २) इति द्वितीये साम्नि अच्छाऽ२होऽ१इ इति पर्व भवति । अग्निंदूताम् (ग्रा. १. १. ३. १) इति साम्नि होताराऽ२३म्वी इति पर्व भवति । अत्र सिद्धोपन्यासो विशेषविवक्षया ॥ ५ ॥

परयोस्त्र्यक्षरेऽच्छा पञ्चाक्षरे होता ॥ ६ ॥

वि. गायन्त्युत्तरयोस्त्र्यक्षरेऽच्छा गेया । पञ्चाक्षरे गेया होता । तदिन्द्राऽ२ होऽ१इ । अर्थंचेताऽ२३ताइ ॥ ६ ॥

भा. गायन्त्युत्तरयोः (ऊ. द. २०८) अच्छा त्र्यक्षरा भवति । होता पञ्चाक्षरा भवति । तदिन्द्राहोइ । अर्थंचेताऽ२३ताइ ॥ ६ ॥

दी. गायन्तित्वागायत्रिणआ (ऊ. द. २०८) इत्युद्वंशीये उत्तरयोः स्तोत्रीययोः त्र्यक्षरे अच्छापर्व भवति । तदिन्द्राऽ२होऽ१इ । आथानाऽ२होऽ१इ । पञ्चाक्षरे होता पर्व भवति । अर्थंचेताऽ२३ताइ । इन्द्रसोमाऽ२३पाः ॥ ६ ॥

द्व्यक्षरेऽन्यत्र ॥ ७ ॥

वि. गायन्तित्वात (ऊ. द. २०८) अन्यत्र उद्वंशीये द्वाभ्यामच्छाहोतारंव्यौ गेये भवतः । विदाऽ२होऽ१इवाऽ२३र्धा ॥ ७ ॥

---

20. A[3] पञ्चभ्यामच्छावाके for द्वाभ्यामच्छा; M[1]-[3] द्वाभ्यां द्वाभ्यां for द्वाभ्यां

भा. आत्वाविशन्त्विन्दव सयति सूत्रेण प्रोधाशप्रथमः । परिवायोगः सुतेष्वित्यत्र अन्योर्द्यक्षरे अच्छाहोतारंव्यौ भवतः । विदा३हो३इवार्घा ।। ७ ।।

दी. गायन्तित्वातो(ऊ. द. २०८)ऽन्यत्र अन्यस्मिन् उद्वंशीये । आत्वाविशन्त्विन्दवआ (ऊ. स. ७१९) इत्यादि उद्वंशीये । द्व्यक्षरे अच्छापर्व । द्व्यक्षरे होतारंवीपर्व भवति । नत्वाऽ२॰होऽ१इ । आऽ२२इन्द्रा । एवमादीनि ।। ७ ।।

सुज्ञाने निधनमेकिनेस्वरम् ।। ८ ।।

वि. सुज्ञाने (ऊ. सं. २३०) निधनमेकिनेस्वरमापद्यते । कनिक्रदादिरेकारः क्रुष्यते । उपशब्द उच्चैर्भवति । मार्गीयवे (ग्रा. ३. १. ११५. ६.) निधनम् एऽ३ । किनेऽ२३४५ [इति] ।। ८ ।।

भा. सुज्ञाने (ऊ. स. २३०) निधनम् उपा एकिनेस्वरं भवति । कनिक्रदद एकारः क्रुष्टो भवतीत्यर्थः ।। ८ ।।

दी. इन्द्रमच्छा । सुताइमाइ (ऊ. सं. २३०) इति सुज्ञाने एऽ३ । किनेऽ२३४५ इति स्वरं निधनं भवति । समप्सुजिदेऽ३उपाऽ२३४५ । एवमेकिनेस्वरम् ।।

वाचःसाम्नि स्वासूत्तमायां तृतीयपादादौ

चदक्षसोतद्विषाम् ।। ९ ।।

वि. स्वासु वाचःसाम्नि (ऊ. सं. २५९) उत्तमायां तृतीयपादादौ चदक्षसा उतद्विषामापद्यते । राजादाऽ१इवाऽ२३ः ।। ९ ।।

भा. वाचःसाम्नि (ऊ. सं. २५९) योनिदृष्टा चदक्षसा स्वासूत्तमायां स्तोत्रीयायां तृयपादतीादौ उतद्विषामापद्यते । राजा३दा३इवा३ ।। ९ ।।

---

1. भा. from. सयति to सुतेष्वित्यत्र is corrupt
4. EM[4] after पर्व add: भवति
6. M[1-2] निधनं तमेकिने निधनं स्वरं for निधनमेकिनेस्वरम्
7. A[2] एकाक्षरः for एकारः
11. ,[2] कददेकारः P कदद एकारः for कदद एकारः
13. My[2] om. समप्सु ....स्वरम्

दी. आसोतापा । हो । रिपिश्वताऽ६ए (ऊ. सं. २५९) इति वाचःसाम्नि स्वासु तृतीयायां स्तोत्रीयायां तृतीयपादस्यादौ चादक्षसाऽ२इ । वानप्राक्षाऽ२३म् । इति पर्व उतद्विषामापद्यते । उताद्वाऽ१इषाऽ२ः । राजादाऽ२इत्राऽ२ः । एवं भवति ॥

लौशयोः पूर्वे वारवन्ता तुविशुष्माम् ॥ १० ॥

वि.&भा. अत्र किं प्राप्तम् । ओभूतं च (ऋक्तन्त्र–७०) इत्यसंनिकर्षः यिच-प्रत्यये संनिकृष्यत इति प्रोपूर्वयोरिति संनिकर्षः । ततो वारापत्तिः । सूत्रेण प्रोवारां प्रथम-परिघः । अत आह लौशयोः पूर्वे वारवन्ता तुविशुष्मामापद्यते इति । प्रोआयासीत् अश्वन्नत्वायां वारवन्ता । त्रिकद्रुकायां तुविशुष्मा ॥ १० ॥

दी. लौशयोर्विशेष उच्यते । प्रो अयाऽसीत् । इन्दुरिन्द्राऽ२३ (ऊ. सं.-२७३) इति पूर्वे लौशे वारावाऽ२३४न्तां योनौ प्रोयाऽ२३४सीत् (ग्रा. १६. ९. ५५७. १) इति पर्व तुविशुष्मामापद्यते । तुविशुष्मः । प्रोअयासीत् । एवं भवति । अश्वन्नत्वा औहोहाइ (ग्रा. १. २. १७. ३) इति साम्नि वारावाऽ२३४न्तां इति पर्व भवति । ओइत्रिका । द्रुकाइ (ग्रा. १२. १२. ४५७. १) इति साम्नि तुवीशुष्मः इति पर्व भवति ॥ १० ॥

उत्तरे चतुर्थोच्चं द्वितीयम् ॥ ११ ॥

वि. उत्तरे लौशे चतुर्थोच्चं पर्व द्वितीयं स्वरमापद्यते । असाविसोम-(ऊ. सं. २८५) गोवित्पवस्वयोः (ऊ. सं. ३०८) । वदस्मो अमिगा अचि ॥ ११॥

---

2. My^{2} चादक्ष । शनप्र इति for चादक्षसाऽ२३····इति
4. KS^{3} after लौशयोः adds: च
5. A^{3}M^{1}-^{2}T औहोवायां for ओभूतं; S^{1} om. अत्र...शुष्ममा० (l. 8); A^{3}M^{1}-^{2}T इति च for यिच
6. M^{1}-^{3} सूरेण for सूत्रेंग; KS^{3} प्रथम इति A^{2}M^{1}-^{3} वृष्वरिवेयोघः T वृष्वरियग्रोर्घः for प्रथमपरिधः
7. भा. om. प्रो अयासीत्...शुष्मा
8. M^{1}-^{2} वन्तीये for वन्ता; A^{3}M^{1}-^{3}TS^{1} add: च before तुवि

भा. उत्तरे लौशे चतुर्थोच्चं द्वितीयं स्वरमापद्यते । द्वितीयपादान्ते उपोत्तमं पदं चतुर्थोच्चम् । असाविसोमगोविन्प्रवस्वयोः वदस्मो अभिगा अचिक्रदाधा । इन्दो भुवनेष्वर्पिताः ॥ ११ ॥

दी. असाविसोमोअरुषोवृषा (ऊ. सं. २८५) इत्याद्युत्तरे लौशे चतुर्थोच्चं पर्व द्वितीयं स्वरमापद्यते । चतुर्थस्वरपर्यन्तमुच्चस्वरो यस्य पर्वणः तच्चतुर्थोच्चं पर्व । राजेऽ३१२३४ । वदस्मोअभिगाअचि । नोवारमत्येष्य । अत्र द्वितीयस्वरो भवति । योनौ प्रोयासीदिन्दुरिन्द्रस्यनिः (ग्रा. १६. ९. ५५७. २) इति साम्नि । सख्युर्न प्रमिनातिसम् । इवयुवतिभिःसम । इदं चतुर्थोच्चं पर्व भवति । क्रदात्क्रदात् । अत्रोदूहो भवति ॥ ११ ॥

हस्वारूपयोश्च ॥ १२ ॥

वि. हस्वा-(र. क्षु. १६३) पश्वनिधनवैरूपयोश्च (र. क्षु. १७४) द्वितीयपादादौ चतुर्थोच्चम् । शतंभूमीरुत । एतदूहगीतौ अभिसोमादिषु । यद्यावोत्तरयोश्च द्वितीयस्वरमापद्यते । पवन्तेमदियम् । एवम् १२ ॥

भा. हस्वायां च पश्वनिधनवैरूपान्तयोः द्वितीयपादादौ चतुर्थोच्चम् । शतंभूमीरुतस्यो३वा३ एतत् ऊहगीतौ अभिसोमादिषु । यद्यावोत्तरयोश्च द्वितीयं स्वरमापद्यते । पवन्तेमदियम् । एवम् ॥ १२ ॥

दी. यदिन्द्रयावतस्तुवम् । ए (र. क्षु. १६४) इति हस्वावैरूपे द्वितीयपादादौ चतुर्थोच्चं पर्व द्वितीयस्वरमापद्यते । एतावदहम् । अत्र द्वितीयस्वरो भवति । यद्यावइन्द्रतेशतम् । ए । इति योनौ हस्वावैरूपे शतं भूमीरुत । अत्रारण्येगेयं चाधीमहे (सं. उ. ब्रा. ३. ४) इति वचनादुदूहः । अभिसोमासआयवः । ए (र. क्षु. १७४) इति पश्वनिधनवैरूपे द्वितीयपादादौ चतुर्थोच्चं पर्व द्वितीयस्वरमापद्यते । पवन्तेमदियम् । अत्र द्वितीयस्वरो भवति ॥ १२ ॥

---

13. K om. पवन्ते मदियं । एवम् S[1]-[2]TMy[1] om. एवम्

तथा शार्ङ्गे तृतीयोच्चम् ॥ १३ ॥

वि. यथा लौशादीनां द्वितीयस्वरापत्तिस्तथा शार्ङ्गे (ऊ. अ ६७१) तृतीयोच्चस्य पर्वणो द्वितीयस्वरापत्तिः । वः पवते कृत्वियो रसः ॥ १३ ॥

भा. यथा लौशादीनां चतुर्थोच्चस्य द्वितीयस्वरापत्तिः एवं शार्ङ्गे पिन्व्यंजतायाम् ॥ १३ ॥

दी. यथा लौशादीनां चतुर्थस्वरपर्यन्तमुच्चस्य पर्वणो द्वितीयस्वरापत्तिः तथा हाउश्वातो (ऊ. अ. ६७२) इति शार्ङ्गे तृतीयोच्चं तृतीयस्वरपर्यन्तमुच्चस्वरं पर्व द्वितीयं स्वरमापद्यते । वःपवेकृत्वियोरसः । अत्र द्वितीयस्वरो भवति । योनौ हावाञ्जा (ग्रा. १६. ९. ५६४. ३) इति शार्ङ्गे वियञ्जते समञ्जते इति तृतीयोच्चं पर्व भवति ॥

प्लवे वारवन्तास्तिस्रस्तृतीये पादे ॥ १४ ॥

वि. सिद्धोपन्यासो विशेषविवक्षया । प्लवे तृतीये पादे तिस्रो वारवन्ताः भवन्ति । आरत्नधा इत्यादि ॥ १४ ॥

भा. प्लवे वारवन्ता योनौ पुनानःसोमायां (ग्रा. ५११. १४) तिस्रो वारवन्ता आरत्नधेत्यत्र । सिद्धोपन्यासो विशेषविवक्षया ॥ १४ ॥

दी. हा । वोऽ२हा । वोऽ२हाऽ२ । ओऽ२३४वा । हाइ । ऊत्सोदाऽ२३इवो (ऊ. स. २२५) इति प्लवे तृतीये पादे तिस्रो वारवन्ता भवन्ति । दूहानाऽ२३४ऊ । धार्दाइवाऽ२३४याम् । माधुप्राऽ२३४याम् । अन्येषु पादेषु द्वे द्वे वारवन्ते भवतः । अश्वन्नत्वा औहोहाइ (ग्रा. १. २. १७. ३) इति उत्तरे वारवन्तीये वारावाऽ२३४न्ताम् इति पर्व भवति ॥ १४ ॥

---

1. RP शार्गे for शार्ङ्गे in all places
9. शार्गे for शार्ङ्गे; EMy[3] इर्द तृतीयोच्चं for इति तृतीयोच्चं
12. S[3] om. आरत्नधा ---आयाम् ॥ (P. 814. l. 2); A[3]M[1-2]T om. आदि
18. E वारवन्तीयोत्तरे for उत्तरे वारवन्तीये

द्वितीये तूष्णिक्षु ॥ १५ ॥

वि. उष्णिक्षु गीयमानस्य द्वितीये पादे वारवन्ता भवन्ति सखायआयाम् ॥

भा. उष्णिक्षु गीयमानस्य सखायआनिषीदतायां (ऊ. द. १३२) वारवन्ताः द्वितीये पादे भवन्ति ॥ १५ ॥

दी. हा । वोऽ३हा इत्यादि । शाखायाऽ२३४आ (ऊ. द. १३२) इति उष्णिक्षु प्लवे द्वितीये पादे तिस्रो वारवन्ता भवन्ति ॥ १५ ॥

तत्र विशेषमाह—

चतुरक्षरा प्रथमा द्व्यक्षरे परे ॥ १६ ॥

वि. योनिवत्सर्वासां चतुरक्षरत्वे प्राप्ते द्वितीये पादे प्रथमा वारा चतुरक्षरा भवति । परे वारे द्व्यक्षरे भवतः । पूनानाऽ२३४या । प्राऽ२३४गा । याऽ२३४ता ॥ १६ ॥

भा. योनिवत्सर्वासां चतुरक्षरत्वे प्राप्ते विशेष उच्यते । चतुरक्षरा प्रथमा । पू३ना३ना३या । द्व्यक्षरे परे । प्रा२३४गा । या२३४ता ॥ १६ ॥

दी. प्रथमा वारवन्ता चतुरक्षरा भवति । पुनानाऽ२३४या । द्व्यक्षरे परे वारवन्ते प्राऽ२३४गा । याऽ२३४ता ॥ १६ ॥

पूर्वे जनित्रे चदक्षसोतद्विषाम् ॥ १७ ॥

वि. पूर्वे जनित्रे च योनिदृष्टा चदक्षसा अभिसोमादिषूतद्विषामापद्यते ॥ १७ ॥

---

2. My[1] om. वारवन्ता...पादे (L. 9)

9. KS[1]-[2]T चतुरक्षरे परे for चतुरक्षरत्वे

भा. पूर्वे जनित्रे द्वितीयपादान्ते योनिदृष्टा चदक्षसा अग्निसोमादिषु (ऊ. अ. ५४१) द्वितीये पादान्ते उतद्विषामापद्यते ॥ १७ ॥

दी. अग्निसोऽ३मासआयवाः । हुवेहोऽ५इ (ऊ. अ. ५४१) इति पूर्वे जनित्रे द्वितीयपादान्ते योनिदृष्टा चदक्षसा । चादक्षासाऽ२इ इति पर्व उतद्विषामापद्यते । उताद्वाऽ२इषाऽ२ः । दियाम्माऽ१दाऽ२म् । एवं भवति ॥ १७ ॥

अतंवस्तृतीयायाम् ॥ १८ ॥

वि.&भा. तंवस्तृतीयायां तु द्वितीयपादान्ते चदक्षसैव ॥ १८ ॥

दी. अकारः प्रतिषेधे । तंवोदाऽ३स्यमृतीषहाम् । हुवेहोऽ२इ (ऊ. ए. ५००) इति पूर्वे जनित्रे तृतीयायां द्वितीयपादान्ते उतद्विषा न भवति । चदक्षसैव भवतीत्यर्थः । रूभोऽ१जासाऽ२म् । चदक्षसायाः द्वितीयमक्षरं ह्रस्वम् अभिगीतं भवति । द्वितीयमक्षरं दीर्घं प्रत्युत्क्रामति इति विशेषः ॥ १८ ॥

तवमाण्डवे ॥ १९ ॥

वि.&भा. तवाहंसोमारारण (ऊ. स. ७७५) माण्डवे तृतीयपादादौ योनिदृष्टा चदक्षसा । चादक्षासाऽ२इ । इति पर्व उतद्विषामापद्यते । उताद्वाऽ१इषाऽ२ः । पुरूणाऽ१इबाऽ२ ।

दी. तवाहँसोमरारण (ऊ.स.७७५) इति माण्डवे तृतीयपादादौ योनिदृष्टा चदक्षसा । चादक्षासाऽ२इ इति पर्व उतद्विषामापद्यते । उताद्वाऽ१इषाऽ२ः । पुरूणाऽ१इबाऽ२ । एवं भवति । योनौ अग्ने विवस्वदुषासाः (ग्रा. १. ४. ४०. २) इति माण्डवे आदाऽ१शुषेऽ२ इति चदक्षसा भवति ॥ १९ ॥

---

7. वि. om. तु द्वितीयपादान्ते
13 वि. om. तृतीयपाददौ

इदावासिष्ठे च ॥ २० ॥

वि. **वयमेनमिदावासिष्ठे च योनिद्दष्टा चदक्षसा ऊहे तूतद्विषामापद्यते ॥**

भा. वयमेनायां च वासिष्ठे मध्यमपादयोरन्ते योनिद्दष्टा चदक्षसा उत्तरयोः स्तोत्रीययोः उत्सोदेवाश्वां च उतद्विषामापद्यते ॥ २० ॥

दी. **वयमेनमिदा** (ऊ. अ. ६३७) इति वासिष्ठे उत्तरयोः स्तोत्रीययोः मध्यमपादयोरन्ते योनिद्दष्टा चदक्षसा । चादक्षासा॒ऽ२इ इति पर्व उतद्विषामापद्यते । द्वितीयायाम् उताद्वाऽ१इषाऽ२ः । षताश्रूऽ१ताऽ२इ । उरामाऽ१थीऽ२ः । तृतीयायां पुभूषाऽ१ताऽ२इ । णआगाऽ१हीऽ२ । एपसुतद्विषा भवति । योनौ सूतंभाराऽ२ (ग्रा. ७. ४. २७२) इति चदक्षसा पर्व भवति ॥ २० ॥

अत्रैव तृतीयाष्टमं वृद्धं प्रथमायाम् ॥ २१ ॥

वि. **इदावासिष्ठे** (ऊ. अ. ६३७) **प्रथमायां** तृतीये पादेऽष्टममक्षरं वृद्धं भवति । **तस्माउवद्यसवनाइ** ॥ २१ ॥

भा. **अत्रैव इदावासिष्ठे** (ऊ. अ. ६३७) तृतीयपादस्य अष्टममक्षरं वृद्धं भवति । **तस्मा उ अद्य सवने सुतमित्यत्र प्रथमायामेव** ॥ २१ ॥

दी. अत्रैव **वयमेनमिदा** (ऊ. अ. ६३७) इति वासिष्ठे तृतीयपादस्याष्टममक्षरं वृद्धं भवति । **तस्माउवद्यसवनाइ** । ऊहे अष्टममक्षरं वृद्धं भवति । **वृकभ्रिदस्ववारणः** ॥ २१ ॥

रुणसाम्नि च घृतवत्याम् ॥ २२ ॥

---

10. My[2]-[3] R trans. प्रथमायाम् to the next sutra

16. My[2] om. तस्मा उ... भवति

वि. घृतवत्यां वरुणसाम्नि तृतीयेऽष्टमं वर्धते। योनावेव। नान्यत्रेत्यर्थः ॥

भा. प्रथमायामेव वरुणसाम्नि च घृतवतीत्यत्र तृतीयपादस्याष्टममक्षरं वृद्धं भवति। ऊहगीतौ वृद्धप्रतिषेध इत्यर्थः ॥ २२ ॥

दी. घृतव। ताऽ३इभुवनानाम् (ग्रा. १०. ३. ३७८. १) इति वरुणसाम्नि प्रथमायामेव तृतीयपादस्याष्टममक्षरं वृद्धं भवति। द्यावापृथिवीवरुणा। ऊहगाने तस्य प्रतिषेधः। ज्योतिर्यज्ञाऽ३स्य पवते (ऊ. क्षु. ५९४) इति वरुणसाम्नि दधातिरत्नँस्वधयोः इत्याद्यवृद्धं भवति ॥ २२ ॥

तिथे च योनावाद्यम् ॥ २३ ॥

वि. दैवातिथे च योनावेवाद्यमक्षरं तृतीये पादे वर्धते ॥ २३ ॥

भा. दैवातिथे च योनौ आद्यायां तृतीयपादस्य प्रथममक्षरं वृद्धं भवति। उत्तरयोः प्रतिषेधः ॥ २३ ॥

दी. आतूऽ३४। एतानि। पीदाऽ६ता (ग्रा. ५. ५. १६४. १) इति दैवातिथे योनौ प्रथमायां तृतीयपादस्य प्रथममक्षरं वृद्धं भवति। साखायस्तोम। ऊहे तु उत्तरयोः प्रतिषेधः। द्वितीयायाम् इन्द्रं सोमेस। तृतीयायां गमद्वाजेभिः ॥

श्रुध्यमानवयोश्च द्वितीयम् ॥ २४ ॥

वि. श्रुध्यमानवयोश्च तृतीये द्वितीयमक्षरं वर्धते। वृद्धं पूर्वविकार एव ॥ २४ ॥

---

1. M¹-² om. घृतवत्याम्
5. L¹ ०गानस्य for ०गाने तस्य
9. A²M¹-²T om. च and एव
15. A² om. श्रुध्य...द्वितीयम्; S²K श्रुध्ये for श्रुध्य०
16. KS² श्रुध्ये for श्रुध्य

भा. **श्रुष्यमानवयोश्च** योनावेव तृतीयपादस्य द्वितीयमक्षरं वृद्धं भवति । श्रुध्योः (ग्रा. ३. ११. ९९. १) अस्मा२इदेहीति । मानवे दीदेथकण्व इति । ऊहगीतौ प्रतिषेधः ॥ २४ ॥

दी. अग्ने वाजाऽ२स्य । गोमतोवा (ग्रा. ३. ११. ९९. १) इति श्रुध्ये योनावेव तृतीयपादस्य द्वितीयमक्षरं वृद्धं भवति । अस्माइदे । ऊहे प्रतिषेधः । द्वितीयाच रेवदस्मभ्यंपुर्वणीक । एवमादीनि । नित्वमग्नाइ (ग्रा. २. ५. ५४. १) इति मानवे योनावेव तृतीयपादस्य द्वितीयमक्षरं वृद्धं भवति । दी । दाइ । ऊहे प्रतिषेधः । मन्द्रायाया (ऊ. सं. ३५५) इत्यादि मानवे अ । नू । पे । एवमादीनि । होवाइ । सोमउष्वाणःसोतृभिः । होवाइ (ऊ. द. ८५) इत्युत्तरे मानवे आश्रयेव । अत्र द्वितीयमक्षरं वृद्धं न भवति । योनौ द्वितीयमक्षरं वृद्धम् । दाइदेऽ१थक ॥ २४ ॥

विशीयेऽधयादिमायां भे प्रत्यये प्रथमोच्चान्त्यस्य वृद्धिरुत-
द्विषा पतिःकवीम् ॥ २५ ॥

वि. **अधयदिमायां** (ऊ. ए. ५२४) सदोविशीये स्तोभे प्रत्यये प्रथमोच्चान्त्यस्यान्त्यं वर्धते । उत्तमे पादे उतद्विषा पतिःकवीमापद्यते । इमाच्चवाइ । युथेननाई । स्थावार्षाऽ१भाऽ२ः ॥ २५ ॥

भा. **सदोविशीये अधयदिमायां** (ऊ. ए. ५२४) स्तोभे प्रत्यये प्रथमोच्चान्त्यस्य वृद्धिः । इमा२चवाऽ२ईयूथेनना२इ इति च । उतद्विषा च योनिदृष्टा सा पतिःकवीमापद्यते । स्थावा२र्षा२३भा२३ इति ॥ २५ ॥

---

7. My[2] after दाइ adds: थक
8. E om. आदि
9. E मानवोत्तरे for उत्तरे मानवे
10. E अवृद्धं and om. न; E om. दाइथेऽ१थक
11. A[2] om. विशीये....प्रत्यये प्र० (L. 13);
M[1-3] om. वृद्धि०...प्रथमोच्चान्त्यस्य
41. A[1]M[1-3]T om. इमाच्चवाइ

दी. अघयदिमेपवमाओहाओहाऽ३ए (ऊ. ए. ४२४) इति सदोविशीये ओऽ३हा इति स्तोभे प्रत्यये प्रथमस्वरपर्यन्तमुच्चस्य पर्वणोऽन्त्याक्षरस्य वृद्धिः। इमाचवाऽ२इ। ओऽ३हा। अत्र वाइ इत्यस्य वृद्धिः। यूथेननाइ। अत्र नाइ इत्यस्य वृद्धिः। योनिदृष्टा उतद्विषा। उताद्वाऽ१इषाऽ२ः इति पर्व पतिःकवीमापद्यते। पताइ काऽ१वीऽ२ः। स्वाबाषोऽ१भाऽ२ः। एवं पतिःकवी भवति। योनौ पुनानस्सोमधारया ओहा ओहाऽ३ए (ग्रा. १४. ५. ५११. ११) इति सदोविशीये उत्सोदाऽ१इवाऽ२ः। एवमुतद्विषा भवति ॥ २५ ॥

साहीये शता द्वितीयं संकर्षात् ॥ २६ ॥

वि. सत्रासाहीये शता द्वितीयमापद्यते। संकर्षात् कारणात्। त्यमु वः स- (ग्रा. ५. ६. १७०. २) इति। सिद्धोपन्यासो विशेषविवक्षया ॥ २६ ॥

भा. सत्रासाहीये शता द्वितीयं स्वरमापन्ना। संकर्षात् कारणात्। त्याऽ३४म्। उवःसत्रासाहम्। ओऽ६वा (ग्रा ५. ६. १७०. २) इति। सिद्धोपन्यासो विशेषविवक्षया ॥ २६ ॥

दी. त्याऽ३४म्। उवस्सत्रासाहम्। ओऽ६वा (ग्रा. ५. ६. १७०. २) इति सत्रासाहीये योनौ शता द्वितीयस्वरमापन्ना। त्याऽ२३४म्। एवं द्वितीयस्वरो भवति। कुतः? त्यामिति संकर्षात्। एकीभूतादिति कारणात्। ताऽ२३४वत्यन्नाऽ५रियन्नृताउ (ग्रा. १२. १२. ४६६. १) इति साम्नि शताक्राऽ२३४तूः इति पर्व भवति। अत्र सिद्धोपन्यासो विशेषविवक्षया ॥ २६ ॥

---

7. E इति for एवम्

11. न्यंवार्पाज्ञातैतिन्यबार्षः ३वान्त, B¹ न्यंवाषऊवति, V¹ नयंचार्षिकतंति, for त्याऽ३४मुवः सत्रासाहम्

18. E after विवक्षया adds: त्वद्याज्ञसाहीये तु त्वद्यात्येतौशब्दौ सौपर्णे इति संकृष्टग्रहणात्, तद्भिन्नस्थलेषु विकृष्टमेव। अतः तृतीयादिरारभ्यते

तथा सर्वत्र स न्याय्यः ॥ २७ ॥

वि. यथेह संकर्षात् द्वितीयस्वरापत्तिः एवं सर्वत्र शताद्वितीयस्वरापत्तिर्न्याय्या वेदितव्या । ऊहगीतौ अन्ये तु ब्रुवते यत्र संकर्षो नास्ति तत्र यथाप्रकृत्येव तृतीयादीनि शता भवन्तीति शतायास्तृतीयस्वरारम्भ इति ॥ २७ ॥

भा. यथा हि योनौ संकर्षात् द्वितीयस्वरापत्तिः एवं सर्वत्र शताया द्वितीयस्वरापत्तिर्न्याय्यो वेदितव्यः । असंकर्षेऽपि ऊहगीतौ अन्यत्र ब्रुवते । यत्र संकर्षो नास्ति तत्र पत्र यथाप्रकृत्येव तृतीयादि शता भवतीति । **शता२क्रा२३२३तू३ः विदा२३ इद्विषा२उवा३** ॥ २७ ॥

दी. ऊहगीतौ संकर्षे सति तथा पूर्वोक्तप्रकारेण शतापर्व द्वितीयस्वरमापद्यते । एष न्यायः सर्वत्र सर्वसंकर्षेषु वेदितव्यः । ऊहगीतौ असंकर्षे सति तृतीयादिशतापर्व भवति । **पुनाऽ२३४इत्यादीनि** ॥ २७ ॥

मन्द्रश्चतुर्थमयोनौ ॥ २८ ॥

वि. **अयोनौ** सत्रासाहीये मन्द्रस्वरस्थो वर्णश्चतुर्थमापद्यते

भा. **साहीश** एव मन्द्रस्वरस्थो वर्णश्चतुर्थस्वरमापद्यते ऊहगीतौ ॥ २८ ॥

दी. **पुनाऽ२३४ । नो अक्रमीदभि । ओऽ६वा** (ऊ. द. ७२) इति सत्रासाहीये **अयोनौ** ऊहगीतौ मन्द्रस्वरस्थवर्णश्चतुर्थस्वरमापद्यते । योनौ उवस्सत्रासाहम् (ग्रा. ५. ६. १७०. २) इति मन्द्रस्वरस्थवर्ण ऊहगीतौ चतुर्थस्वरमापद्यते इत्यर्थः । **नो अक्रमीदभि** । एवं चतुर्थस्वरो भवति ॥ २८ ॥

---

1. M^{1-2} स तु न्यायः EK न्यायः L^{1} न्याय्यः P संन्यायः for स न्याय्यः S^{1-2} सर्वत्रान्यायः for सर्वत्र स न्याय्यः
4. $S^{1}T$ om. शतायास्तृतीस्वरारम्भ इति
7. P भवन्ति for भवतीति
13. $A^{2}M^{1-2}T$ om. अयोनौ
14. $KS^{1-3}A^{2}M^{1-2}T$ स्वरस्थोऽक्षरः for स्वरस्थो वर्णः
17. E °स्वरस्थः for °स्वरस्थवर्णः and om. ऊहगीतौ

ऐडकौत्से च ॥ २९ ॥

वि.&भा. ऐडकौत्से अयंपूषादिषु (ऊ. स ७६४) मन्द्रस्वरस्थश्चतुर्थस्वरम् आपद्यते ॥ २९ ॥

दी. अभीहीनोऽ२३। वाजसातममीया (ऊ. द. १६४) इत्यैडकौत्से मन्द्रस्वरस्थश्चतुर्थस्वरमापद्यते । योनौ चमसेषुवाईया (ग्रा. ५. ५. १६२. १) इते मन्द्रस्वरस्थः ऊहगीतौ वाजसातममीया इति चतुर्थस्वरमापद्यते । एवमादीनि ॥ २९ ॥

वसुरुच्चायामोवाद्यस्य लोपः ॥ ३० ॥

वि. वसुरुचायां (ऊ. ए. ५२३) साहीये ओवाया आद्यस्य लोपः । तथा सति दिव्या अभिवा इति स्थिते परेण सूत्रेणौत्वम् ॥ ३० ॥

भा. प्रसङ्गादैडकौत्सग्रहणम् । इदानीं प्रकृतमेवोच्यते । वसुरुचायां (ऊ. ए.-५२३) सत्रासाहीये ओवाया आद्यस्य वर्णस्य लोपः । इकारस्य लोप इत्यर्थः । तथा सति वसुरुचोदिव्याअभिओ२वा३ । एतद्रूपं भवति । एवंस्थिते उत्तरेण सूत्रेण ओभाव उच्यते ॥ ३० ॥

दी. प्रसङ्गादैडकौत्सस्योक्तम् । वसूऽ३४ । रुचोदिव्याअ । भोऽ६वा (ऊ. ए. ५२३) इति सत्रासाहीये ओवाया आद्यस्य ओकारस्य लोपः । रुचोदिव्याअभि ओऽ६वा । अत्र ओवामध्ये ओकारस्य लोपः ॥ ३० ॥

वाशब्दे च नित्यमोत्वम् ॥ ३१ ॥

वि. वाशब्दे च नित्यमोत्वं भवति । तथा साहीये मन्द्रस्थस्यैव । वसुरुचा

---

1. A[2]M[1]-[2] ऐडं for ऐड०
2. वि. om. अयंपूषादिषु; वि. after ०स्वरस्थः adds: अक्षरः M[1]-[2] मन्द्रश्चतुर्थः for मन्द्रस्वरस्थः
8. KS[2]M[1]-[2]A[2]T after लोपः add: ओकारलोपः
9. A[2]M[1]-[2] सूत्रेणोत्वम् for सूत्रेणौत्वम्
18. K मन्द्रस्थास्येव S[1] मन्द्रस्यैव for मन्द्रस्थस्यैव

यामित्यधिकारात् । वस्र्‌ऽ३४ । रुचोदिव्याअ । भोऽ६वा५ (ऊ. ए. ५२३) ॥ ३१ ॥

भा. वाशब्दे च प्रत्यये नित्यमोत्वम् । तथा सति भिशब्दस्य इकारे लोपे सति वाशब्दे प्रत्यये ओत्वं नित्यमापद्यते । वसू३३रुचोदिव्याअ । भोवा (ऊ. ए. ५२३) इति रूपं भवति ॥ ३१ ॥

दी. वाशब्दे प्रत्यये व्यञ्जनस्य स्वरस्य च नित्यमोत्वम् ओ भवति । भोऽ६वा । एवं भवति । ३१ ॥

क्षिते च हाशब्दे ॥ ३२ ॥

वि. ऐडसैन्धुक्षिते हाशब्दे प्रत्यये पूर्वस्यौत्वं भवति । तिस्रोवाचोहाइ (ऊ. अ. ५९२) योनौ विसर्जनीयस्य अलोपदर्शनात् । अग्निवः । ओहाइ (ग्रा. १३. २१. ३) [इति] ॥ ३२ ॥

भा. ऐडसैन्धुक्षिते हाइशब्दे प्रत्यये असाव्यं–(ऊ. अ. ६१७) पवस्वदेवयोः (ऊ. अ. ६५३) पूर्वस्य स्वरस्य व्यञ्जनस्य च ओत्वं भवति । योनौ विसर्जनीयस्य अलोपदर्शनात् । अग्निवः । ओहाइ (ग्रा. १. ३. २१. ३) इति । अत इदमुक्तं माभूद्योनिवद्भाव इति ॥ ३२ ॥

दी. पवमानो । हाइ । स्वजिन्नाऽ२३ताः (ऊ. द. १७७) इत्यैडसैन्धुक्षिते हाशब्दे प्रत्यये पूर्वस्य स्वरस्य व्यञ्जनस्य च ओ भवति । पवमानो । हाइ । अत्राकारस्य ओभावः । योनौ अग्निवः । ओहाइ (ग्रा. १३. २१. ३) अत्र विसर्जनीयस्य न ओभावः ॥ ३२ ॥

---

1. KS[2] एव for इति
5. E after वाशब्दे add: च
8. S[2] ऐडे for ऐड०
9. A[2]T लोप० for अलोप०
11. PV[2] ऐडे for ऐड०; B[4] ०शब्द for ०शब्दे
16. E M[4]S[2] after च add: ओत्वं भवति

मैधे चायोनौ ॥ ३३ ॥

वि. मैधातिथे च हाशब्दे प्रत्यये पूर्वस्यौत्वं भवति। औवोकारयोरेकीभावे लोपः (७ १० ३०) मत्सरासोहाइ योनौ व्यञ्जनलोपो न दृष्टः। माचिदन्यदोहाइ (ग्रा. ६. १.२४२. १) अत्रापि योनिवद्भावे मामूदित्युक्तम्। योनौ ओत्वान्तलोपौ न ततः। प्रकृत्या ओत्वं भवति ॥ ३३ ॥

भा. मैधातिथे च हाशब्दे प्रत्यये पूर्वस्य स्वरस्य व्यञ्जनस्य च ओत्वं भवति ॥ योनौ तु व्यञ्जनस्य न लोपो दृष्टः। माचिदन्यदो२हइ३इ (ग्रा. ६. १. २४२. १)। इति। अत्रापि योनिवद्भावो माभूदित्युक्तम्। ततः किं भवति? मुहुरुक्थोहाइ इति स्वरलोपे ओत्वं भवति ॥ ३३ ॥

दी. माचिदन्यदोहाइ (ऊ. द. २१५) इति मैधातिथे अयोनौ ऊहगीतौ पूर्वस्य स्वरस्य व्यञ्जनस्य च ओ भवति। मुहुरुक्थोहाइ। अत्राकारस्य ओभावः। योनौ तु व्यञ्जनस्य न लोपो दृष्टः। माचिदन्यदोहाइ। अत्र तकारस्य न लोपः ॥

बोधीये वच्यन्ते वामित्यत्र स्वरागमो मान्तश्च रागम् ॥ ३४ ॥

वि. जराबोधीये (ऊ. स. ७२२) वच्यन्तेवामित्यत्र स्वरागमो भवति। कस्मिन् प्राप्ते इदमारभ्यते। [उच्यते।] वच्यन्तेओवा इत्येवं प्राप्नोति। तस्मात् स्वरागमः क्रियते। वच्यन्ते वाऽआ इति आकारः स्वरागमः वच्यन्तेवामोवा इत्यत्र। अत आह मान्तश्च रागं भवतीति। वच्यन्तेवा१ ओवा। नकारान्ते

---

1. वि. splits this sutra into two as मैधे च and अयोनौ and comments accordingly
2. KA²M¹-²S² My¹ trans. पूर्वस्य after भवति
13. S¹M¹-²T trans. बोधीये...रागम् ॥ जराबोधीये...रागमिति (P. 824, L. 2) after आनो विश्वादिषु ! (P. 825, L. 2); M¹-² माहान्तश्च for मान्तश्च; M¹-²TS¹ रङ्गम् for रागम्
15. A²S¹T om. ओ; M¹-² ओवायाम् for ओवा इति; T om. इति; A² तस्मिन् T कस्मिन् for तस्मात्
16. A² आयिकार: for आकारः
17. A²M¹-²T om. अतः; A²M¹-² आगमान्तः for आह मान्तः; M¹-²TS¹ रङ्गः for रागं; A² before रागं adds: रागमः करान्तश्च

पदे पूर्वे स्वरे च परतः स्थिते आकारो रक्तो भवतीति। अनकारान्तत्वान्नैव प्राप्नोति। अप्राप्तो रागो वचनेन क्रियते मान्तश्च रागमिति॥ ३४॥

भा. जराबोधीये (ऊ. स. ७२२) वच्यन्तेवार्यां स्वरागमो भवति। कस्मिन् प्राप्त इदमुच्यते। उच्यते। वच्यन्तेवोवा एवं प्राप्नोति। ओवौकारयोरिति। तस्मात्स्वरागमः क्रियते। वच्यन्ते वां आकारः स्वरागमो भवति। यस्माच्चस्य स्वरस्य ओत्वं भवति। ततः वच्यन्तेवामोवेति प्राप्नोति। ततः आह मान्तश्च रागमिति। नकारान्ते पदे पूर्वे स्वरे च परतः स्थिते इति। तथा आकारो रक्तो भवतीति। अत्र मकारान्तत्वात् रागो न प्राप्नोति। अप्राप्तो रागो वचनेन क्रियते। मान्तश्च रागमिति॥ ३४॥

दी. एषोउषो वा। आपूर्विया (ऊ. स. ७२२) इति जराबोधीये तृतीयायां वच्यन्तेवा२ ओवा इत्यस्यां वचयन्ते वामित्यत्र ओवाप्रत्यये स्वरस्याकारस्यागमो भवति। तस्य अकारस्य ओभावः। ततो मकारान्तो रागं रङ्गं प्राप्नोति। शिक्षायां तु नकारान्तो रागं पाप्नोति। नकारान्ते पदे पूर्वे स्वरे परतः स्थिते। आकारं रक्तमित्याहुर्नकारे न तु रज्यते॥ ३४॥

दोविशीये स्तावहारोपाया वान्तास्थे दौपूर्वौ हान्तौ॥ ३५॥

---

1. A[2] om. च; A[4] परः for परतः; A[4]S[1-3] for अकारान्तः for आकरो रक्तः; My[1] om. इति S[1-3] अनाकारान्तत्वात् M[1-2] अनेकान्तत्वात् for अनकारान्तत्वात्; A[2] om. एव; M[1-2] रङ्गः for रागः; M[1-2] रङ्गम् for रागम्; T om. मान्तश्च रागमिति

5. PV[2] कस्मात् for तस्मात्; PV[2]A[1] तस्माद् for यस्मात्

6. P वामोत्वेति, V[2] वामो भवति for वामोवेति; B[4] आमो V[2] आस, A[1] आगमो for आह

7. PV[2] पूर्वं for पूर्वे; V[2] अकारः for आकारः

8. A[1] आप्राप्तो for अप्राप्तो; V[2] om. मान्तश्च रागमिति

10. E om. तृतीयायां

12. ES[2]M[4] after प्राप्नोति। adds: अत्र मकारान्तत्वात् रागं न प्राप्नोति। अप्राप्तो रागो वचनेन क्रियते वान्तश्च रागमिति; L[1] om. नकारान्तो रागं प्राप्नोति

13. नकारेण for नकारे न

वि. सदोविशीये (ऊ. ए. ४७४) प्रस्तावप्रतिहारोपद्रवाश्च वकारान्ता भवन्ति। उद्गीथे द्वितीयतृतीयौ पादौ हकारान्तौ भवतः। आनो विश्वादिषु ॥ ३५ ॥

इति फुल्लसूत्रविवरणे चतुर्थस्य सप्तमः खण्डः ॥ ७ ॥

भा. सदोविशीये (ऊ. ए. ४७४) साम्नि प्रस्तावप्रतिहारोपाया वान्ता भवन्ति। किं सिद्धम्? प्रस्तावे औहो औहो३वा। एतावन्मात्रो वान्तो भवति। प्रतिहारः औ३होइ औ३हो३वा। एतावन्मात्रः। उपायो मन्द्रस्वरे औहोवा। एतावन्मात्रो वान्तः। थे द्वौ पूर्वौ हान्तौ। उद्गीथे द्वौ पादौ हकारान्तस्तोभान्तौ भवतः। ओ३हा ॥ ३५ ॥

इति पुष्पसूत्रभाष्ये चतुर्थस्य सप्तमी कण्डिका ॥ ७ ॥

दी. आनोविश्वासुहव्यमोहाओहाऽ३ए (ऊ. ए. ४७४) इत्यादि सदोविशीये प्रस्तावप्रतिहारयोरुपाया वान्ताः भवन्ति। उद्गीथे प्रतिहारस्यादौ पूर्वौ उपायौ हान्तौ हकारान्तौ भवतः। प्रस्तावस्योदाहरणम्– औहोऔहोऽ३वा। प्रतिहारस्योदाहरणम् औऽ२३होइ। औऽ३होऽ३वा। उद्गीथे उदाहरणम्– इन्द्रꣳसमत्सुभूषत। ओऽ३हा। अत्राग्रिमस्तोभः लुप्तः। उपब्रह्माणिसवनानिवृत्रहन्। ओऽ३हा। अत्राग्रिमः स्तोभः लुप्तः। एवं हान्तौ भवतः। उपायस्योदाहरणम्– ऋची। षाऽ२माऽ२३४ औहोवा। एवमुपायो भवति। वान्तो भवतीत्यर्थः ॥ ३५ ॥

इति फुल्लदीपे अष्टमप्रपाठकस्य सप्तमः खण्डः ॥ ७ ॥

---

2. $M^{1-3}TS^{1}$ उद्गीथादौ for उद्गीथे; $A^{2}M^{1-2}TS^{1}$ om. पादौ

5. $PV^{3}L^{1}$ om. सदोविशीये...ओ३हा(L. 8)

12. after वान्ता adds: एव; $S^{2}M^{4}$ om. प्रतिहारास्यादौ

15. L^{1} om. उपब्रह्माणि...औहोवा (L. 17)

16. $S^{1}M^{4}L^{1}$ छुतः for लुप्तः; R om. एवं हन्तौ...औहोवा (l. 17)

17. R उपाया भवन्ति for उपायो भवति and om. वान्तो भवतीत्यर्थः

अष्टमः खण्डः

ज्ञीयर्क्षु विशीयाद्यायां ताद्विविड्ढा वृणीमहाम् ॥ १ ॥

वि. ज्ञीयर्क्षु विशीये (ऊ. ए. ४७९) प्रथमायां तद्विविड्ढा वृणीम्महामापद्यते । इराइरा ॥ १ ॥

भा. यज्ञायज्ञीयर्क्षु विशोविशीये (ऊ. ए. ४७९) आद्यायां स्तोत्रीयायां तद्विविड्ढा वृणीमहामापद्यते । इरा ईरा३ ॥ १ ॥

दी. यज्ञायज्ञाहुम्वोऽ३अग्नाइ (ऊ. ए. ४७९) इति विशोविशीये आद्यायां स्तोत्रीयायां तद्विविड्ढा इति पर्व वृणीमहामापद्यते । वृणीमहाइ । ईराइरा । एवं वृणीमहा भवति । योनौ विशोविशोहुम् (ग्रा. २. ९. ८७.१) इति विशोविशीये वाजयन्ताः इति तद्विविड्ढापर्व भवति ॥ १ ॥

वैच्छन्दसे समन्ते दिवानक्ता प्रथमम् ॥ २ ॥

वि. इमंस्तोमादिषु वैच्छन्दसे समन्ते दिवानक्ता प्रथमस्वरमापद्यते । योनौ द्वितीयम् । त्वंहोतानोअध्वराइ ॥ २ ॥

भा. वैच्छन्दसे समन्ते दुहानऊधः (ऊ. ए. ५१३) पाहिविश्वस्मात् (ऊ. ए. ४१२)। इमंस्तोमम् (ऊ. अ. ६६७) इति च दिवानक्ता प्रथमं स्वरमापद्यते । योनौ द्वितीयं पर्व दिवानक्ता त्वंहोतानोअध्वरा३इ । (ग्रा. २. ६. ६१. १) इति । एतेषु प्रथमं स्वरमापद्यते ॥ २ ॥

---

9. E om. विशोविशोहुम् इति

11. $A^2M^{1-2}T$ मन्ते for समन्ते; A^2T नक्त० for नक्ता;

12. $A^2M^{1-2}TS'$ स्तोममित्यत्र for स्तोमादिषु and om. वैच्छन्दसे समन्ते

17. PV^2 after एतेषु adds: त्रिषु; B^4 after आपद्यते adds: दिवानक्तं दिशस्यताम् इति । दिवानक्ता । and A^1 दिवानक्ताशचीभिर्न इत्यत्र । दिवानक्तं दिशस्यताम्

दी. **वैच्छन्दसे** योनिच्छन्दतः अन्यच्छन्दसि **दुहानऊधर्दिवियाम्** (ऊ. ए. ५१३) इति **समन्ते** दिवानक्ता। **दिवानक्तं दिशस्यताम्** इति पर्व। **प्रथमस्वरमापद्यते।** **मधुप्रियां प्रत्नं सधस्थमासदात्**। एवं प्रथमस्वरो भवति। एवं **पाहिविश्वस्मात्** (ऊ. ए ४१२) इति समन्ते **इमंस्तोमम्** (ऊ. अ. ६६७) इति च समन्ते भवति। योनौ त्वमग्नेगृहपताइः (ग्रा. २. ६. ६१. १) इति समन्ते द्वितीयं पर्व **त्वंहोतानोअध्वराइ** इति पर्व दिवानक्ता भवति ॥ २ ॥

दान्त्यस्य वृद्धिर्विष्टारपङ्क्त्याम् ॥ ३ ॥

वि. **विष्टारपङ्क्त्यां** समन्ते **पदान्त्यस्याक्षरस्य वृद्धिः** । पर्वमध्यत्वाद्योनिवद् वृद्धिरुच्यते । पर्वमध्यस्य पादान्त्यस्य वृद्धिः । वचनात् । दिवानक्तविषये **मधुप्रियाम्** (ऊ. ए. ५१३) **अराव्णाः** (ऊ. ए. ४१२) । **इमंस्तोम**–(ऊ. अ. ६६७) **समन्ते** पादिकः एव प्रस्तावः ! न योनिवदष्टाक्षरः प्रस्तावो भवति । **शचीभिर्नाऽ५इशचीवसू** । **दिवानक्तम्** (ग्रा. ८. ६. २८७. १) ॥ ३ ॥

भा. **पदान्त्यस्य** वृद्धिर्विष्टारपङ्क्त्यां पर्वमध्यत्वात् योनिवत् **वृद्धिरुच्यते** । पर्व-मध्यपादान्त्या वृद्धिर्वचनात् । **इमंस्तोमं समन्ते** (ऊ. अ. ६६७) पादिक एव प्रस्तावः । न योनिवदष्टाक्षरः प्रस्तावो भवति ॥ ३ ॥

---

1. M[4]S[2] अन्यत्र for अन्य०
2. RL[1] इत्यादि for इति
7. T दान्तस्य तु for दान्त्यस्य
8. T पादान्तस्य, M[1-2] पादस्य for पदान्त्यस्य; A[2]M[1-3]TS[1] योनिवदप्राप्तत्वात् for योनिवत्
9. A[2] पदान्त्यस्य, M[1-2] पादान्तस्य, T पदान्तस्य for पादान्त्यस्य
10. A[2]M[1-2]T om. स्तोम; A[2]M[1-2]T पादादिके for पादिकः
11. A[2]M[1-3]TS[1] after भवति add: नियमं वा
13. P om. पदान्त्यस्य वृद्धिर्विष्टारपङ्क्त्यां; A[1] om. वृद्धिर्विष्टारपङ्क्त्यां; L[2] पदमध्यत्वात् for पर्वमध्यत्वात्
14. PV[1] ०पादान्त्यां, for ०पादान्त्या; PV[2] पादादिकः for पादिकः

दी. सतः पङ्क्तिर्विमिश्रपादा सैव च सिद्धाविष्टारपङ्क्तिस्ताण्डिन इति वचनात् । दुहानऊधर्दिवियाम् (ऊ. ए. ५१३)। इति विष्टारपङ्क्त्यां पादान्त्यस्य अक्षरस्य वृद्धिर्भवति । मधुप्रियां भ्रन्न सधस्थमासदात् । अत्र दिवानक्तापर्वमध्ये पादान्त्यस्य वृद्धिः । वचनात् । एवं पाहिविश्वस्माद्रक्षसाः (ऊ. ए. ४१२) इति विष्टार-पङ्क्त्यां समन्ते पादान्त्यस्य वृद्धिः । अरवृणाःप्रस्म वाजेषु नोअवा । अत्र दिवानक्ता-पर्वमध्ये पादान्त्यस्य वृद्धिः । इमंस्तोमम् (ऊ. अ. ६६७)इति वैच्छन्दसे समन्ते रथमिव संमहेमामनीषया इति दिवानक्तापर्वमध्ये पादान्त्यस्याभावात् पर्वमध्ये न वृद्धिः । अत्र समन्ते दान्त्यस्यवृद्धिरिति वृद्धिः ॥ ३ ॥

किमित्त्रिकब्रृहद्देव्ययोर्वृणी प्रथमम् ॥ ४ ॥

वि. किमित्ते विष्णो–(र. ए. ८५) त्रिकद्रुक (र. सं. ६८) बृहति पञ्चनिधने देव्ये वृणी प्रथमस्वरमापद्यते । त्रिकद्रुकेषु महिषो यवाशिराम् । क्षिनामप्रयद्ववक्षे शिपाइ ॥ ३ ॥

भा. किमित्त्रिकबृहद्वामदेव्ययोः वृणी प्रथमस्वरमापद्यते । किमित्तायः (र. ए. ८५) बृहति त्रिकद्रुकायां (र. सं. ६८) पञ्चनिधने वामदेव्ये बृहतोः प्रथमं स्वरम् ॥

दी. औहोइ किमित्तेविष्णोपरिचाऽ३ए (र. ए. ८५) इति बृहति वृणी-महाइ इति पर्व प्रथमं स्वरमापद्यते । क्षिनामप्रयद्ववक्षेशिपाइ । एवं प्रथमस्वरो भवति । योनौ सातौवाजा इति वृणीपर्व भवति । त्रिकद्रुकेषुमहिषो यवाशिराम् (र. सं. ६८) इति पञ्चनिधने वामदेव्ये वृणीमहाई इति पर्व प्रथमस्वरमापद्यते । त्रिकद्रुकेषु महिषो यवाशिराम् । एवं प्रथमस्वरो भवति । योनौ कयानश्चाइ (ग्रा. ५. ६. १६९. ३) इति वृणीपर्व भवति ॥ ४ ॥

त्वे सोमदैर्घे पराङ्गं नित्यमाचार्यनियमात् ॥ ५ ॥

---

1. My[2] अतः for सतः

7. L[1] om. अत्र····वृद्धिः

9. A[2]M[1-2]T त्रिकद्रु for त्रिक;

18. My[2] om. इति पञ्च····शिराम् ; My[3]L[1] द्वितीयं प्रथमः for पर्व प्रथम०

वि. त्वेसोमायां दैर्घश्रवसे गकारो नित्यं पराङ्गं भवति। अलोपः। किमुक्तं भवति। वृदोहेत्येतस्मिन्नेव कल्पे कथं नु गकारेणैव प्रत्यारम्भ इति। अन्यथा वृदोहेत्येतस्मिन्नेव कल्पे तकारेणैव प्रत्यारम्भः स्यात्। त्तबाऽ२र्हिपो। कस्मादेवमेव न भवतीति। उच्यते। आचार्यनियमात्। ऊहपाठादित्यर्थः। ऊहकारो द्वयोरपि कल्पयोरनुषङ्गगकारेण प्रत्यारम्भं कुर्वन् उभयत्र गकारादितां दर्शयति। इतरथा पूर्ववत् एवोभयं पठेत्। तस्मादुभयत्र गकारेण प्रत्यारम्भ इति सिद्धम्॥ ५॥

भा. त्वेसोमायां (ऊ. ए. ४०१) दैर्घश्रवसे पराङ्गं नित्यमलोपो भवति। गकारस्य। किमुक्तं भवति। वृदोहेत्येतस्मिन्नपि कल्पे कथं तु गकारेणास्य प्रत्यारम्भ इति। अन्यथा वृदोहेत्येतस्मिन् कल्पे दकारेणास्य प्रत्यारम्भः स्यात्। कस्मादेवमेव न भवति। उच्यते। आचार्यनियमात्। ऊहवशादित्यर्थः। ऊहकारो हि द्वयोऽपि कल्पयोरनुषङ्गगकारेण प्रत्यारम्भं कुर्वन् उभयत्र गकारतां दर्शयति। इतरथा पूर्वेऽप्युभयं मानवेति। तस्मादुभयत्र गकारेण प्रत्यारम्भ इति सिद्धम्॥ ५॥

२र र र र र र र र २
दी. त्वेसोमप्रथमा वृदोहावृगोहा ओहाऽ३ए (ऊ. ए. ४०१) इति दैर्घश्रवसे वृदो। अत्र प्रथमे कल्पे दकारः परस्याग्रिमस्याङ्गं नित्यं भवति। वृगो। अत्र द्वितीयकल्पे गकारः परस्याग्रिमस्याङ्गं नित्यं भवति। कुतः ? आचार्यस्योहकारस्य नियमात्। उभयोः पक्षयोः नित्यत्वात्॥ ५॥

पूर्वाङ्गं च॥ ६॥

वि. च-शब्दात् पूर्वाङ्गं च नित्यमपि भवति। अत्र कथं प्राप्नोति। अन्तःपदिकानां व्यञ्जनानां स्तोभान्ते विरते लोप इति संधौ यत्रोभयोरपि पूर्वाङ्गपराङ्गयोः सहभावो

---

5. My^{1} पूर्वम् for पूर्ववत्

6. M^{1-2} om. पठेत्;

8. A^{1} om. कथं तु कल्पे

10. B^{4} before हि adds: अपि; $PV^{2}B^{4}$ अनुषङ्गं for अनुषङ्ग०

11. V^{2} कुर्वीत for कुर्वन्; PV^{3} गकारो भवति for गकारातां दर्शयति; B^{4} मकारतां for गकारतां

16. after नित्यत्वात् adds: उक्तसूत्रद्वयेन अन्तःपदिकस्य स्पर्शस्य नातिहारः। नित्यमलोपः

19. $S^{1}A^{2}A^{1-6}$ om. यत्र; T तु for यत्र; $My^{1}Ks^{1-3}M^{1-2}T$ सिद्धौ for संधौ

भवति । यथा हाविष्कृते (ऊ. द. १९५) त्वम्सुतोमदाहाउन्तामाः । पूर्वाङ्गभावस्तु पदान्तीयानां प्राक् स्तोभात् भवति । यथा त्वाष्ट्रीसाम्नि देवाऽ३नूहोइ । तस्मादन्तःपदिकत्वात् अत्र पराङ्गभावे प्राप्ते पूर्वाङ्गं चालोपितं भवति । प्राक् स्तोभात् पदान्तव्यञ्जनस्यालोप इत्युक्तम् । तस्मादत्र पदान्तवत् प्राक् स्तोभात् भावो द्रष्टव्यः । शश्वच्छश्वदितिवत् ॥ ६ ॥

भा. चशब्दात् पूर्वाङ्गं च नित्यमलोपितं भवति । अत्र कथं प्राप्नोति । अन्तःपदिकानां स्तोभान्ते विरते लोप भवतीति । संधौ यत्रोभयोरपि पूर्वाङ्गपराङ्गयोः संहितायाम् अतिहारो भवति । यथा हाविष्कृते । त्वंम्सुतोमदाहाउन्तामाः (ऊ .द. १९५) इति पूर्वाङ्गं भवति । पदान्तीयानां व्यञ्जनानां प्राक् स्तोभभावो भवति । यथा त्वाष्ट्रीसाम्नि । देवान् होइगच्छोहा३ । तस्मादन्तःपदिकत्वादत्र पराङ्गभावे प्राप्ते पूर्वाङ्गं च अलोपितं भवति । प्राक् स्तोभात् पदान्तव्यञ्जनालोप इत्युक्तम् । तस्मादत्र पदान्तवत् प्राक् स्तोभात् भावो द्रष्टव्यः । शश्वच्छश्वदितिवत् ॥ ६ ॥

दी. गकारश्च पूर्वस्याङ्गं नित्यं भवति । कुतः ? ऊहकारस्य नियमात् ॥ ६ ॥

वृदेव च पूर्वकल्पः ॥ ७ ॥

वि. अवृद्धस्यान्तःपदिकस्य प्राक् स्तोभात् भवतीति वृदेव पूर्वकल्पो भवतीति वृगेव उत्तरकल्पः ॥ ७ ॥

भा. उक्तं पदान्तवद् प्राक् स्तोभात् भवति ॥ ७ ॥

दी. त्वेसोमप्रथमावृदोहाओहाऽ३ए (ऊ. ए. ४०१) इत्येवं पूर्वकल्पो

---

2. T पादान्तीयानां for पदान्तीयानां
3. M[1-2] अलोपि A[2] अलोपः S[3] लोपी for अलोपितं; A[2] after भवति adds: इति and om. प्राक् स्तोभात्...पूर्वकल्पो भवतीति;(L.14); M[1-2]TS[1] अपदान्तव्यञ्जनलोपः for पदान्तव्यञ्जनस्यालोपः
9. V[2] लोपितं for अलोपितम्
10. PV[2]; ०पदलोपः for ०लोपः M[1-2]T अपदान्तस्य for पदान्तवत्
11. M[1-2]S[1] शश्वदिति for शश्वच्छश्वदितिवत्
12. E MS[2] पूर्वाङ्ग for पूर्वस्याङ्गं; L[1] om. नित्यम्
14. M[1-2]TS[1] वृद्धस्य for अवृद्धस्य; M[1-2] ०पादिकस्य for ०पदिकस्य

भवति । त्वेसोमप्रथमा वृगोहा ओहाऽ३ए इति द्वितीयकल्पो भवति । कुतः ? तथैव अध्ययनात् ॥ ७ ॥

शङ्कुन्येषस्यध्यमायामकाराभ्यासः ॥ ८ ॥

वि. एषस्य-(ऊ. स. ७००) मध्यमायां शङ्कुन्यकाराभ्यासो भवति स्वरपूरणार्थम् । क्रीडन्नुर्मिरा । एऽ२ । अपाम् । [अत्र रमध्ये] एक अकारो-[ऽपांमध्येऽ] कारो द्वितीयः । अपामित्यत्र अकारस्य ह्रस्वस्य सतो वचनाद्दीर्घत्वम् । शङ्कुन्येकार इति ॥ ८ ॥

भा. शङ्कुन्येषस्यधारये-(ऊ. स. ७००) ति मध्यमायां स्तोत्रीयायाम् अकाराभ्यासो भवति स्वरपूरणार्थम् । क्रीडन्नूर्मिरा । एऽ२ । अपामिति । एकः अकारः रकारे । द्वितीयः अपामिवेत्यत्र । अकारस्य ह्रस्वस्य वचनात् दीर्घत्वं शङ्कुन्येकार इति ॥ ८ ॥

दी. एषस्यधा । एऽ२ । रया । सुताः (ऊ. स. ७००) इति शङ्कुनि द्वितीयायाम् अकारस्याभ्यासः । क्रीडन्नूर्मिरा । एऽ२ । अपाम् । अत्र रमध्ये एकोऽकारः । अपां मध्ये द्वितीयोऽकारोऽभ्यासः ॥ ८ ॥

अग्निं वो वाजीयद्वितीयायां च ॥ ९ ॥

वि. अग्निंवोदेव-(र. अ. ११७) द्वितीयायां च वाजीये अकाराभ्यासो भवति । तेत्रजनंकृष्णमाऽ२३होइ । आस्तियाऽ३१उवाऽ२३ ॥ ९ ॥

भा. अग्निंवोदेवमग्निभि-(र. अ. ११७)रिति रायोवजीये द्वितीयायां स्तोत्रीयायाम् अकाराभ्यासः । अधास्मा । तेत्रजनंकृष्णामाहोइ । आस्तियाउवेति ॥

8. PB^4L^2 ०पूरणार्था, V^2 ०पूरणार्थः for ०पूरणार्थम्; V^2 आकारः for अकारः

17. V^2 अत्रापि for अग्निंवो...स्तोत्रीयायाम्

18. P आकाराभ्यासः for अकाराभ्यासः

दी. ए आग्नीम् । वोदेवमग्निभिः (र.अ.११७) इति **रायोवाजीये** द्वितीयायां चाकारस्याभ्यासः । तेद्रजनंकृष्णमाऽ२३होइ । आस्तियाऽ३१उवाऽ२३ । अत्र मकारे एकः अकारः । अस्तिमध्ये द्वितीयोऽकारोऽभ्यासः ॥ ९ ॥

एकारे च नित्यं दीर्घत्वं शङ्कुनि ॥ १० ॥

वि.&भा. **एकारे च** प्रत्यये ह्रस्वस्याक्षरस्य दिर्घीभावः । नित्यग्रहणात् तत्रैव तृतीयायां **पवस्वमधुमत्तमायां** तृचे (ऊ. सं. २५०) ॥ १० ॥

दी. पवस्वमा । एऽ२ । धुमा । तमाः (ऊ. द. ४६) इति **शङ्कुनि एकारे** प्रत्यये ह्रस्वस्य **नित्यं दीर्घत्वं** भवति । पवस्वमा । एऽ२ । अत्र मकारो दीर्घो भवति ॥ १० ॥

कौत्से हिशब्दो वृद्धः प्रकृतौ ॥ ११ ॥

वि. **प्रकृतौ** योनौ **कौत्से हिशब्दो वृद्धो** भवति । सिद्धोपन्यासो विशेषविवक्षया । **याहीन्द्राऽ२३** (ग्रा. ५. ५.१६२. १) ॥ ११ ॥

भा. **ऐडकौत्से याहीन्द्र** (ग्रा. ५- ५ १६२ १) इति **प्रकृतौ** । योनावित्यर्थः । हिशब्दो वृद्धः । सिद्धोपन्यासो विशेषविवक्षया ॥ ११ ॥

दी. **प्रकृतौ योनौ याहीन्द्राऽ२३** । **चमसेषुवाईया** (ग्रा. ५. ५. १६२. १) इत्यैडकौत्से **हिशब्दो वृद्धो** भवति । **याहीन्द्राऽ२३** । अत्र **हिशब्दो** वृद्धः । सिद्धोपन्यासो विशेषविवक्षया ॥ ११ ॥

---

2. E चाकारोऽभ्यासः for चाकारस्याभ्यासः

5. भा. अत्र for तत्र;

6. भा. मधुमत्तम इति for मधुमत्तमायां

8. E after भवति add: एवम्

ऊहे दीर्घः सर्वत्र ॥ १२ ॥

वि. ऊहे ऐडकौत्से सर्वत्र दीर्घो भवति । हिशब्दोऽभीनोवादिषु (ऊ. द. १६४) ॥ १२ ॥

भा. ऊहगीतौ अभीनोवादिषु (ऊ. द. १६४) सर्वत्र [हिशब्दो] दीर्घो भवति । द्विमात्र इत्यर्थः ॥ १२ ॥

दी. अभीहीनोऽ२३ । वाजसातममीया (ऊ. द. १६५) इत्याद्यैडकौत्से ऊहे सर्वसामसु हिशब्दो दीर्घो भवति । अभीहीनोऽ२३ । अत्र हिशब्दो दीर्घः । एवमादीनि ॥ १२ ॥

संयोगे ह्रस्वः ॥ १३ ॥

वि. ऊहे संयोगे प्रत्यये सर्वत्र हिशब्दो ह्रस्वो भवति । परीहित्याऽ२३म् (ऊ. अ. ५६९) ॥ १३ ॥

भा. ऐडकौत्से एव हिशब्दः संयोगे प्रत्यये ह्रस्वो भवति । परित्यं (ऊ. अ. ५६९) परिस्वस्वानादिषु (ऊ. द. १६४) ॥ १३ ॥

दी. अभीहीनोऽ२३ (ऊ. द. १६४) इत्यैडकौत्से तृतीयायां परीहिस्याऽ२३ः । अत्र संयोगे अक्षरे प्रत्यये हिशब्दो ह्रस्वो भवति ॥ १३ ॥

वार्शेऽभिद्रोणोग्रंशर्मामिषंतोकायाम् ॥ १४ ॥

वि. वार्शे (ऊ. द. ८४) इषन्तोकायां योनिदृष्टाभिद्रोणा उग्रंशर्मामापद्यते । अर्षासोमोत्तमे (ग्रा. १४. ४. ५०३. ३) अभिद्रोणा । आमहीयत्रे (ग्रा. १२. १. ४६७. १) उग्रंशर्मा । अस्मभ्यं वह्निम् (!) ॥ १४ ॥

भा. वार्शे अभिद्रोणा योनिदृष्टा वह्निमद्या३ अर्षासोमोत्तमायाम् अभिद्रोणा उग्रं शर्मापद्यते। अस्मभ्यंसो ॥ १४ ॥

दी. अर्षासोम्मा। द्युमान्ता ऽ३माः (ऊ. द. ८४) इति वार्शे तृतीयायाम् इषन्तोकायां योनिदृष्टा अभिद्रोणा उग्रंशर्मामापद्यते। अस्मभ्यम्। सो। उग्रशर्मो। एवं भवति। योनौ अभिद्रोणा। इति पर्व भवति ॥ १४ ॥

ताद्विविड्ढां प्राणा सर्वासु ॥ १५ ॥

वि. प्राणाशिशुः (ऊ. अ. ६४०) सर्वासु वार्शे अभिद्रोणा तद्विड्ढामापद्यते हिन्वन्नृतस्य दीधि ॥ १५ ॥

भा. प्राणातृचे (ऊ. अ ६४०) सर्वासु स्तोत्रीयासु अभिद्रोणा तद्विविड्ढाम् आपद्यते। प्रथमायां हिन्वन्नृतस्येत्यादिषु ॥ १५ ॥

दी. प्राणाशिशूः। माहा ऽ३इनोम् (ऊ. अ. ६४०) इति वार्शे सर्वासु स्तोत्रीयासु अभिद्रो। णा इति पर्व तद्विविड्ढामापद्यते। प्रथमायां हिन्वन्नृतस्य दीधि। द्वितीयायाम् अभक्तंयद्गुहाप। तृतीयायां पृष्ठेष्वेरयद्र। एवं तद्विविड्ढा भवति। योनौ जारा (ग्रा. १. २. १५. १) इति साम्नि तद्विविड्ढाइ इति पर्व भवति ॥

मनाज्ये त्नुमूतया वायोरनीमुत्तरयोः ॥ १६ ॥

वि. गौतमस्य मनाज्ये योनिदृष्टा त्नुमूतया उत्तरयोर्वायोरनीमापद्यते। सुरूपकृत्नुमू। कण्वेऽ२ऍसूऽ२३। वायोरनीके अस्थिरन्। राधोदेऽ२३याऽ३ ॥

भा. गौतमस्य मनाज्ये त्नुमूतया योनिदृष्टा कण्वे३ ३पुसू इति उत्तरयोर्वायोरनीमापद्यते। राधोदेयाय। ज्येष्ठंतद्दधिषे। इति ॥ १६ ॥

---

7. M^{1-2} om. प्राणाशिशुः सर्वासु

15. A^2T मनाध्ये for मनाज्ये; $M^{1-2}T$ अनीक० for अनी०

19. B^4 after आपद्यते; adds: त्नुमूतायाइ। इति त्नुमूतया

दी. यथागौऽ२३रो आपाकृताम् (ऊ. स ७१७) इति गौमतस्य मनाज्ये उत्तरयोः स्तोत्रीययोः योनिदृष्टा त्नुमूतया वयोरनीमापद्यते । द्वितीयायां राधोदेऽ२३याऽ३ । तृतीयायां ज्येष्ठन्ताऽ२३ह्वाऽ३ । एवं वायोरनीपर्व भवति । योनौ सुरूपकृ (ग्रा. ४. ५. १६०. ४) इति साम्नि त्नुमूऽ२तयाइ । [प्रथमायां] कण्वेऽ२घूसूऽ२३ इति पर्व भवति । योनौ उपत्वाजा (ग्रा. १. २. १३. १) इति साम्नि वायोराऽ२३-नी इति पर्व भवति ॥ १६ ॥

यज्ञा महामित्रोत्तरयोश्चतुरक्षरायां विश्वायां वाजीवाजा पिबासोमाम् ॥ १७ ॥

वि. यज्ञायज्ञीयस्यर्क्षु (ऊ. प्रा. ८३९) महामित्रे उत्तरयोश्चतुरक्षरायां विश्वा-यां वैकृत्यां वाजीवाजा पिबासोमामापद्यते । पूर्वपर्वणो लोपः । कस्तमिन्द्रायाम् (ग्रा. ७. ५. २८०. १) अग्नीवाधाऽ२न् । एषा वाजीवाजा । ब्राह्मणादिन्द्रायां (ग्रा. ६-१२- २२८. १) तृतीयादेर्द्वितीयादित्वमित्यर्थः । ऊर्जः । नापाऽ२ ॥ १७ ॥

भा. यज्ञायज्ञीयर्क्षु (ऊ. प्रा. ८३९) महावैश्वमित्रे उत्तरयोः स्तोत्रीययोः चतुर-क्षरायां वैकृतायां वाजीवाजापर्व पिबासोमामापद्यते। ब्राह्मणादिन्द्रराधसः (ग्रा. ६. १२. २२८. १) । पिबासोमा । कस्तमिन्द्र (ग्रा. ७. ५. २८०. १) इति वाजीवाजा । ऊर्ज्ञानाउपातं सहिना३ । भुवत् । वा३जा३इ ॥ १७ ॥

दी. हषाइ ॥ हयाऽ३ । ओहाओहा । यज्ञायज्ञा । वोअग्नयाऽ२इ (ऊ. प्रा. ८३९) इति महावैश्वमित्रे उत्तरयोः स्तोत्रीययोः चतुरक्षरायां गीत्यां वाजीवाजा पिबा-

---

8. A²M¹-²T after पिबा adds: पूर्वा

10. M¹-²T पूर्वे for पूर्व

12. A²T तृतीये for तृतीयादेः

14. V² om. ब्राह्मणादिन्द्रराधसः

15. V² trans. कस्तमिन्द्रेति वाजीवाजाम् in brackets after वाजा३इ । P ऊर्जः ना३पात सहिना३भुवत् वा ३ वाजीवाकस्तमिन्द्रेति वाजीवाजा२ for कस्तमिन्द्रेति .. वाजाइ

सोमामापद्यते । द्वितीयायाम् ऊर्जः । नपाऽ२ । तृतीयायां भुवत् । वाजाऽ२इ । एवं पिबासोमा भवति । योनौ । कस्तमिन्द्रा (ग्रा. ७. ५. २८०. १) इति साम्नि वाजीवाजाऽ२म् इति पर्व भवति । ब्राह्मणादी (ग्रा. ६. १२ २२९. १) इति साम्नि पिबासोमाऽ२म् इति पर्व भवति ॥ १७ ॥

उत्तरे जनित्रे पुरोजित्यामुद्गीथाद्यस्य दीर्घत्वम् ॥ १८ ॥

वि. उत्तरे जनित्रे (ऊ. ए. ५०१) पुरोजित्यामुद्गीथाद्यस्य पकारस्य दीर्घत्वम् । पामाभीऽ१नाराऽ२३४ः ॥ १८ ॥

भा. उत्तरे जनित्रे (ऊ. ए. ५०१) पुरोजित्युत्तमायाम् उद्गीथाद्यस्य ह्रस्वाक्षरस्य दीर्घत्वम् । पा३मा३ इति ॥ १८ ॥

दी. पुरोजितीवोअ । धसाऽ३ः । सुताया (ऊ. ए. ५०१) इत्युत्तरे जनित्रे तृतीयायाम उद्गीथाद्यस्य ह्रस्वस्याक्षरस्य दीर्घत्वं भवति । पामाभीऽ१नाराऽ२३४ः ॥

दन्वते प्रथमऋध्य्येवप्रियामुत्तरयोः ॥ १९ ॥

वि. वैदन्वते (ऊ. द. ११०) प्रथमे योनिदृष्टा ऋध्या उत्तरयोरिवप्रियामापद्यते । अग्नेतमद्यद्वितीये ऋध्यास्तुषे मित्रमित्रप्रियम् । पवाऽ२इत्रेऽ२३४सो । मधूऽ२प्राऽ२३४जातमन्धासाऽ२ः ॥ १९ ॥

भा. वैदवन्ते (ऊ. द. ११०) प्रथमे ऋध्या पवाइत्रेसो । समाम्नाये प्रथमे ऋध्या योनिदृष्टा उत्तरयोः स्तोत्रीययोः इवप्रियामापद्यते । इवप्रिया प्रेष्ठंव- (ग्रा. ११. ५. २) द्वितीये । अग्नेतमद्य-(ग्रा. ११. ९. ४३४. २) द्वितीये ऋध्या ॥ १९ ॥

---

5. A[2] om. उत्तरे...दीर्घत्वम् M[1]-[3]T after आद्यस्य add: जकारस्य and T पकारस्य;

6. M[1]-[2]T om. उत्तरे...दीर्घत्ववम् । पा

16. A[1] om. प्रथमे ऋध्या पवाइत्रेसो; L[2] om. ऋध्या पवाइत्रेसो; V[2] om. पवाइत्रे...ऋध्या 3' सोमसामाम्नाये for सो समाम्नाये

17. PV[2] om. इवप्रिया प्रेष्ठंव द्वितीये

दी. पारी। स्वानोगिरिष्ठाः (ऊ. द. ११०) इति प्रथमे बैदन्वते उत्तरयोः स्तोत्रीययोः ऋध्यापर्व इन्द्रियामापद्यते। द्वितीयायां मधूऽ२प्राऽ२३४जा। तृतीयायां देवाऽ२-साऽ२३४:पी। एवमिन्द्रियापर्व भवति। योनौ। पवाऽ२इन्द्रेऽ२३४सो (ग्रा. ४७५. १)। अग्नेतमाद्यां (ग्रा. ११. ९. ४३४. २) इति साम्नि ऋध्याऽ२माऽ२३४औहोवा इति पर्व भवति। ग्रेष्ठंवः। ओहाइ (ग्रा. १. १. ५. २) इति साम्नि इवाऽ२प्राऽ२३४याम् इति पर्व भवति ॥ १९ ॥

वार्त्रतुरे गीथाद्यं प्रथमोच्चं मागायताम् ॥ २० ॥

वि.&भा वार्त्रतुरे उद्गीथाद्यं प्रथमोच्चं पर्व। देहिपरायामताइर्थीम् प्रकृतं प्रथमोच्चे संहन्यत इति सर्वामतेति उदाहरणग्रहणात् मागायतामापद्यते। पावस्वैना। सिद्धोपन्यासो विशेषविवक्षया ॥ २० ॥

दी. अयापवोवा (ऊ. क्षु. ९१०) इति वार्त्रतुरे उद्गीथस्याद्यमक्षरं प्रथमोच्चं मागायतामापद्यते। पावस्वैना। एवं मागायता भवति। इन्द्रायसा (ग्रा. १०. ४. ३८८. १) इति साम्नि मागायत इति पर्व भवति। वार्त्रतुरे सिद्धोपन्यासो विशेषविवक्षया ॥

द्वितीये च पादे सान्त्वा तन्त्वाम् ॥ २१ ॥

वि. वार्त्रतुरे द्वितीये पादे सान्त्वासंघातस्तान्त्वासंघातमापद्यते। सान्त्वा

---

1. E after गिरिष्ठाः adds: प्रकृतिमनुसृज्य

8. M^{1}T अचेदि, A^4 अचेति, S^1 अवेदि S^2 देदि, P ददि for देहि; KS^1 पराया अता for पराया मता; A^{2}M$^{1-2}$TS^1 अनु इत्यर्थः for मता इर्थीम्; S^1 परायम् for परायाम्

9. KS^{1}A^{2}M$^{1-2}$T प्रथमोच्चे for प्रथमोच्चे; A^{2}M$^{1-2}$TS^1 समानेति for सर्वामतेति S^2 om. सर्वामतेति KA^{2}M$^{1-2}$TS$^{1-2}$ उदाहरणम् for उदाहरणग्रहणात्; PV^2 पवस्वनावदध्यवस्थो (स्थे V^4) विशेषः B^4 पावास्ये नावुध्यवस्थो विशेषः L^4 तत्वागिरः सुष्टुविशेषः for पावस्वैना...विवक्षया

10. A^{2}M$^{1-2}$TS^1 प्रतीकः for सिद्धो...विवक्षया; My^1 S^2 om. सिद्धोपन्यासो विशेषविवक्षया;

13. E om. वार्त्रतुरे सिद्धोपन्यासो विशेषविवक्षया

15. A^{2}TS^1 om. वातुत्रे; A^3 om. सान्त्वासंघातः

मतासः । इन्धाऽ२३ताइ इत्येष संघातः । तन्त्वागिरःसुष्टुतयोवाजयाऽ२३न्ती । ऊहगाने योनिवत् स्वराः स्तोभाभ्यासविरामाः (पु. सू. ८. ५. १) इति तन्त्वासंघातो द्वे पर्वणी । स एवातिदिश्यते । तन्त्वामापद्यते । नात्र पर्वैकत्वं विवक्षितम् । किं तर्हि ? संघातत्वं भवतीति विवक्षितम् । तस्माद्योनिवत् पर्वद्वित्वमेवेति मन्यन्ते । अन्ये त्वेकपर्वसंघातादेशादेकपर्वैवेति मन्यन्ते ॥ २१ ॥

भा. वार्त्रतुर एव द्वितीये पादे सान्त्वासंघातः सान्त्वामर्तासः इन्धा२ता३इ इत्येष संघातः तन्त्वासंघातमापद्यते । तन्त्वागिरःसुष्टुतयोवाजयां२ती३ । अत्र ऊहगाने योनिवद्विरमा इति । तन्त्वासंघातं द्विपर्वाणमेवमापद्यते । तन्त्वामापद्यते इति । न तु पर्वैकत्वं विवक्षितम् । किं तर्हि ? संघातान्यत्वं भवतीति विवक्षितम् । तस्मात् योनिवत् पर्वद्वित्वमेवेति । अन्ये तु एकपर्वसंघातादेव पर्वैकतामेव मन्यन्ते ॥ २१ ॥

दी. अयापवोवा (ऊ क्षु. ९१०) इति वार्त्रतुरे द्वितीये पादे सान्त्वासंघतः तन्त्वासंघातमापद्यते । एवं मांश्चत्वइन्दोसरसि । प्रधाऽ२३न्वा । एवं तन्त्वासंघातो भवति । यजामहोवा (ग्रा. ९. ११. ३३४. १) इति योनौ हरीणां रथ्यंवि । व्रताऽ२३नाए ॥ शेषेवनाऽ५ इषु मातृषूऽ (ग्रा. २. ५. ४६. १) इति साम्नि सान्त्वामर्तासः । इन्धाऽ२३ताइ इति सान्त्वासंघातो भवति । वित्वत् । ओहाइ (ग्रा. २. ७. ६८. १) इति साम्नि तन्त्वागिरःसुष्टुतयोवाजयाऽ२३न्ती इति तन्त्वासंघातो भवति ॥ २१ ॥

ज्योतिर्वरुणसाम्न्याद्यान्त्ययोस्तृतीयोच्चात् परं तमु ॥ २२ ॥

वि. ज्योतिर्धिज्ञायां (ऊ. क्षु. ९११) वरुणसाम्नि आद्यान्त्ययोः स्तोत्रीययोः

---

1. $A^2M^{1-2}T$ om. संघातः

2. T om. तन्त्वा°

19. M^{1-2} om. ज्योतिर्; A^2TS^1 आद्यन्तयोः for आद्यान्त्ययोः;

तृतीयोच्चात् परं तमू॒ऽ३ अभिप्रगायतेत्येतदापद्यते । ज्योतिर्य इत्येतत्तृतीयोच्चम् । ज्ञाऽ३स्य पवतेमधुप्रियाम् इति । किमुक्तं भवति । योनौ चतुर्थे एकमक्षरम् । अत्र तु आद्यायां द्वे अक्षरे चतुर्थे । द्वितीयायां यथायोनि ॥ २२ ॥

भा. ज्योतिर्यज्ञस्य-(ऊ.क्षु.९११) वरुणसाम्न्याद्यान्त्ययोः तृतीयोच्चात् परं तमुसंघातमापद्यते । तमू३अभिप्रगायतेदाभिति । किमुक्तं भवति । योनौ घृतवतीचतुर्थे एकमक्षरम् आद्यायां द्वे अक्षरे चतुर्थे । द्वितीयायां यथायोन्येव ॥ २२ ॥

दी. ज्योतिर्य । ज्ञाऽ३स्यपवते (ऊ. क्षु. ९११) इति वरुणसाम्नि प्रथमान्त्ययोः स्तोत्रीययोः तृतीयोच्चात् पर्वणः परं तमुसंघातो भवति । ज्योतिर्य इति तृतीयोच्चात् परं ज्ञाऽ३स्यपवते । मधुप्रियाम् एवं तमुसंघातो भवति । तृतीयायां धूऽ३नांपवमानः । अर्षसाइ । योनौ ताऽ३इभुवनानाम् । अभिश्रिया (ग्रा. १०. ३. ३७८. १) इति भवति । तमूऽ३अभिप्रगायता (ग्रा. १०. ४. ३८२. ३) एवं तमुसंघातो भवति । ॥ २२ ॥

तृतीयायां तु त्रिभाक् चतुर्थः ॥ २३ ॥

वि. आद्यान्त्ययोरिति वचनात् तृतीयायामपि त्रीणि न प्राप्नुवन्ति । द्वे अक्षरे प्राप्नुवतः । अत आह । तृतीयायां तु चतुर्थः स्वरस्त्रिभाक् भवति ॥ २३ ॥

भा. आद्यान्त्ययोरितिं वचनात् तृतीयायामपि द्विभाक् चतुर्थः प्राप्तः । अत आह-तृतीयायां तु त्रिभाक् चतुर्थ इति । अत्र चतुर्थस्वरः अक्षरत्रयं भजते ॥ २३ ॥

---

1. K प्रगाइत्ये त् for प्रगायतेत्येतत्
2. A[2]M[1]-[3]T om. अत्र तु
4. V[2]B[4] om. तृतीयोच्चात्....गायतेदामिति
14. A[2]M[1]-[2]TK प्राप्नुवतः for प्राप्नुवन्ति
15. A[2]M[1]-[2]T om. प्राप्नुवतः
16. PV[2] त्रिभाक् for द्विभाक्

दी. ज्योतिर्ये (ऊ. क्षु. ९११) इति वरुणसाम्नि तृतीयायां तु तमुसंघाते चतुर्थस्वरोऽक्षरत्रयं भजते । धूऽ३र्नां पवमानः । अत्र चतुर्थस्वरोऽक्षरत्रयं भजते ॥ २३ ॥

मध्येनिधनानि निगदवृत्तीनि प्रयोगवत्स्वाध्याये ॥ २४ ॥

वि. **मध्येनिधनानि निगदवृत्तीनि प्रयोगवत्** स्वाध्याये भवन्ति । अत्र स्वाध्यायशब्देन ऊह उच्यते । प्रयोगे कथमिति । उच्यते । **आर्चिकं निधनं न्याये स्तौभिकं वा यदक्षरम् । क्रुष्टाक्रुष्टं भवेत्स्वार्यमन्तोदात्तं वृधेस्वरम्** ॥ यथान्वीगवे मध्येनिधनं निगदवृत्तिन्यायेन संप्रसार्यते तथा प्रथमाद्या तृतीयात् स्वरान्तं च ॥ २४ ॥

भा. **मध्येनिधनानि** । किंभूतानि । निगदवृत्तीनि प्रयोगवत् स्वाध्याये । स्वाध्यायशब्देन ऊहः स्यादभिप्रेतः प्रयोगे । कथं प्रयोगे इति ? उच्यते ॥ २४ ॥

आर्चिकं निधनं न्याये स्तौभिकं वा यदक्षरम् ।
क्रुष्टाक्रुष्टं भवेत्स्वार्यमन्तोदात्तं वृधेस्वरम् ॥

तथा प्रथमाद्या तृतीयात् स्वरान्तं च ॥ २४ ॥

दी. **साममध्ये निधनानि** कथं भूतानि । **निगदवृत्तीनि** । निगदस्वराभ्यां प्रथम द्वितीयाभ्यां वर्तन्ते तानि निगदवृत्तीनि । **स्वाध्याये** ऊहे **प्रयोगवत्** भवन्ति । कथं प्रयोग इति उच्यते—

---

3. M^{1-2} om. मध्ये...स्वाध्याये; KE °वर्त्तीनि for °वृत्तीनि;
4. S^1 om. मध्ये....भवन्ति; $A^2M^{1-2}T$ इति for अत्र
5. TS^1A^2 om. प्रयोगे....उच्यते
6. $A^2M^{1-2}T$ भवति चेत् for भवेत्; A^2TS^1 after गवे add: भवन्ति स्वाध्याय
7. A^2T प्रथमाद्यायां, M^{1-2} प्रथमायां for प्रथमाद्या ; $M^{1-2}A^2T$ तृतीयायां, S^1 तुतीयं for तुतीयात् $M^{1-2}T$ स्वरान्तश्च for स्वरान्तं च
12. P after स्वरान्तं च adds: ३१यो२वृधे२२
13. E वर्त्तीनि for वृत्तीनि
14. My^2 °द्वितीयस्वराभ्यां for °द्वितीयाभ्यां; E वर्त्तीनि for °वृत्तीनि.

आर्चिकं निधनं न्याये स्तौभिकं वा यदक्षरम् ।
क्रुष्टाक्रुष्टं भवेत्स्वार्यमन्तोदात्तं वृधे स्वरम् ॥

अस्यार्थः । आर्चिकानां स्तौभिकानां वा निधनानां निगदवृत्तीनाम् अन्त्यो **वर्णः** अनुदात्तश्चेत् अथवा प्रचयश्चेत् तदा तृतीयस्वरादि संप्रसारणम् । स्वरितश्चेत् तदा प्रथमस्वरादि संप्रसारणम् । उदात्तश्चेत् तदा वृधेस्वरम् । न्याये योनिगाने आर्चिकम् ऋगक्षराणां निधनम् । अथवा स्तौभिकं स्तोभाक्षराणां निधनम् । अन्ते क्रुष्टं स्वरितान्तं यद् भवेत् अन्ते अक्रुष्टम् अनुदात्तस्वरान्तं प्रचयस्वरान्तं वा यद् भवेत् तन्निधनं स्वार्यं स्वरितस्वरान्तं मन्द्रस्वरान्तम् ऊहे भवति । यन्निधनं योनिगाने अन्तोदात्तं भवेत् तन्निधनमूहे वृधेस्वरं भवति । पुरोआन्वीगवे अक्रुष्टमनुदात्तस्योदाहरणम् । **त्वनवे अपश्वानँश्नथिष्टनाऽ२३४५** (ऊ. द. १२) **औहोऽ६वा** (ग्रा. ११. ९. ४२९. २) इति धर्मणि उदाहरणम् । योनिगाने **पवस्वसोम** । इदमक्रुष्टं प्रचयस्वरान्तम् ऊहे स्वार्यं भवेत् । **पवस्वसोमा ऽ२३४५** । एवं मन्द्रस्वरान्तं योनिगाने **महान्त्समुद्रः** । इदमन्तोदात्तम् ऊहे वृधेस्वरं भवेत् । **महान्त्समुद्राऽ१ः** । एवं वृधेस्वरम् । योनिगाने **पितादेऽ२वानाऽ२म्** । इदं क्रुष्टं स्वरितान्तम् ऊहे स्वार्यं भवेत् । **पितादेऽ२वानाऽ२३४५म्** । एवं क्रुष्टं मन्द्रस्वरान्तम् । एवं प्रयोगे निधनानि भवन्ति ॥ २४ ॥

गिरागिरा प्रप्र नशंसिषं तस्थुषश्चेत्यनुब्राह्मणं स्वाध्याये ॥ २५ ॥

वि. गिरागिरादीनि तस्थुषान्तानि स्वाध्यायेऽनुब्राह्मणम् ऊहगीतावेतेषु ब्राह्मणेन यदुक्तं तत् स्वाध्याये भवति । ब्राह्मणेन **इराइरापप्रींवयंप्रियंमित्रंसुशंसिष-**

---

3. E वर्त्तीनां for वृत्तीनां
6. E om. अथवा
7. E प्रथम° for प्रचय°
16. A² om. गिरा...स्वाध्याये
17. T om. स्वाध्याये; S² °गीतेषु for °गीतौ

मीशानमिन्द्रसुस्थुष इत्येते उक्ताः ॥ २५ ॥

भा. गिरागिरादीनि तस्थुषान्तानि अनुब्राह्मणं स्वाध्याये । ऊहगीतावित्यर्थः ॥

दी. योनौ यज्ञायज्ञीये (ग्रा. १. ४. ३५. ४) गिरागिरा । गाइरागिरा । प्रप्र । प्रप्राऽ२ । नशꣳसिषम् । नशाऽ२ꣳसिषाउ ॥ रथन्तरे (आ. २. ६. ७६) तस्थुषः । तास्थूऽ२३४षा । इत्येतानि पर्वाणि स्वाध्याये ऊहे अनुब्राह्मणं यथा ब्राह्मणे उक्तानि तथा भवन्ति । ऐरं कृत्वोद्गेयम् । आइराइरा । पप्रींवयमिति वक्तव्यम् । पप्रीऽ२सूवयममृतम् । नुशँसिषमिति वक्तव्यम् । सुशँसिषमिति वा । प्रायम्मित्रन्नुशाऽ२ꣳसिषाउ । अथवा प्रायंमित्रंसुशाꣳसिषाऽ२ । रथन्तरे अस्थुष इति वक्तव्यम् । सुस्थुष इति वा । आस्थूऽ२३४षा । अथवा सूस्थूऽ२३४षा । एवम् ऊहे ब्राह्मणोक्तानि पर्वाणि भवन्ति ॥ २५ ॥

देवतानामधेयान्यप्यनिरुक्तेष्वेके ॥ २६ ॥

वि.&भा. देवतापरोक्षनामधेयानि स्वाध्याये ऊहे एके मन्यन्ते । तथैवाधीयन्ते राणायनीयाः । पुनानइन्दो धारया (ऊ. स. ६८५) इति बार्हदुक्थे । तथा सफे प्रियंयज्ञायेति (ऊ. ए. ४६७) ॥ २६ ॥

दी. ऊहे देवतानां परोक्षनामधेयानि पर्वाणि भवन्ति । अनिरुक्तेष्वपि क्रतुषु देवतानां परोक्षनामधेयानि पर्वाणि भवन्ति । एवमेके आहुः । इन्दुर्धाराभीऽ३ःसच । इन्दोसहाऽ३स्नभाऽ३ । यथा राणायनीयाः । बार्हदुक्थे पुनानइन्दोधाऽ२रया(ऊ. स. ६८५) सफे प्रियं याऽ२ज्ञाय (ऊ. ए. ४६७) । एवं पठन्ति ॥ २६ ॥

---

2. V^2B^4 गीतात् for गीतौ

8. अस्थुषम्....सुस्थुषम् for अस्थुष...सुस्थुषः

12. after नामधेयानि वि. add: च; भा. om. मन्यन्ते; M^{1-2} एवान्ते यथा; T एते यथा भा. ऊहे यथा for अधीयन्ते; S^1 after अधीयन्ते adds: यथा

13. M^{1-2} after रणायनीया: add: इति; $A^2M^{1-2}S^1T$ om. पुनान

18. $A^2M^{1-2}TS^1$ होता for सफे प्रियं; KS^1 after यज्ञाय adds: जन्मना

यथादेशं च ॥ २७ ॥

वि. यच्च ब्राह्मणं मशकसूत्रकारेण दिश्यते प्रोच्यते तच्च तथैव भवति ऊहगीतौ । यथा द्विर्द्विः पदमभ्यस्यन् (क्षु. क. ३. २. ७) इति । **नौधसस्य षट् ककुभः** (क्षु. क. १. ५. ५) इति । **मध्यमां तृचस्य प्रभृतिं कृत्वा** (क्षु. क. १. ६. ९) इति रथन्तरादीनां ककुवुत्तरीय[-त्व]म् । एवंजातीयानि सूत्रकारेण निर्दिष्टानि भवन्ति ॥ २७ ॥

भा. यच्च ब्राह्मणमनु शब्दः सूत्रकारैरादिश्यते तच्च ऊहगीतौ तथैव भवति । **द्विः पदमभ्यस्यन्ति** (क्षु. क. ३. २. ७) इति । **नौधसस्य षट् ककुभः** (क्षु. क. १. ५. ५) इति । **मध्यमां तृचस्य प्रभृतिं कृत्वा** (क्षु. क. १. ६. ९) इति । रथन्तरादीनां ककुबौत्तर्यं ककुवुत्तरे नौधसे द्विःपदमभ्यस्यन्निति । **आ३यिन्द्रंगीर्भिर्नवा** (ऊ. द. ६) । उत्तमायामप्येवम् ॥ २७॥

दी. यच्च ब्राह्मणमनु सूत्रकारैरादिश्यते **आदेशः** क्रियते तच्च ऊहे तथैव भवति । **प्रगाथेषु बृहद्रथन्तरयोर्यज्ञायज्ञीयस्य चानादेशे ककुभावुत्तरे** (द्रा. श्रौ,-२०. ४. २) इत्यादयः आदेशाः ऊहे भवन्ति ॥ २७ ॥

कालबविनामपि प्रवचनविहितः स्वरः स्वाध्याये ॥ २८ ॥

वि.&भा. कालबविनामपि प्रवचनविहितः स्वरः स्वाध्याये भवति । प्रवचनशब्देन ब्राह्मणमुच्यते । प्रोच्यते अनेनेति प्रवचनम् । स्वाध्यायशब्दः पूर्ववत् ॥ २८॥

दी. कालबविनां शाखिनां **प्रवचने** ब्राह्मणे **विहित** उक्तः **स्वरः** ऊहे

---

2. M^{1-2} मस्यिक० T मशुक०, A^{2} दुशनक० for मशक०; A^{2} om. प्रोच्यते

4. $A^{2}T$ मध्यमा M^{1-2} मध्यमस्य for मध्यमां; $S^{1}A^{2}M^{1-2}T$ प्रकृति for प्रभृतिं

5. $A^{2}M^{1-2}TS^{1}$ रथन्तरस्यापि for रथन्तरादीनाम्

9. P. प्रकृतिं for प्रभृतिं

16. भा om. स्वाध्याये भवति; वि. om. प्रवचन....स्वाध्याये भवति (P.844 L. 3)

17. भा. om. अनेनेति

भवति ।। २८ ।।

तथा शाट्यायनिनाम् ॥ २९ ॥

वि.&भा. **शाट्यायनिना**मपि प्रवचनविहितः स्वरः स्वाध्याये भवति ॥ २९ ॥

दी. **तथा** तेन प्रकारेण **शाट्यायनिनां** शाखिनां प्रवचने ब्राह्मणे विहितः स्वरः ऊहे भवति ॥ २९ ॥

समानोदर्केषूदर्कस्योद्धारः पूर्वयोः स्तोत्रीययोः ॥ ३० ॥

वि. **समानोदर्केषु** सामसु **उदर्कस्योद्धारो** भवति । उदर्कशब्दः ऋगन्तवचनः । यस्य तृचस्योदर्कः समानः स समानोदर्कः । तस्मिन् उदर्कस्योद्धारः पूर्वयोः स्तोत्रीययोरिष्यते । यथा **परिस्वानायां** (ऊ. सं. ३४८) मदेषु सर्वधा इति तथा **य एकइत्-त्रैककुभे** (ऊ. द. २०८) चतुरक्षस्योद्धारः पादवद्वृत्तेः । उष्णिह्यन्तश्च चतुरक्षरं पादवदिति पूर्वयोः स्तोत्रीययोः ॥ ३० ॥

भा. समानमुदर्कं येषु तानि समानोदर्काणि । तेषु समानोदर्केषु । उदर्कशब्दोऽन्तवचनः । समानसमाप्तिषु अन्त्यस्योद्धारः । यथा परिस्वानायां (ऊ. सं. ३४८)

---

3. PB[4] om. भवति and add: ताण्ड्यत्र ब्राह्मणादिः । ब्राह्मणविहितः स्वरः स्वाध्याये; P after स्वाध्याये further adds: ऊहगाने स्वाध्यायशब्दे च ऊहगानमुच्यते

6. T om. पूर्वयोः...उदर्कस्योद्धारः (L 8)

9. S[1] तथा for यथा; S[1] यथा for तथा

10. A[1]M[1-2]TS[1] वृद्धे for वृत्तेः

12. A[1] folio 112b: at the lower margin a note on उदर्क is found as follows: उदर्कशब्देन अन्तः । एकस्मिन् सर्वासु ऋक्षु अन्ते एकः सदृशः पादः । द्वौ वा । यथा सना च सोमजेषिचेत्यत्र अथा ना । तथा तरत्समन्दी चेत्यत्र । उभे यदिन्द्ररोदसी इत्यत्र देवी जनीति द्विपादस्य समानोदर्कः । श्रुतिश्च सोदर्क इन्द्रियस्य वीर्यस्य इति

मदेषु सर्वथा असीति तथा य एक इत्यै ककुभे चतुरक्षरस्योद्धारः । पादवद् वृत्तेः । उष्णिगन्त्यं चतुरक्षरं पादवदिति ॥ ३० ॥

दी. समानोदर्कम् अन्त्यं येषु सामसु तानि समानोदर्काणि । तेषु समानोदर्केषु समानसमाप्तिषु उदर्कस्यान्त्यस्योद्धारः । पूर्वयोः स्तोत्रीययोः । यथा परिस्वानायां (ऊ. स. ३४८) संहिते माऽ२३दाइ । धूऽ२३सा । वेधाऽ२३ः । हाउवाऽ३ । आऽ२३४सी इति समानान्त्यस्योद्धारः । ३० ॥

महेनायां तूपान्त्यं पदं प्रतिस्तोत्रीयं वाजीये संघातैकत्वात् ॥ ३१ ॥

वि. महेनायां (र. स. १२३) रायोवाजीये पूर्वोक्तेन न्यायेन द्वयोः पादयोरुद्धारः समानोदर्कत्वात् प्राप्तः । प्रतिस्तोत्रीयं भवति उपान्त्यं पदम् । तद्धि कस्मात् ? संघातैकत्वात् । द्वयोरुद्धारो न प्राप्नोति ॥ ३१ ॥

भा. पूर्वोक्तेन न्यायेन द्वयोः पदयोरुद्धारः प्राप्तः । समानोदर्कत्वात् ब्रवीति । महेनायां (र. स. १२३) रायोवाजीये उपान्त्यं पदं प्रतिस्तोत्रीयं भवति । तद्धि कस्मात् ? संघातैकत्वात् ॥ ३१ ॥

दी. एमाहे । नो अद्य (र. स. १२३) इति रायोवाजीये प्रतिस्तोत्रीयमुपान्त्यं पदं भवति । कुतः ? संघातैकत्वात् । संघातस्य एकपदत्वात् । सत्यश्रवसि वाऽ३ । यायाइ इति पदं प्रतिस्तोत्रीयं भवति ॥ ३१ ॥

तथातिच्छन्दस्सु नित्यवत्सासु ॥ ३२ ॥

---

4. L[2] °साम्निषु B[1] °सामसु for °समाप्तिषु

7. M[1-2] त्रिपादमन्त्ये for तूपान्त्यं

10. A[2]M[1-2]T पादम्; for पदम्; V[2]S[1] तदैकत्वात् M[1-2] ददकस्वात् KS[2] तदेकत्वात् for तद्धि कस्मा

वि. तथातिच्छन्दःसु नित्यवत्सासु संघातैकत्वात् प्रतिस्तोत्रीयं भवति ॥ ३२ ॥

भा. यथा महेनायां (र. स. १२२) तथातिच्छन्दःसु प्रोष्व्वमै (र. क्षु. १७०) त्रिकद्रुकयोः (र. क्षु. १६९) । संघातैकत्वात् ॥ ३२ ॥

दी. यथा महेनयां (र. स. १२२) तथातिच्छन्दस्सु एनाइका । द्रुकेषु (र. क्षु. १६९) इति नित्यवत्सासु उपान्त्यपादः प्रतिस्तोत्रीयं भवति । कुतः ? संघातैकत्वात् । सैनँसश्चद्देवो ऽ३ । दाइवाम् इति पादः प्रतिस्तोत्रीयं भवति । एप्रोषू । अस्मै (र. क्षु. १७०) इति नित्यवत्सासु उपान्त्यपादः प्रतिस्तोत्रीयं भवति । कुतः । संघातस्यैकत्वात् । नभन्त मन्यिाऽ३ । काईषाम् इति पादः प्रतिस्तोत्रीयं भवति ॥

त्रिकबृहति च पर्वैकत्वात् ॥ ३३ ॥

वि & भा. त्रिकद्रुकायां (र. प्रा. १४९) च बृहति पर्वैकत्वात् प्रतिस्तोत्रीयम् अष्टाक्षरस्यानुद्धारः ॥ ३३ ॥

दी. औहोइत्रिकद्रुकेषु महिषाऽ३ए (र. प्रा. १४९) इति बृहति । चकारादुपोत्तमः पादः प्रतिस्तोत्रीयं भवति । कुतः । पर्वैकत्वात् । सैनंसश्चद्देवोदाऽ२३४ इवाम् इति पादः प्रतिस्तोत्रीयं भवति ॥ ३३ ॥

इमं स्तोमसमन्ते च द्व्यक्षरं पदं संकृष्टत्वात् ॥ ३४ ॥

वि. इमंस्तोमसमन्ते च द्व्यक्षरं पदं प्रतिस्तोत्रीयं भवति । संकृष्टविधानात् ॥ ३४ ॥

इति फुल्लसूत्रविवरणे चतुर्थस्य अष्टमः खण्डः ॥ ८ ॥

---

1. M^{1-2} om. तथाति...नित्यवत्सासु
8. E om. कुतः
10. वि. om. प्रतिस्तोत्रीयम्
11. वि. उद्धारः for अनुद्धारः
16. V^{2} om. भवति

भा. **इमंस्तोम**-(ऊ. स. ६६७) समन्ते **घग्रा३इ** । **योग्ना३इ** । **त्वमादित्यान्** । **अवहतान्यूः३मस्यग्ने** । इति संकर्षः । ३४ ॥

इति पुष्पसूत्रभाष्ये चतुर्थस्य अष्टमी कण्डिका ॥ ८ ॥

दी. **इमंस्तोममर्हतेजातवेदसाइ** (ऊ.स.६६७) इति **समन्ते** द्व्यक्षरं पदं चकारात् प्रतिस्तोत्रीयं भवति । कुतः ? संकृष्टत्वात् । एकीभावात् । **घग्नाइ** । इति प्रथमायां द्व्यक्षरं पदं प्रतिस्तोत्रीयं भवति । द्वितीयायां **योग्नाइ** । तृतीयायां **स्यग्नाइ** । एवं संकर्षः ॥ ८ ॥

इति फुल्लदीपे अष्टमप्रपाठकस्याष्टमः खण्डः ॥ ८ ॥

नवमः खण्डः

प्रतिस्तोत्रीयमार्चिकानि निधनानि ॥ १ ॥

वि. ऊहगाने योनिवदित्यूहः प्रकृतः । तत्र ऊहस्वाभाव्यं **वर्तते** । अतः आह—**आर्चिकानि प्रतिस्तोत्रीयं** भवन्ति **निधनानि** । काण्वे (ऊ. द. २०) **रन्ताया** एवमादीनि । सिद्धोपन्यासः पूर्वयोः स्तोत्रीययोरुपान्त्यप्रतिषेधार्थः॥ १ ॥

भा. ऊहगाने योनिवत् स्वरा इति ऊहः प्रकृतः । तत्र **ऊहस्वाभाव्यं वर्तते** । अत्र आह **प्रतिस्तोत्रीयमार्चिकानि** भवन्तीति । सिद्धोपन्यासः **पूर्वयोः** **स्तोत्रीययोः** उपायप्रतिषेधार्थः ॥ १ ॥

दी. ऊहे ऋगक्षराणि **निधनानि** **प्रतिस्तोत्रीयं** भवन्ति । **उदाहरणम्**—

---

13. $V^2M^{1-2}TS^1$ ऊर्ध्वं हव्य वर्तेत इति ऊहः for तत्र...वर्तते

15. M^{1-2} आयान्तः, T उपायं तत् S^2 उपायान्त्य for उपान्त्य°

ऽ३१ (ऊ. द. १) इति यौधाजये प्रथमायां ३ ५ च्याऽ२३४याः। द्वितीयायां ३ साऽ२३४-५ दात्। तृतीयायां ३ क्षाऽ२३४ ५ णाः॥ १॥

स्तोभाङ्गभूतानि च॥ २॥

वि. येषां स्तोभोऽङ्गभूतस्तानि निधनानि प्रतिस्तोत्रीयं भवन्ति। यथा बृहन्-निधनवार्कक्षम्भे (र. सं. ६५)॥ २॥

भा. येषां निधनानां स्तोभोऽङ्गभूतः प्रतिस्तोत्रीयं भवति। यथा पद्मनिधने काण्वे (ऊ. द. २०) बृहन्निधने वार्कक्षम्भे (र. स. ६५) च॥ २॥

दी. स्तोभा अङ्गभूताः येषामृगक्षराणां निधनानां तानि **स्तोभाङ्गभूतानि** निधनानि प्रतिस्तोत्रीयं भवन्ति। उदाहरणम्। २र हावभि २र सोमास र १ २ आयावाः (र. सं. ६५) इति वार्कजम्भे प्रथमायां २ च्युता १ ऽ३हम्। द्वितीयायां २ बृहा १ ऽ३द्धम्। तृतीयायां २ बृहा १ ऽ३द्धम्॥ २॥

पर्वाङ्गभूतानि च॥ ३॥

वि.&भा. **पर्वाङ्गभूतानि** च प्रतिस्तोत्रीयं भवन्ति॥ ३॥

दी. पर्वाणि अङ्गभूतानि येषाम् ऋगक्षराणां निधनानां तानि **पर्वाङ्गभूतानि**। प्रतिस्तोत्रीयं भवन्ति। यथा **२र तद्वौ १ हो २ वा** (ऊ. अ. ५३८) इति मार्गीयवे २ ए १ ३। किने-ऽ२३४५। अयं एकारः प्रतिस्तोत्रीयं भवति॥ ३॥

---

12. $L^{1-2}EMy^{2-3}$ पूर्वाङ्ग° for पर्वाङ्ग°

13. $M^{1-2}TS^{1}$ om. पर्वाङ्गभूतानि च प्रतिस्तोत्रीयम्, $L^{1-2}E$ पूर्वाङ्ग for पर्वाङ्ग

14. $EL^{1-2}My^{2-3}$ पूर्वाणि for पर्वाणि

16. E अत्र for अयं

तथा हाइकारस्वारपदानुस्वाराणाम् ॥ ४ ॥

वि. तथा **हाइकारस्वारपदानुस्वाराणां** साम्नां प्रतिस्तोत्रीयं भवति। वामदेव्ये हाइकारो भवति। स्वारे **सुतासो** (ऊ. अ. ५९४) त्वाष्ट्रीसाम्नि हाइकारः। कावे पदानुस्वारः। स्वारग्रहणान्न वाङ्निधनानि प्रतिस्तोत्रीयमिति भावः। यथा **उद्धद्**भार्गवे (ऊ. द. १५४)। सामराजे च **असाविसोमायाम्** (अ. ऊ. द. १८८) ॥ ४ ॥

भा. **हायिकारस्वारपदानुस्वाराणां** प्रतिस्तोत्रीयं हायिकारो भवति। पदानुस्वारश्च। स्वारग्रहणाच्च वाङ्निधनानां प्रतिस्तोत्रीयं निधनानामभावः। यथा उद्धद्भार्गवे (ऊ. द. १५४)। सामराजे चासाविसोमायाम् (ऊ. द. १८८)। अत्र स्तोभाङ्गभूतोऽपि प्रतिस्तोत्रीयं निधनं न भवति। उत्तमायामेव भवति ॥ ४ ॥

दी. **हाइकारस्वाराणां पदानुस्वाराणां** साम्नां **तथा पूर्वोक्तेन प्रकारेण प्रति**स्तोत्रीयं हाइकारो भवति। प्रतिस्तोत्रीयं पदानुस्वारो भवति। उदाहरणम्– **काऽ५या** (ऊ. द. ५) इति वामदेव्ये प्रथमायां **वाऽ२त्तोंऽ३५हाइ**। द्वितीयायां **वाऽ२सोऽ३५ हाइ**। तृतीयायां **ताऽ२योऽ३५हाइ**। पदानुस्वारस्योदाहरणम्– **प्रातू**। (ऊ. द. ४) इत्यौशने प्रथमायां **ताऽ६५६इ**। द्वितीयायां **व्याऽ६५६:**। तृतीयायां **नाऽ६५६म्** ॥ ४ ॥

---

3. S^1 स्वासु for स्वारे; My^1 ०कारस्वरो for ०कारो; My^1 om. स्वारे...कारः

4. A^2T काव्ये for कावे; $A^3M^{1-2}T$ ०ग्रहणेन for ०ग्रहणान्न; A^2 ०निधनान्वितानि च कण्वबृहत्प्रभृतीनि च for ०निधनानि...सोमायाम्; M^{1-3} निधनानां न for ०निधनानि; T after ०निधनानि add: च; T भवन्ति for इति भावः; T स्वःपृष्ठोत्सेधादिषु for उद्धद्भार्गवे...सोमायाम्

7. P स्वाराणां for ०स्वारश्च

8. B^4 भूतौ for भूतोऽपि

9. PV^2 च for न

14. My^{2-3} om. प्रथमायां

अन्तःसामिकानि च स्तौभिकानि ॥ ५ ॥

वि' भा. अन्तःसाम्नि सामसध्ये यानि **स्तौभिकानि** निधनानि च **प्रतिस्तोत्रीयं** भवन्ति । यथा स्वःपृष्ठोत्सेधादिषु ॥ ५ ॥

दी. अन्तःसाम्नि साममध्ये यानि **स्तौभिकानि** निधनानि । चकारात् यानि च ऋगक्षराणि निधनानि तानि प्रतिस्तोत्रीयं भवन्ति । उदाहरणम्–तवाऽ२हँ्स्सोऽ३४ । औ॒होऽ५ । **मरारणा** (ऊ. द ७१) इति स्वःपृष्ठे । ऊऽ२३४पा । ऊऽ२३४पा इति स्तोभनिधनं प्रतिस्तोत्रीयं भवति ॥ ५ ॥

सामान्तिकानि सामान्ते सर्वत्र ॥ ६ ॥

वि. यानि **साम्मान्तिकानि** स्तौभिकानि तानि तृचस्थस्यान्ते भवन्ति **सर्वत्र** । आमहीयवरौरवश्यैतादिषु ॥ ६ ॥

भा. यानि स्तौभिकानि निधनानि बहिर्निधनानि तानि तृचस्थस्य साम्नः अन्ते भवन्ति । यथामहीयवरौरवश्यैतादिषु ॥ ६ ॥

दी. योनिगाने साम्नः अन्तिकानि अन्तेभवानि यानि स्तौभिकानि बहिर्निधनानि तानि ऊहे तृचस्थस्य साम्नोऽन्ते भवन्ति । उदाहरणम्–**उच्चाताऽ३इजातमन्धसाः** (ऊ. द. १. १. १) इत्यामहीयवे । **स्तौषेऽ२३४५** इति स्तोभनिधनं तृचस्थस्य साम्नः अन्ते भवति ॥ ६ ॥

अन्यत्र गणगीतिभ्यः ॥ ७ ॥

वि. गणगीतिषु च बहिर्निधनेषु **वारवन्तीये यज्ञा** (ऊ. ए. ५०६) **सन्तेम्पदा**-(ऊ. ए. ५०८)**दिषु** तथा **एना- प्रत्यु अदर्श्या** (ऊ ए. ८२७- ८)**दिषु** तथा **वैराज-र्षभयोः** (र. क्षु. १६७- ८) **पिबासोमादिषु** ॥ ७ ॥

---

2. वि. om. अन्तःसाम्नि; A² om. साममध्ये…निधनानि च; T om. साममध्ये…उत्सेधादिषु(L. 3)
9. S¹ तृचस्थानस्य for तृचस्थस्य
18. M¹-² बृहन्निधनेषु for बहिर्निधनेषु

भा. गणगीतिषु बहिर्निधनेषु वारवन्तीयादिषु यज्ञा–एह्यूषु-तन्ते-श्रुधीहवादिषु (ऊ. ए. ५०६.–९)। तथा प्रत्यु-इमाउवादिषु (ऊ. प्रा. ८२८-९)। तथा वैराजर्षभ–पिबासोमादिषु (र. क्षु. १६७-८)। एतेषु सामसु अन्ते बहिर्निधनानि भवन्ति ॥ ७ ॥

दी. गणेषु सामसमुदायेषु। एका गीतिर्येषु तानि गणगीतिनि। तेभ्यो गणगीतिभ्योऽन्यत्र अन्येषु सामसु स्तौभिकं निधनं तृचस्थस्य साम्नो अन्ते भवति। गणगीतिषु तु सर्वेषामन्ते स्तौभिकं बहिर्निधनं भवति। उदाहरणम्– यज्ञायज्ञाऔहोहाइ। एहियूषा औहोहाइ। तन्तेमदा औहोहाइ। श्रुधीहवा औहोहाइ॥ (ऊ. ए. ५०६-९) इति वारवन्तीयानां सर्वेषामन्ते निधनम् ॥ ७ ॥

प्रतिस्तोत्रीयम् बोधीयधुरामश्वयोः ॥ ८ ॥

वि. बोधीये धुरां च साकमश्वे प्रतिस्तोत्रीयं भवति। सामान्तिकानि सामान्ते (पु.सू. ८. ९. ६) इति प्राप्त इदमुच्यते। ये सोमा (ऊ. द. १३६) घ्वर्या (ऊ- द. १४५)दिषु ॥ ८ ॥

भा. सामान्तिकानि सामान्ते सर्वत्रे–(पु. सू. ८. ९. ६)ति प्राप्ते इदमुच्यते। प्रतिस्तोत्रीयं बोधीये निधनं भवति। धुरां च साकमश्वे येसोमास (ऊ. द. १३६) अध्वर्यादिषु (ऊ द. १४५)॥ ८ ॥

दी. सामान्तिकानि सामान्ते सर्वत्रे–(पु. सू. ८. ९. ६)ति प्राप्ते इदमुच्यते। जराबोधो वा। इत्यादिजराबोधीये स्तोभनिधनं प्रतिस्तोत्रीयं भवति। इडा। निधनम्। अध्वर्यो आऽ३। होऽ३होऽ३१ (ऊ. द. १४५) इत्यादिधुरांसाकमश्वे स्तोभनिधनं प्रतिस्तोत्रीयं भवति। इडा इति निधनम् ॥ ८ ॥

---

1. B[6] हवायां तथा एनादिषु वैराजर्षिवासोम्यादिषु for हवादिषु...सोमादिषु

5. L[1] सामसु for सामº; E om. सामº

10. A[2]M[1-2]TS[1] धुरां कमश्वयोः for धुरामश्वयोः

कण्वबृहति च ॥ ९ ॥

वि.&भा. कण्वबृहति च प्रतिस्तोत्रीयं निधनं भवति **त्वामिध्यादिषु** (ऊ. क्षु. ८६६) ॥ ९ ॥

दी. औहोतुवमिद्धा२ए (ऊ. क्षु. ८६६) इत्यादिकण्वबृहति स्तोभनिधनं प्रतिस्तोत्रीयं भवति । बा इति निधनम् ॥ ९ ॥

निधनोपायान्ताः स्तोत्रीयाः सर्वत्र ॥ १० ॥

वि.&भा. बहिर्निधनेष्वामहीयवगौरवश्यैतादिषु सामान्ते सकृत्प्राप्तौ समान्तिकत्वात् । किन्तु उपायार्थमुच्यते **निधनोपायान्ता** इति । न ऋचा समाप्तिः । उपायः प्रतिस्तोत्रीयं भवतीत्यर्थः ॥ १० ॥

दी. बहिर्निधनेषु आमहीयवादिषु **सर्वत्र** सर्वसामसु निधनस्य वाइत्युपायान्ताः स्तोत्रीया भवन्ति । वाइत्यन्ताः स्तोत्रीयाः । न निधनम् ॥ १० ॥

इडाभिरैडानामिडान्ताः ॥ ११ ॥

वि.&भा. **इडाभिरैडानां** पृश्न्यादीनाम् इडान्ताः स्तोत्रीयाः भवन्ति ॥११॥

---

2. KS[1]-[2]M[1]-[2] om. निधनं; वि. om. त्वामिध्यादिषु

7. भा. °नौधस° for °गौरव°; वि. before सकृत् adds: उपाय; KS[1]-[3]My[1] असामान्तिकत्वात् for सामान्तिकत्वात्

8. KS[1]-[2]M[1]-[2] भवन्ति, A[2]T च भवन्ति for इति; भा. om. न ऋचा समाप्तिः; KS[3] उपाया.... भवन्ति for उपायः... भवति

9. P after इत्यर्थः ॥ adds: उपायो यज्ञकर्मणि

11. L[1] अन्तस्थाः for अन्ताः; L[1] om. न निधनम्

13. वि. om. पृश्न्यादीनाम्; B[4] after भवन्ति adds: इडानिधन उपायान्ता इति ; वि. after भवन्ति adds: पृश्न्यादिषु

दी. ऐडानामिडानिधनानां नाम्नां प्रथमेडाभिरिडान्ताः स्तोत्रीयाः भवन्ति । उदाहरणम्- द्यौराजाऽ२३चर्षणीनांहाउ (ऊ. द. ७४) इति पृश्निनि इडाऽ२३ । एवं प्रथमेडान्ताः स्तोत्रीयाः भवन्ति ॥ ११ ॥

श्रूधियान्ताः श्रुध्ये ॥ १२ ॥

वि.&गा. श्रुध्ये श्रूधियान्ताः स्तोत्रीयाः भवन्ति ॥ १२ ॥

दी. अग्नेवाजाऽ२स्य (ऊ. ए. ४२१) इत्यादि श्रुध्ये श्रूधियाऽ२ इत्यन्ताः स्तोत्रीया भवन्ति ॥ १२ ॥

ऋक्समाः पगवयोः ॥ १३ ॥

वि. औपगवयोः त्वंनइन्द्रे- (ऊ. द. १३८) न्द्रमच्छयोः (ऊ. द. ३९५(ऋक्समाः स्तोत्रीया भवन्ति । ऋचा समाप्तिः ॥ १३ ॥

भा. औपगवयोः ऋगन्ताः स्तोत्रीया इति ॥ १३ ॥

दी. इन्द्रमच्छा । सुताइमाइ (ऊ. ए. ३९५) इति पूर्वे औपगवे ऋक्-समानाः ऋगन्ताः स्तोत्रीया भवन्ति । सुवर्वोऽ२३इदाः । यथा वाऽ२३इदाइ । इति ऋगन्ताः स्तोत्रीयाः भवन्ति । तुवन्नाऽ३इन्द्रआभरा (ऊ. द. १३८) इत्युत्तरे औपगवे तनासाहाम् । स्नमीमाहाइ । इति ऋक्समानाः । न अग्रे ॥ १३ ॥

अभ्यस्तान्ताः पुष्पाद्यरयिष्ठयोः ॥ १४ ॥

वि. अभ्यस्तान्ताः स्तोत्रीया भवन्ति । पूर्वमभ्यस्तं परोऽभ्यासः ॥ १४ ॥

भा. अभ्यस्तान्ताः पूर्वार्केपुष्परयिष्ठयोः भवन्ति । पूर्वमभ्यस्तं परोऽभ्यास

---

5. वि. after भवन्ति adds: इत्यर्थः

8. A²M¹⁻² औपगवयोः for पगवयोः

10. A² om. ऋचा समाप्तिः

11. A¹ om. स्तोत्रीयाः

17. A² om. पूर्वम्... अभ्यासः

इति। आद्यन्तयोर्दर्शनम्। पादशिष्टे च। यथा पार्थसंकोशवाराहकुत्सादिषु ॥ १४ ॥

दी. परीतोषिञ्चतासुतम्। हुवेऽ२३ (ऊ. द. १८३) इत्यर्कपुष्पाद्ये सुषावसोमभद्रिभिः। हुवेऽ३१। इत्यभ्यस्तान्ताः। न अग्रे। अभीनोवा। जसाताऽ३माम् (ऊ. द. १६७) इति रयिष्ठे तुविद्युम्नाम्। विभासाऽ३हाम्। औऽ३होऽ३वा। इत्यभ्यस्तान्ताः। न अग्रे। पूर्वमभ्यस्तम्। परोऽभ्यासः ॥ १४ ॥

उगत्यन्ताः प्रवद्गुद्गत्सामराजेषु ॥ १५ ॥

वि. प्रवद्भार्गवोद्वद्भार्गवसामराजेषु उगत्यन्ताः स्तोत्रीया भवन्ति ॥ १५ ॥

भा एतेषु उगत्यन्ताः स्तोत्रीया भवन्ति। ते पादशिष्टे च। यथा पार्थसम्पावाराहकुत्सरथीयवात्सप्रादिषु ॥ १५ ॥

दी. प्रोअयासाइत् (ऊ. द. १२७) इति प्रवद्भार्गवे उगत्यन्ता स्तोत्रीया भवन्ति। माऽ२नापथाऽ३१२उ। इति उगत्यन्ताः। न अग्रे। शिशुञ्जज्ञाऽ२३ (ऊ. क्षु. ९१३) इत्युद्वद्भार्गवे तिरेभाऽ३नाउ। इति उगत्यन्ता। न अग्रे। हाउहोवाऽ३हाइ। असाविसोमोऽ३आ (ऊ. द. १८८) इति सामराजे आसदाऽ३दाउ। इति उगत्यन्ता। न अग्रे ॥ १५ ॥

एकारान्ताः सुज्ञाने ॥ १६ ॥

वि. सुज्ञाने एकारान्ताः स्तोत्रीयाः भवन्ति ॥ १६ ॥

दी. सखायआ। निषीदता (ऊ. सं. २६०) इति सुज्ञाने एकारान्ताः स्तोत्रीया भवन्ति। षतश्रियएऽ३। एवमेकारान्ताः। न अग्रे ॥ १६ ॥

स्तोभश्च सामाद्यः सामन्ते यथान्यायम् ॥ १७ ॥

वि. स्तोभानुमुद्धारः उक्तन्यायः संभवति। सामाद्यस्य सामान्ते यथान्यायमुद्धारे प्राप्ते सामाद्यः सामान्ते च नियम्यते। आद्यन्तयोर्दर्शनम्। स्तोभस्येत्यर्थः ॥ १७ ।

---

1. P om. आद्यन्त०...कुत्सादिषु

भा. ऊहस्वाभाव्यं प्रकृतम् । तत्र सामाद्यः सामान्ते यथान्यायं भवति । आद्यन्तस्तुब्धेषु द्वन्द्वशिष्टेषु च यथान्यायम् । आद्यन्तदर्शनात् ॥ १७ ॥

दी. ऊहे सामाद्यः सामान्ते च स्तोभो यथान्यायं भवति । लाट्यायनेन न्याय उक्तः । आद्यन्तस्तुब्धेषु (ला. श्रौ. ३. ९. ७) इति । उदाहरणम्– हाउहाउ-हाउ । आग्नीम् (ऊ. क्षु. ९००) इति मराये हाउ [त्रिः] इति स्तोभः साम्नः आदौ अन्ते च भवति । एवमन्येषु सामसु ॥ १७ ॥

रहस्ये तूद्धारः ॥ १८ ॥

वि. रहस्ये तु सर्वेषु सामसु स्तोभस्योद्धारो भवति । राजनादिषु ॥ १८ ॥

भा. रहस्ये तु स्तोभस्योद्धारः । एवं राजनादिषु ॥ १८ ॥

दी. रहस्ये तु अरण्ये गेये स्तोभस्योद्धारो भवति । उदाहरणम्- त्रिकद्रुकेषु महिषोयवाशिराम् (र. सं. ६८) इति पञ्चनिधने स्तोभस्योद्धारः । एवमादिषु । अनुपद-सूत्रे–नित्यदृष्टस्त्वदृष्टानामनुविधार्थम् [इति] ॥ १८ ॥

तस्य लक्षणोद्देशः ॥ १९ ॥

वि. तस्य लक्षणोद्देश उक्तिर्वक्ष्यते ॥ १९ ॥

भा. तस्य लक्षणोद्देशो वर्तिष्यते ॥ १९ ॥

दी. तस्य स्तोभस्य लक्षणोद्देशः । लक्षणेन निरुक्तस्य सामादावाद्यं वचनम् (पु. सू ८. ९. २१) इत्यादिवचनेन उद्देशः आदेशः कर्तव्यः ॥ १९ ॥

पर्वाङ्गभूतस्यानुद्धारः ॥ २० ॥

---

1. P स्वभावः प्रकृतः for °स्वाभाव्यं प्रकृतम्
2. P °पूर्वेषु for °स्तुब्धेषु
15. B[4] before तस्य adds: स न उच्यते सर्वासु
18. TS[1]L[1] पूर्वाङ्ग° for पर्वाङ्ग°

वि. पर्वाङ्गभूतस्य स्तोभस्यानुद्धारो भवति । यथा बृहद्रथन्तरयोः ॥ २० ॥

भा. यथा बृहद्रथन्तरयोः तदिदाराजने तृचान्तप्रयोगः ॥ २० ॥

दी. पर्वणः अङ्गभूतस्य स्तोभस्य न उद्धारः । बृहति **उहुवाऽ६हाउ** । **रथन्तरे ओवाऽ६** । **तदिदा-** (र. स. ६७) राजने तृचान्तप्रयोगः । वैराजे **सधमे(द्विः): साधा ऽ३माइ** । **ऋतमे** (द्विः) **आर्ताऽमाइ** । **ईयाहाउ** (द्विः) । **इयपिबामत्स्वऽ२** (र. द. १७) इत्यादिस्तोभस्य पर्वणः अङ्गभूतस्य न उद्धारः । एवमादीनि ॥ २० ॥

त्रिरुक्तस्य सामादावाद्यं वचनं यथा भद्रश्रेयोऽरिष्टशाक्वर-

ऋषभस्याशिरामर्कसप्तहैकवृषाणाम् ॥ २१ ॥

वि. रहस्ये तु **त्रिरुक्तस्य** स्तोभस्य सामादावाद्यं वचनं भवति । भद्रश्रेयोऽरिष्ट-शाक्वरर्षभस्याशिरामर्कसप्तहैकवृषाणामिति ॥ २१ ॥

भा. रहस्ये **त्रिरुक्तस्य सामादावाद्यं वचनम्** । यथा भद्रश्रेयादिषु ॥ २१ ॥

दी. भाद्रादीनां **सामादौ त्रिरुक्तस्य** स्तोभस्याद्यं **वचनं** न लुप्यते । **होइहा** । इत्यादि । **इमानुकं भुवना** (आ. ३. ५. १३२) इति भद्रे । **होइहा** इति **सामादा-वाद्यं वचनं** न लुप्यते । अन्येषां लोपः । **होइया** इत्यादि **इमानुकं भुवना** (आ. ३. ५. १३३) इति **श्रेयसि** सामादौ **होइया** इति त्रिरुक्तस्याद्यं वचनं न लुप्यते । अन्येषां लोपः । **हाह** । **होइया** (आ. १. १. ११) इत्यरिष्टे **हाह** । **होइया** इति सामादौ त्रिरुक्तस्याद्यं वचनं न लुप्यते । अन्येषां लोपः । **औऽ३१म्** (आ. १. ४. ४८) इति **शाक्वरऋषभे** औऽ३१म् इति त्रिरुक्तस्याद्यं वचनं न लुप्यते । **अयामायाम्** (आ. १. ३.

---

1. Ts^1 पूर्वाङ्ग for पर्वाङ्ग०; A^2M^{1-2} om. स्तोभस्य

4. L^1M^{2-3} om. तदिदाराजने तृचान्तप्रयोगः

12. E इदानीं for भद्रादीनां

15. L^1 अप्रमादौ for सामादौ

18. My^2 om. आयामयाम्....न लुप्यते (P 857; L.1)

३०) इति **स्वशिरामर्के अयामायाम्** इति त्रिरुक्तस्याद्यं वचनं न लुप्यते। **अयंवायाउ** (आ. २. ६. ७७) इति **सप्तहे अयंवायाउ** इति त्रिरुक्तस्याद्यं वचनं न लुप्यते। **हाहुम्**(त्रिः) **योवा**(त्रिः) **योवा**।हाइ (त्रिः) इत्येक**वृषे** (आ. २. ६. ६९) सामादौ **हाहुम्** इति त्रिरुक्तस्याद्यं वचनं न लुप्यते। अन्येषां लोपः ॥ २१ ॥

श्रेयसि तु होशब्दस्य लोपः ॥ २२ ॥

वि. **श्रेयसि** (र. क्षु. १९९) **होशब्दस्य लोपो** भवति। **होइयेत्यत्र**। इया ॥ २२ ॥

भा. सामादौ ॥ २२ ॥

दी. **श्रेयसि** (र. क्षु. १९९) **तु** सामादिषु **होशब्दस्य लोपो** भवति। **इया**। एवं भवति ॥ २२ ॥

जम्भोत्तरसंस्तोभाञ्जोरूपाणां सामान्तेऽन्त्यं वचनम् ॥ २३ ॥

वि. **उत्तरजम्भसंस्तोभाञ्जोवैरूपाणां सामान्त** एवान्त्यं **वचनमेव** भवति ॥

भा. एतेषां साम्नां सामान्ते यत् त्रिरुक्तं तस्य अन्त्यं यद्वचनं तत् न लुप्यते ॥ २३ ॥

दी. योनौ **हाउ** (त्रिः)। **विश्वेषाम्** (आ. ३. ५. १३९) इति **वार्कजम्भोत्तरस्य**। **हाउ** (त्रिः)। **सन्त्वानोनवुः** (आ. १. ३. ३३) इति **संस्तोभस्य**। **यद्यावई** (आ. १. १. १.) इत्यञ्जोवैरूपस्य **सामान्ते अन्त्यं** स्तौभिकं **वचनम्** ऊहे न लुप्यते। **पुरोजितीवोअन्धासाः** (र स. १३१) इति **वार्कजम्भोत्तरे सामान्ते अन्त्यं वचनं** स्तौभिकं न लुप्यते। **स्तोभानाऽ३४**। **औहोवा** इदमन्त्यं वचनम्। **स्तोभानुसुद्धारः** (पु. सू. ८. ५. ११) इत्यनेन लोपे प्राप्ते इदं वचनम्। **नदंवो अदतीनाम्** (र. ए. ७८)

10. E om. भवति

इति संस्तोभे सामान्ते अन्त्यं स्तौभिकं वचनं न लुप्यते । **वाङ्श्वस्माऽ२३४ औहोवा** । इदमन्त्यं वचनम् । अभिसोमा । सआऽ२३उवाऽ२३ (र. सं. ३९) इत्यञ्जोत्रैरूपे सामान्ते अन्त्यं स्तौभिकं वचनं न लुप्यते । हाहाऽ३ । उवाऽ२३ इत्यन्त्यं वचनम् ॥ २३ ॥

संक्रुतिनि स्तोभाद्यं वचनं प्रातिस्तोत्रीयम् ॥ २४ ॥

वि. संक्रुतिनि (र. द. २४) त्रिरुक्तस्य स्तोभस्याद्यं वचनं **प्रतिस्तोत्रीयं** भवति ॥ २४ ॥

भा. संक्रुतिनि (र. द. २४) उद्गीथाद्यस्य त्रिरुक्तस्य प्रतिस्तोत्रीयमाद्यं वचनं न लुप्यते । **हाउवा** ॥ २४ ॥

दी. एपारी (र. द २४) इति **संक्रुतिनि** हाओवा (त्रिः) इति स्तोभस्याद्यं **वचनं प्रतिस्तोत्रीयं** भवति । प्रथमायां **हाओवा** । न अभ्यस्तम् । द्वितियायां **हाओवा** । तृतीयायां **हाओवा** । एवं भवति ॥ २४ ॥

उद्भिद्बलभिदोः पूर्वस्यादौ परस्यान्ते ॥ २५ ॥

वि. उद्भिद्बलभिदोः पूर्वस्योद्भिदः सामादौ यदुक्तं तस्यानुद्धारः । **परस्य** बलभिदः सामान्ते **यत्** (?यः) स्तोभस्त्रिरुक्त (?क्तः) तस्यानुद्धारः ॥ २५ ॥

भा. उद्भिद्बलभिदोः पवतेहर्य-यस्तेमदयोः पूर्वस्य उद्भिदः सामादौ **यत्** त्रिरुक्तं तस्यानुद्धारः । परस्य बलभिदः अन्ते यत् त्रिरुक्तं तस्यानुद्धारः ॥ २५ ॥

---

5. M[1-2] om. संक्रुतिनि...स्तोत्रीयम्
6. M[1-2] om. त्रिरुक्तस्य
8. A[1] om: आद्यं; PV[2] om. न
9. PV[1] om. हाइवा
13. KS[2] अन्त्ये, S[2] अन्त्यम् for अन्ते
14. M[1-2] om. परस्य...अनुद्धारः, (L. 15)
15. KS[1] स्तोभे for स्तोभः

दि. उद्भिद्बलभिदोर्विशेष उच्यते । होवाइ । होवाइ । होवाऽ ३होइ । पवते हाऽर्याऽ३तो हरिः (र. ए. ८६) इत्युद्भिदि सामादौ होवाइ । होवाइ । होवा-ऽ३हाइ इति त्रिरुक्तस्य स्तोभस्यानुद्धारः । ओवा । ओवा । ओवाऽ३हाऽ३४औहोवा इति बलभिदि (र. ए. ८७) अन्ते न उद्धारः ॥ २५ ॥

भर्गस्य सामादौ स्तोभान्त्यं पदम् ॥ २६ ॥

वि. भर्गस्य स्तोभानामन्त्यं पदं भवति सामादावेव । यत् इति ॥ २६ ॥

भा. भर्गस्य ये स्तोभाः तेषां पादान्त्यं पदं [यदिति] तत् स्तोभान्त्यं पदं सामादौ भवति ॥ २६ ॥

दी. यत् । पुरोजिती (र. ए. ८९) इति भर्गे सामादौ हाउधामयत् इत्यादि स्तोभानामन्त्यं यत् इति पदं न लुप्यते ।अन्येषां लोपः ॥ २६ ॥

वैराजर्षभे त्वन्त्यस्यान्त्यं वचनम् ॥ २७ ॥

वि. वैराजर्षभे (र. क्षु. १६७) सामादौ अन्त्यस्य त्रिरुक्तस्य अन्त्यं वचनं भवति ॥ २७ ॥

भा. वैराजर्षभे तु अन्त्यस्य त्रिरुक्तस्य अन्त्यं वचनं सामादौ भवति । इया३हा३उ पिबासोमादिषु (र. क्षु. १६७) ॥ २७ ॥

दी. इयाहाउ । पिबासोमाम् (र. क्षु. १६७) इति वैराजर्षभे तु हाउ-हाउहाउ । आइही(त्रिः) आइ(त्रि) इयाहाउ(त्रिः) इत्यन्त्यस्तोभस्यान्त्यम्[इयाहाउ]इति न लुप्यते । अन्येषां लोपः ॥ २७ ॥

---

3. RMy[3] अनुद्धारः for न उद्धारः; R om. ओवा ।... न उद्धारः

6. S[1] स्तोभान्त्यं for स्तोभानामन्त्यं; M[1-2] अन्त्यस्तोभान्त्यं for अन्त्यं

9. L[1] यामयत् for धामयत्

10. L[1] om. इति

13. S[1]A[2]M[1-3]T. after भवति add: सामादौ

यण्वापत्ययोर्यथा ग्रामे ॥ २८ ॥

वि. **यथा ग्रामेगेये** आद्यन्त्ययोः स्तोभावित्यर्थः ॥ २८ ॥

भा. यण्वापत्ययोः **अर्षासोमायां** यथा ग्रामेगेये तदुक्तो न्यायः **स** भवति । **स्तोभश्च सामाद्यः सामान्ते यथान्यायम्** (पु. सू. ८. ९. १७) इति ॥ २८ ॥

दी. **यथा ग्रामेगेयेषु** स्तोभन्यायस्तथा यण्वापत्ययोः स्तोभन्यायो भवति । **स्तोभश्च सामाद्यः सामान्ते यथान्यायम्** (पु. सू. ८. ९. १७) इति **अर्षासोमद्युमत्तमः** । एऽ२ (र. द. ११) इति **यण्वे औहोवा औहोवा औहोवा । औहोवाइ** इति स्तोभः **प्रस्तावानन्तरमुद्गीथादौ** भवति । अयमेव स्तोभः पुनरुपद्रवादौ भवति । एवमाद्यन्तस्तोभो भवति । **हाउहाउहाउ । अर्षासोमद्युमऽ२३त्तमाऽ३ः** । (र. सं. ३३) इत्यपत्ये **हाउहाउहाउ** इति स्तोभः प्रथमपादात् प्राक् भवति । अन्तिमपादात् प्राक् भवति ॥ २८ ॥

वैराज इयादिः स्तोत्रीयान्ते सर्वासु ॥ २९ ॥

वि. **महावैराजे** (र. द. १०) **इयादिः** स्तोभ एव भवति **सर्वासु** स्तोत्रीयासु ॥ २९ ॥

भा. **महावैराजे** (र. द. १०) **इयादि;** स्तोभः स्तोत्रीयान्ते सर्वासु स्तोत्रीयासु भवति ॥ २९ ॥

दी. **होइयाहोइयाहोइयाऽ२३४३पिबा** (र. द. १०) इति **वैराजे सर्वासु** स्तोत्रीयासु **स्तोत्रीयान्ते ईयाहाउ** इत्यादिः स्तोभो भवति ॥ २९ ॥

---

2. M[1]-[2] before यथा add गेये; A[2]S[1]T. वेदसाम्नि for ग्रामे गेये

3. O. गेयानाम् for गेये; V[2] संभवति for स भवति

10. E अन्त्य° for अन्तिम°

12. My[1] इयाद्यः for इयादिः

स्तोत्रीयाद्ये चाक्षरे मत्स्वसंयुक्ते ॥ ३० ॥

वि. स्तोत्रीयाद्ये द्वे अक्षरे तस्याः स्तोत्रीयायाः अन्ते **मत्स्वसंयुक्ते** भवतः सर्वासु ॥ ३० ॥

इति फुल्लविवरणे चतुर्थस्य नवमः खण्डः ॥ ९ ॥

भा. एकैकस्याश्च स्तोत्रीयाया आद्ये अक्षरे ते च स्तोत्रीयाया अन्ते **मत्स्वसंयुक्ते** भवतः ॥ ३० ॥

इति पुष्पसूत्रभाष्ये चतुर्थस्य प्रपाठकस्य नवमी कण्डिका ॥ ९ ॥

दी. एकैकस्याः स्तोत्रीयाया आद्ये द्वे अक्षरे **मत्स्वसंयुक्ते** भवतः । इया-हाउ(द्विः) इया पिबमत्स्वाऽ३ । हाउवा३ । द्वितीयायाम् इयाहाउ । इयास्तेमत्स्वाऽ३ । हाउवाऽ३ । तृतीयायाम् इयाहाउ (द्विः) इयबोधमत्स्वाऽ३ । हाउवाऽ३(र. द. १०) । एवं भवन्ति ॥ ३० ॥

इति फुल्लदीपे अष्टमप्रपाठकस्य नवमः खण्डः ॥ ९ ॥

दशमः खण्डः

आज्यदोहानि प्रतिलोमानि ॥ १ ॥

वि. आज्यदोहानामनुलोमक्रममुत्सृज्य प्रातिलोम्यं भवति । ऋतनिधनमीनिधनं त्रिणिधनमिति ॥ १ ॥

18. A^2 आनुलोम्य० for अनुलोम०; KMy^1 ०लोम्यक्रम, $M^{1-2}Ts^{1-2}$० लोम्यक्रमि for ०लोम्य०

भा. आज्यदोहानां सामाम्नायिकं क्रममुत्सृज्य प्रातिलोम्यं भवति इति श्रुतेः अयमेवर्तनिधनमित्याज्यदोहानां लोकतो विनियोग इति ।। १ ।।

दी. योनौ हाउहाउहाउ । आज्यदोहम् ।। हाउहाउहाउ । हुंचिदोहम् ।। हाउहाउहाउ च्योहम् (आ. १. ४- ४३. ५) इति क्रमेणाज्यदोहानि भवन्ति । ऊहे च्योहम् । प्रसुन्वानाऽ२ । अयंऽसोमाः । तिस्रोवाचाः ।। (र. अ. ९२ ६) इत्याज्यदोहानि । आम्नायिकक्रममुत्सृज्य प्रतिलोमानि विपरीतक्रमाणि भवन्ति ।। १ ।।

तेषामाद्यस्य सामादावाद्यं वचनम् ।। २ ।।

वि. तेषां प्रतिलोमानाम् आद्यस्य सामादौ त्रिरुक्तस्याद्यं वचनं भवति । च्योहम् इति ।। २ ।।

भा. तेषां प्रतिलोमानां यदाद्यमृतनिधनं तस्य सामादावाद्यं वचनं भवति च्योहमिति प्रसुन्वानायाम् ।। २ ।।

दी. तेषां प्रतिलोमानाम् आज्यदोहानां मध्ये प्रथमस्य सामादौ च्योहम् इत्याद्यं वचनं भवति । इतरयोराद्यं वचनं न भवति ।। २ ।।

आथर्वणदेवस्थानस्वरान्तरिक्षतौरश्रवसानामविकारः ।। ३ ।

वि. आथर्वणदेवस्थानस्वरचतुष्टयान्तरिक्षतौरश्रवसानामविकारः । एषां साम्न स्तोभा योनिवद्भवन्ति । प्रतिस्तोत्रीयं न विकारः ।। ३ ।।

भा. आथर्वणादीनाम् ऊहगीतौ यथायोनि प्रयोगो भवति । न कश्चिद्विकारः । आथर्वणे (र. द. ९) पवस्वदक्षसादिषु । देवस्थाने परीतोष्यादिषु (ऊ. द. २३) । स्वरेषु सर्वेष्वेव । जातिवचनात् । यज्ञाप्रसुन्वानादिषु । अन्तरिक्षे अभिसोमादिषु (र. द. ६) तौरश्रवसयोः (र. प्रा. १५१-२) प्रत्नसखायोदीर्घमिति ।। ३ ।।

---

15. A[2]-om. आथर्वण.........आविकारः M[1]-[2]TS[1] चतुःसर for स्वरचतुष्टय; A[2] एते for एषां

दी. उहुवा ओहा। औहोवा। पत्रःवदा (र. द. ९) इत्याथर्वणे ऊहगीतौ यथायोनि प्रयोगो भवति। न कश्चिद्विकारः। हाउपरीतोपाइ (र. द. २३) इति देवस्थाने ऊहगीतौ न कश्चिद्विकारः। एप्रतियस्माइ (र. सं. ४५) इति प्रथमस्वरे ऊहगीतौ न कश्चिद्विकारः। एहाउमत्सियापा (र. सं. ४१) इति द्वितीयस्वरे ऊहगीतौ न कश्चिद्विकारः। एहाउ औहोऽ२। मत्सियापाऽ३ (र. सं. ४३) इति तृतीयस्वरे ऊहगीतौ न कश्चिद्विकारः। यज्ञायज्ञा (र. सं ३०) इति चतुर्थस्वरे ऊहगीतौ न कश्चिद्विकारः। हाविमिसोमा। सआय (र. द. ६) इत्यन्तरिक्षे ऊहगीतौ न कश्चिद्विकारः। सज्रायोदीर्वजिह्वायाम् (र. प्रा. १५२) इति तौरश्रवसाद्ये ऊहगीतौ न कश्चिद् विकारः। प्राऽ५त्नम्। सधाऽ३स्थाऽ३मासादात् (र. प्रा. १५१) इति तौरश्रवसोत्तरे ऊहगीतौ न कश्चिद्विकारः॥ ३॥

सर्वोद्धारोऽतोऽन्यत्र॥ ४॥

वि. अतः उक्तेभ्योऽन्येषां साम्नां स्तोभानामुद्धारो भवति॥ ४॥

भा. अतोऽन्यत्र सर्वस्तोभोद्धारः॥ ४॥

दी. अतः एभ्योऽन्येषु सामसु सर्वस्तोभानामुद्धारः। तदिदासा इति राजनादिषु॥ ४॥

वैरूपे तु देवतानामनुद्धारः प्रयोगसिद्ध्यर्थम्॥ ५॥

वि.&भा. पद्यानिधने वैरूपे (र. द. ७) स्तौभिकदेवतानामनुद्धारः। प्रयोगसिद्ध्यर्थं देवतापदम्। देवतापदमिति पूर्वलक्षणेन सर्वोद्धारे प्राप्ते अपवादः स्तौभिकाभिप्रायेण॥ ५॥

---

2. My² om. हाउपरी.........विकारः (L.3)

5. E om. मत्सियापा

13. B⁴ before अन्यत्र adds:-सर्वत्र

16. L⁴A²S²उद्धारः for अनुद्धारः

18. A⁸T,om. first देवतापदम्; KA²TM¹-²S¹-⁸ after इति add:-वैरूपे निधनानीति; भा. स्तोभ° for स्तौभिक°

भा. आज्यदोहानां सामाम्नायिकं क्रममुत्सृज्य प्रातिलोम्यं भवति इति श्रुतेः अयमेवर्तनिधनमित्याज्यदोहानां लोकतो विनियोग इति ॥ १ ॥

दी. योनौ हाउहाउहाउ । आज्यदोहम् ॥ हाउहाउहाउ । हुंचिदोहम् ॥ हाउहाउहाउ च्योहम् (आ. १. ४- ४३. ५) इति क्रमेणाज्यदोहानि भवन्ति । ऊहे च्योहम् । प्रसुन्वानाऽ२ । अयंऽसोमाः । तिस्रोवाचाः ॥ (र. अ. ९२ ६) इत्याज्यदोहानि । आम्नायिकक्रममुत्सृज्य प्रतिलोमानि विपरीतक्रमाणि भवन्ति ॥ १ ॥

तेषामाद्यस्य सामादावाद्यं वचनम् ॥ २ ॥

वि. तेषां प्रतिलोमानाम् आद्यस्य सामादौ त्रिरुक्तस्याद्यं वचनं भवति । च्योहम् इति ॥ २ ॥

भा. तेषां प्रतिलोमानां यदाद्यमृतनिधनं तस्य सामादावाद्यं वचनं भवति च्योहमिति प्रसुन्वानायाम् ॥ २ ॥

दी. तेषां प्रतिलोमानाम् आज्यदोहानां मध्ये प्रथमस्य सामादौ च्योहम् इत्याद्यं वचनं भवति । इतरयोराद्यं वचनं न भवति ॥ २ ॥

आथर्वणदेवस्थानस्वरान्तरिक्षतौरश्रवसानामविकारः ॥ ३ ॥

वि. आथर्वणदेवस्थानस्वरचतुष्टयान्तरिक्षतौरश्रवसानामविकारः । एषां साम्न स्तोभा योनिवद्भवन्ति । प्रतिस्तोत्रीयं न विकारः ॥ ३ ॥

भा. आथर्वणादीनाम् ऊहगीतौ यथायोनि प्रयोगो भवति । न कश्चिद्विकारः । आथर्वणे (र. द. ९) पवस्वदक्षसादिषु । देवस्थाने परीतोष्यादिषु (ऊ. द. २३) । स्वरेषु सर्वेष्वेव । जातिवचनात् । यज्ञाप्रसुन्वानादिषु । अन्तरिक्षे अभिसोमादिषु (र. द. ६) तौरश्रवसयोः (र. प्रा. १५१-२) प्रत्नसखायोदीर्घमिति ॥ ३ ॥

---

15. A²-om. आथर्वण........आविकारः M¹-²TS¹ चतुःसर for स्वरचतुष्टय; A² एते for एषां

दी. उहुवा ओहा। औहोवा। पवस्वदा (र. द. ९) इत्याथर्वणे ऊहगीतौ यथायोनि प्रयोगो भवति। न कश्चिद्विकारः। हाउपरीतोपाइ (र. द. २३) इति देवस्थाने ऊहगीतौ न कश्चिद्विकारः। एप्रतियस्माइ (र. सं. ४५) इति प्रथमस्वरे ऊहगीतौ न कश्चिद्विकारः। एहाउमत्सियापा (र. सं. ४१) इति द्वितीयस्वरे ऊहगीतौ न कश्चिद्विकारः। एहाउ औहोऽ२। मत्सियाराऽ३ (र. सं. ४३) इति तृतीयस्वरे ऊहगीतौ न कश्चिद्विकारः। यज्ञायज्ञा (र. सं ३०) इति चतुर्थस्वरे ऊहगीतौ न कश्चिद्विकारः। हावमिसोमा। सआय (र. द. ६) इत्यन्तरिक्षे ऊहगीतौ न कश्चिद्विकारः। सव्रायोर्दीर्घजिह्वायाम् (र. प्रा. १५२) इति तौरश्रवसाद्ये ऊहगीतौ न कश्चिद् विकारः। प्राऽ५तम् ! सधाऽ३स्थाऽ३मासादात् (र. प्रा. १५१) इति तौरश्रवसोत्तरे ऊहगीतौ न कश्चिद्विकारः॥ ३॥

सर्वोद्धारोऽतोऽन्यत्र ॥ ४ ॥

वि. अतः उक्तेभ्योऽन्येषां साम्नां स्तोभानामुद्धारो भवति॥ ४॥

भा. अतोऽन्यत्र सर्वस्तोभोद्धारः॥ ४॥

दी. अतः एभ्योऽन्येषु सामसु सर्वस्तोभानामुद्धारः। तदिदासा इति राजनादिषु॥ ४॥

वैरूपे तु देवतानामनुद्धारः प्रयोगसिद्ध्यर्थम् ॥ ५ ॥

वि.&भा. पद्यनिधने वैरूपे (र. द. ७) स्तौभिकदेवतानामनुद्धारः। प्रयोगसिद्ध्यर्थं देवतापदम्। देवतापदमिति पूर्वलक्षणेन सर्वोद्धारे प्राप्ते अपवादः स्तौभिकाभिप्रायेण॥ ५॥

---

2. My² om. हाउपरी.........विकारः (L.3)

5. E om. मत्सियापा

13. B⁴ before अन्यत्र adds:-सर्वत्र

16. L⁴A³S²उद्धारः for अनुद्धारः

18. A³T,om. first देवतापदम्; KA²TM¹-³S¹-³ after इति add:-वैरूपे निधनानीति; भा. स्तोभ° for स्तौभिक°

दी. यद्यावइन्द्रतेशतम् (र. द. ७) इति पञ्चनिधने वैरूपे प्रयोगसिद्ध्यर्थं दिशंविशँहस् । अश्वाश्विशुमती इति देवतानां तु न उद्धारः ॥ ५ ॥

इहाथेडानां च ॥ ६ ॥

वि. इहा । अथा । इडा । इत्येतेषामनुद्धारः रेवत्यपार्थुरश्मादिषु ॥ ६ ॥

भा. इहा । अथा । इडा । एतेषां च अनुद्धारः प्रयोगसिद्ध्यर्थमेव रेवत्य पार्थुरश्मादिषु । हाउरेवा (र. सं. ६३) एस्वादो३ः ओ३३३३वा३ (र. अ. ९८) ॥

दी. हाउरेवा । तीर्नाः (र. सं. ६३) इति रेवत्यादिषु । इहा । अथा । इडा । एतेषां न उद्धारः । प्रयोगसिद्ध्यर्थम् । एस्वादोः औऽ२३४वा । (र. अ. ९८) इति पार्थुरश्मादिषु अथास्तोभस्य न उद्धारः ॥ ६ ॥

एकवृषे च देवतानाम् ॥ ७ ॥

वि&भा. एकवृषे च अभिप्रवार्यां (र. प्रा. १३८) देवतानामनुद्धारः । एकःसमैरयद्वृधे इत्यादि देवतानामनुद्धारः । शाक्करर्षभे च सामान्यात् ॥ ७ ॥

दी. हाहुम् । अमित्रस्सुराधतसम् (र. प्रा. १३८) इत्येकवृषे एकःसमैरय-द्वृधे । एकःसमैरयन्महे । एकोवृषाविराजति । इति देवतानां न उद्धारः ॥

निधनं तु सामान्ते सर्वत्र यल्लघीयः ॥ ८ ॥

वि. सर्वत्र सामान्ते निधनं भवति । रहस्ये च । यन्निधनं लघु तत्सर्वं भवत्यल्पाक्षरम् । यथा बृहद्रथन्तरादिषु ॥ ८ ॥

---

4. A[2]S[2] रैवत, S[1] रेवत, M[1]-[2]T रेवती for रेवत्य

5. P रेवती, for रेवत्य.

10. KS[1]-[2] तु for च

12. अ. वि. om. एक.........अनुद्धारः; K S[2]om. शाक्करर्षभे च सामान्यात्; V[2] सामान्यवचनात् for सामान्यात्; A[2]M[1]-[2]TS.[1] शक्करऋषभे देवतानामनुद्धारः । शंयोरादाश्यो देवतः for सामान्यात्

भा. अनुद्धारप्रसङ्गेनेदमुच्यते। सामान्ते यन्निधनं लघु। अल्पाक्षरमित्यर्थः। यथा बृहद्रथन्तरयोः स्वाशिरामर्कादिषु च ॥ ८ ॥

दी. सामान्ते यन्निधनं लघु अल्पाक्षरं तस्य न उद्धारः। यथा आभित्वा-शूरनोनुमो वा (र. द. १) इति रथन्तरे अस् इति लघु। अस्य न लोपः। एवं बृहदादिषु ॥ ८ ॥

गुरुषु निधनैकदेशः ॥ ९ ॥

वि. बह्वक्षरेषु निधनेषु निधनस्यैकदेशं भवति वक्ष्यमाणेषूदाहरणेषु ॥ ९ ॥

भा. गुरुषु बह्वक्षरेषु निधनैकदेशः। यथोत्तरत्र वक्ष्यति ॥ ९ ॥

दी. गुरुषु बह्वक्षरेषु निधनस्यैकदेशः तस्य न उद्धारः। यथा त्वमिन्द्रयशा असि (र. ए. ८८) इति यशसि। शतंजीवेमशरदो ऽयन्तेऽ२३४५ इत्येकदेशस्य न उद्धारः ॥ ९ ॥

त्रिरुक्तानामन्त्यं वचनम ॥ १० ॥

वि. त्रिरुक्तानां स्तोभानामन्त्यं वचनं भवत्याज्यदोहादिषु ॥ १० ॥

भा. त्रिरुक्तानां निधनानामन्त्यं वचनम्। यथाज्यदोहे त्रिणिधने ॥ १० ॥

दी. त्रिरुक्तानां निधनानामन्त्यं वचनम्। तस्य न उद्धारः। यथा तिस्रो-वा ऽः (र. अ. ९६) इत्याज्यदोहे ए। आज्यदोहाऽ२३४५म्। इदमन्त्यं वचनम्। तस्य न उद्धारः ॥ १० ॥

---

1. P. एवम् for इदम्

7. A^2T गुर्वक्षरेषु for बह्वक्षरेषु

13. $A^2M^{1-2}TS^1$ ०दोहेषु for ०दोहादिषु

ऋषभे तु त्रिरुक्तम् ॥ ११ ॥

वि. रैवतऋषभे (र. द. १८) तु निधनं त्रिरुक्तमेव भवति । उम् । उम् । उम् ॥ ११ ॥

भा. रैवतऋषभे (र. द. १८) त्रिरुक्तमेव निधनं भवति । नान्त्यं वचनम् । उम् । उम् । उम् इति योनिवन्निधनम् ॥ ११ ॥

दी. सुरूपकृत्नुमूतये(त्रिः) (र. द. १८) इति रैवतऋषभे उम् । उम् । उम् । इति त्रिरुक्तस्य न उद्धारः ॥ ११ ॥

देवस्थानपूर्वयोर्निधनाद्यं पदम् ॥ १२ ॥

वि.&भा. देवस्थाने पूर्वयोः स्तोत्रीययोः निधनस्याद्यं पदं भवति । द्यौः ॥ १२ ॥

दी. हाउपरीतोषाइ (र. द. २३) इति देवस्थाने पूर्वयोः स्तोत्रीययोः द्यौः इति निधनस्याद्यं पदं भवति ॥ १२ ॥

अन्त्यायां सर्वम् ॥ १३ ॥

वि.&भा. देवस्थाने (र. द. २३) एवान्त्यायां स्तोत्रीयायां सर्वं निधनं भवति ॥ १३ ॥

दी. देवस्थानस्य (र. द. २३) अन्त्यायां स्तोत्रीयायां सर्वं निधनं भवति । द्यौरक्रान्भूमिरततनत्समुद्रऽसमचूकुपत् । इट्इहाऽ२३४५ । एवं सर्वं निधनं

---

1. A² निधने M¹-² ऋषभेषु for ऋषभे
2. A²M¹-²T °ऋषभेषु for °ऋषभे तु; A² adds: तु after निधनं
5. A²T हिम् । हिम् । हिम् । for उम् । उम् । उम् ।
9. M¹-² after पूर्वयोः add: निधनं; बि. निधनाद्यं for निधनस्याद्यं; A² om. भवति
12. M¹-² om . अन्त्यायां...भवति;
13. A² om. स्तोत्रीयायाम्

भवति ॥ १३ ॥

दिवाकीर्त्ये वैराजम् ॥ १४ ॥

वि. महादिवाकीर्त्ये वैराजं भवति । वैराजमिति ईनिधनमुच्यते ॥ १४ ॥

भा महादिवाकीर्त्ये आयन्त्यन्त्यायां (र. सं. ५२) गणगीतित्वात् वैराजं भवति । इकारः वैराज उच्यते निधनम् ॥ १४ ॥

१र २ १र ३
दी. आयन्तइवसूर्यम् (र. सं. ५२) इति महादिवाकीर्त्ये अन्त्यायाम् ईऽ२३४५ इति वैराजस्य निधनं भवति ॥ १४ ॥

आड्विकर्णे ॥ १५ ॥

वि.&भा विकर्णे आयन्त्यायामेव (र. सं. ५५) आड् निधनं भवति । फाश् फाड् परित्यज्य अन्त्यं निधनं आड् भवति ॥ १५ ॥

१र १
दी. आयन्तइवसूऽ२रायाऽ२म् (र सं. ५५) इति विकर्णे अन्त्यायां आऽ२ड् इति निधनं भवति ॥ १५ ॥

ष्ठास्वरं भासे ॥ १६ ॥

वि. भासे पुरोजित्यां (र. सं. ५९) ष्ठास्वरं निधनं भवति । भाऽ२३४५म् । ष्ठाऽ२३४५म् । ॥ १६ ॥

भा. भासे पुरोजित्यन्त्यायां (र. सं. ५९) ष्ठास्वरं निधनं भवति । प्रसम्राजतृतीये

---

3. M^{1-2} after इति add: तस्य साम्नां; $KA^2M^{1-2}T$ om. ई

4. P. आयन्तीयायां for आयन्त्यन्त्यायाम्

9. वि. आयन्तायां for आयन्त्यन्त्यायां; वि. trans. एव after आड्; वि. V om. फाश्... भवति

15. S^1A^2 om. ष्ठाऽ२३४५; K after ष्ठाऽ२३४५म्... adds: असाव्यंशुप्रथमे

ष्ठास्वरः एहौहो भद्रम् एवमादि परित्यज्य अन्त्यं निधनं भा२३२सू भवति ॥ १६ ॥

दी. पुरोजितीवोअन्धाऽ२३सः (र. सं. ५९) इति भासे अन्त्यायां ष्ठाऽ२३४५सू इति पर्वणः स्वरं निधनं भवति। भाऽ२३४५सू एवं ष्ठास्वरं निधनं भवति। प्रसम्राजश्च। षणाऽ३२३४इनाम् (ग्रा. ४. ३. १४४. ३) इति साम्नि ष्ठाऽ२३४५सू इति निधनं भवति। इहौहा। भद्रम्। एवमादि निधनं परित्यज्यान्त्यं भाऽ२३४५सू इति निधनं भवति ॥ १६ ॥

शतमादि यशसि ॥ १७ ॥

वि. यशसि निधनं भवति। शतं जीवेमेत्यादि ॥ १७ ॥

भा. यशसि शतं जीवेमेत्येवमादि निधनं भवति ॥ १७ ॥

दी. त्वमिन्द्रयशाअसि (र. ए. ८८) इति यशसि आयुर्विश्वायुरित्यादि परित्यज्य शतमादि। शतंजीवेमशरदोवयन्तेऽ२३४५। एवं निधनं भवति ॥ १७ ॥

सप्तहे त्वाद्यं वचनम् ॥ १८ ॥

वि.&भा. सप्तहे तु त्रिरुक्तस्याद्यं वचनं निधनं भवति। अन्त्ये प्राप्ते इदम् उच्यते ॥ १८ ॥

दी. अयंवायाउ। पुनानस्सो (र. ए. ७९) इति सप्तहे तु त्रिरुक्तस्याद्यं वचनं निधनं भवति। ए। त्रिवृतं प्रवृतमित्याद्यं वचनं भवति ॥ १८ ॥

साम्नोः पूर्वस्योपग्रहाद्यं पदम् ॥ १९ ॥

---

3. L[1] om. भासू एवं ष्ठास्वर निधनं भवति
5. My[2] om. इहौहा...भवति
8. P हाउ२यशौहाऊवचाहाऊएवमादि परित्यज्य for यशसि
11. A[2] om. सप्तहे....वचनम्; M[1-2]T om. वचनम्; M[1-2]T आद्य; for आद्यम्
12. वि. om. तु; M[1-2] आद्यः for आद्यम्
13. PB[4] after उच्यते add: ए (यत्) त्रिवृतं प्रवृतम्
15. E after भवति adds: त्रिरुक्तानामन्त्यमित्यवचनस्यापवादः

वि. साम्नोः पूर्वस्य उपग्रहाद्यं पदं निधनं भवति ॥ १९ ॥

दी. पूरोऽ२ । जीतीऽ२ । वोअऽ२ (र. ए. ९१-२) इति सम्मील्ययोः साम्नोः पूर्वस्य साम्नः उपग्रहाद्यम् एकारेण सहाद्यं पदम् ए अम् इति निधनं भवति ॥ १९ ॥

अपांव्रते च गवांव्रते च क्वान्तं प्रथमम् ॥ २० ॥

वि. उपग्रहाद्यमिति वर्तते । अपांव्रते पुनानायां (र. प्रा. १४१) क्रान्तं प्रथमं पर्व निधनं भवति । गवांव्रते (र. प्रा. १४३) वान्तं प्रथमं पर्व निधनं भवति । ए । अग्निःशिशुकः ॥ ए । गावः ॥ २० ॥

भा. अपांव्रते (र. प्रा. १४१) गवांव्रते (र. प्रा. १४३) च । पुनानायां अपांव्रते कशब्दान्तं यत्प्रथमं तन्निधनं भवति । अग्निः शीशुक इति । गवांव्रते च वशब्दान्तं प्रथमं निधनं भवति । एगाव इति॥ २० ॥

दी. पुनानस्सोमधाराऽ२३या (र. प्रा. १४१) इत्यपांव्रताद्ये च कशब्दान्तं यत् प्रथमं पदं तन्निधनं भवति । ए । अग्निश्शिशुकः इति कशब्दान्तं प्रथमं पदं अन्त्ये वशब्दादुपग्रहग्रहाद्यम् । पुनानस्सोमधाराऽ२या (र. प्रा. १४३) इति गवांव्रताद्ये व-शब्दान्तं प्रथमं निधनं भवति । ए । गावः इति व-शब्दान्तं प्रथमं पदम् अन्येषाम् उद्धारः ॥ २० ॥

आश्विनोर्व्रतपूर्वे इकारोऽतिक्रान्तः ॥ २१ ॥

वि. आश्विनोर्व्रतपूर्वे (र. प्र. १३८) अतिक्रान्त इकार एव निधनं भवति ॥

भ. अश्विनोर्व्रतपूर्वे (र. प्र. १३८) इकारः अतिक्रान्तो निधनं भवति । ई३३३ ॥ २१ ॥

---

4. A[2]M[1-3]T गवां for गवांव्रते

5. M[1-3] om. उपग्रहाद्यमिति वर्तते

13. L[1] एवशब्दात् for वशब्दात्

दि. पुनानःसोमधारया ओहाउ (र. प्र. १३९) इति पूर्वे अश्विनोर्व्रते द्वितीयादिस्वरत्रयमतिक्रम्य गत इकारो निधनं भवति । ई॒५ । एवं त्रीन् स्वरान् अतिक्रान्तः । मात्रालक्षणे- प्रथमस्त्रीन्स्वरानतिक्रामत्यश्विनोर्व्रते । ई॒५ ॥ (मा. ल. १. ३१)॥ २१ ॥

वैरूपशाक्वरऋषभपूर्वयोरर्धेडा ॥ २२ ॥

वि. वैरूपशाक्वरर्षभयोः पूर्वयोरर्धेडा निधनं भवति ॥ २२ ॥

भा. पञ्चनिधनवैरूपशाक्वरर्षभपूर्वयोः स्तोत्रीययोः अर्धेडा भवति । नजातमष्टरोदसी । इट् ॥ २२ ॥

दी. यद्यावइन्द्रतेशतम् । ए (र. द. ७) इति पञ्चनिधने वैरूपे पूर्वयोः स्तोत्रीययोः अर्धेडा निधनं भवति । इट् इति अर्धेडा निधनम् । एवं शाक्वरर्षभे ॥

सामान्तेऽध्यर्धा ॥ २३ ॥

वि. एतयोरेव अन्त्यायामध्यर्धेडा निधनं भवति ॥ २३ ॥

भा. सामान्ते तु अन्त्यायां स्तोत्रीयायाम् अध्यर्धेडा भवति । इट् इडा२३ ३३ इति अध्यर्धेडा ॥ २३ ॥

दी. पञ्चनिधने वैरूपे उत्तमायां सामान्ते अध्यर्धेडा निधनं भवति । इट् इडा॒२३४५ इत्यर्धेडा । शाक्वरऋषभे उत्तमायां सामान्ते अध्यर्धेडा निधनं भवति । इट् इडा॒२३४५ । इत्यर्धेडा ॥ २३ ॥

अश्वव्रते हौ ह्वौ ह्यौ हौ होऽन्तेषु चत्वारः सोमाः ॥ २४ ॥

वि. अश्वव्रते (र. अ. ९९) हौह्वौह्यौहौ एतेषु चतुर्ष्वक्षरेषु । होइकारेष्वित्यर्थः ।

---

9. L[1] My[2-3] om. एवं शाक्वरर्षभे

10. A[2] अत्यध्यर्धा for अध्यर्धा

14. MES[2] after वैरूपे add: पूर्वयोः स्तोत्रीययोः

17. L[1] स्तोभाः for सोमाः

एतेषु चत्वारः सोमसंघाता भवन्ति । सोमसंघातोऽयं प्रपुनाऽ२३नायवेधसाइ इति साम्नि होइ । सोमायवचाऊच्यातोऽ२इ (ग्रा. १७. १०. ५७३.१)इति ॥ २४ ॥

भा. अश्वव्रते (र. अ. ९९) होह्वौह्यौहो एतेषु चतुर्ष्वक्षरेषु,–होइकारान्तेषु इत्यर्थः,-तेषु चत्वारः सोमस्वरा संघाता भवन्ति । सोमसंघातः प्रपुनायवेधसे (ग्रा. १७ १०. ५७३. १) इति प्रथमे साम्नि होइ । होइ । सोमायवचा२उच्या२ता२३३३इ इति ॥

दी. अश्वव्रते (र. अ. ९९) । हौ । होइ । ह्वौ । होइ । ह्यौ । होइ हौ । होइ । एतेषु होऽन्तेषु होइशब्दान्तेषु । होइकारान्तेष्वित्यर्थः । प्रत्येकं चत्वारः सोमाः स्वराः भवन्ति । प्रपुनाऽ२३नायवेधसाइ (ग्रा. १७. १०. ५७३. १) इति साम्नि होइ । सोमायवचाउच्यताऽ२इ इति सोमसंघातस्वरो भवति ॥ २४ ॥

वा औहोवा त्सिबा ॥ २५ ॥

वि. औहोवाद्रव्ये त्सिबा भवति । त्सिबापूर्वत्वाच्च होशब्दस्य वृद्धिः ॥

भा. औहोवाद्रव्ये त्सिबा वा भवति । त्सिबापूर्वप्रत्ययत्वाच्च होशब्दस्य वृद्धिः ॥

दी. औहोवास्तोभे प्रत्यये होवा त्सिबास्वरो भवति । त्साऽ२इवाऽ२३४ औहोवा । होऽ२वाऽ२३४ औहोवा । एवं भवति । होइ । अत्र क्वचिद्विरतेऽप्यगतिः (पु. सू. ५. ४. ४) इति वचनात् गतिलोपः ॥ २५ ॥

स्वर्ज्योतिः प्रथमोच्चमेकारादिकृष्टम् ॥ २६ ॥

वि. त्सिबायाः परमेतत् द्रव्यं प्रथमोच्चं भवति । उपायपरत्वाच्च प्रथमोच्चस्य

---

1. M[1-2] प्रसुन्वान for प्रपुनानाय

8. L[1] स्तोभाः for सोमाः

11. M[12]T S[1] om. ०द्रव्ये; S[2] कर्षणम् for वृद्धिः

12. B[6] त्सिबाद्रव्ये, P. विडग्वेद्रव्ये, A[1] स्तव्येद्रव्ये for ०द्रव्ये; B[4] पर्व for पूर्व; B[4] यहोशब्दस्य for होशब्दस्य

स्वज्योंतिःशब्दस्य निधनभावः। अन्तः तेभ्यः छाहिषीप्रथमोच्चानीति निधनत्वाच्च स्वार्यः। निधनान्तः स्वर्यत इति। तस्य च स्वज्योंतिर्द्रव्यस्य निधनभूतस्य एकार आदौ क्रुष्टो भवति॥ २६॥

भा. त्सिबायाः परं स्वज्योंतिर्द्रव्यं प्रथमोच्चं भवति। उपायपरत्वाद्वा प्रथमोच्चं निधनभावः। अन्तः तेभ्यः छाहिषीप्रथमोच्चानीति निधनत्वाच्च स्वार्यः। निधनान्त स्वर्यत इति। तस्य च स्वज्योंतिर्द्रव्यस्य निधनभूतस्य एकार आदौ क्रुष्टो भवति। ए३। सुवज्योंती३३३३॥ २६॥

दी. प्रथमस्वरे उच्चम् एकारेणादौ क्रुष्टं स्वज्योंतिर्निधनं भवति। एऽ३। सुव-ज्योंतीऽ२३४५ः। अन्ते स्वरितत्वात् स्वार्यं भवति। स्वरितस्वरान्तं मन्द्रस्वरान्तं भवति॥

एवं पदाय स्तोभाः॥ २७॥

वि. अथ हौ होइ एवमादयः स्तोभाः पदाय प्राक् प्रथमोच्चात् त्सिबास्वरान्ता भवन्ति। अभिवाजी-(र. अ. ९९)त्येतस्यादौ भवति। एका विधा समाप्ता॥

भा. एवं हौहोइ एवमाद्याः स्तोभाः प्राक् प्रथमोच्चात् त्सिबास्वरान्ता भवन्ति। अभिवाजी-(र. अ. ९९)त्येतस्य आदौ भवन्ति। एषा तावदेका विधा समाप्ता॥

दी. एवं पूर्वोक्तप्रकारेण हौहोइ एवमाद्याः स्तोभाः पदाय पदार्थमभिवाजी-(र. अ. ९९)त्येतस्यादौ भवन्ति। अभिवाजीविश्वरूपोजनित्राऽ२३४५म्। अस्य निधने निगदस्वरः। अन्ते स्वरितत्वात् स्वार्यम्। एवमेका विधा भवति॥ २७॥

---

1. $A^2M^{1-2}T$ om. स्वज्योंतिशब्दस्य; A^2T तेभ्यष्ठः किं S^1 तेभ्यः क्रुष्टाः किं for अन्तस्तेभ्यः छाहिषी; A^2 $S^2M^{1-2}T$ व्यवधानत्वाच्च for निधनत्वाच्च; $KA^2M^{1-2}T$ प्रथमोच्चम् for प्रथमोच्चानि
2. KS^2My^1 निधनान्ताः स्वर्यन्ते for निधनान्तः स्वर्यते
9. L^1 स्वरो भवति for स्वरान्तम्; RMy^{2-3} om. भवति
11. KS^2A^2T पदाय पदाय, M^{1-2} पादाय for पदाय
13. P त्सिबात् स्वरान्ताद् for त्सिबास्वरान्ताः
14. A^2 इत्यजातशत्रुविरचितैकारविधिः समाप्तः; M^{1-2} एकारविधिः समाप्तः for एका विधा समाप्ता
16. L^1 निगदे स्वरः for निधने निगदस्वरः

परासु विधासु ज्योतिर्भाः शिशुर्वाज्यश्वो मेध्य इति ॥ २८ ॥

वि. पादादौ स्तोभान् कृत्वा स्वर्ज्योतिःस्थाने परासु विधासु ज्योतिर्भाः-शिशुर्वाजी-अश्वो मेध्य इति भवन्ति ॥ २८ ॥

भा. एवं परासु विधासु किमतिदिश्यते? पादादौ स्तोभान् कृत्वा प्रथमोच्चस्य स्थाने द्वितीयायां विधायां ज्योतिर्भा इति तृतीयायां शिशुर्वाजीति चतुर्थ्यां प्रथमोच्चस्य स्थानेऽश्वो मेध्य इति ॥ २८ ॥

दी. परासु अग्रिमासु विधासु सदृशगीत्या विभागासु ज्योतिर्भाः। शिशुर्वाजी। अश्वो मेध्यः। इति निधनानि भवन्ति। द्वितीयायां विधायां द्वितीयपादादौ हौ। होइ इत्यादिस्तोभान् कृत्वा सुवर्ज्योतिरित्येतस्य स्थाने ज्योतिर्भाः इति निधनं भवति। तृतीयायां विधायां तृतीयपादादौ हौ। होइ। इत्यादि स्तोभान् कृत्वा सुवर्ज्योतिरित्येतस्य स्थाने शिशुर्वाजी इति निधनं भवति। चतुर्थ्यां विधायां चतुर्थपादादौ हौ। होइ इत्यादिस्तोभान् कृत्वा सुवर्ज्योतिरित्येतस्य स्थाने अश्वो मेध्य इति निधनं भवति ॥ २८ ॥

पादगीतिस्तुल्या ॥ २९ ॥

वि. इत्थं व्यस्तं यथा प्रथमा पादगीतिः पठिता। स्तोभाः पादादौ। प्रथमोच्चं यथोक्तम्। एवं तिस्रो विधा भवन्ति ॥ २९ ॥

भा. यथा प्रथमा पादगीतिः पठिता। पादादौ स्तोभाः। प्रथमोच्चं यथोक्तम्। एवंरूपाश्चतस्रो विधा भवन्ति ॥ २९ ॥

दी. यथा प्रथमे पादे गीतिस्तथा द्वितीये तुल्या समाना कर्तव्या। तथा तृतीये पादे। तथा चतुर्थे पादे हौ[१र]। होइ। हौ[र]। होइ। हौ[र]! होइ। हौ[र]।

---

13. A[a] Om. पादगीतिस्तुल्या

होऽ२ । वाऽ२३४औहोवा । एऽ३सुवर्ज्योतीऽ२३४५: । एवं प्रथमे पादे गीतिः । तथा द्वितीये पादे । हौ । होइ । इत्यादयः स्तोभाः । तदनन्तरं एऽ३ । ज्योतिर्भाऽ२३४५: । अन्ते स्वरितत्वात् स्वार्यम् । तदनन्तरं हौ । होइ इत्यादयः स्तोभाः । तदनन्तरं द्वितीयः पादः । हिरण्ययविभ्रदत्कः सुपर्णाऽ१: । अत्रान्ते उदात्तत्वात् वृधे-स्वरः । एवं द्वितीये पादे गीतिः । तथा तृतीये पादे हौ । होइ इत्यादयः स्तोभाः । तदनन्तरम् एऽ३ । शिशुर्वाजीऽ१ । अत्रान्ते उदात्तत्वात् वृधेस्वरः । तदनन्तरं हौ । होइ । इत्यादयः स्तोभाः । तदनन्तरं तृतीयः पादः । सूर्यस्यभानुमृतुथावसानऽ२३४५: । अत्रान्ते स्वरितत्वात् स्वार्यः । एवं तृतीये पादे गीतिः । तथा चतुर्थे पादे हौ । होइ इत्यादयः स्तोभाः । तदनन्तरम् एऽ३ । अश्वोमेध्याऽ२३४५: । अत्रान्ते स्वरितत्वात् स्वार्यः । तदनन्तरं हौ । होइ इत्यादयः स्तोभाः । तदनन्तरं चतुर्थः पादः । परिस्वयं धमृज्ञोजजानाऽ२३४५: । अत्रान्ते स्वरितत्वात् स्वर्यः ॥ २९ ॥

परयोरुद्धारः ॥ ३० ॥

वि. परयोः स्तोत्रीययोः स्तोभस्य प्रथमोच्चस्य उद्धारः ॥ ३० ॥

भा. परयोः स्तोत्रीययोः स्तोभप्रथमोच्चानामुद्धारः ॥ ३० ॥

दी. द्वितीयतृतीययोः स्तोत्रीययोः स्तोभस्य निधनानां चोद्धारः । केवलाः पादाः भवन्ति । द्वितीयायां पादा उच्यन्ते । अप्सुरेतःशिश्रियेविश्वरूपाऽ२३४५म् । अत्रान्ते स्वरितत्वात् स्वार्यः । तेजः पृथिव्यामधियत्संबभूवऽ२३४५ । अत्रान्ते स्वरितत्वात् स्वार्यः । अन्तरिक्षे स्वम्महिमानम्मिमानाऽ२३४५: । अत्रान्ते स्वरितत्वात् स्वार्यः । कनिक्रन्तिवृष्णोअश्वस्यरेताऽ२३४५: । अत्रान्ते स्वरितत्वात् स्वार्यः । तृतीयायां पादाः उच्यन्ते । अयं सहस्रापरियुक्तावसानाऽ२३४५: । अत्र अन्ते स्वरितत्वात् स्वार्यः ।

---

5. E after द्वितीये om. पादे

14. B[4]V[2] प्रथमोच्चम्, P प्रथमोच्चान्तात् for प्रथमोच्चानाम्

१र २ र१ २१रर २र३ २ १र २१र
सूर्यस्यभानुं यज्ञोदाधाराऽ२३४५ । अत्रान्ते स्वरितत्वात् स्वार्थः । **सहस्रदाः शतदा-भूरिदावाऽ२३४५** । अत्रान्ते स्वरित्वात् स्वार्यः । **धर्तादिवोभुवनस्यविश्पतीऽ२३-४५ः** । अत्रान्ते स्वरितत्वात् स्वार्यः । पादेषु सर्वत्र निगदस्वरः ॥ ३० ॥

सामान्ते निधनाय स्तोभाः ॥ ३१ ॥

वि. पादान्ते निधनार्थं **स्तोभाः** वक्तव्याः ॥ ३१ ॥

भा. अन्ते निधनं स्वर्वत इति तदर्थं च स्तोभाः कर्तव्याः प्रथमोच्चवर्जिताः ॥

दी. अश्वव्रत-(र. अ. ९९) सामान्ते निधनार्थं **हौ । होइ इत्यादयः** स्तोभाः कर्तव्याः ॥ ३१ ।

स्वर्वत इति निधनमुपग्रहादि ॥ ३२ ॥

वि. **उपहादि च स्वर्वत** इति **निधनं** भवति । उपग्रह एकारः ॥ ३२ ॥

भा. **स्वर्वत** इति **निधनमुपग्रहादि** भवति । एकारः उपग्रहः ॥ ३२ ॥

दी. हौ । होइ । इत्यादिस्तोभानन्तरम् **उपग्रहादि** एकारादि **स्वर्वत** इति निधनं भवति । एऽ३ । **सुवर्वतेऽ२३४५** । अत्रान्ते स्वरितत्वात् स्वार्यः स्वरः ॥ ३२ ॥

व्याहृतिसामानि पञ्च भूर्भुवः स्वः सत्यं पुरुष इत्येतासु पृथक् ॥ ३३ ॥

वि. **व्याहृतिसामानि** (र. अ. १००) यथोपदिष्टं भवन्ति । तथैवोच्यन्ते ॥ ३३ ॥

भा. भूरादिव्याहृतिषु पञ्च सामानि यथोपदिष्टानि **भवन्ति** । यथा भवन्ति तथोच्यन्ते । एकैकस्यां व्याहृत्यामभ्यस्तायां त्रिस्त्रिः पञ्च सामानि भवन्ति ॥ ३३ ॥

---

5. A[2]T निधनाय for निधनार्थं
9. KM[1]-[3]S[1]-[3] ०प्रहादिः for ०ग्रहादि
15. A[2]T तथा for यथा

दी. भूर्भुवः स्वः सत्यं पुरुष इत्येतासु पञ्च व्याहृतिसामानि पृथग्भवन्ति ॥३३॥

आग्निदूतास्तावो मन्द्रे ॥ ३४ ॥

वि. भूरादिषु अग्निदूतास्वरः प्रस्तावो भवति । मन्द्रग्रहणाच्च अग्निदूताया मनभ्युदूहः प्रस्तावः ॥ ३४ ॥

भा. भूःशब्दे अग्निदूतास्वरः प्रस्तावो भवति । मन्द्रग्रहणाच्च अग्निदूताया-मनभ्युदूहः प्रस्तावः ॥ ३५ ॥

दी. एतासु व्याहृतिषु मन्द्रे अग्निदूतास्वरः प्रस्तावो भवति । भूः[५] । भुवाः[५] । सुवाः[५] । सत्याम्[५] । पुरुषाः[५] । एवं मन्द्रे स्वरे प्रस्तावः ॥ ३४ ॥

सोमस्त्रिरुक्तः ॥ ३५ ॥

वि. परभक्तय उच्यन्ते । भूरित्येतस्मिन् द्रव्ये सोमसंघातस्वरः त्रिरुक्तो भवति । सोमसंघातश्च प्रागुक्तो भवति ॥ ३५ ॥

भा. भूरादिष्वेव एकैकस्यामनभ्यस्तायाम अग्निदूताप्रस्तावो भवतीत्युक्तम् । इदनीं परा भक्तयः उच्यन्ते । पुनर्भूरित्येतस्मिन् अक्षरे सोमसंघातस्वरः त्रिरुक्तो भवति । सोमस्वरः पृथग् भवति ॥ ३५ ॥

दी. इदानीं परा भक्तय उच्यन्ते । प्रस्तावानन्तरमेतासु व्याहृतिषु प्रथमे स्वरे होइकारान्तः सोमस्वरः त्रिरुक्तो भवति । भूः[१२] । होइ । इत्युद्गीथः । भूः[१२] । होइ इति प्रतिहारः । भूः[२] । इत्याद्युपद्रवः । भुवः[१] । होइ । इत्युद्गीथः । भुवः[१] । होइ । इति प्रतिहारः । भुवः इत्याद्युपद्रवः । सुवः । होइ । इत्युद्गीथः । सुवः । होइ ।

10. M[1-2] अस्मिन् for एतस्मिन्

14. P सोमसंघातश्च for सोमस्वरः

इति प्रतिहारः । सुवः इत्याद्युपद्रवः । सत्यम् । होइ इत्युद्गीथः । सत्यम् । होइ इति प्रतिहारः । सत्यम् इत्याद्युपद्रवः । पुरुष । होइ इत्युद्गीथः । पुरुष । होइ इति प्रतिहारः । पुरुष इत्याद्युपद्रवः । एवं सोमस्वरो भवति ॥ ३५ ॥

आनीकयां तृतीयः ॥ ३६ ॥

वि. तृतीयः सोमसंघात आनीकयामापद्यते । भूः । हाऽ३१२वाऽ२ इति ॥

भा. सोमसंघात आनीकयां तृतीय आपद्यते । हा३उवा३ । इति ॥ ३६ ॥

दी. तृतीयः सोमस्वरः आनीकयामापद्यते । आनीकयाऽ३१उवायेऽ३ । भूः । हाऽ३१२उवाऽ२ । इत्युपद्रवः । अत्रायेभावो न भवति । भुवः । हाऽ३१२उवाऽ२ । इत्युपद्रवः । सुवः । हाऽ३१२उवाऽ२ । इत्युपद्रवः । सत्यम् । हाऽ३१२उवाऽ२ । इत्युपद्रवः । पुरुष । हाऽ३१२उवाऽ२ इत्युपद्रवः ॥ ३६ ॥

स्वर्ज्योतिर्निधनमकृष्टैकारादि ॥ ३७ ॥

वि. अकृष्टैकारादि स्वर्ज्योतिर्निधनं भवति । प्रकृतव्याहृतिषु द्रव्यं प्रथमोच्चम् । प्रथमोच्चत्वान्निधनम् । उपायपरत्वात् स्वरः ॥ ३७ ॥

भा. भूरादीनां व्याहृतिसाम्नां स्वर्ज्योतिर्द्रव्यं प्रथमोच्चं भवति । प्रथमोच्चत्वात् निधनम । उपायपरत्वान्निधनत्वाच्चान्ते स्वरः एकारस्वरश्चास्य अक्षर आदौ अकृष्टो भवति प्रथमोच्चस्य ॥ ३७ ॥

---

6. VPB[4] तृतीयम् for तृतीयः

12. A[2]S[1-2] अकृष्ट एकारादि for अकृष्टैकारादि; M[1-2]T द्रष्टव्यम् for द्रव्यं

14. P प्रकृतव्याहृतिसामान्ते for व्याहृतिसाम्नाम्; V[2] द्रष्टव्यं for द्रव्यं

16. L[2] प्रथमोच्चमस्य for प्रथमोच्चस्य

दी. एतासु व्याहृतिषु सामान्ते अस्य निधनस्यादौ अकृष्ट एकारो भवति। प्रथमोच्चं स्वज्योतिर्निधनं भवति। प्रतिसाम ए[२र]। सु[१]वज्यो[२३]तीऽ२३४५ः। इति निनंध भवति ॥ ३७ ॥

एवं सर्वेषामेष विकारविधिः ॥ ३८ ॥

वि.&भा. एवं सर्वेषाममहीयवादीनां साम्नाम् एष विकारविधिरुक्तः प्रत्येतव्यः ॥ ३८ ॥

दी. एवं पूर्वोक्तेन प्रकारेण सर्वेषाममहीयवादीनां साम्नामेष विकारविधिरुक्तो ज्ञातव्यः ॥ ३८ ॥

एतेन प्रदेशेनोह्यः सामगणः कल्पयितव्यः। कल्पयितव्यः ॥ ३९ ॥

वि. एतेन लक्षणप्रदेशेन ऊह्यस्य सामगणस्य प्रयोगः कल्पयितव्यः। शक्यः कल्पयितुम्। अभ्यासः प्रकरणसमाप्त्यर्थः ॥ ३९ ॥

इति अजातशत्रुभट्टोपाध्यायविरचिते फुल्लविवरणे चतुर्थप्रपाठकस्य दशमः खण्डः ॥१०॥

॥ विकारा भावाः परिसमाप्ताः ॥

चतुर्थः प्रपाठकः समाप्तः ॥ ४ ॥

---

1. L^1 एकाकारः for एकारः
5. A^2 om. प्रत्येतव्यः
9. A^2T om second कल्पयितव्यः; M^{1-2} repeats the whole sutra
10. KS^2 ऊह्यः सामगणः for ऊह्यस्य सामगणस्य; M^{1-2} ऊह्यस्वरः for ऊह्यस्य
11. A^2S^1 कल्पयितव्यः इति पुनर्वचनं भाव-(S^1 om. भाव-) परिसमाप्तिप्रदर्शनार्थम् (S^1 परिसमाप्त्यर्थम्) for अभ्यासः प्रकरणसमाप्त्यर्थः; $M^{1-2}T$ om. अभ्यासः
12. My^1 इति चतुर्थस्य दशमः ।। इत्यजातशत्रुभट्टोपाध्यायकृते पुष्पभाष्ये विकाराभावाश्च परिसमाप्ताः ।। इति चतुर्थः प्रपाठकः ॥ for the colophon

भा. एतेन लक्षणप्रदेशेन ऊह्यप्रयोगः कल्पयितव्यः। कल्पयितुं शक्य इति ॥३९॥

इति उपाध्यायाजातशत्रुकृते पुष्पसूत्रभाष्ये चतुर्थस्य दशमी कण्डिका समाप्ता ॥ १० ॥

॥ भावाः समाप्ताः ॥

चतुर्थः प्रपाठकः समाप्तः ॥ ४ ॥

दी. एतेन पूर्वोक्तेन **प्रदेशेन** ऊह्यः ऊहसंबन्धी **सामगणः** सामसमूहः कल्पयितव्यः कल्पयितुं शक्यत इत्यर्थः। अभ्यासः प्रकरणसमाप्त्यर्थः ॥ ३९ ॥

इति श्रीत्रिपाठिदामोदरसूनुना दिक्षितरामकृष्णेन नान्हाभाई द्वितीयनाम्ना कृते फुल्लदीपे अष्टमप्रपाठकस्य दशमः खण्डः ॥ १० ॥

॥ भावाः परिसमाप्ताः ॥

अष्टमः प्रपाठकः समाप्तः ॥ ८ ॥

---

1. PV[2] ऊह्यः for ऊह्य०

2. PB[4] इति उपाध्यायाजातशत्रुपादैर्विष्णुयशःशिष्यार्थ अनुचरणार्थं भाष्यं कृतमिति for colophon

6. R कल्पनीयः for कल्पयितव्यः

9. My[3] after समाप्ताः adds: श्रीकाशीविश्वेश्वराय नमः ॥

नवमः प्रपाठकः

अथ विकल्पाः

प्रथमः खण्डः

वि. भा&रा. इदानीं विकल्पा उच्यन्ते । भावशेषश्च । एकस्मिन् पादे द्विधा गीतिर्दृश्यते । तत्र किमुभयप्रकारस्यापि गानस्य युगपत् प्रयोगो भवति उत अन्यतरस्येति संशयः । प्रयोगार्थत्वात् ऊहस्य । तन्निर्णयार्थमिदमारभ्यते ।

अथ विकल्पाः ॥ १ ॥

वि&भा. वर्तिष्यन्ते इति वाक्यशेषः ॥ १ ॥

दी. **अथ** भावकथनानन्तरं सामसु पर्व**विकल्पा** उच्यन्ते ॥ १ ॥

ख उगातिः ॥ २ ॥

वि.&भा. **तरणिरित्सिषायां** (ऊ. द. ५९) **रौरवे** **उगातिर्विकल्पते** । **नेमिन्तष्टेवषुऽ२३हाइ** । **नेमिन्तष्टेवसाऽ२३उहाइ** । विकल्पत्वात् अन्यतरस्य प्रयोगो भवति । ऊहे उभयं भवति ॥

---

5. $M^{1-2}TS^1$ The first Khanda in these MSS comes after the third Khanda; S^1 om. इदानीं; $S^1M^{1-2}T$ विशेषः for शेषः; भा. KS^2 शेषं for शेषः; A^2 भावे for पादे; TA^2 द्वितीया for द्विधा
6. वि. om. अपि गानस्य; A^2 उभय for युगपत्; $KA^2M^{1-2}S^{1-2}My^1$ भवतु for भवति; $KS^{1-2}T$ अथवा, M^{1-2} तथा for उत
7. $KS^1A^1M^{1-2}T$ उभयस्यापि for ऊहस्य तन्°; My^1 om. तन्°
12. $A^2M^{1-2}T$ भा om. उगतिर्विकल्पते
13. भा. विकल्पते, A^2 विकल्पते तु for विकल्पत्वात्
14. भा. om. भवति...भवति; $A^2S^1M^{1-2}T$ after उभयं add: अन्यतरप्रयोगे

दी. तरणिरित्साऽ३इषासाऽ२३४ती (ऊ. द. ५९) इति रौरवे उगतिर्विकल्पेन भवति । नेमन्तिष्टेवसूऽ२३हाइ । अत्र न उगतिः । नेमिन्तष्टेवसाऽऽ२३उहाइ । अत्र उगतिः । यज्ञे अन्यतरस्य प्रयोगो भवति ॥ २ ॥

मदमदो धनकामे ॥ ३ ॥

वि. निधनकामे पवस्वदक्षाय (ऊ. द. ६८) मदाः । मदः । मदः । इत्येते विकल्पास्त्रयो भवन्ति । पर्यायेण प्रयोगे मदा इति उपलक्षणम् । उत्तरयोरप्येवम् ॥ ३ ॥

भा. पवस्वदक्षायां (ऊ.द.६८) निधनकामे मदाः । होइ । मद । हो३इ । मदः । हो३इ । प्रतिस्तोत्रीयमन्यतरस्य प्रयोगो भवति ॥ ३ ॥

दी. पवस्वदाऽ२क्षसाधनाः (ऊ. द. ६८) इति निधनकामे मद । मदः । इति विकल्पेन भवति । मद । हो३इ । मदः । होइ । एतयोरन्यतरस्य प्रयोगः । द्वितीयायां भिय । होइ । भियः । होइ । एतयोरन्यतरस्य प्रयोगः । तृतीयायां रुह । होइ । रुहः । होइ । एतयोरन्यतरस्य प्रयोगः ॥ ३ ॥

पुरः स्वासूत्तरयोश्चारङ्गमा नदे ॥ ४ ॥

वि.&भा. पुरोजित्यां (ऊ द. ७७) नानदे स्वासूत्तरयोः स्तोत्रीययोः च अरङ्गमा विकल्पते । अपश्वानंश्नथि ॥ ४ ॥

---

8. PB[2] om. मदाः । होइ

11. E भवन्ति for भवति । and एतेषां for एतयोः

12. E before भिय adds: भियाः होइ; E एतेषां for एतयोः

14. A[2]M[1-2]T नानदे for मा नदे; My[2] °ङ्गमास्वरोन्वये for ङ्गमानदे

15. B[4] om. नानदे

16. KS[1-2]A[2]T विकल्प्यते for विकल्पते; भा. अरङ्गमा।जरम इत्येतत् for अपश्वानं श्नथि

दी. पुरोजिती वोअ । धसाऽ३ः । (ऊ. ऊ. ७८) इति नानदे अरङ्गमास्वरो विकल्पेन भवति । प्रथमायाम् अपश्वानःश्नथि । अपश्वानंश्नथि । एतयोरन्यतरस्य प्रयोगः । द्वितीयायां परिप्रस्यन्दते । परिप्रस्यन्दते । एतयोरन्यतरस्य प्रयोगः । तृतीयायां सोमंविश्वाचिया । सोमंविश्वाचिया । एतयोरन्यतरस्य प्रयोगः । प्रत्यस्मैपिपी । षताऽ३इ (ऊ. द. ३७५) इति स्वासु नानदे उत्तरयोः स्तोत्रीययोः अरङ्गमास्वरो विकल्पेन भवति । द्वितीयायां अमत्रेभिर्ऋजी । अमत्रेभिर्ऋजी । एतयोरन्यतरस्य प्रयोगः । तृतीयायां वेदाविश्वस्यमे । वेदाविश्वस्यमे । एतयोरन्यतरस्य प्रयोगः । प्रत्यस्मै-नानदे प्रथमायाम् अरङ्गमापर्व भवति ॥ ४ ॥

अष्टेडरयिष्ठयोर्महित्वनादीदिहिस्वरा ॥ ५ ॥

वि. अष्टेडरयिष्ठयोः पवमानमहित्वानादीदिहिस्वरा गीतिर्विकल्पते ॥ ५ ॥

भा. पवस्ववाजसातृतीयायाम अष्टेड–(र. द. १६) रयिष्ठयोः (ऊ. सं. २८४) पवमानमहित्वनेति दीदिहिस्वरा गीतिर्विकल्पते ॥ ५ ॥

दी. ईडा पवस्ववाजसातये । ईडा (र. द. १६) इत्यष्टेडे तृतीयायां महित्वना गीतिः दीदिहिस्वरा गीतिश्च विकल्पेन भवति । पवमानमहित्वनाऽ२३४५ । पवमान-महित्वनाऽ१ । एतयोः अन्यतरस्य प्रयोगः । पवस्ववा । जसाताऽ३याइ (ऊ. सं. २८४) इति रयिष्ठे तृतीयायां महित्वना गीतिः दीदिहिस्वरा गीतिश्च विकल्पेन भवति । पवमानमहित्वनाऽ२३४५ । पवमानमहित्वनाऽ१ । एतयोरन्तरस्य प्रयोगः । औहो-हाइ । अयोहाइ । पवापवस्वैनावस्नऽ२३नी (ऊ. द. ११८) इति श्रौष्टे दीदिहि इति स्वरो भवति ॥ ५ ॥

---

5. My² before अरङ्ग॰ adds: यत्र

6. My² om. एतयो····प्रयोगः ।

10. A² स्वरादि T स्वरादिति for स्वरा गीतिः; Ks¹-² My¹ इति for गीतिः

12. P विकल्प्यते for विकल्पते

मातावृद्धं श्वामित्रे ॥ ६ ॥

वि. महावैश्वामित्रे असाविसोम-(ऊ. द. ९८) यज्ञायज्ञ-(ऊ प्रा ८३९) तृचान्त्ययोः स्तोत्रीययोः माता अवृद्धे । माताशब्दौ विकल्पेते । यज्ञंचामा । उतत्राता ॥

भा. असाविसोमइन्द्र-(ऊ. द. ९८) तृतीयायां यज्ञायज्ञीयर्क्षु तृतीयायां च महावश्वामित्रे माशब्दताशब्दयोर्यद्वृद्धं गानं तद्विकल्पते । यज्ञंचमा । उतत्राता । इति च ॥ ६ ॥

दी. हयाइ । हयाऽ३ । ओहाओहा । असाविसो । मइन्द्राताऽ२इ (ऊ. द. ९८) इति महावैश्वामित्रे मा-अक्षरं विकल्पेन अवृद्धं भवति । तृतीयायां यज्ञश्च । मा । नुषाणाऽ२म् । यज्ञश्चा । मानुषाणाऽ२म् । एतयोरन्यतरस्य प्रयोगः । हयाइ हयाऽ३ । ओहाओहा । यज्ञायज्ञा । वोअग्नयाइ (ऊ. प्रा. ८३९) इति महावैश्वामित्रे ता-अक्षरं विकल्पेनावृद्धं भवति । तृतीयायाम् उतत्राता । तनूनाऽ२३नाम् । उतत्रा । तातनूनाऽ२म् । एतयोरन्यरस्य प्रयोगः ॥ ६ ॥

क्रौ ध्यम-षष्ठं नवमात्रम् ॥ ७ ॥

वि. क्रौञ्चे इन्द्रायेन्दायां (ऊ. द. १००) सर्वासु मध्यमे पादे षष्ठमक्षरं नवमात्रं विकल्पते ॥ ७ ॥

भा. गायत्रीक्रौञ्चे प्रतिस्तोत्रीयं मध्यमे पादे षष्ठमक्षरं विकल्पते ॥ ७ ॥

दी. इन्द्रायेन्दाऽ२औहो(ऊ. द. १००)इति गायत्रीक्रौञ्चे प्रतिस्तोत्रीयं मध्यमपादे षष्ठमक्षरं विकल्पेन नवमात्रं भवति । प्रथमायां पात्रस्वामा । धूऽ३म । पवस्वमधुमाऽ३२ ।

---

3. A¹M¹-³T om. माता अवृद्धे; S¹ अवृद्धौ for माता अवृद्धे; T मिमाताशब्दौ for माताशब्दौ; S¹ after °ता adds: वृद्धौ, K अवृद्धम्, A²M¹-²T अवृद्धौ

7. वृद्धं for अवृद्धं

12. A²M¹-³T क्रौध्यपाषष्ठं for क्रौध्यमषष्ठं

13. K स्वासु for सर्वासु

अत्र मा-अक्षरं स्वरे स्वरे त्रिमात्रं भवते । एवं नवमात्रम् । एतयोरन्यतरस्य प्रयोगः । द्वितीयायां पारिष्क्रार्ण्वे । ताऽ२३इंध । परिष्कृण्वन्तिधाऽ३२ । एतयोरन्यतरस्य प्रयोगः । तृतीयायां पाइबन्तूव ।रूऽ३णः । पिबन्तुवरुणाऽ३२ः । एतयोरन्यतरस्य प्रयोगः ॥

दीर्घे परयोर्दोषापरं नीचैः ॥ ८ ॥

वि. सासू । दीर्घे परयोर्दोषायाः परमक्षरं नीचीभवति । विकल्पमापद्यते । **पिबाद्यस्यमरूऽ२३ताः ।** **दोषाऽ२वाऽ२ स्ताऽ२ः ।** एषा दोषा ॥ ८ ॥

भा. सासू । (ऊ. द. ११२) दीर्घे परयोः दोषायाः परमक्षरं नीचैर्भवति ॥ ८ ॥

दी. **सासू । न्वेयोवसूऽ२३नाम्** (ऊ. द. ११२) इति दीर्घे परयोः स्तोत्रीययोः **दोषायाः** परमक्षरं विकल्पेन **नीचैर्**भवति । द्वितीयायां **द्रःपिबाद्यस्यमरूऽ२३ताः** **द्रःपिबाद्यस्यमरूऽ२३ताः** । एतयोरन्यतरस्य प्रयोगः । तृतीयायां **त्रावरुणाकरामाऽ२३हाइ ।** **त्रावरुणाकरामाऽ२३हाइ ।** एतयोरन्यतरस्य प्रयोगः । उपात्वाऽ२३ग्नेदिवेदिवाइ (ग्रा. १. २. १४. १) इति साम्नि **दोषाऽ२वास्ताऽ२ः ।** इति दोषापर्व भवति ॥ ८ ॥

गवतृतीयदशमं कृष्टं सर्वत्र ॥ ९ ॥

वि. **गौङ्गवे** (ऊ. द. १२५) तृतीये पादे दशममक्षरं सर्वत्र कृष्यते ॥ ९ ॥

भा. **गौङ्गवे** (ऊ. द. १२५) तृतीये पादे दशमं कृष्यते ॥ ९ ॥

दी. **पुनानाऽ३स्सोमधारया ।** **आपोऽ२** (ऊ. द. १२५) इति **गौङ्गवे तृतीये** पादे **दशम**मक्षरं **कृष्टं** भवति । सप्तममष्टमं चाक्षरं विकल्पेन कृष्टमित्यर्थः । सर्वासु विकल्पवतीषु **आरत्नधायोनिमाऽ२३ताँऽ२ ।** **स्वसाऽ३इदासाइ ।** इति प्रथमा गीतिः । **आरत्नधायोनिमृत ।** **स्वसाऽ३इदासाइ ।** इति द्वितीया गीतिः । एतयोरन्यतरस्य प्रयोगः ॥ ९ ॥

---

7. P नीची for नीचैर

13. A³ गायत्र for गव

धर्मविधर्मणोर्दशपञ्चाक्षरशो धनानि ॥ १० ॥

वि. धर्म- (ऊ. द. १६९) विधर्मणोः (ऊ. द. २०४) पञ्चाक्षरशो निधनानि भवन्ति विकल्पेन । अन्यद्दशाक्षरं च ॥ १० ॥

भा. पञ्चाक्षरशः निधनानि भवन्ति । दशाक्षराणि विकल्पेनाम्नातानि ॥ १० ॥

दी. औहोऽ३वा । औहोऽ३वा । औहाऽ२वाऽ२३४ औहोऽ६वा (ऊ. द. १६९) इति धर्मणि दशपञ्चाक्षराणि निधनानि विकल्पेन भवन्ति । पवस्वसोममहान्त्समुद्राऽ१ः । इति दशाक्षरम् । पवस्वसोमाऽ२३४५ । महान्त्समुद्राऽ२ः । [इति पञ्चाक्षरम् ।] एतयोरन्यतरस्य प्रयोगः । एवमादीनि । ओहोऽ३वा । ओहोऽ३वा । ओहोऽ२वा-ऽ२३४ । ओहोऽ६वा (ऊ. द. २०४) इति विधर्मणि दशाक्षराणि पञ्चाक्षराणि निधनानि विकल्पेन भवन्ति । पवस्वसोममहेदक्षायाऽ२३४५ इति दशाक्षरम् । पव-स्वसोमाऽ२३४५ । महेदक्षायाऽ२३४५ । [इति पञ्चाक्षरम् ।] एतयोरन्यतरस्य प्रयोगः । एवमादीनि ॥ १० ॥

स्तावे हविष उत्तरयोः प्रथमे ॥ ११ ॥

वि.&भा. सौहविषे (ऊ. द. २२०) उत्तरयोः स्तोत्रीययोः प्रस्तावे प्रथमे स्वरे विकल्पः परिप्रधन्वोत्तरयोः ॥ ११ ॥

दी. य । येपारी । प्रधन्वा (ऊ.द. २२०) इति सौहविषे उत्तरयोः स्तोत्रीययोः प्रस्तावे प्रथमे स्वरे विकल्पः । द्वितीयायाम् एव । एआइवा । एव । एआइवा । एतयोरन्यतरस्य प्रयोगः । तृतीयायाम् इन्द्रः । एआइन्द्रः । एतयोरन्यतरस्य प्रयोगः ॥

---

1. A[2]My[1]M[1-2]TS[1]P om. दश; M[1-2] निधनानि for धनानि

3. M[1-2]T अन्यदा for अन्यद्

5. My[2] om. औहोऽ६....धर्मणि

15. वि परिप्रधन्वायां for परिप्रधन्वोत्तरयोः; P after प्रधन्वोत्तरयोः adds: पवाप३वा आईवा३इन्द्रः पे३ धा३इन्द्रा३

17. My[2] एव । एव । एव । ए आइका for एवा...आइवा; R om. एआइवा in both places

18. My[2] इन्द्रः । इन्द्रः । इन्द्रः । एआइन्द्रः for इन्द्र ... आइ द्राः; R om. एआ

विराट् पर्यू च देव्ये गीथस्तदादिः ॥ १२ ॥

वि. & भा. अग्निन्नरायां (ऊ. द. २२२) **पर्यूष्वायां** (ऊ.सं. ३५०) च **वामदेव्ये उद्गीथाद्यं** पर्व प्रथमस्वरे **विकल्पते** ॥ १२ ॥

दी. **आऽ५ग्निम् ।** **नरोऽ३दाऽ३इधीतिभाइः** (ऊ. द. २२२) इति **विराड्वामदेव्ये उद्गीथः ।** **तदादिः ।** तस्य उद्गीथस्याद्युद्गीथः प्रथमे स्वरे विकल्पते । **आ ।** **रण्योर्हस्तच्युतंजनयतप्रशस्तन्दूरे ।** आ । रण्योर्हस्तच्युतंजनयतप्रशस्तंदूरे । एतयोरन्यतरस्य प्रयोगः । एवं द्वितीयात् तृतीययोः उद्गीथादिः प्रथमे स्वरे विकल्पते । **पाऽ५रि ।** **ऊषूऽ३प्राऽ३धन्वावा** (ऊ. सं. ३५०) इति **वामदेव्ये** उद्गीथस्याद्युद्गीथः प्रथमे स्वरे विकल्पते । **जा ।** **सातये परिवृत्राणिसक्षाणिर्द्विषस्त ।** रा । औहो-हाइ । जा । **सातयेपरिवृत्राणि सक्षाणिर्द्विषस्त ।** रा । औऽ३होहाइ । एतयोरन्यतरस्य प्रयोगः । एवं द्वितीयतृतीययोः उद्गीथादिः प्रथमे स्वरे विकल्पते । यावत्प्रथमे स्वरे आचार्य-स्याध्ययनं तावदाद्युद्गीथः । **आ ।** **रण्योर्हस्तच्युतंजनयतप्रशास्तं दू ।** एतावत् । प्रथमे स्वरे अध्ययनम् । आद्योद्गीथश्चैतावत् ॥ १२ ॥

नवे निहोता ॥ १३ ॥

---

1. A^{2}T पर्यूषु for पर्यू

2. भा. ॰नर इति for नरायां; $M^{1}S^{1}M^{3}$ पर्यूषु प्रेद्ध इत्यत्र, A^{2}T पर्यूषु प्रेत्यतृच for पर्यूष्वायां च वामदेव्ये

3. भा. प्रथमे for प्रथम॰; KS^{2} स्वरः for स्वरे; A^{2} विकल्पिए भवति, M^{1-2} विकल्पः : TS^{1} विकल्प भवति for विकल्पते M^{1-2} after विकल्पः ।। add: प्रथमस्वरे सर्वाण्यक्षराणि भवन्तीत्यर्थः । त्रिकद्रुपञ्चनिधनदेव्यप्रस्तावक्त् किमित्ते कबृहद्देव्ययोः बृणीप्रथममिति तद्विवेष्ठा स्वरविधानादत्राप्युपलक्षितम् । अन्येषां चतुर्थपर्वणि । अन्त्याक्षरवर्जं सर्वाण्युच्चैभवन्तीत्यर्थः ॥

12. L^{1} om. आरण्यो…एतावत्

13. $L^{1}My^{2-3}$ यदि for आद्य

वि.&भा. पूर्वे मानवे निहोता विकल्पते ॥ १३ ॥

दी. इन्द्रक्रतूम् (ऊ. सं. ३६३) इत्यादिमानवे निहोतापर्व विकल्पेन भवति । न आभाऽ२३४राऽ५ । न आभाऽ२३४रा । एतयोरन्यतरस्य प्रयोगः । अग्नआयाहि । वाऽ५इतयाइ (ग्रा. १. १. १. ३) इति तृतीये निहोताऽ२३४सा इति पर्व भवति १३ ॥

तिधा तु वारा ॥ १४ ॥

वि.&भा. मन्द्रयायेत्यत्र वारा विकल्पते ॥ १४ ॥

दी. मन्द्रयाया (ऊ. सं. ३५५) इति मानवे तु वारापर्व विकल्पेन भवति । तिधाराऽ२३४या । वाइधाराऽ३२४या । एतयोरन्यतरस्य प्रयोगः । अश्वन्नत्वा । औहोहाइ (ग्रा. १७. ३) इति साम्नि वारावाऽ२३४न्ताम् इति वारापर्व भवति ।। १४ ॥

त्वे सो दैर्घे गकारः ॥ १५ ॥

वि. त्वेसोदैर्घे (ऊ. ए. ४०१) गकारो विकल्पते । वृगोहेति ॥ १५ ॥

भा. त्वेसोमायां ऊ. ए. ४०१) दैर्घश्रवसे वृगोहेति गकारो विकल्पते ॥ १५ ॥

दी. त्वेसोम-प्रथमावृदोहा वृगोहा ओहाऽ३ए (ऊ. ए. ४०१) इति दैर्घश्रवसे प्रस्तोवे गकारो विकल्पेन भवति । त्वेसोमामप्रथमावृदोहओहाऽ३ए । त्वेसोमप्रथमावृगोहा-ओहाऽ३ए । एतयोरन्यतरस्य प्रयोगः ॥ १५ ॥

शने राजन् प्लवते ॥ १६ ॥

---

1. वि. विकल्प्यते for विकल्पते; PV[2] after विकल्पने add: अग्निसोमादिषु; B[4]A[1] अग्निसोशगध्यूषु

6. वि. विकल्प्यते for विकल्पते

8. E om. अश्वन्नत्वा...भवति

10. KA[2]TS[1-3] दैर्ग्यें for दैर्घे

11 KA[2]S[1-3]T दैर्ध्ये for दैर्घे; M[1-2]T सोम for सो

वि. **औशने इनोराजायां** (ऊ. ए. ४१४) राजन्-शब्दो विकल्पेन प्लवते ॥

भा. इनोराजन्नौशने (ऊ. ए. ४१४) राजन्-शब्दो विकल्पेन प्लवते ।। १६ ॥

दी. **आइनाः** (ऊ. ए. ४१४) इत्यौशने राजन्शब्दो विकल्पेन प्लवते । प्लुतो भवति । **राजन्नरताइः** । **राजानरताइः** । एतयोरन्यतरस्य प्रयोगः ॥ १६ ॥

आसोफतृतीयायामृतेन योनिवन्मध्ये जा प्लुतं प्रान्त्ययोर्वलोपश्चाद्य उच्चैस्तकारः ॥ १७ ॥

बि. **आसोता-सफ**(ऊ. ए. ४६७) **तृतीयायाम्** **ऋतेने**त्येतस्मिन् पादे मध्ये विकल्पे **योनिवद्भवति** । आद्यन्तयोः विकल्पयोः **जा**-शब्दः **प्लुतः** भवति । **प्रथमान्त्ययोर्वलोपश्चाद्ये** विकल्पे **तकार उच्चैर्भवति** ॥ १७ ॥

भा. **आसोतापा**-(ऊ. ए. ४६७) **तृतीयायां सफे** **ऋतने**त्येतस्मिन् पादे जाशब्दः **योनिवद्भवति** । मध्यमे विकल्पे प्रथमान्त्ययोर्विकल्पयोः जाशब्द एव प्लुतो भवति । वकारलोपश्च तयोरेव । आद्ये लोपे **उच्चैस्तकारः** ॥ १७ ॥

दी. **आसोताऽ३परि । षिश्चाऽ२३४ता** (ऊ. ए ४६७) इति **सफे तृतीयायाम्** **ऋतेनय** इत्येतस्मिन् पादे मध्यमे विकल्पे जाशब्दो **योनिवद्भवति** । **तजातोवाऽ३इवाऽ३** । **प्रान्त्ययोः** प्रथमान्त्ययोर्विकल्पयोर्जाक्षरं **प्लुतं** भवति । **वलोपश्च** । प्रथमे विकल्पे **उच्चैस्तकारो** भवति । **तजातोऽ३वाऽ३इ** । **वाऽ३२३४द्धाइ** । तृतीये विकल्पे **तजातोऽ३वाऽ३इ** । **वाऽ३२मृ४द्धाइ** । एतेषां त्रयाणां विकल्पानां मध्ये अन्यतरस्य प्रयोगः ॥ १७॥

---

1. KS[3] शब्दे for शब्दः
5. A[2] T आसोसफ, M[1-2] आसीतासफ for आसोफ
6. M[1-2] after तकारः add: विकल्पो भवति
7. T विकल्पः for विकल्पे
8. M[1-2] om, विकल्पयोः; M[1-2] आद्यः उच्चैस्तकारो विकल्पः for आद्ये....उच्चैः
17. My[2-3] om. मध्ये

याजिवाह इहायां प्लवते ॥ १८ ॥

वि. यजिष्ठन्त्वायामैध्मवाहे (ऊ. स. ६८१) **इहायां** प्रत्ययभूतायां पूर्वाक्षरो विकल्पः **प्लवते** ॥ १८ ॥

भा. यजिष्ठन्त्वायामैध्मवाहे (ऊ. स. ६८१) **इहायां प्रत्यये प्लवते** ॥ १८ ॥

दी. यजिष्ठन्त्वावब्रमाहाइ (ऊ. स. ६८१) इत्यैध्मव हे आद्ये **इहायां** प्रत्यये **उकारो** विकल्पेन प्लुतो भवति । **अस्य यज्ञस्य सुइहा । अस्य यज्ञस्य सूइहा ।** एतयोरन्यतरस्य प्रयोगः ॥ १८ ॥

यशस्युत्तरयोरग्निंदूतास्तावे ॥ १९ ॥

वि. & भा. इन्द्रयशसि(ऊ. स. ७१३)**उत्तरयोः** स्तोत्रीययोः **प्रस्तावे अग्निंदूत।** विकल्पते ॥ १९ ॥

दी. त्वमिन्द्रा । यशाः । असाइ (ऊ. स. ७१३) इति **इन्द्रस्य यशसि** **उत्तरयोः** स्तोत्रीययोः **प्रस्तावे अग्निंदूतास्वरो** विकल्पेन भवति । द्वितीयायाम् **अनुत्तश्चा । अनुत्तश्चा ।** एतयोरन्यतरस्य प्रयोगः । तृतीयायां **रोधोभागाम् । रोधोभागाम् ।** एतयोरन्यतरस्य प्रयोगः ॥ १९ ॥

ण्वबृहत्युदा आ इति गतिः ॥ २० ॥

वि. & भा. त्वँ ह्येहिचेरवायां **कण्वबृहति उदा आ** इति **गतिर्विकल्पते** ॥ २० ॥

---

2. M¹⁻³T पूर्वो for पूर्वा°
3. M¹-² प्लुतो भवति for प्लवते
5. R °वाहाद्ये for °वाहे वाद्ये
9. वि· om. स्तोत्रीययोः
10. वि·विकल्प्यते for विकल्पते
14. My³ विकल्पः for प्रयोगः
16 .trans· त्वंह्येहचेरवायां after विकल्पते; T विकल्प्यते for विकल्पते; S¹ om· गतिः

दी. औहोतुवा३ह्रियाऽ३ए (ऊ. क्षु. ८६७) इति कण्वबृहति उदा आऽ२३ इति गतिर्विकल्पेन भवति । उदाइन्द्राऽ१आऽ२३४ । उदाआऽ१इन्द्राऽ२३४ । एतयोरन्यतरस्य प्रयोगः ॥ २०॥

षभे काम्पा ॥ २१ ॥

वि. & भा. श्रुधीहवायां वैराजर्षभे (र. क्षु. १६७) मारे अस्मान्मघवञ्जित्यत्र काम्पास्वरो विकल्पते ॥ २१ ॥

दी. श्रुधीहवाम् । विपि । पानस्याद्राइः (र. क्षु. १६८) इति वैराजऋषभे तृतीयायां काम्पापर्व विकल्पेन भवति । मारे अस्मान् । मघ । वञ्ज्योक्काः । मारेआ । स्माऽ३न्मघ । वञ्ज्योक्काः । एतयोरन्यतरस्य प्रयोगः ॥ २१ ॥

त्वंनोवारे पुनाण्वहाति प्रसोण्वतरे पुनाभिसो जम्भे
चोत्तरयोः ककुभोर्विकल्पः ॥ २२ ॥

वि. & भा. त्वंनश्चित्रायां(ऊ. ए. ४८०)वारवन्तीये पुनानायां (ऊ क्षु.८७७) कण्वबृहति प्रसोमदेवायां (ऊ. क्षु. ८७५) कण्वरथन्तरे पुनानायाम् (र. क्षु. १७२) अभिसोमायां (र. सं. ६५) वार्कजम्भे उत्तरयोः स्तोत्रीययोः ककुभोर्विकल्पा भवन्ति । ककुभो वा बृहत्यौ वा । तयोर्विकल्पा भवन्तीत्यर्थः ॥ २२ ॥

इति फुल्लविवरणे पञ्चमस्य प्रथमः खण्डः ॥ १ ॥

इति पुष्पसूत्रभाष्ये पञ्चमस्य प्रथमा कण्डिका ॥ १ ॥

---

10. A[2]T ण्वबृहति, M[1-2] कण्वबृहति for ण्वह

11. भा. विकल्प्यः M[1-2] विकल्पः for विकल्पाः

13. देववीतयायां for देवायां; वि. कण्वतरे for कण्वरथन्तरे; M[1-2] om. पुनानायाम्

14. PB[1] after जम्भे add: च; KS[2] om. स्तोत्रीययोः; A[2]S[1]T trans. स्तोत्रीययोः after ककुभोः

15. P before ककुभौ ins. पाद्यौ......स्तोत्रीयौ । S[1] ण्वबृहत्यां,M[1-2] बृहत्ये for वा बृहत्यौः भा. om. तयोर्विकल्पा भवन्तीत्यर्थः ॥

दी. तुवन्नश्रा औहोहाइ (ऊ. ए. ४८०) इति वारवन्तीये उत्तरयोः स्तोत्रीययोः ककुभोर्विकल्पेन प्रयोगो भवति। ककुभो (भौ?) बृहत्यौ वा भवत इत्यर्थः। द्वितीयायां प्रस्तावानन्तरं तूचाइतूऽ२३४नाः। विदागाश्नन्तुचेतूनोऽ२३४हाइ। पर्वितोकन्तनयं पर्तृभिष्टूऽ३४। औहोवा। इति बृहती गीतिः। प्रस्तावनन्तरं तूचाइतूऽ२३४नाः पर्वाइतोऽ२३४हा। कंतनयंपर्तृभिष्टूऽ३४। औहोवा। इति ककुप् गीतिः। एतयोरन्यतरस्य प्रयोगः। तृतीयायां प्रस्तावानन्तरं प्रायुत्वाऽ२३४भाइः। अदब्धाप्रयुत्वाभोऽ२३४हाइ। अग्नइहेडाऽसि दैव्या युयोधाऽ३४। औहोवा इति बृहती गीतिः। प्रस्तावानन्तरं प्रायुत्वाऽ२३४भाइः। अग्नाइहाऽ२३४इहाइ। डाऽसिदैव्या युयोधाऽ३४। औहोवा इति ककुप् गीतिः। एतयोरन्यतरस्य प्रयोगः। औहो पुनानस्सोऽ३ए (ऊ. क्षु. ८७७) इति कण्वबृहति उत्तरयोः स्तोत्रीययोः ककुभोर्विकल्पेन प्रयोगो भवति। द्वितीयायां प्रस्तावानन्तरं हिराण्याऽ१याऽ२३४इः। हाहोइ। ऊत्सोदेवोहिरण्ययः। दुहानाऽ१ऊऽ२३४। हाहो। धार्दिवियम्। मधूम्राऽ१याऽ२३४म्। हाहोइ। इति बृहती गीतिः। प्रस्तावानन्तरं हिरण्याऽ१याऽ२३४ः। हाहोइ। दूहानऊ। धर्दाइवाऽ१याऽ२३४म्। हाहोइ। मधूम्राऽ१याऽ२३४म्। हाहोइ। इति ककुप् गीतिः। एतयोरन्यतरस्य प्रयोगः। तृतीयायां प्रस्तावानन्तरं स्थामसाऽ१दाऽ२३४त्। हाहोइ। प्रान्नं सत्रस्य नासदत्। आपाच्छ्रोऽ१याऽ२३४म्। हाहोइ। धारया वा। जियाषोऽ१साऽ२३४इ। हाहोइ। इति बृहती गीतिः। प्रस्तावानन्तरं स्थामासाऽ१दाऽ२३४त्। हाहोइ। आपृच्छयम्। धरूणाऽ१म्वाऽ२३४। हाहोइ। जिगाषोऽ१साऽ२३४इ। हाहोइ। इति ककुप् गीतिः। एतयोरन्यतरस्य प्रयोगः। प्रासो मदेववीतयाइ (ऊ. क्षु. ८७५) इति कण्वरथन्तरे द्वितीयायां प्रस्तावानन्तरम् अच्छाकोशाम्। माधूऽ३श्चूऽ३ताम्। आहर्यतो अर्जुनो अत्के अव्यताऽ२३४ऐही। इति बृहती गीतिः। प्रस्तावानन्तरम् अच्छाकोशां माऽ३धूश्चूऽ३नाम् आऽ३हार्याऽ३तो

21. L[1]My[2] after ऐही add: प्रियस्सूऽ२३४नूः

22. My[3] om. अच्छा---श्चूताम्

अर्जुनो अत्के अव्यताऽ२३४ ऐही इति ककुप् गीतिः । एतयोरन्यतरस्य प्रयोगः । तृतीयायां प्रस्तावानन्तरं प्रियः सूनूः । नाऽ३माजऽ२याँः । तमीहिन्वन्त्यपसोयथारथा ऽ२३४मैही । इति बृहती गीतिः । प्रस्तावानन्तरं ताऽ३माईऽहाऽ२इन्वा । तिपयसोयथारथाऽ२३४मैही । इति ककुप् गीतिः । एतयोरन्यतरस्य प्रयोगः । हाउ पुनानस्सोमधारया (र. क्षु. १७२) इति वार्कजम्भे द्वितीयायां प्रस्तावानन्तरम् उत्सो-देवो हिरण्ययाः । हाउ । दुहान ऊधर्दिवियां हाउ । माऽ३धूप्रायाऽ३म् । हाउ । इति बृहती गीतिः । प्रस्तावानन्तरं दुहानऊ । हाउ । धर्दिवियाम् । हाउ । मा-ऽ३धूप्रायाऽ३म् । हाउ । इति ककुप् गीतिः । एतयोरन्यतरस्य प्रयोगः । तृतीयायां प्रस्तावानन्तरं प्रत्नँसधस्थमासदात् । हाउ । आपृच्छियं धरुणंवा । हाउ । जाऽ३याषोमाऽ३इ । हाउ । इति बृहती गीतिः । प्रस्तावानन्तरम् आपृच्छियाम् । हाउ । धरुणं वा । हाउ । जाऽ३यार्षासाऽ३इ । हाऊ । इति ककुप् गीतिः । एतयो-रन्यतरस्य प्रयोगः । हावभिमोमास आयाव्राः (र. सं. ६५) इति वार्कजम्भे द्वितीयायां प्रस्तावानन्तरं मत्सरासोमदच्युताः । हाउ । तरत्समन्द्रंपवमा । हाउ । नाऽ३ऊर्मा इणाऽ३ । हाउ । इति बृहती गीतिः । द्वितीयायां प्रस्तावानन्तरं मत्सरासोमदच्युताः । हाउ । तरत्सम् । हाउ । द्रंपवमा । हाउ । नाऽ३ऊर्माइणाऽ३ । हाउ इति ककुप् गीतिः । एतयोरन्यतरस्य प्रयोगः । तृतीयायां प्रस्तावानन्तरं राजादेवोऋतंबृहत् । हाउ । अर्षा मित्रस्यवरुणा । हाउ । स्याऽ३धार्मणाऽ३ । हाउ । इति बृहती गीतिः । प्रस्तावानन्तरम् राजादेवऋतं बृहात् । अर्षामित्रा । हाउ । स्यवरुणा । हाउ । स्याऽ३धार्माणाऽ३ । हाउ । इति ककुप् गीतिः । एतयोरन्यतरस्य प्रयोगः । एवं ककुप्बृहत्योर्विकल्पा उक्ताः ॥ २२ ॥

इति फुल्लदीपे नवमप्रपाठकस्य प्रथमः खण्डः ॥ १ ॥

---

16. L^1 om. एतयोः----प्रयोगः; L^1 om. प्रस्तावानन्तरं

17. L^1 ककुप् for बृहती

द्वितीयः खण्डः

अथ भावान् प्रवक्ष्यामः प्रगाणं यैर्विधीयते ॥
आर्चिकं स्तौभिकं चैव पदं विक्रियते तु यैः ॥ १ ॥

वि.&भा. अथशब्द आनन्तर्ये । **भावान् प्रवक्ष्यामः** । गानमेव **प्रगाणम्** । **विधीयते** प्रतिष्ठाप्यत इत्यर्थः । **आर्चिकं पदं स्तौभिकं च यैर्विक्रियते** विकारमापद्यते तान् भावान् प्रवक्ष्यामः इति संबन्धः ॥ १ ॥

दी. **अथ** विकल्पकथनानन्तरं **भावान्** नामरूपान् आइभावादीन् **प्रवक्ष्यामः** कथयिष्यामः । **यैः** भावैः **प्रगाणं** प्रकृत्याः ऋचो गानं **विधीयते** विधानं क्रियते । यैस्तु भावैः **आर्चिकं पदं स्तौभिकं च** पदं **विक्रियते** विकारमापद्यते । तान् भावान् प्रवक्ष्यामः ॥ १ ॥ नामरूपान् भावनाह-

आइत्वं प्रकृतिं चैव वृद्धं चावृद्धमेव च ॥
गतागतं च स्तोभानामुच्चनीचं तथैव च ॥ २ ॥

वि. **आइत्वं** आइभावत्वम् । **प्रकृतिं** प्रकृतिभावम् । **वृद्धं चावृद्धं च** । **स्तोभानां गतागतम् उच्चनीचम्** ॥ २ ॥

---

2. $A^{2}M^{1-2}TS^{1}$ प्रवक्ष्यामि for प्रवक्ष्यामः

4. PS^{2} आनन्तर्यार्थे for आनन्तर्ये; $KS^{1}A^{2}M^{1-2}$ om. अथ...विधीयते

5. $KS^{1}A^{2}M^{1-2}TMy^{1}$ तान्भावान् इति संबन्धः for इत्यर्थः; M^{1-2} विधीयते for विक्रियते; K M^{1-2} om. विकारमापद्यते;

6. $M^{1-2}TS^{1}A^{2}$ प्रवक्ष्यामि for प्रवक्ष्यामः

11. S^{1} प्रकृतित्वं for प्रकृतिं

13. S^{1-2} प्रकृतित्वं for प्रकृतिं; M^{1-2} स्वरभावत्वं $A^{2}TS^{2}$ स्वरभावम् $S^{2}K$ °भावः for °भावम्

संधिवत्पदवद्गानमत्वमार्भाविमेव च ।
प्रश्लेषांश्चाथ विश्लेषानूहे त्वेवं निबोधत ॥ ३ ॥

वि. **संधिवत्** संधाविव यद् गानं तत् । पदवत् पद इव । अकारादीनामत्वम् । ऋवर्णस्य आर्भावम् । प्रश्लेषान् स्वरसंधीन् ॥ ३ ॥

संकृष्टं च विकृष्टं च व्यञ्जनं लुप्तमतिहतम् ।
आभावांश्च विकारांश्च भावानूहेऽभिलक्षयेत् ॥ ४ ॥

वि. **संकृष्टं विकृष्टं च** व्यञ्जनं लुप्तमतिहतं च आभावांश्च विकारांश्च इत्येतान् **भावानूहेऽभिलक्षयेत्** । अभिपश्येत् । ऊहे तु एवं भावान्निबोधत । ऊहे ऊहगातारः ॥ ४ ॥

दी. आइभावादीन् विंशतिभावान् **ऊहे** **एव** **निबोधत** । ज्ञातव्या इत्यर्थः । अष्टादशभावान् ऊहे **अभि** आभिमुख्येन **लक्षयेत्** । लक्षणं कृतवानाचार्यः । अवृद्धकृष्टयोर्न ॥ २-४ ॥

एतैर्भावैस्तु गायन्ति सर्वाः शाखाः पृथक् पृथक् ।
पञ्चस्वेव तु गायन्ति भूयिष्ठानि स्वरेषु तु ॥ ५ ॥

सामानि षट्सु चान्यानि सप्तसु द्वे तु कौथुमाः ।

---

2. EMy$^{2-3}$S^{2}M^{4} एव for एवं

3. K संध्यवत् संध्य इव यद्गतागतं for संधिवत्...तत्

4. M$^{1-2}$T आकारस्य अकारत्वम् । आर्भावः ऋवर्णस्य S^{1} आभावस्य अत्वमृवर्णस्यार्भावः for अकारादीनाम्....आर्भावम्

7. A^{2}T trans. व्यञ्जनम् after लुप्त

8. A^{2}M$^{1-2}$T एते भावाः for एतान् भावान्; M$^{1-2}$ om. अभिपश्येत्

वि. प्रायेण **पञ्चसु स्वरेषु भूयिष्ठानि सामानि गायन्ति**। प्रथमादिष्वेव षट्सु अन्यानि गीयन्ते। क्रुष्टादिषु सप्तसु स्वरेषु द्वे सामनी गीयेते। कौथुमशाखिनाम्। **मोषु त्वा** (ग्रा. ८. ६. २८४. २) परं काह्व (आ. ५. ८. २३९) च ॥

भा. प्रायेण सामानि पञ्चसु स्वरेषु गायन्ति प्रथमादिषु। **षट्सु चान्यानि**। अन्यानि षट्सु गीयन्ते प्रथमादिष्वेव। सप्तसु द्वे तु कौथुमाः। सप्तसु स्वरेषु द्वे सामनी गीयेते। कौथुमशाखिनाम्। **मोषुत्वा वा** (ग्रा. ८. ६. २८४. २) **कह्व च** ॥

दी. तु पुनः एतैराइभावादिभिः **भावैः पृथक् पृथक् सर्वाः शाखाः कौथुमादयो गायन्ति**। गानं कुर्वन्ति। **पञ्चस्वेव स्वरेषु तु भूयिष्ठानि** बहूनि सामानि गायन्ति। षट्सु च स्वरेषु पञ्चस्वरेभ्योऽन्यानि **सामानि** गायन्ति। **कौथुमास्तु** कुथुमशाखिनो द्वे सामनी **सप्तसु** स्वरेषु गायन्ति। **मोषुत्वावाघतश्चनाऽ६ए** (ग्रा. ८ ६. २८४. २) इति साम्नि तृतीयपादमध्यस्तोभान्ते ऊ इति पर्व क्रुष्टस्वरेण गायन्ति। हाउ (त्रिः) हाऽ२इ। ऊऽ२ (द्वे त्रिः)। **काह्वह्वह्वह्व** (त्रिः) (आ. ग्रा. ५. ८. २३९) इति साम्नि ऋग्गानानन्तरं स्तोभान्ते **उऽ२** इति पर्व क्रुष्टस्वरेण गायन्ति। एवं द्वे सामनी गायन्ति ॥

ऊनानामन्यथा गीतिः पादानामधिकाश्च ये ॥ ६ ॥

वि. योन्यक्षरपरिमाणा**दूनानां पादानामन्यथा गीतिः** भवति। योन्यक्षरपरिमाणा**दधिकाश्च ये** पादाः तेषामप्यन्यथा गीतिर्भवत्येव। **एष ब्रह्म**-कालेय-(ऊ. प्रा. ८०७) **त्रिकद्रुबृहतो**-(र प्रा. १४९) श्च ॥ ६ ॥

भा. योनिपरिमाणा**दूनानां पादानाम्**। अक्षरपरिमाणादूनानामित्यर्थः। **पादानामन्यथा गीतिर्भवति**। यथा **एष ब्रह्मा**दिषु। योनिपरिमाणा**दधिकाश्च ये** तेषां चान्यथा गीतिर्भवति। यथा विराड्वामदेव्या-(उ. द. २२२) दिषु ॥ ६ ॥

1. M^{1-3} after स्वरेषु add: प्रथमादिषु
3. $KS^1A^4TS^2$ °शाखिनः for शाखिनाम्
10. EM^4S^2 om. कुथुमशाखिनः
11. My^1 °मध्ये for °मध्य°
13. A^3 ऊनाक्षराणां for ऊनानाम्

दी. ऊहे **ऊनाना**मूनाक्षराणां **पादानामन्यथा** योनितोऽन्या **गीति**र्भवति। **ये चाधिकाः** अधिकाक्षराः पादाः तेषामन्यथा योनितोऽन्या गीतिर्भवति। यथा **एषब्रह्मा** (ऊ. प्रा. ८०७) क्रालेयादिषु ऊनाक्षराः पादा भवन्ति। यथा विराड्वामदेव्या-(ऊ. द. २२२)दिषु अधिकाक्षराः पादा भवन्ति। तेषां गीतिरन्यथा भवति॥ ६॥

योनिदृष्टा समा येऽन्ये पादास्त्वक्षरशः स्मृताः॥

वि. **येऽन्ये अक्षरशः** योन्या **समास्ते** पादा **योनिदृष्टा** भवन्ति॥

भा. पादास्तु **येऽन्येऽक्षर**समानतः **समाः** स्मृताः ते योनिवद् दृष्टा भवन्ति॥

दी. ऊनाधिकेभ्यो **ये तु अन्ये पादाः** योनिवद् दृष्टाः तेषामक्षरशः अक्षरैः **समाः** समानाः गीतयः **स्मृताः** उक्ताः॥

आयेभावश्च नेदानीं दीर्घं यच्चैव कृष्यते॥ ७॥

वि. आयेभाव ऊहगीतौ **न** भवति श्यैतादिषु। हुम्माये। दीर्घकर्षणं च न भवति। **अर्कोद्वाना**मिति॥ ७॥

भा. **आयेभावो न** भवत्यूहगीतौ श्यैतादिषु। दीर्घकर्षणं च न भवति। किं तर्हि? वृद्धकर्षणं भवति। यथा **अर्कोद्वाना**मित्यत्र॥ ७॥

दी. **इदानीमूहे छामूतयाऽ३१२ वायेऽ३** इत्याद्यायेभावश्च **न** भवति। **एन्द्रसादिषु यच्च दीर्घ**मक्षरं **कृष्यते**। कर्षणं क्रियते। तन्नैव भवति। यथा यज्ञा-यज्ञीयादिषु। **प्रप्राऽ२**। **तपानोदेऽ२**। एवं दीर्घस्य **कर्षणं** न भवति। किंतु वृद्धकर्षणं भवति। यथा **अर्कोद्वानाऽ२म्**॥ ७॥

कर्षणे तु निवर्तेते त्सायिबायामुपद्रवे॥

---

2. R अक्षराधिकाः for अधिकाक्षराः

8. R. न्यून० for ऊन०

9. L[1] समाना गीतिः for समाना गीतयः; E before समाना गीतयः adds: समाना गीतिः

11. A[2]T भावाः....भवन्ति for भावः...भवति; A[3]M[1]-[2]TS[1] हिम् for हुम्

वि. **त्साइवायां** प्रत्यये **उपद्रवविषये** कर्षणवृद्धे निवर्तेते। ऊहगीतौ सांवर्तादिषु ॥ ७ ॥

भा. **त्सायिवायां** प्रत्यये **उपद्रवे** भक्तिविषये **कर्षणे तु द्वे** अपि निवर्तेते। ऊहगीतौ समेष्वपि पादेषु ॥ ७ ॥

दी. एवम् **उपद्रवे** उपद्रवभक्तिविषये **त्साइवायां** त्साऽ२इवा२३४ **औहोवा** इति पर्वणि प्रत्यये श्याऽम्रूऽ२३ द्वितीयतृतीयस्वरे एते द्वे **कर्षणे तु निवर्तेते**। न भवतः। ऊहे हाविष्मते (ऊ. द. ४५) **घश**। एवं भवति। पूर्वजनित्रादिष्वेवं ज्ञातव्यम् ॥ ७ ॥

ओभावो दृश्यते साम्नि औभावश्च यथाक्रमम् ॥ ८ ॥

वि. **ओभावो दृश्यते साम्नि यथाक्रमम्**। यथाप्राप्ति **औभावश्च** यथा-लक्षणं **दृश्यते**। यथा यथा प्राप्तिः तयोस्तथा तथा ओकारश्च औकारश्च तौ भवतः ॥

भा. **ओभावो दृश्यते साम्नि** यत्र **औभावश्च दृश्यते यथाक्रमम्**। लक्षण-न्यायेन यथा यथा प्राप्तिस्तयोस्तथा तथा तौ भवतः। ऊहगीतावपि ॥ ८ ॥

दी. योनिसाम्नि **ओभावो** यत्र **दृश्यते** औभावश्च यत्र दृश्यते तौ ओभाव-औभावौ **यथाक्रमं** लक्षणन्यायेन तयोर्यथा यथा प्राप्तिः तथा तथा ऊहे भवतः। तयोरुदाहरणम्-वाऽ२सोऽ२५हाइ। रुजौहोऽ२ ॥ ८ ॥

अभ्युदूहेन सर्वत्र ऊहे गीतिः रहस्यवत् ॥

वि.&भा. **अभ्युदूहेन सर्वत्र** ऊहे **गीतिः** प्रत्येतव्या। यथा रहस्ये तद्वत्। अरण्येगेयवदित्यर्थः ॥

---

3. P उद्देशः for द्वे; निवर्तते for निवर्तेते

10. M^{1-2}TP. सामनि for साम्नि

11. M^{1-2} क्रम for लक्षणं; M^{1-3}T trans. तयोः before ओकारः

18. P ऊहगीतिः for ऊहे गीतिः

91. P om. अरण्येगेयवदित्यर्थः

स्वादिपर्वाणि तिस्रायां तथैवान्येषु सामसु ॥ ९ ॥

वि. तिस्रायां स्वादिपर्वणि संहिते स्वादिष्ठयामेत्येतत् स्वादिपर्व । **तिस्रो वाच उदीति** पाष्ठौहे यथा अभ्युदूहो भवति **अन्येषु सामसु च तथैवा**भ्युदूहो **भवति** ॥ ९ ॥

भा. यथा स्वादिपर्वणि तिस्रायां अभ्युदूहो भवति रहस्यवत् तथा अन्येष्वपि सामसु । यथा संहिते । उदाहरणम्-तिस्रोवाचउत् ॥ ९ ॥

दी. ऊहे **सर्वत्र** सर्वसामसु **रहस्यवत्** अरण्येगेयवत् उदूहेन गीतिर्भवति । यथा **स्वादिष्ठयाम** इति **स्वादिपर्वणि** उदूहेन भवति । यथा तिस्रोवाचाऽ२ उदीरताइ इति **तिस्रायाम्** उदूहेन भवति । यथा अन्येष्वपि सामसु औशनकावादिषु उदूहेन भवति । अत्रापिशब्दः पादपूरणे ॥ ९ ॥

आर्चिकं निधनं न्याये स्तौभिकं वा यदक्षरम् ।
कृष्टाकृष्टं भवेत् स्वार्यमन्तोदात्तं वृधेस्वरम् ॥ १० ॥

वि.&भा. आर्चिकं निधनं स्तौभिकं वा तयोर्यदन्त्यमक्षरं तत् **कृष्टमकृष्टं वा भवेत् स्वार्यम्** । प्रथमस्वरस्थस्य कृष्टात् स्वार्यं भवति । प्रथमाद्यात्तृतीयस्वरान्तं चेति ।

---

2. KS^2 om. तिस्रायां; M^{1-3} तिस्रोवाचायां for तिस्रायां

3. $A^2M^{1-2}TS^1$ om. इति पाष्ठौहे

8. E befre तिस्रो om. यथा

9. L^1 उदूहो न for उदूहेन

11. भा. after निधनं add: यत्र; T निधनन्याये for निधनम्

14. $A^{2}{-}^{2}M^1T$ भवति for भवेत्; $A^2M^{1-2}L^2S^1$ स्वरस्तस्य for स्वरस्थस्य;

P कृष्टं for कृष्टात्;M^{1-3} कृष्टस्वान्य: प्रथमान्यतृतीयाद्या स्वेनवेति कृष्यते तथा धेनुषाम्नि उदाथाम् अन्तोदात्त वृधेस्वरं भवति । सखाशौषधोनौ वृधेस्वर: वृधे एव कृष्टाकृष्टत्वात्, T कृष्टस्थान्यतृतीयास्वराद्यो वेति कृष्यते यथा धेनुसाम्नि उददिधिर्मि: यथा अन्तोदात्तवृधेस्वरं भवति । सखासौक्ते योनौ वृधेस्वर: वृधे वंए कृष्टाकृष्टत्वात्, S^1 कृष्टस्यान्या प्रथमान्यतृतीयास्वोराद्यो वेति कृष्यते । यथा धेनुसाम्नि इद यथा अन्तोदात्तवृधे स्वरं भवति । सखाशौक्ते योनौ वृधेस्वर: । वृऽ१ । एवं कृष्टाकृष्टत्वात् for कृष्टास्स्वर्यं ....योनिगाने एव दृष्टत्वात्; KA^8PB^4 द्वितीयं for तृतीय, V^3 द्वीतीयस्य स्वरस्य तृतीयस्वरस्थस्य

तृतीयस्वरस्थस्य अक्रुष्टात् स्वार्यं भवति। प्रत्युत्क्रामं कृत्वा क्रुष्यते इत्यर्थः। **अन्तोदात्तं वृधेस्वरं** भवति। कुतः? **न्याये** योनिगाने एवं दृष्टत्वात्॥ १०॥

दी. न्याये योनिगाने **आर्चिकम्** ऋगक्षराणां **निधनं** भवति। अथवा स्तौभिकं स्तोभाक्षरणां निधनं भवति। तयोर्निधनयोः **यदक्षरं क्रुष्टं** भवेत् तत् क्रुष्टमक्षरम् ऊहे प्रथमस्वरादिमन्द्रस्वरान्तं **स्वार्यं** भवति। तयोर्निधनयोर्यदन्त्यमक्षरमक्रुष्टं भवेत् तदक्रुष्टमक्षरमूहे तृतीयस्वरादिमन्द्रस्वरान्तं स्वार्यं भवति। तयोर्निधनयोः यदन्त्यमक्षरमुदात्तं भवेत् तदुदात्तमक्षरमूहे तृतीयस्वरादिप्रस्युत्क्रमं कृत्वा **वृधेस्वरं** भवति। कुतः। योनौ तथैव दृष्टत्वात्। क्रुष्टस्योदाहरणम्। **पितादेऽ२·वानाऽ२३४५म्**। अक्रुष्टस्योदाहरणम्- **पवस्वसोमा**ऽ२३४। अन्तोदात्तस्योदाहरणम्- **हान्तसमुद्रा**ऽ१ः। एवं स्तोभनिधनानामुदाहरणानि। स्वरेषु भवं स्वार्यम्। मात्रालक्षणे**त्रिविधः स्वारः प्रथमादिर्द्वितीयादिस्तृतीयादिः॥ प्रथमादिर्नवमात्रः। द्वितीयादिः** षण्मात्रः। **तृतीयादिरष्टमात्रः**। **इरीऽ३श्रीऽ२३४५ः। रयाऽ३४५इमीऽ२३४५** (मा. ल. २. १. २) इति। सामतन्त्रे **प्रथमाद्यातृतीयादिस्वरान्तं चेति। आर्चिकमिति** श्लोकस्यायमर्थः। आर्चिकानां स्तौभिकानां निधनानां निगदवृत्तीनाम् अन्त्योवर्णः प्रथमश्चेत् द्वितीयस्वरादि स्वार्यं संप्रसारणं भवेत्। स्वरितश्चेत् प्रथमादि। अनुदात्तश्चेत् तृतीयादि। अन्तोदात्तश्चेत् वृधेस्वरमिति॥ १०॥

मणाजनं सदद्घोनामाविशासि विदेऽप्नुजित्।
त्वनाहूयुं श्रियेतिभर्रियिं प्रियमभिह्विता॥ ११॥
जसावसन्तमन्धर्मन्त्सुत उद्रचः षिभिर्धयन्।
न्यायादेतान्यपेतानि-

1. KA^{2} क्रुष्टे, $PV^{2}B^{4}$ अक्रुष्टं for अक्रुष्टात्; $KPV^{2}B^{4}A^{2}$ after भवति add: तृतीयादि; $KPV^{2}B^{4}$ om क्रुष्यते इत्यर्थः; KA^{2} om. इत्यर्थः
2. $A^{2}S^{2}K$ ऊह for कुतः; $KA^{2}S^{2}My^{1}$ योनौ for योनिगाने
13. वर्तिनाम् for वृत्तीनाम्
15. $L^{1}My^{2}$ प्रथमादि for तृतीयादि

वि.&भा. एतानि मणादीनि एतस्मान्यायादपेतानि भवन्ति । मणाजनम् । पवस्वदेवाद्यान्त्ययोः (ऊ. सं. १५८) सदद्धोनाम् । स्वादिष्ठोत्तरयोः (ऊ. स. ६९४) आविश । पवस्वदेवमध्यमायाम् (ऊ. द. १५८) । असि । यस्तेमदमध्यमायाम् (ऊ. अ. ५६४) । एतानि गायत्रीभासे ॥

विदे-अप्सुजित् इन्द्रमच्छोत्तरयोः पौष्कले (ऊ. द. १०) । त्वना पवस्ववाजोत्तमायाम् अष्टेड- (र. द. १६) रयिष्ठयोः (ऊ. स. २८४) । इयुं सनेमित्वमायां पौष्कल (ऊ.स. ७०५) त्रैतयोः (ऊ. अ.६५४) । श्रिये सखायआद्यायां पौष्कले (ऊ. सं.३४०) । तिर्भाः ज्योतिर्भा-अध्वत्रते (र. अ. ९९) । रयिम् उपशिक्षायां पौष्कले (ऊ. प्रा. ८१४) । प्रियम् प्राणामध्यमायां पौष्कल- (ऊ. सं. ३६४) त्रैतयोः (ऊ. द. १६२) । अभि अनुहित्वायामान्धीगवे (ऊ. द. २१९) । द्विता प्राणा- प्रथमायां पौष्कल-(ऊ. सं. ३६४) त्रैतयोः (ऊ.द. १६२ ॥ ११ ॥

जसा तपोष्पवित्रायां षडिडे (र. अ. १०९) । वसम्-तमम् सखान्त्ययोः शौक्त-(ऊ. अ. ५६७) पौष्कलयोः (ऊ. सं. ३४०) । धर्मन् दिवोधर्तायां धर्मणि (ऊ. द. १६९) । सुतः पवस्वाद्यायां रयिष्ठे (ऊ. सं. २८४) । उद्गृचः अभिसोमाध्यास्यायामच्छिद्रे (ऊ. स. ७५६) । षिमिः वृषाद्यायां धर्तादिवमध्यमायां च चतुरिड-(र. अ.

---

1. भा. om एतानि; after मणाजनम adds: गायत्रीभासे and भा. सदद्धोनाम्
2. A[2]M[1-2]T देवाद्यन्तयोः for देवाद्यान्त्ययोः; वि. after स्वादिष्ठोत्तरयोः adds: भासे
4. वि. om. एतानि गायत्रीभासे
5. A[2]M[1-2]TS[1] om. पौष्कले; वि. om. पवस्ववाजोत्तमायाम्
6. वि. before इयुं adds: त्रैते; वि. सनेमित्वमित्वत्र (M[1-2] ०मित्वमित्वमित्यत्र) पौष्कले च for सनेमित्वमायां पौष्कलत्रैतयोः; PV[1]B[1]L[2] गोमन्तोत्तमायां for सनेमित्वमायां
8. A[2] च तिर्भावः, T चतिर्भाः for तिर्भाः
12. KA[2]M[1-2]TS[1-2]My[1] सखाय (संखयय) उत्तरयोः शौक्ते for सखान्त्ययोः शौक्तपौष्कलयोः

१०८) अष्टेडयोः (र. अ. ११०)। धयन् वृषामध्यमायां चतुरिडे (र. स. १०८)। पूर्वस्मालक्षणन्यायात् **एतानि अपेतानि** अपगतलक्षणानि भवन्ति। विपरीतानीत्यर्थः॥

श्वत एके वृधेस्वरम् ॥ १२ ॥

वि.&**भा.** अष्टेडतृतीयायां **धियानोवाजामुपमाहिशश्वत** इत्येतद् **वृधेस्वरमेके** मन्यन्ते ॥ १२ ॥

त्रीभासपौष्कलाष्टेडरयिश्राच्छिद्र -**धर्मसु**।
त्रैताश्वव्रतशौक्तान्धीचतुःषडिडयोस्तथा ॥ १३ ॥
षड्भासे पौष्कले सप्त त्रीण्यष्टेडे पृथक्कृतृचे।
रयिशौक्ते वृषास्तोभे द्वे द्वे न्यायविरोधिनी ॥ १४ ॥
अश्वान्धीगवयोः स्तोभधर्माच्छिद्रेषु पञ्चसु ॥ १५ ॥

वि. भासादिषु षडिडान्तेषु यथासंख्यं **न्यायविरोधीनि** भवन्ति पूर्वोक्तानि। पूर्वग्रन्थस्य व्याख्यानमिदं ग्रन्थम्। **गायत्रीभासे** षण् न्यायविरोधीनि भवन्ति। **पौष्कले** सप्त भवन्ति। **अष्टेडे पृथक्कृतृचे त्रीणि** भवन्ति। त्रैते च त्रीणि भवन्ति। **रयिष्ठे शौक्ते**

---

1. S[2] धर्मन् for धयन्

2. KS[1-2]My[1] अपेतानि विलक्षणानि, A[2]M[1-3]T अपेतानि लक्षणानि P अनेन गतलक्षणानि for अपगत लक्षणानि; भा. om. अपेतानि

4. भा. trans. अष्टेडतृतीयायां after शाश्वतः; भा. om. इत्येतत्

11. KA[2]S[2] भासादि for भासादिषु:; M[1-2]TS[1] after यथासंख्यं add. गायत्रीभासेषु; M[1-2]TS[1] विरोधिन्याः for ०विरोधीनि

12. M[1-2]TS[1] om. गायत्रीभासे षण्न्यायविरोधीनि भवन्ति;

13. A[2]M[1-2]TS[1] after सप्त add: न्यायविरोधिन्यः M[1-2]TS[1] trans. पृथक्कृतृचे after भवन्ति

वृषामतीनां चतुरिडस्तोभे च द्वे द्वे न्यायविरोधिनी भवतः । अश्वव्रतान्धीगवषडिडस्तोभधर्माच्छिद्रेषु पञ्चसु एकैकं न्यायविरोधि भवति ॥ १३-१५ ॥

इति फुल्लविवरणे पञ्चमस्य द्वितीयः खण्डः ॥ २ ॥

भा. एतेष्वेव सामसु एतेषां शब्दानामपवादः ॥ १३-१५ ॥

इति पुष्पसूत्रभाष्ये पञ्चमस्य प्रपाठकस्य द्वितीया कण्डिका ॥ २ ॥

दी. गायत्रीभासादिषु द्वादशसामसु एतानि मणादीनि निधनान्तानि कृष्टाकृष्ट भवेत्स्वार्यमन्तोदान्तं वृधेस्वरम् इति न्यायादपेतानि अपगतानि विपरीतानि भवन्ति । पव । स्वाऽ३दाइ । वाः । ईया । (ऊ. द. १५८) इति गायत्रीभासे प्रथमायां हधर्मणाऽ१ । इदमन्तोदात्तं न भवति । तृतीयायां वयुंजनाऽ१म् । इदमन्तोदात्तं न भवति । स्वादि । ष्ठाऽ३या । मा । ईया (ऊ. स. ६९४) इति गायत्रीभासे द्वितीयायां स्थमासदाऽ१त् । इदमन्तोदात्तं न भवति । तृतीयायां मघोनाऽ१म् । इदमन्तोदात्तं न भवति । पव । स्वाऽ३दाइ । वाः । ईया (ऊ. द. १५८) इति गायत्रीभासे द्वितीयायां द्रमाविशाऽ१ । इदमन्तोदात्तं न भवति । यस्ते । माऽ३दो । वा । ईया (ऊ. अ. ५६४) इति गायत्रीभासे द्वितीयायां श्वसाश्वसाऽ१इ । इदमन्तोदात्तं न भवति । मणा । जनम् । सदत् । घोनाम् । आविश । असि । षडेतानि गायत्रीभासे विपरीतानि भवन्ति । इन्द्रमाऽ३च्छसु । ताइऽ२३४माइ (ऊ. द. १०) इति पौष्कले द्वितीयायां यथाविदेऽ२३४५ । अत्र स्वारो न भवति । अन्ते उदात्तत्वात् । तृतीयायां सप्तसुजीऽ२३४५त् । अत्र न स्वारः । अन्ते उदात्तत्वात् । ईडा पवस्ववाजसातये (र. द. १६) इत्यष्टेडे तृतीयायां पवमानमहित्वनाऽ२३४५ । अत्र न स्वारः । अन्तोदात्त-

1. TS[1] स्तोभे दीर्घौ भवतः for चतुरिड...भवतः । A[3]M[1-2] om. चतुरिड...भवतः

11. E before न adds: निधने; My[2] निधने for न

12. L[1] om. स्थमासदाऽ१त्....भासे द्वितीयायां (L. 14)

त्वात् । पवस्वावा । जसाताऽ३याइ (ऊ. सं. २८४) इति रयिष्ठे तृतीयायां पवमान महित्वनाऽ२३४५ । अत्र न स्वारः । अन्ते उदात्तत्वात् । गोमन्नाऽ३इन्दो (ऊ. स. ७०५) इति पौष्कले तृतीयायाम् अपद्वयूऽऽ२३४५म् । अत्र न स्वारः । अन्ते उदात्तत्वात् । गोमन्नइन्दो अश्वावात् । (ऊ. अ. ६५४) इति त्रते तृतीयायाम् एऽ३ । द्वयूऽ२३४५म् । अत्र न स्वारः । अन्ते उदात्तत्वात् । सखायाऽ३आनि । षीदा-ऽ२३४ता (ऊ. सं. ३४०) इति पौष्कले प्रथमायां पतश्रियेऽ२३४५ । अत्र न स्वारः । अन्ते उदात्तत्वात् । हौ । होइ (र. अ. ९९) इत्यश्वव्रते ज्योतिर्भाऽ२३४५: । अत्र न स्वारः । अन्ते उदात्तत्वात् । उपशीऽ३क्षाप (ऊ प्रा. ८१४) इति पौष्कले विदा रयीऽ२३४५म् । अत्र न स्वारः । अन्ते उदात्तत्वात् । प्राणाशिशूः (ऊ. सं. ३६४) इति पौष्कले द्वितीयायां अधप्रियाऽ२३४५म् । अत्र न स्वारः । अन्ते उदात्तत्वात् । प्राणाशिशुर्महाइनाम् (ऊ. द. १६२) इति त्रैते द्वितीयायाम् एऽ३ । प्रियाऽ२३४५म् । अत्र न स्वारः । अन्ते उदात्तत्वात् । पर्यूषुप्रधाऽ२न्वावा (ऊ. द. २१९) इत्यान्वीगवे तृतीयायां सम्वर्यराज्ये वाजाँऽअभीऽ२३४५ । अत्र न स्वारः । अन्ते उदात्तत्वात् । प्राणाशाऽ३इशुः (ऊ. सं. ३६४) इति पौष्कले प्रथमायाम् अध-द्विताऽ२३४५ । अत्र न स्वारः । अन्ते उदात्तत्वात् । प्राणाशिशुर्महाइनाम् (ऊ. द. १६२) इति त्रैते प्रथमायाम् एऽ३ । द्विताऽ२३४५ । अत्र न स्वारः । अन्ते उदात्तत्वात् । पवित्रन्ते वित । ईडा (र. अ. १०९) इति षडिडपदस्तोभे द्वितीयायां दिवःपृष्ठमधिरोहा तितेजसाऽ१ । इदमन्तोदात्तं न भवति । सखा । य आओऽ२३४वा (ऊ. अ. ५६७) इति शौक्ते द्वितीयायां वसाःऽ१म् ! इदमन्तोदात्त न भवति । तृतीयायां तमाऽ२म् । इदमन्तोदात्तं न भवति । औहोऽ६वा (ऊ. द. १६९) इति धर्मणि तृतीयायां सत्येविधर्माऽ१न् । इदमन्तोदात्तं न भवति । पवस्वा । जसाता-

---

9. E om. प्राणाशिशू...अन्ते उदात्तत्वात्

17. R L[1] षडिडे तृतीयायां for षडिडपदस्तोभे द्वितीययां

20. L[1] om. तृतीयायाम्...न भवति

ऽ३याइ । (ऊ. सं. २८४) इति रयिष्ठे प्रथमायां **पवित्रे धारयासुताऽ२३४५ः** । अत्र स्वारो न भवति । अन्तोदात्तत्वात् । **प्रहिन्वानाः** । **ऋताऽ३१२वाऽ२३** (ऊ. स. ७५६) इत्यच्छिद्रे **राजादेवस्समुद्रियाऽ१ः** । इदमन्तोदात्तं न भवति । **वृषामतीनांप** । **ईडा** (र. अ. १०८) इति । चतुरिडपदस्तोभे प्रथमायां **विशन्मनीषीभाऽ२इः** । इदमन्तोदात्तं न भवति । द्वितीयायां **खियायवधयाऽ१न्** । इदमन्तोदात्तं न भवति । **ईडा** । **धर्त्तादिवः पवतेकृत्व्योरसः** । ईडा (र. अ. ११०) इत्यष्टेडे तृतीयायाम् **धिया नोवाजाः उपमाहि शाश्वताऽ१ः** ॥ अत्रैके वृध्रेस्वरं मन्यन्ते । न तु ग्रन्थकारः । अत्र न । अन्ते उदात्तत्वात् । गायत्रीभासे **नाना**तृचे मणादीनि षट् विपरीतानि भवन्ति । पौष्कले **विदे** । **अप्सुजित्** । **द्युम्नम्** । **श्रिये** । **रयिम्** । **प्रियम्** । **द्विता** । सप्तैतानि नानातृचे विपरीतानि भवन्ति । त्वाना । पिभिः । श्वतः । त्रीण्येतानि अष्टेडे नानातृचे विपरीतानि भवन्ति । त्रैते **द्युम्** । **प्रियम्** । **द्विता** । त्रीण्येतानि नानातृचे विपरीतानि भवन्ति । रयिष्ठे । **त्वना** । **सुतः** । एते द्वे न्यायस्य विरोधिनी भवतः । शौक्ते **वसम्** । **तमम्** । एते द्वे न्यायस्य विरोधिनी भवतः । **वृषामतीनां पवते** (र. अ. १०८) इति चतुरिडपदस्तोभे **पिभिः** । **धयन्** । एते द्वे न्यायस्य विरोधिनी भवतः । अश्वव्रते **तिर्माः** । एकं न्यायविरोधि भवति । आन्धीगवे **अभि** । एकं न्यायविरोधि भवति । षडिडे पदस्तोभे **जसा** । एकं न्यायविरोधि भवति । धर्मणि **धर्मन्** । एकं न्यायविरोधि भवति । अच्छिद्रे **उद्गृचः** । एकं न्यायविरोधि भवति ॥ ११-१५ ॥

इति फुल्लदीपे नवमस्य द्वितीयः खण्डः ॥ २ ॥

---

4. R L[1] चतुरिडे for चतुरिडपदस्तोभे
8. My[2-3] भाता for नाना॰
10. L[1]My[2] om. अष्टेडे
12. L[1] घ्वर्यम् for द्युम्
14. L[1] वयम् for वसम्

तृतीयः खण्डः

दीर्घीभावः

तृतीयोच्चान्त्यं ह्स्तोभे दीर्घीभवति ॥ १ ॥

वि. तृतीयोच्चस्य पर्वणोऽन्त्यमक्षरं ह्स्तोभे दीर्घीभवति । द्विमात्रं भवतीत्यर्थः । ऐडक्रौञ्चवाम्रादिषु । **य ओजिष्ठाः** (ऊ. द. ४९) **मत्सरासोमदा** (ऊ. सं. २७८) ॥ १ ॥

भा. तृतीयोच्चान्त्यमक्षरं ह्रस्वं मकारे स्तोभे प्रत्यये दीर्घीभवति । द्विमात्रं भवतीत्यर्थः । यथा ऐडक्रौञ्च (ऊ. द. ४९) वाम्रादिषु ॥ १ ॥

दी. तृतीयस्वरपर्यन्तमुच्चस्य पर्वणोऽन्त्यमक्षरं ह्रस्वं दीर्घीभवति । हकारस्तोभे प्रत्यये । उदाहरणम् **अयंपूषा** । **हो** (ऊ. द. ४९) इत्यैडक्रौञ्चे तृतीयायां **य ओजिष्ठाः । हो** । अत्र ष्ठाशब्दो दीर्घीभवति । एवमादीनि ॥ १ ॥

न वाम्रे स्पर्शान्तं व्यं च ॥ २ ॥

वि. वाम्रे स्पर्शान्तमक्षरं तालव्यं च न दीर्घीभवति । यथा **राजादेव ऋतम्** (ऊ. सं. २७९८) **अदब्धःसुरभि** (ऊ. अ. ६०४८) ॥ २ ॥

भा. उत्सर्गप्राप्तस्यापवादः । वाम्रेस्पर्शान्तमक्षरं **तालव्यं च न** दीर्घीभवति । यथा **राजादेवऋतम्** (ऊ. सं. २७९) । **अदब्धः सुरभि** (ऊ. अ. ६०४८) **च** ॥

दी. **अभिशोमासआ** । **हाऽ३हाऽ३इ** (ऊ. सं. २७८) इति **वाम्रे** तृतीयायां **राजादेवऋतम्** ; अत्र मकारान्तम् ऋकारं न दीर्घीभवति । **तलव्यं च** । **परीतो-**

---

4. $A^2M^{1-2}T$ दीर्घं for दीर्घी

12. M^{1-2} om. न वाम्रे....व्य च

पिश्वता। हाऽ३हाऽ३इ (ऊ. अ. ६०४) इति वाम्रे तृतीयायान् अदब्धःसुरभि। अत्र भिमध्ये इकारं (!) न दीर्घीभवति ॥ २ ॥

कौत्से चेकारोकारौ ॥ ३ ॥

वि. कौत्से च इकारोकारौ ह्रस्वौ हिस्तोभे प्रत्यये दीर्घीनौ भवतः। परीहिस्याऽ२३ः (ऊ. द. १६४c)। अभीहिनोऽ२३ (ऊ. द. १६४) सेमूहिप्रीऽ२३ (ऊ. सं. ७६४b) ॥ ३ ॥

भा. कौत्से च इकार-उकारौ हिस्तोभे प्रत्यये दीर्घीभवतः। यथा स्वादीहिष्ठा (ऊ. प्रा. ८१९) समूहिप्री (ऊ. स. ७६४b) इति ॥ ३ ॥

दी. स्वादीहिष्ठाऽ२३ (ऊ. प्रा. ८१९) इति कौत्से हिस्तोभे प्रत्यये इकारो दीर्घीभवति। अयँहीपूऽ२३। पारयिर्भगईया (ऊ. स. ७६४) इति कौत्से च हिस्तोभे प्रत्यये उकारो दीर्घीभवति। यथा द्वितीयायां समूहिप्रीऽ२३। अत्र हिस्तोभे प्रत्यये उकारो दीर्घीभवति ॥ ३ ॥

न श्च ॥ ४ ॥

वि. & भा. कौत्से नकारश्च दीर्घीभवति। सनाही न्द्राऽ२३ (ऊ. क्षु. ८५३) इति ॥ ४ ॥

दी. सनाहीन्द्राऽ२३ (ऊ. क्षु. ८५६) इति कौत्से नशब्दश्च दीर्घीभवति ॥

अध्वयवमध्यमायाम् ॥ ५ ॥

---

4. S[1] इकार उकारो ह्रस्वश्च for इकारोकारौ ह्रस्वौ; A[2]M[1-2] ह्रस्वश्च for ह्रस्वौ: TS[1]M[1]-[2] दीर्घी भवन्ति A[2] दीर्घम् भवति for दीर्घीभवतः

14. B[4] नःशब्दश्च, V[3] नशब्दः P नशब्दश्च for नकारश्च; V[2] दीर्घः for दीर्घी

16. L[1] दीर्घः for दीर्घी

वि. अध्वर्यो-मध्यमायां मार्गीयवे (ऊ. द. १४२) हेस्तोभे दीर्घीभवति। पवाहाऔऽ३होइ ॥ ५ ॥

भा. अध्वर्यो अद्रिभिः (ऊ. द. १४२) इति मार्गीयवमध्यमायां हिस्तोभे प्रत्यये दीर्घीभवति। पवाऽर। हा३औ३३हो३ई। मा३३३३ना३ ॥ ५ ॥

दी. अध्वौहोवा। योआऽर (ऊ. द. १४२) इति मार्गीयवे मध्यमायां हिस्तोभे प्रत्ययें दीर्घीभवति। पवा। हा ॥ ५ ॥

स न इन्द्रायाम् ॥ ६ ॥

वि. सनइन्द्रायां मार्गीयत्रे (ऊ. स. ७९३b) होस्तोभे प्रत्यये दीर्घीभवति। वारा। हा ॥ ६ ॥

भा. सनइन्द्रेति मार्गीयवे हिस्तोभे प्रत्यये दीर्घीभवति। वराहा३औं३३हो३ई। वो३३३३वी३त् ॥ ६ ॥

दी. उच्चौहोवा (ऊ. स. ७९३) इति मार्गीयवे मध्यमायां सनइन्द्रायां हिस्तोभे प्रत्यये दीर्घीभवति। वरा। हा ॥ ६ ॥

क्षौद्रे च ॥ ७ ॥

वि. क्षौद्रे च मार्गीयवे रसन्तेमित्र (ऊ. क्षु. ९०९) इति दीर्घीभवति पवा ॥ ७ ॥

भा. क्षौद्रे च मार्गीयवे रसौ होवा (ऊ. क्षु. ९०९) इत्यत्र हिस्तोभे प्रत्यये दीर्घीभवतिं ॥ ७ ॥

---

1. M^{1-2} om. अध्वर्योमध्यमायां

7. वि, before स नः add: वरिवः

8. $A^{1}M^{1-3}T$ हे for हो

दी. [क्षौदे] क्षुद्रपर्वणि भवे। रसौ होवा (ऊ. क्षु. ९०९) इति मार्गीयवे पवा। हा। अत्र हिस्तोभे प्रत्यये दीर्घीभवति ॥ ७ ॥

कृते चापदान्तः ॥ ८ ॥

वि & भा. हाविष्कृते च अपदान्तो दीर्घीभवति हिस्तोभे प्रत्यये। स्वादिष्ठया-(ऊ. ए. ४४१)दिषु ॥ ८ ॥

दी. स्वादिष्ठयामदाहाउष्ठाय (ऊ. ए. ४४१) इत्यादिहाविष्कृते मदाहाउ। अत्रापदान्तो दिशब्दो हिस्तोभे प्रत्यये दीर्घीभवति। एवमादीनि ॥ ८ ॥

विशीये च पूर्वे ॥ ९ ॥

वि. & भा. विशोविशीये (ऊ. द. १७०) च पूर्वे हिस्तोभे प्रत्यये ह्रस्वोऽपादान्तः दीर्घीभवति। हिन्वाहुम्। ताइम्र् ॥ ९ ॥

दी. हिन्वाहुम्। ताऽ३इम्र् (ऊ. द. १७०) इत्यादि पूर्वे विशोविशीये अपदान्तो न्वकारः हिस्तोभे प्रत्यये दीर्घीभवति ॥ ९ ॥

अशूष ॥ १० ॥

वि. & भा. स्तुषे शूष इत्यत्र प्रतिषेधः ॥ १० ॥

दी. विशोविशोहुम् (ऊ. अ. ५७५) इति विशोविशीये द्वितीयायां स्तुषेशूषहुम्। अत्रापदान्तः षशब्दो न दीर्घीभवति हिस्तोभे प्रत्यये ॥ १० ॥

त्रिणिधने चायास्ये ॥ ११ ॥ ९

---

1. L^{1}E क्षद्रे for क्षुद्र०

4: वि. त्वंसुष्वाण आहाउद्राइ भाइः for स्वादिष्ठयादिषु

9. भा. om. ह्रस्व and trans. अपदान्तः after भवति

10. वि. हिन्वाहिं पवहिं for हिन्वाहुम्। ताइम्र

12. R न्व for न्वकारः

14. वि, शूषस्येति for शूष इत्यत्र

16. R om. षशब्दो

वि. & भा. त्रिणिधने चायास्ये हिस्तोभे प्रत्यये दीर्घीभवति। अपदान्त एव। उत्सोदेवोहिराहाउदेवा ॥ ११ ॥

दी. पुनानस्सोमधाहाउहोवा (ऊ. द. ४१) इति त्रिणिधनआयास्ये द्वितीयायाम् उत्सोदेचोहिराहाउहोवा। अत्रापदान्तो रशब्दो दीर्घीभवति हिस्तोभे प्रत्यये ॥ ११ ॥

सेधे षिणोदनः ॥ १२ ॥

वि. & भा. उत्सेधे षिणो दन इत्येतौ दीर्घीभवतः। अग्निसोमायां (ऊ. दा. ४५७) श्रीणन्त (ऊ. ए. ४९५) इत्यत्र [च] ॥ १२ ॥

दी. अग्निसोमासआयवः। पव (ऊ. ए. ४५७) इत्युत्सेधे मानीपाइणाः। हाऽउवाऽ२३। अत्र णःशब्दो दीर्घीभवति। हिस्तोभे प्रत्यये। श्रीणन्तो गोभिरुत्तरम्। श्रीण (ऊ. ए. ४९५) इत्युत्सेधे वमादानाः। हाऽ३१उवाऽ२३। अत्र नःशब्दो दीर्घीभवति हिस्तोभे प्रत्यये ॥ १२ ॥

कामे च प्रथमकल्पे सर्वासु ॥ १३ ॥

वि. सर्वासु निधनकामे प्रथमकल्पे दीर्घीभवति हेप्रत्यये पवस्वदक्षायाम् (ऊ. द. ६८) ॥ १३ ॥

भा. पवस्वदक्षायां (ऊ. द. ६८) निधनकामे प्रथमे विकल्पे दीर्घीभवति सर्वासु स्तोत्रीयासु ॥ १३ ॥

दी. पवस्वदाऽ२क्षसाधनाः (ऊ. द. ६८) इति निधनकामे सर्वासु स्तोत्रीयासु त्रयाणां पक्षाणां मध्ये प्रथमकल्पे दीर्घो भवति हिस्तोभे प्रत्यये। प्रथमायाम् मदाः। होइ। द्वितीयायां भियाः। होइ। तृतीयायां रुहाः। होइ ॥ १३ ॥

---

2. वि. चकारादपदान्तः for अपदान्त एव and om. उत्सो...उदेवा
6. भा. after इति add: च; KS[2] दीर्घिनौ for दीर्घी
12. A[2]M[1-2]T प्रथमे for प्रथम०
13. M[1-2]T प्रथमे for प्रथम०

सौमे स्तावे ॥ १४ ॥

वि. **सौमेधे** (ऊ. द. २९) **प्रस्तावे** हेस्तोभे प्रत्यये दीर्घीभवति। **आघागमद्यदीहा२श्रावात्** ॥ १४ ॥

भा. **सौमेधे प्रस्तावे** दीर्घीभवति हिस्तोभे प्रत्यये। **योगेयोगेतवाहाउस्ता३रा३** (ऊ. द. २९) ॥ १४ ॥

दी. **योगेयोगेतवाहाउस्ताराम्** (ऊ. द. २९) इति **सौमेधे प्रस्तावे** दीर्घीभवति हिस्तोभे प्रत्यये। प्रथमायाम् वाःशब्दः। द्वितीयायां स्ता-शब्दः। तृतीयायां दी-शब्दः ॥ १४ ॥

कार्ते च परि ॥ १५ ॥

वि. **कार्तयशे** (ऊ. स. ६८८) **च परिस्य स्थान** इति दीर्घीभावः ॥ १५ ॥

भा. **कार्तयशे** (ऊ. स. ६८८) **च परिस्यस्थानो** अक्षरादित्यत्र हिस्तोभे प्रत्यये दीर्घीभवति ॥ १५ ॥

दी. **अभीहाउ। नोऽ२३४वा** (ऊ. स. ६८८) इति **कार्तयशे** तृतीयायां **परीहाहाउ।** अत्र **रि**-शब्दो दीर्घीभवति। हिस्तीभे प्रत्यये ॥ १५ ॥

अश्विनोर्व्रतोत्तरे ॥ १६ ॥

वि. & भा. **उत्तरे अश्विनोर्व्रते** हेप्रत्यये दीर्घीभवति ॥ १६ ॥

---

2. Ks² स्तावे for प्रस्तावे; K om. हे० S¹ om. स्तोमे;

14. L¹ दीर्घः for दीर्घी; L¹ om. हिस्तोभे प्रत्ये

दी. पुरोजितीवोअन्धसाहोहाउ (र. प्रा. १४०) इत्युत्तरे अश्विनोर्व्रते प्रस्तावे हिस्तोभे प्रत्यये दीर्घीभवति । प्रथमायाम् अन्धसाहो । द्वितीयायां घजिह्वियाँहो । तृतीयायां नक्रत्त्रियाहो ॥ १६ ॥

शङ्कुन्येकारे ॥ १७ ॥

वि. & भा. शङ्कुनि च एकारे प्रत्यये दीर्घीभवति । पवस्वमा । एऽ२-[illegible] मधुमा (ऊ. द. ४६) ॥

दी. पवस्वमा । एऽ२ । धुमा (ऊ. द. ४३) इति शङ्कुनि प्रस्तावे एकारे प्रत्यये दीर्घीभवति । अत्र मकारो दीर्घो भवति ॥ १७ ॥

ऋषभे च शाक्वरे ॥ १८ ॥

वि. & भा. शाक्वरर्षभे च एकारे प्रत्यये दीर्घीभवति । पवाएस्ववाएजसा-एतयआ (र. द. १५) ॥ १८ ॥

दी. ओऽ३२म् । पवाएस्ववाएजसाएतयआ (र. द. १५) इति शाक्वरर्षभे एकारे प्रत्यये दीर्घीभवति । पवाए । इत्यादि ॥ १८ ॥

संमील्ये लघुविनते ॥ १९ ॥

वि. & भा. संमील्ये (र. ए. ९१) च लघ्वक्षरं विनते प्रत्यये दीर्घीभवति । पुरोजितीत्यत्र ॥ १९ ॥

---

5. वि. trans. च after एकारे

8. EM⁴S² om. अत्र मकारो दीर्घो भवति

10. वि. om. पव एस्व…तय आ

16. भा. before पुरो add: संमील्ये; A¹ after पुरोजिती adds: इन्दुरश्व इत्येतयोः । पुरोजिती-त्यत्र

दी. पूरोऽ२। जीतीऽ२। वोआऽ२। धासाऽः। (र. ए. ९१) इति सम्मील्ये लघु ह्रस्वमक्षरं दीर्घीभवति विनते स्वरे प्रत्यये। विनतं प्रथमद्वितीयान्तम्। पूरोऽ२। अत्र पु इति ह्रस्वमक्षरं दीर्घीभवति विनते स्वरे रोशब्दे प्रत्यये॥ एवमादीनि॥१९॥

अत्वे कालेये ॥ २० ॥

वि. कालेये अत्वे प्रत्यये दीर्घीभावः। यस्यायाऽ३म् विश्वा अर्याः (ऊ. ए. ४६५) ॥ २० ॥

भा. कालेये अत्वभावविषये प्रत्यये दीर्घीभवति। कालेये यस्यायद्ऽाम्भिश्वा अर्याः (ऊ. ए. ४६५) ॥ २० ॥

दी. यस्यायाऽ३म्। विश्वाअर्याः (ऊ. ए. ५६५) इति कालेये अत्वभाव॰विषये दीर्घीभवति। विश्वा। अत्र अत्वभावे प्रत्यये दीर्घीभवति॥२०॥

प्रत्ना महीयवे च ॥ २१ ॥

वि.&भा. प्रत्नं पीयूषमित्यत्र आमहीयवे (ऊ. ए. ५२१) अत्वभावविषये एव प्रत्यये दीर्घीभवति। दिवा अनाइः॥ २१॥

दी. प्रत्नं पीयूऽ३षंपूर्वियाम् (ऊ. ए. ५२१) इति आमहीयवे अत्वभावविषये दीर्घीभवति। दिवाअनाइः। दिवः। अत्रात्वभावे प्रत्यये दीर्घो भवति॥२१॥

क्रौञ्चाभिनिधनसत्तहपयउत्तरधर्तोद्धत्त्रासदस्यवेषु वृण्यादिः ॥ २२ ॥

---

3. E om. रोशब्दे

12. PV²B¹ पीयूषेत्यत्र for पीयूषमित्यत्र; वि॰ भावाविष्टेऽक्षरे for ॰भावविषये एव प्रत्यये

13. वि. दीर्घीभाव: for दीर्घीभवति

15. E after ॰भावे adds: विषये

वि. क्रौञ्चाभिनिधनसप्तहपयसि उत्तरस्यां वृण्यां धर्तायामुद्वद्भार्गवे (ऊ. द १५४) त्रासदस्यवे (ऊ. ए. ४८८) इत्येतेषु वृण्यादेर्दीर्घीभावः। सखायो औहो। घाजिह्वियाम्। आरोनाऽ२३४त्रु। क्तबर्हिषाः। (ऊ. द. १२८)। हावामहाइ। मधुप्रजा। तामन्धसाः। त्वीयोरसाः। दाइत्नवाइ॥ २२॥

भा. एतेषां वृण्यादिर्दीर्घीभवति। क्रौञ्चे अयंपूषौहो३रायिर्भगा३ः (ऊ. अ- ५९०)। आमन्द्रैरभिनिधने (ऊ. स. ७१६)। पुनानस्सोमसप्तहे। पयस्युत्तरयोः। वृणीमहा इत्यत्रोदाहरणम्। धर्त्तोद्वद्भार्गवे। पुरोजित्यां त्रासदस्यवे। उदाहरणम्॥

दी. क्रौञ्चादिषु सामसु वृणीमहाइ इति वृण्या आदिर्दीर्घो भवति। अयं पूषौहो (ऊ. अ. ५९०) इति क्रौञ्चे रायिर्भगाः। अत्र रकारो दीर्घो भवति। औहो होहाइ। आइही। आमा। द्रैऽ२३४राइ (ऊ. स. ७१६) इत्यभिनिधने काण्वे। रारोमभाइः। अत्र रकारो दीर्घो भवति। ना पाशिनाः। इत्यादीनि। अयंवायाउ। पुनानःसो (र. ए. ७९) इति सप्तहे माधारया। अत्र मकारो दीर्घो भवति। स्यासीदसाइ इत्यादीनि परिस्रुवानोगाऽ३इरिष्ठाः (र. अ. १२०) इति पयसि उत्तरयोः स्तोत्रीययोः। तुवंकवाइः। तृतीयायां सजोषसाः। एवमादीनि। धर्तादाईवाऽ२३ः। पवताइकाऽ२३ (ऊ. द. १५४) इति उद्वद्भार्गवे त्वियोरसाः। अत्र त्विशब्दो दीर्घो भवति। दीयो। नृभाईः। इत्यादीनि। पूऽ२३४। रः। जिताइ (ऊ. ए. ४८८) इति त्रासदस्यवे दायित्नवाऽ२३इ। अत्र दकारो दीर्घो भवति। श्नाथिष्टनाऽ२३। इत्यादीनि॥

जितोश्च पूर्वेऽसंयोगे ॥ २३ ॥

वि. वाजजितोः पूर्वे चासंयोगे प्रत्यये दीर्घीभावः। वृण्यादेर्मृज्यमानायाम् (ऊ. द. १०४)॥ २३॥

भा. पूर्वे वाजजिति वृण्यादिर्दीर्घीभवति। असंयोगे प्रत्यये। मृज्यमानायाम् (ऊ. द. १०४)॥ २३॥

---

7. PV[2] before उदाहरणम् add: तत्र

18. A[2]M[1]-[2]T वाजजित्तोश्च for जितोश्च

दी. वाजजितोरुच्यते । तत्र मृज्यमानस्सुहा । स्तियाऽ२ (ऊ. द. १०४) इति पूर्वे वाजजिति वृण्या आदिर्दीर्घीभवति । असंयोगेऽक्षरे प्रत्यये चामिन्वसाइ । अत्र चकारो दीर्घो भवति । पूरुस्पृहाम् । इत्यादीनि ॥ २३ ॥

अमप ॥ २४ ॥

वि.&भा. देवानां सोमप (ऊ. द. १०४) इत्यत्र दीर्घीभावप्रतिषेधः ॥ २४॥

दी. अकारः प्रतिषेधे । तृतीयायां मपवमा (ऊ. द. १०४) अत्र मकारो दीर्घो भवति ॥ २४ ॥

उत्तरे स्तोभे ॥ २५ ॥

वि. उत्तरे वाजजिति सूर्यस्येवायां (ऊ. द. २२१) वृण्यादेर्दीर्घीभावः स्तोभे प्रत्यये ॥ २५ ॥

भा. उत्तरे वाजजिति स्तोभे प्रत्यये योवृणीमहा तस्या आदिर्दीर्घीभवति । सूर्यस्येवा । रश्मयोद्रा । वायित्ववाऽ३ः । हो३वा३होइ (ऊ. द. २२१) ॥ २५ ॥

दी. सूर्यस्येवा । रश्मयोद्रा (ऊ. द. २२१) इत्युत्तरे वाजजिति वृण्या आदिर्दीर्घीभवति । स्तोभे प्रत्यये । वायित्ववाः । होवाऽ३होइ । अत्र वृण्या आदिर्वकारो दीर्घो भवति ॥ २५ ॥

क्रौञ्चे त्वसंयोगे ॥ २६ ॥

वि. क्रौश्चाद्ये त्वसंयोगे प्रत्यये दीर्घीभावः । दर्शतासाः । जिगत्वोऽ३ (ऊ. अ. ६१४) संयोगप्रत्ययस्य प्रतिषेधार्थमस्यारम्भः ॥ २६ ॥

भा. क्रौञ्चे तु असंयोगे प्रत्यये दीर्घीभवति । असंयोगः प्रतिषिध्यते । यथा सूरासोनौहो । दर्शतासाः (ऊ. अ. ६१४) ॥ २६ ॥

---

11. B⁴ या for यो

दी. अयंपूपौहो (द्व. अ. ५९०) इत्यादिक्रौश्चे असंयोगेऽक्षरे प्रत्यये वृण्या आदिर्दीर्घो भवति। रायिर्भगाः। अत्र रकारो दीर्घो भवति। संयोगे तु प्रतिषिध्यते। यथा दर्शतासाः। (ऊ. अ. ६१४) अत्र संयोगे प्रत्यये दकारो न दीर्घः॥

नात्राविनेमिः ॥ २७ ॥

वि. अत्राविनेमिरेषाम् (ऊ. क्षु. ८९१)इत्यत्रासंयोगे प्रत्ये प्रतिषेधः ॥ २७ ॥

भा. अत्राविनेमिरेषाम् (ऊ क्षु. ८९१)इत्यत्र प्रतिषेधः। असंयोगे प्रत्यये ॥

दी. नकारः प्रतिषेधे। एन्द्रयाहौहो (ऊ. क्षु. ८९१) इति कौश्चाद्ये द्वितीयायाम्। अत्राविनौहो। मिरेषाम्। अत्र मि-शब्दो न दीर्घः ॥ २७ ॥

कौत्से च हिशब्दः ॥ २८ ॥

वि. भा. कौत्से च हिशब्दो दीर्घोभवति। असंयोगे प्रत्यये अभीहीनोऽ२३ (ऊ. द. १९४) ॥ २८ ॥

दी. अभीहिनोऽ२३ (ऊ. द. १९४) इत्यैडकौत्से हिशब्दो दीर्घो भवति। असंयोगे प्रत्यये। अयँहीपूऽ२३ (ऊ. स. ७६४) अभीहीनोऽ२३। अत्र हिशब्दो दीर्घो भवति ॥ २८ ॥

प्रवङ्गार्गवे कुष्टादस्थाद्वकारः ॥ २९ ॥

वि. & भा. प्रवङ्गार्गवे (ऊ. क्षु. ९१२) कुष्टादस्यादकरात् परो वकारो दीर्घोभवति। महिव्रताः। शुचिबन्धूः। पाऽ२वाकाः ॥ २९ ॥

2. E प्रितिषेधः for प्रतिषिध्यते

7. E प्रतिषेधार्थः for प्रतिषेधे

15. A²M¹-² विकारः for वकारः

16. A²S¹-²T om. अस्थात्; भा. om. अकारात् परः

17. भा. om. महिव्रताः

दी. **प्रकावियाम्** (ऊ. क्षु. ९१२) इति प्रवद्धार्गवे कृष्टादध्यादकारात् परो वकारो दीर्घो भवति। पाऽ२वाकाः। अत्र वकारो दीर्घः ॥ २९ ॥

स्वारे च पर्णे हाराद्योनौ ॥ ३० ॥

वि. & भा. स्वारे च सौपर्णे (ऊ. ग्रा. ३. २. १२५. २) प्रतिहारात् परमक्षरं दीर्घीभवति **योनौ**। आस्ता३उवारामा३इ ॥ ३० ॥

दी. उद्भेदभिश्रुतामाऽ३घाम् (ग्रा. ३. २. १२५. २) इति योनौ स्वारसौपर्णे प्रतिहारात् परमक्षरं दीर्घं भवति। आस्ताऽ३उवा इति प्रतिहारात् परं रामाइ। अत्र रकारं (!) दीर्घीभवति ॥ ३० ॥

त्वं ह्यङ्ग प्रथमायां च ॥ ३१ ॥

वि. त्वंह्यङ्गप्रथमायां च सौपर्णे (ऊ. द. १९६) प्रतिहारात् परस्य दीर्घीभावः। तात्वा ॥ ३१ ॥

भा. प्रतिहारात् परमक्षरं दीर्घीभवति ॥ ३१ ॥

दी. त्वाँह्यङ्गदैवाऽ३या (ऊ. द. १९७) इति स्वारसौपर्णे प्रथमायां प्रतिहारात् परमक्षरं दीर्घीभवति। आमाऽ३उवा इति प्रतिहारात् परं तात्व। अत्र तकारो दीर्घीभवति ॥ ३१ ॥

द्वितीयं सन्तः ॥ ३२ ॥

वि. उच्चान्त्यायां हारात् परं द्वितीयं दीर्घीभवति ॥ ३२ ॥

भा. उच्चा-स्वारसौपर्णे (ऊ. ए. ३८४) तृतीयायाम् उपायद्वितीयमक्षरं दीर्घीभवति। साइषा३३उवा सान्ता३: ॥ ३२ ॥

---

4. A²M¹⁻²TS¹ परोऽक्षरः for परमक्षरम्

5. A¹T दीर्घः for दीर्घी; वि. om. आस्ताउवा

दी. उच्चातेजातमन्धाऽ३साः (ऊ. ए. ३८४) इति स्वारसौपर्णे तृतीयायां प्रतिहारात् द्वितीयमक्षरं दीर्घं भवति। साइपाऽ३उवा। इति प्रतिहारात् परं सन्ताः। इति द्वितीयं तकारं (!) दीर्घीभवति ॥ ३२ ॥

षं जानित्रे ॥ ३३ ॥

वि. उत्तरे जनित्रे (ऊ. ए. ५०१) तन्दुरोषमिति दीर्घीभावः ॥ ३३ ॥

भा. उत्तरे जनित्रे षंशब्दो दीर्घीभवति पुरोजि-तृतीयायाम् ॥ ३३ ॥

दी. पुरोजितीत्रोअ। धसाऽ३ः। सुताया (ऊ. ए. ५०१) इत्युत्तरे जनित्रे तृतीयायां ष-शब्दो दीर्घीभवति। षामाभीऽ१नाराऽ२३४ः। अत्र षकारो दीघः ॥ ३३ ॥

रथन्तरवृषाश्विनोर्व्रतेष्वोस्तोभे ॥ ३४ ॥

वि. रथन्तरवृषाश्विनोर्व्रतेषु ओस्तोभे प्रत्यये पूर्वस्य दीर्घीभावः। सूस्थूऽ२३४षाओवाऽ६हाउवा ॥ ३४ ॥

भा. एतेषां साम्नामोस्तोभे प्रत्यये दीर्घीभवति। वाइश्वस्यद्२३२ता३२म्। आ२मा३३२३र्ताओवा२। अभाओवा (र. प्रा. १३७) अपोक्सानोअर्षसाओए (र. प्रा. १३९) ॥ ३४ ॥

दी. आइनावो अग्निन्नमसोवा (र. द. २) इति रथन्तरे आमाऽ२३४र्ताम्। ओवाऽ६। अत्र ओस्तोभे प्रत्यये तंशब्दो दीर्घः। एवमादीनि। अभा ओवा। प्रदाओव (र. प्रा. १३७)। इति वृषिण ओस्तोभे प्रत्यये दीर्घो भवति। अभाओवा। अत्र भिशब्दो दीर्घः। एवमादीनि। पुनानस्सोमधारयाओहाउ (र. प्रा. १३९) इत्यश्विनोर्व्रताद्ये अपोवसानो अर्षसाओहाउ। अत्र सिशब्दो दीर्घः। एवमादीनि ॥

2. L[1] दीर्घी for दीर्घ

17. B[4] om. अभा ओवा...अर्षसा

18. E सिमध्ये for सिशब्दो

दैर्घे व्रात्योत्तरयोश्च थे ॥ ३५ ॥

वि. & भा. **त्वेसोमदैर्घे** (ऊ. ए. ४०१) **उत्तरयोः** स्तोत्रीययोः **उद्गीथे** औस्तोभे प्रत्यये दीर्घोभवति ॥ ३५ ॥

दी. **व्रात्यस्तोमानां** यज्ञानां **दैर्घे** **त्वेसोमप्रथमाव्रदोहाव्रगोहाओहाऽ३ए** (ऊ. ए. ४०१) इति **दैर्घश्रवसे** **उत्तरयोः** स्तोत्रीययोः **उद्गीथे** औस्तोभे प्रत्यये दीर्घोभवति । द्वितीयायां **तताऽ२र्दिथोऽत्सन्नाऽ२का** । **ओऽ३हा** । अत्र कंशब्दो दीर्घः । तृतीयायां **तियाऽ२यअमृतस्याऽ२घा** । **ओऽ३हा** । अत्र **धशब्दो दीर्घः** ॥ ३५ ॥

लान्दतयियौक्तेष्वौकारे ॥ ३६ ॥

वि. & भा. **इलान्दवारवन्तीययौक्ताश्वेषु औकारे** प्रत्यये दीर्घोभवति । **पुत्रा औहोहोहाइ** । **सा ओहोहाइ** । **मान्मा** । **युजाऔहोहोहाइ** ॥ ३६ ॥

दी. **अग्नेतवश्र** (र. सं. ७०) **इतीलान्दे औकारे** प्रत्यये दीर्घोभवति । **पुत्रा औहोहोहाइ** । अत्र त्र-शब्दो दीर्घः । **साम्नोहोहाइ** (ऊ. ए. ५२८) इत्यादि वार-**वन्तीये** औस्तोभे प्रत्यये दीर्घोभवति । **सा औहोहाइ** । अत्र सु-शब्दो दीर्घः । एवमादीनि । **वृषाऔहोहोहाइ** (ऊ. सं २४४) इत्युत्तरे **यौक्ताश्वे** तृतीयायां **युजाऔहोहोहाइ** । अत्रौकारे प्रत्यये **जम्**-शब्दो दीर्घः ॥ ३६ ॥

स्तावाद्यं कण्वतरे ॥ ३७ ॥

वि. **कण्वतरे** **प्रस्तावाद्यं** दीर्घोभवति । **पारीतोपिश्चतासुताम्** (ऊ. स. ७३६) ॥ ३७ ॥

---

2. वि. om. स्तोत्रीययोः

3. वि. om. प्रत्यये; वि. दीर्घोभावः for दीर्घोभवति

9. वि. दीर्घोभावः for दीर्घोभवति

भा. प्रस्तावाद्यमक्षरं कण्वरथन्तरे दीर्घीभवति । पारीतोषिञ्चतासुताऽ२म् (ऊ. स. ७३६) इत्येवमादिषु ॥ ३७ ॥

दी. पारीतोषीञ्चतासुताम् (ऊ. प्रा. ७३६) इति कण्वरथन्तरे प्रस्तावस्याद्यमक्षरं दीर्घीभवति । पारी । अत्र पशब्दो दीर्घः ॥ ३७ ॥

वैघने कृष्टवृद्धयोर्मध्ये ॥ ३८ ॥

वि. & भा. वैघने सोमसाम्नि कृष्टवृद्धयोर्मध्ये यदक्षरं तद्दीर्घीभवति । यथा पुरोजित्यां (ऊ. ए. ५२०) सुतायामाऽ२ । दायाइत्नवे ॥ ३८ ॥

दी. वैघने विघने यज्ञे भवे पुरोजाऽ३इतीवोअन्धसाः (ऊ. ए. ५३०) इति सोमसाम्नि कृष्टवृद्धयोरक्षरयोर्मध्ये यदक्षरं तत् दीर्घीभवति । सुतायामाऽ२ । दायाइत्नवे । अत्र कृष्टवृद्धयोर्मध्ये दकारो दीर्घः ॥ ३८ ॥

रैवते च वृण्यादिः ॥ ३९ ॥

वि. & भा. रैवतऋषभे वृष्यादिर्दीर्घीभवति । द्याविद्यवाइ (र.द. १८) ॥

दी. सुरूपकृत्नुमूतये (र. द. १८) इति रैवतऋषभे वृण्याया आदिर्दीर्घी भवति । द्याविद्यवाइ । अत्र द्य-शब्दो दीर्घः ॥ ३९ ॥

साहीये शतायास्तत्वा ॥ ४० ॥

वि. & भा. सातासाहीये (ऊ. स. ७३०) तत्वाशब्दे शतायाः परस्ताद्यदक्षरं तद्दीर्घीभवति । आमाऽ२३४ । तत्वायघोषयन् ॥ ४० ॥

---

7. भा. तस्य दीर्घीभावः for तद्दीर्घीभवति; वि. om. पुरोजित्याम्

12. भा. before द्याविद्यवाइ add: जुमसाइ

15. B[1] R after साहीये add: च; M[1]-[2]T तन्त्वा for तत्वा

16. M[1]-[2]T तन्त्वा for तत्वा; भा. शब्दस्य for शब्दे; वि. परस्तादक्षरस्य दीर्घीभावः for परस्ताद्यदक्षरं दीर्घीभवति

दी. तुवाऽ३४म् । हियङ्गदैविय । ओऽ४वा (ऊ. स. ७३०) इति सत्रासाहीये द्वितीयायां शता-पर्वणः परं तत्वाक्षरं दीर्घीभवति । अमाऽ३४ । तात्वायघोषयन् । अत्र तशब्दो दीर्घः । शताक्राऽ२३४तूः । अत्र शताया पवर्कैदेशस्य ग्रहणम् ॥ ४० ॥

त्सप्रे द्वितीयान्तः सूर्यस्य ॥ ४१ ॥

वि. वात्सप्रे (ऊ. द. ७९) द्वितीयस्वरान्तस्य सूर्यस्येत्यत्र दीर्घीभावः ॥ ४१ ॥

भा. वात्सप्रे द्वितीयान्तो दीर्घीभवति । जनितासूर्यस्य ॥ ४१ ॥

दी. हाउ (त्रिः) । ओ । होहोवा (द्वे त्रिः) । सोमः पवा (ऊ. द. ७९) इति वात्सप्रे द्वितीयस्वरान्तः सूर्यस्येतिशब्दो दीर्घीभवति । सूरियस्या । अत्र स्य-शब्दो दीर्घः ॥ ४१ ॥

म्रेऽभिसोमाद्यायामाद्यस्यान्त्यम् ॥ ४२ ॥

वि.&भा. वाम्रे (ऊ. स. २७८) आभिसोमाद्यायां स्तोत्रीयायामाद्यस्य पादस्य अन्त्यमक्षरं दीर्घीभवति ॥ ४२ ॥

दी. अभिसोमासआ । हाऽ३हाऽ३इ (ऊ. सं. २७८) इति वाम्रे प्रथमाया माद्यस्य पादस्यान्त्यमक्षरं दीर्घीभवति । वायवोवा । अत्र प्रथमवकारो दीर्घः ॥ ४२ ॥

बोधीये मघोनामेक ॥ ४३ ॥

वि. जराबोधीये (ऊ. ए. ४०४) स्वादिष्ठान्त्यायां मकारस्यैके दीर्घत्वं मन्यन्ते ॥

---

4. My[3] ०देशग्रहणम् for ०देशस्य ग्रहणम्
5. A[2] om. त्सप्रे सूर्यस्य; M[1-2]T द्वितीयान्स्यः for द्वितीयान्तः
6. A[2]M[1-2]T ०स्वरान्त्यस्य for ०स्वरान्तस्य

भा. स्वादिष्ठायां (ऊ. ए. ४०४) तृतीयायां जराबोधीये मकारस्यैके दीर्घीभावं मन्यन्ते ॥ ४३ ॥

दी. स्वादिष्ठयोवा (ऊ. ए. ४०४) इति जराबोधीये तृतीयायां मकारस्य एके दीर्घीभावं मन्यन्ते । पर्षाइराऽ१धाऽ२३: । म । अस्य मकारस्य दीर्घीभावमेकेन मन्यन्ते । न तु ग्रन्थकारः ॥ ४३ ॥

देव्ये दीधि ॥ ४४ ॥

वि.&भा. विराट्सु वामदेव्ये दीधि-शब्दो दीर्घीभवति अग्निंनरायाम् ॥

दी. आऽ५ग्निम् । नरोऽ३ । दाऽ३इ धीतिभाइः (ऊ. द. २२१)इति विराड्-वामदेव्ये दाऽ३ईधीतिभाइः । अत्र धिशब्दो दीर्घः ॥ ४४ ॥

न्ववा वितदेव्ययोः ॥ ४५ ॥

वि.&भा. पर्यूष्वाद्यायां गौरीवितवामदेव्ययोः न्व-शब्दो दीर्घीभवति । परिऊषूऽ२३प्रधन्वावा ॥ ४५ ॥

दी. परि । ऊषूऽ३ । प्रधन्वावा (ऊ. स. ७८४) इति गौरीविते प्रधन्वावा अत्र न्व-शब्दो दीर्घः । पाऽ५रि । ऊषूऽ३प्राऽ३धन्वावा (ऊ. सं. ३५०) वामदेव्ये । अत्र न्व-शब्दो दीर्घः ॥ ४५ ॥

त्स्यशब्दः स्वरयोः ॥ ४६ ॥

वि. स्वरयोर्मत्स्यपायीत्यत्र त्स्य-शब्दस्य दीर्घीभावः ॥ ४६ ॥

---

4. EM'S[2] अत्र for अस्य

7. S-K धिशब्दस्य A[2]M[1-3] दीधिशब्दस्य for दीधिशब्दः; वि. दीर्घत्वम् for दीर्घीभवति&om. अग्निं नरायाम्

11. वि. न्वशब्दस्य दीर्घीभावः for न्वशब्दो दीर्घीभवति;

12. भा.om. वरि...वा

भा. **स्वरसाम्नोः मत्स्यपायितेम्मह** इत्यत्र त्स्य-शब्दो दीर्घीभवति ॥ ४६ ॥

दी. **एहाउमत्सियापा** (र. सं. ४१) इति **द्वितीयस्वरे मत्सियापा** । अत्र यशब्दो दीर्घः । **एहाउ** । **औहोऽ२** । **मत्सियापाऽ३** । **यितेमहाः** (र. सं. ४३) इति **तृतीयस्वरे मत्सियापाऽ३** । अत्र यकारो दीर्घः ॥ ४६ ॥

ककुभे दय ॥ ४७ ॥

वि. **त्रैककुभे योनौ य एक इद्विदयत** इति दकारस्य दीर्घीभावः ॥४७॥

भा. **त्रैककुभे द-शब्दो** दीर्घीभवति । य एकइद्विदाय३ताइ ॥ ४७ ॥

दी. **यएक इद्विदायाऽ२ताइ** (ऊ. द. २०७) इति **त्रैककुभे** । **द्विदयाऽ३**. **ताइ** । अत्र दशब्दो दीर्घः ॥ ५७ ॥

श्येने नइ दीर्घत्वम् ॥ ४८ ॥

वि. **श्येने** (ऊ. क्षु. ९०३) **गोवित्तृतीयायां नशब्दस्य** दीर्घीभावः ॥ ४८ ॥

दीर्घीभावः समाप्तः ॥

इति फुल्लविवरणे पञ्चमस्य प्रपाठकस्य तृतीयः खण्डः ॥ ३ ॥

भा. **गोविच्छ्येने** (ऊ. क्षु. ९०७) तृतीयायां नशब्दो दीर्घीभवति ॥ ४८ ॥

दीर्घत्वं दीर्घीभावशेषं समाप्तम् ॥

इति पुष्पसूत्रभाष्ये पञ्चमप्रपाठकस्य तृतीया कण्डिका ॥ ३ ॥

दी. **गोवित्पवस्ववसुवाइत्** (ऊ. क्षु. ९०७) इति **श्येने** तृतीयायां **नाइया** अत्र **न**-शब्दो दीर्घः । एवं दीर्घत्वं दीर्घीभावशेषमुक्तम् ॥ ४८ ॥

इति फुल्लदीपे नवमप्रपाठकस्य तृतीयः खण्डः ॥ ३ ॥

---

20. RMy[2] दीर्घंभाव° for दीर्घीभाव

चतुर्थः खण्डः

वृद्धावृद्धम्

शाक्त्ये हीष्यन्तो वृद्धः ॥ १ ॥

वि.&भा. शाक्त्ये प्रवइन्द्रायां (ऊ. द. १९) हीष्या अन्तो वर्धते। यमा दाऽ२३४नाम् ॥ १ ॥

दी. प्रवइन्द्राऽ२। यमादाऽ२३४नाम् (ऊ. द. १९) इति शाक्त्ये हिष्या अन्तो वर्धते। यमादाऽ२३४नाम्। अत्र नकारो वृद्धः। याऽ२३४मा। अत्र मकारो वृद्धः। एवमादीमि। हीऽ२३४षी। इति हीषी पर्व ॥ १ ॥

अशत ॥ २ ॥

वि. शाक्त्ये (ऊ. द. १९) त्वंगव्युः शत इत्यत्रापवादः ॥ २ ॥

भा. शतशब्दस्यापवादः। तुवाऽ२म् गव्य्ः। औ३हो३इ। शा३त ॥ २ ॥

दी. अकारः प्रतिषेधे। प्रव इन्द्रे-(ऊ. द. १९)ति शाक्त्ये तृतीयायां शाऽ२-२३४त। अत्र तकारो न वृद्धः ॥ २ ॥

प्लुवे वारान्तः ॥ ३ ॥

वि. प्लुवे सर्वत्र वारान्तो वर्धते ॥ ३ ॥

भा. प्लुवे वारायाः सर्वत्रान्तो वर्धते ॥ ३ ॥

दी. हा। वोऽ३हा। वोऽ३हाऽ३। हा ओऽ२३४वा। हाइ। साखायाऽ२३४ आ (ऊ. द. १३२) इत्यादिप्लुवे वारापर्वणोऽन्तो वर्धते। साखायाऽ२३४आ

---

4. भा. om. प्रवइन्द्रायाम्

15. M¹-² वारान्त्यः for वारान्तः; M¹-² trans. सर्वत्र after वारान्त्यः

16. V²P वारान्तायाः for वारायाः

अत्र आकारो वृद्धः । नीषीदाऽ२३४ता । अत्र तकारो वृद्धः । एवमादीनि वारावाऽ२३४न्ताम् । इति वारापर्व भवति ॥ ३ ॥

अषतयश च ॥ ४ ॥

वि. षतयश-शब्दौ न वर्धेते । ह्रौः षाराऽ२३४इभूषाऽ२३४ तयाश्राऽरूऽ२-३४णा । याऽ२३४श ॥ ४ ॥

भा. अकारः प्रतिषेधार्थः । ह्रौः पा३रा३३३इभू३षा३३३तश्रा३३३या३इ । यावा३रू३३बणा३या३३३शता३३३मा३म् ॥ ४ ॥

दी. अकारः प्रतिषेधे । प्रथमायाम् । षाऽ२३४त । अत्र तकारो न वृद्धः । तृतीयायां याऽ२३४श । अत्र शकारो न वृद्धः ॥ ४ ॥

दन्वते च ॥ ५ ॥

वि &भा. वैदन्वते च निहोतान्तो वर्धते ॥ ५ ॥

दी. औऽ३होइ । इहहाहहाइ । औऽ२होऽ२३४वा । पराइस्वाऽ३३४नो (ऊ. दां १११) इति चतुर्थवैदन्वते वाराया अन्तो वर्धते । पराइस्वाऽ२३४नो । अत्र नोशब्दो वर्धते । गिराऽ२३४इष्ठाः । अत्र ष्ठाशब्दो वर्धते । एवमादीनि ॥ ५ ॥

अविप्रः ॥ ६ ॥

वि. भा. त्वं विप्र इत्यत्रापवादः ॥ ६ ॥

दी. अकारः प्रतिषेधे । द्वितीयायां तुवंवाऽ२३४इप्रः । अत्र प्र-शब्दो न वर्धतेः ॥ ६ ॥

---

1. L[1] om. निषीदाः....वृद्धः

11. P after च adds: सर्वत्र; V[2]B[4] om. च; V[2]B[4]P before निहोता add: सर्वत्र; A[1] वारायाः सर्वत्रान्तः for निहोतान्तः; PV[2]B[4] निहोताया अन्तः for निहोतान्तः

16. प्रतिषेधः for अत्र अपवादः

हति स्तावात् स्वरान्तः ॥ ७ ॥

वि.&भा. बृहति प्रस्तावात् परस्य पर्वणः सर्वत्रान्तो वर्धते ॥ ७ ॥

दी. औहोइत्वामिद्धिहवामहा॒ऽ३ए (र. द. ५) इत्यादि बृहति प्रस्तावात् परः अकारादिस्वरस्यान्तो वर्धते । सातौवाजा । अत्र जकारो वृद्धः । एवमादीनि ॥ ७ ॥

न गपशूधा ॥ ८ ॥

वि. गशूपधा न बर्धते । मत्स्य - (र. सं. ३६) बृहत्युत्तरयोर्यज्ञा - (र. अ. १०६) न्त्यायाम् । सुतासोमा - (ऊ. अ. ११३)न्त्यायां च ॥ ८ ॥

भा. एतेषामपवादः । मत्स्य - (र. सं. ६७) बृहत्युत्तरयोः । यज्ञा - (र. अ. १०६) बृहति तृतीयायां सुता-(र. अ. ११३) बृहति तृतीयायां च ॥ ८ ॥

दी. न-कारः प्रतिषेधे । औहोइमत्स्यपायितेम्महाऽ३ए ! (र. सं. ३७) इति बृहति द्वितीयायां नस्रोग । अत्र गकारो न वृद्धः । तृतीयायां व॑र्हिश । अत्र शूकारो न वृद्धः । औहोइयज्ञायथा अपूर्वियाऽ३ए (र. अ. १०६) । इति बृहति तृतीयायां मासुप । अत्र पकारो न वृद्धः । औहोइसुतासोमधुमत्तमाऽ३ए (र. अ. ११३) इति बृहति तृतीयायां हस्रधा । अत्र धा-शब्दो न वृद्धः ॥ ८ ॥

ञ्यन्ते च त्वाष्ट्रीसाम्नि हारादियोंनौ ॥ ९ ॥

त्रि.&भा. त्रिणिधने त्वाष्ट्रीसाम्नि योनौ प्रतिहारादिर्वर्धते ॥ ९ ॥

---

1. A^2M^{1}-^{3}T स्वरान्त्यः for स्वरान्तः

2. वि. om. सर्वत्र, A^2M^{1}-^{2} अन्त्यः for अन्तः; A^2 before बृहति adds: स्वरान्तः

4. EM^4S^2 पर्वणः स्वरस्य for अकारादिस्वरस्य

16. P ञ्यन्तरे for त्रिणिधने

दी. सुतासोमाधुमाऽ३त्तमाः (ग्रा. १६.८.५४७.१) इति त्रिणिधने त्वाष्ट्रीसाम्नि योनौ प्रतिहारादिर्वर्धते । दाइवान् गच्छाऽ३ । अत्र प्रतिहारस्यादिर्देकारो वृद्धः। योनाविति वचनात् ऊहे वृद्धिर्न भवति । द्वितीयायां विश्वस्येशाऽ३नओऽ३ (ऊ. द. ६४) अत्र विकारो न वृद्धः । एवमादीनि ॥ ९ ॥

नवपूर्वपञ्चरूणसामशोकपृश्निषु च नौ देदिरिक्रेशब्दाः ॥ १० ॥

वि. देदिरिक्रेशब्दाः योनौ वर्धन्ते । मानवपूर्वे देशब्दो वर्धते । दी । दाइ । पञ्चवरुणसाम्नोः दिशब्दो योनौ वर्धते । आदिद्वन्देतवरुणम् (सा. २८८) । वरूध्ये वरुणे छन्दग्म् । (सा. २५५) श्रैशोके रिशब्दः सजूस्नतक्षुरिन्द्रं (सा. ३७०) । पृश्निनि क्रेशब्दः । शुक्रेण (सा. ३७) ॥ १० ॥

मा. पूर्वमानवपञ्चवरुणसामश्रैशोकपृश्निषु च योनौ देदिरिक्रे एते शब्दा वृद्धा भवन्ति । यथाक्रमेण ॥ १० ॥

दी. नित्वामग्नाइ (ग्रा. २.५.५४.१) इति पूर्वे मानवे योनौ देशब्दो वृद्धो भवति । दाइ । थक । अत्र देशब्दो वृद्धः । योनाविति वचनादूहे प्रतिषेधः । इन्द्रक्रतूम् (ऊ. सं. ३६३) इत्यादिपूर्वे मानवे शि । क्षा । अत्र क्षशब्दो न वृद्धः । यदाऽ४क । दाऽ४चमी (ग्रा. ८.६.२८८.१) इति पञ्चे योनौ दिशब्दो वर्धते । आदाइद्वन्दाऽ३इ । अत्र दिशब्दो वृद्धः । योनाविति वचनादूहे प्रतिषेधः । प्रसोऽ४म (ऊ. सं. २३५) । इत्यादि पञ्चे आँऽशोःपयाऽ३ । अत्र शोः-शब्दो न वृद्धः । प्रमित्राय प्रार्यम्णो वा । ओवा (ग्रा. ७.३.२५५.३) इत्यादिवरुणसाम्नि दायाऽ२३ऽहाइ । अत्र दिशब्दो वृद्धः । योनाविति वचनादूहे प्रतिषेधः । मृज्यमानस्सुहस्त्ये वा । ओवा (ऊ. द.

---

5. A[2]T वज्र for पञ्च
6. KS[2]I चत्वारः for शब्दाः; A[2]M-[2] m. योनौ; M[1-2]TS[1] om. मानव....वर्धते;
7. KS[1] om. योनौ; M[1-2] ०शब्दाः...वर्धन्ते for ०शब्दो...वर्धते A[2] after छन्द्यम् adds: योनौ दिदाइ and M[1-2]TS[1] मानवे पूर्वे देशब्दो वर्धते योनौ दिदाइ
14. L[1]My[2-3] वृद्धो भवति for वर्धते
15. E न भवति for प्रतिषेधः

१०५) इत्यादिवरुणसाम्नि पुरुऽ२३हाइ । अत्र पु-शब्दो न वृद्धः । विश्वोहाइ (ग्रा. ९.३.३७०.१) । इति योनौ त्रैशोके रि-शब्दो वृद्धः । सजूस्ततक्षुराइन्द्रंजजनूः । अत्र रिशब्दो वृद्धः । योनाविति वचनादूहे प्रतिषेधः । द्वितीयायां मेषंविप्राः (ऊ. द. ७३) । अत्र षं-शब्दो न वृद्धः । बृहाद्भीऽ३रग्ने अर्चिभिर्हाउ (ग्रा. १.४.३७.१) इति पृश्निनि योनौ केशब्दो वृद्धः । शुक्राइणदेवशोचिषा । अत्र केशब्दो वृद्धः । योनाविति वचनादूहे प्रतिषेधः । योराजाऽ२३चर्षणीनांऽहाउ (ऊ. द. ७४) । इति पृश्निनि । यातारथेभिरध्रिगुः । अत्र ताशब्दो न वृद्धः । एवमादीनि ॥ १० ॥

अरिष्टे च येवि इत्येतौ शब्दौ ॥ ११ ॥

वि.&भा. अरिष्टे च येशब्द-वि-शब्दौ योनौ वर्धेते ॥ ११ ॥

दी. हाःह । होइया । पावी (र. द. ८) इत्यरिष्टे च येशब्द-विशब्दौ योनावेव वर्धेते । णीऽ३परियांइ । अत्र ये-शब्दो वृद्धः । षिवाइश्वाऽ२३४ताः । अत्र विशब्दो वृद्धः । ऊहे प्रतिषेधः । द्वितीयायां त्राऽ३म्वितंतम् । अत्र तंशब्दो न वृद्धः । दिवस्पाऽ२३४दाइ । अत्र वशब्दो न वृद्धः ॥ ११ ॥

समुद्रच्छन्दसि स्वोतायां द्वितीयस्थम् ॥ १२ ॥

वि. समुद्रच्छन्दसि च इलान्दे (र सं. ६०) साम्नि ऊतायां द्वितीयस्वरस्थमक्षरं वर्धते ॥ १२ ॥

भा. समुद्रच्छन्दसि च साम्नि ऊतायां द्वितीयस्वरस्थमक्षरं वर्धते ॥ १२ ॥

दी. समुद्रवत् छन्दो यस्य तत् समुद्रच्छन्दः । तस्मिन् समुद्रच्छन्दसि इलान्दे (र. सं. ७०) ऊतएकाम् इति ऊतायां विषये द्वितीयस्वरस्थमक्षरं वर्धते । वाकवर्चाः । अत्र द्वितीयस्वरे वकारो वृद्धः । क्रावर्चाआ । अत्र क-शब्दो वृद्धः । एवमादीनी ॥

M[1-3] येवीत्यतेहशब्दौ for येशब्दविशब्दौ; भा. after योनौ adds: एव

17. PV[2] before समुद्र add: अग्ने तव श्रवोतायां द्वितीयस्थाम्

अर ॥ १३ ॥

वि. र-शब्दो न वर्धते । इळान्दे आइ । रज्यन्नग्ने (र. सं. ७०) ॥ १३ ॥

भा. रशब्दस्यापवादः । आइ । रज्यन्नग्ने (र. सं. ७०) ॥ १३ ॥

दी. अकारः प्रतिषेधे । ऊतायां विषये र-कारो न वर्धते । आइ रज्यन्नग्ने (र. सं. ७०) । अत्र रकारो न वृद्धः ॥ १३ ॥

पवि राजे स्तावाद्गेष्णादिरवृद्धः ॥ १४ ॥

वि.&भा. पवित्रायां सामराजे प्रस्तावात् परस्य गेष्णस्य पर्वणः आदिर्न वर्धते ॥ १४ ॥

दी. पत्रौ होवा । तन्ते विततं ब्रा (ऊ. सं. २६३) इति सामराजे प्रस्तावात् परस्य गेष्णस्य उद्गीथस्य आदिरवृद्धः । न वृद्धः । अन्तेविततंब्रा । अत्र उद्गीथस्यादिः तम्-शब्दो न वृद्धः ॥ १४ ॥

संक्षारवैश्वज्योतिषगोराङ्गिरसेषु नियान्तः ॥ १५ ॥

वि.&भा. इडानां संक्षारे वैश्वज्योतिषे गोराङ्गिरसे च नियान्तो न वर्धते । सर्वत्राधिकारात् । नियामंचीऽ३त्राऽ३मृञ्जताइ (ग्रा. ४. ३. १३५. १) [इति नियापर्व ॥ १५ ॥

दी. औहोइ हुवाऽ३होइ । पवमानाऽ३स्याऽ३जिघ्नतः (ऊ. द. १७९) इतीडानां संक्षारे नियापर्वण अन्तो न वर्धते । पवमानाऽ३स्याऽ३जिघ्नतः । अत्र तकारो न

---

3. P राऽशब्दस्य, V³ न्नुशब्दस्य, B⁴A² रेशब्दस्य for रशब्दस्य

4. E अः for अकारः

7. भा. पवित्रेतायां for पवित्रायां; भा. पर्वणः गेष्णादिः for गेष्णस्य पर्वणः आदिः

13. भा. गोराङ्गिरसेषु for गौराङ्गिरसे; भा. अवृद्धो भवति for न वर्धते

14. वि. om. सर्वत्राधिकारात्

वृद्धः । हरेश्वन्द्राऽ३अाऽ३स्रक्षत । अत्र तकारो न वृद्धः । एवमादीनि । हाउहोवा ऽ३हाइ । अक्रान्त्समुद्रः प्रथमेऽ३४३विधर्मन् (ऊ. क्षु. ९१७) इति तृतीये वैश्वज्योतिषे नियापर्वणः अन्तो न वर्धते । जनयन्प्रजाभुवनाऽ३४३स्यगोपाः । अत्र पाशब्दो न वृद्धः । एवमादीनि । औहोइहूऽ२बाऽ२३इ । हुवए । पुनानो आऽ३क्राऽ३मी दभि (ऊ. क्षु. ९२२) इति गोराङ्गिरसे नियापर्वणोऽन्तो न वर्धते । विश्वामृधोऽ३वी ऽ३चर्षणिः । अत्र णिशब्दो न वृद्धः । एवं शाक्करादिषु । नियान्तस्याधिकारात् । इहेवाऽ२३शृण्व एषाम् (ग्रा. ४. ३. १३५. १) इति साम्नि नियामश्वीऽ३त्राऽ३मृज्ज-ताइ इति नियापर्व भवति ॥ १५ ॥

अवेज्यवे ॥ १६ ॥

वि.&भा. दे-शब्द-वे-शब्दौ वर्धेते । दिविसद्भूऽ२३मीऽ२याददाइ । सन इन्द्राऽ३याऽ३यज्यवाइ । संक्षारे (ऊ. अ. ५७८) ॥ १६ ॥

दी. अकारः प्रतिषेधे । औहोइहुवाऽ३होइ । उच्चातेजा३ताऽ३मन्धसः (ऊ. अ. ५७८) इतीडनां संक्षारे प्रथमायां दिविसद्भूऽ३मीऽ२याददाइ । अत्र देकारो वृद्धः । द्वितीयायां सनइन्द्राऽ२याऽ२यज्यवाइ । अत्र वे-शब्दो वृद्धः ॥ १६ ॥

अन्येऽद्रिः ॥ १७ ॥

वि. वान्त्यवैश्वज्योतिषे (ऊ. क्षु. ९१७) न्ये-द्रि-शब्दौ नियान्तौ वर्धेते । वृषा पवित्रे अधिसान्मे अन्ये । स्वानोअद्रिः । च ॥ १७ ॥

---

1. R हौहो for हाउहो°

10. A[4] अददज्यवे, M[1-3] आवेदेज्यवे, A[1]B[4] देशब्दज्यवेशब्दौ for देशब्दवेशब्दौ; T शब्दौ घवते सनन्द्रयायज्यवाइदिवसद्भूमीया दादाइ for देशब्द····ज्यवाइ; B[4] after °शब्दौ adds: अन्तो; M[1-3] सनइन्द्रायायज्यवाइदिविसद्भूमियाददाइ for दिव…ज्यवाइ

11. भा. वैश्व ज्योतिषे पूर्ववन्नियान्तो न वर्धते for संक्षारे KM[1-3] om. संक्षारे

दी. हाउहोवा२हाइ । अक्रान्त्समुद्रः प्रथमे३४३विधर्मन् (ऊ. क्षु. ९७१) इति तृतीये वैश्वज्योतिषे वृषापवित्रे अधिसा३४३नोअव्याइ । अत्र व्येशब्दो वृद्धः । बृहत्सोमोवावृधेसुवा३४३नौ अद्राइ । अत्र द्रि शब्दो वृद्धः ॥ १७ ॥

तेऽयोनौ ॥ १८ ॥

वि. गोराङ्गिरसे नियान्तो न वर्धते । अयोनौ । योनौ [तु] ते-शब्दो वर्धते । धियो जिन्वा२सी२सतताइ (ग्रा. १. ३. ३१. १) ॥ १७ ॥

---

4. तेऽयोनौ ॥ The Bhāṣya omits अयोनौ and transfers ते to the next sūtra. It reads the three successive sūtras in one single line without punctuation as ते जयत्रिणिधनसाप्तमिकेषु च थे सार्वाद्रिरदेवः ॥ and interprets: अयोनौ तेशब्दो वर्धते । धियो जिन्वसि सत्पते ॥; which actually relates to ते[ऽयोनौ]; leaving the rest of the portion from जय to सर्वाद्रिः and अदेव; unexplained. Maybe, the commentary on these latter two sūtras was lost in the course of transmission by oversight. In Phulladīpa no trace of this sūtra could be seen.

It may be noted in this eonnetion that the sūtra तेऽयोनौ speaks of गोराङ्गिरस of प्रकृतिगान which is based on कस्य नूनम् (SV.34). This verse is not found in उत्तरार्चिक but the malody formed thereon acts as yoni for the गोराङ्गिरस of the ūha book which is based on the तृच of पुनानो अक्रमीदभि (SV.924-926;ऊ.क्षु.922). The commentator has cited in his Bhāṣya as well as in his vivaraṇa the last pāda of the verse text of कस्य नूनम् (Sv.34) and the corres ponding portion of the melody formed thereon from the book of गामेगेय as example respetively. It is evident from this that the Bhāṣya has lost some passages before and after अयोनौ since अयोनौ implies ऊह melody and is therefore not appicable to धियो जिन्वसि सत्पते । Hence it is obvious that the Bhāṣya even as the vivaraṇa must have spoken of गोराङ्गिरस of अयोनि, i. e. of ūha corpus where नियान्त is not vṛddhied— न वर्धते

अयोनौ stands here as the remnant, to remind us, of the lost passages of the commentary. The sentence might have been: गोराङ्गिरसे तेशब्दो नियान्तो न वर्धते अयोनौ । योनौ तेशब्दो वर्धते ।

भा. [गोराङ्गिरसे ते-शब्दो नियान्तो न वर्धते] **अयोनौ** । [योनौ] **ते-शब्दो** वर्धते । **धियोजिन्वसिसत्पते** (ग्रा. १. ३. ३४. १) ॥ १८ ॥

जयत्रिणिधनसाप्तमिकेषु च थे सार्वादिः ॥ १९ ॥

वि. यौधाजय-त्रिणिधन-साप्तमिकेषु उद्गीथे सार्वादिर्न वर्धते । आपोऽ२-वसाऽ२ ॥ १८ ॥

दी. पुना३२ । नाऽ२३स्सो । म । धाराऽ२३४वा (ऊ.द.३) इति **यौधाजये** उद्गीथे सार्वाया आदिर्न वर्धते । वसाऽ२ । अत्र सार्वाया आदिर्व-शब्दो न वृद्धः । निमृताऽ२ । अत्र सार्वाया आदिर्न वृद्धः । एवमादीनि । **पुनानस्सोमधाहाउहोवा** (ऊ. द. ४१) इति **त्रिणिधन** आयास्ये उद्गीथे सार्वाया आदिर्न वर्धते । वसाऽ२ । अत्र व-शब्दो न वृद्धः । त्वधायोनिमृताऽ२ । अत्र सार्वाया आदिर्न वृद्धः । पुनानस्सोमधारया । एऽ३ (ऊ. द. १२६) इति **साप्तमिकायास्ये** उद्गीथे सार्वाया आदिर्न वर्धते । वसाऽ२ ॥ १९ ॥

अदेवः ॥ २० ॥

वि. उद्गीथे उत्सोदेवो वर्धते । दाइवोऽ२ ॥ २० ॥

दी. अकारः प्रतिषेधे । यौधाजयादिषु । दाइवोऽ२ । अत्र सार्वाया आदिर्न निषिध्यते । वर्धते ॥ २० ॥

सिष्ठे ताद्विविद्धाया अन्तो **योनौ** ॥ २१ ॥

---

3. A[2] om. जयत्रिणिधन...वर्धते; M[1]-[3]T साप्तमिकायास्येषु for साप्तमिकेषु

4. S[1] साप्तमिकायास्येषु for साप्तमिकेषु; भा. om. the commentary

11. R My[3] om. उद्गीथे

14. भा. om. commentary

वि.&भा. वयमेन-वासिष्ठे (ग्रा. ७. ४. २७२. ३) तद्विविद्ढाया अन्तो वर्धते योनौ। तस्माउअद्यसवनाइ ॥ २१ ॥

दी. वयमेनमिदा। हियाओऽ२३४वा (ग्रा. ७. ४. २७२. ३) इति वासिष्ठे तद्विविढ्ढापर्वणः अन्तो योनौ वर्धते। तस्माउअद्यसवनाइ। अत्र तद्विविद्ढाया अन्ते नेशब्दो वृद्धः। योनाविति वचनादूहे प्रतिषेधः। वृकश्चिदस्य वारणः (ऊ. अ. ६३७) अत्र तद्विविड्ढाया अन्तो न वृद्ध। एवमादीनि ॥ २१ ॥

रुणसाम्नि च ॥ २२ ॥

वि.&भा. घृतवत्यां (ग्रा. १०. ३. ३७८. १) वरुणसाम्नि च योनौ तद्विविड्ढाया अन्तो वर्धते। द्यावापृथिवीवरुणा। ऊहगीतौ न वर्धते तद्विविड्ढान्तः ॥

दी. घृतव। ताऽ३इभुवनानाम् (ग्रा. १०. ३. ३७८. १) इति वरुणसाम्नि। च-कारात् योनावेव। तद्विविड्ढाया अन्तो वर्धते। द्यावापृथिवीवरुणा। अत्र ण-शब्दो वृद्धः ॥ २२ ॥

रूपदोविशियाष्टेडेषूर्मिणोच्चाव: ॥ २३ ॥

वि. वैरूपसदोविशीयाष्टेडेपूर्मिणाशब्दास्योच्चीभावः। अभिसोममध्यमायां स्वाष्टेडायां च ॥ २३ ॥

भा. वैरूपसदोविशीयाष्टेड इत्येतेषु ऊर्मिणाशब्दस्य उच्चीभावः। अभिसोमाद्वितीयायां वैरूप (र. क्षु. १८७) सदोविशीययोः (ऊ. ए. ४९०) स्वासु अष्टेडे तृतीयायां च। तरत्समुद्रं पवमान ऊर्मिणा। इन्द्रस्य सोम पवमान ऊर्मिणा ॥

---

1. भा. before वासिष्ठे add: इत्यत्र; A²M¹⁻²TS¹ न वर्धते अयोनौ। योनौ वर्धते for वर्धते योनौ

2. वि. om. तस्मा उ अद्य सवनाइ

9. A²M¹⁻²TS¹ after अन्तो add: न; My¹ om. द्यावा...विड्ढान्तः

11. L¹ My²⁻³ R om. चकारात् योनावेव

12. L¹ My²⁻³ णकारः for णशब्दः

18. B⁴ om. तरत्समद्रं...पवमान ऊर्मिणा

दी. **अग्निसोमास आयवः**। **ए** (र. क्षु. १८७) इति पञ्चनिधने **वैरूपे** द्वितीयायाम् ऊर्मिणा-शब्दस्योच्चीभावः। **तरत्समुद्रंपवमानऊर्मिणा**। अत्र ऊर्मीइत्यक्षरे द्वे उच्चीभवतः। **अग्निसोमासआयवओहाओहा२३ए**। **औहो औहो२३वा** (ऊ. ए. ४९०) इति **सदोविशीये** द्वितीयायां **तरत्समुद्रंपवमानऊर्मिणा**। ऊर्मि इत्यक्षरे द्वे उच्चीभवतः। **धर्तादिवःपवतेकृत्व्योरसः** (र. अ. ११०) इति स्वासु अष्टेडे तृतीयायाम् **इन्द्रस्यसोमपवमानऊर्मिणा**। अत्र ऊर्मीइत्यक्षरे द्वे उच्चीभवतः। त्रिभ्योऽन्यत्र रयिष्ठादिषु ऊर्मिशब्दः यथर्चं भवति॥ २३॥

जम्भे च तृतीयो दादिः॥ २४॥

वि.&भा. वार्कजम्भे च तृतीयपादादिरुच्चैर्भवति। अग्निसोमादिषु (र. सं. ६५) समृद्रस्याधिविषपाइ इति योनौ नीचत्वादूहगीतावुच्चीभावः॥ २४॥

दी. **हावग्निसोमासआयावाः** (र. सं. ६५) इति **वार्कजम्भाद्ये** तृतीयपादादेरुच्चीभावः। **समुद्रस्याधिविष्टापाइ** इति तृतीयपादस्योच्चीभावः। एवमादीनि। योनौ **वृत्रँहनातिवृत्रहा** (आ. ३. ५. १३८) इति पादादौ नीचत्वात् ऊहे उच्चीभावः॥ २४॥

नित्रे च पूर्वे॥ २५॥

वि.&भा. पूर्वे जनित्रे च तृतीयपादादिरुच्चैर्भवति॥ २५॥

दी. **परिधा२३इ२रातिता२इहाइ** (ऊ. सं. ३५६) इति **पूर्वे जनित्रे** तृतीयपादादेरुच्चीभावः। **तवाहंनक्तमुतसो२**। इति तृतीयपादादिरुच्चः। **अस्माकमद्यम-रुता२२ः** (ग्रा. ६. १. २४१. १) इति योनौ तु नीचः॥ २५॥

---

3. 2; 3;4 R My²-³उच्चैः for उच्चीभवतः

6. E after अष्टेडे adds: पदस्तोभे.

7. L¹My²-³ R om. त्रीभ्यो...भवति

9. उच्ची for उच्चैः

10. वि. om. समुद्रस्याधि...उच्ची भावः।
V² समृद्रस्य.

17. om. अस्माक०...इति and तु

दोविशीये हारादिः ॥ २६ ॥

वि.&भा. सदोविशीये प्रतिहारादिरुच्चीभवति ॥ २६ ॥

दी. अभिसोमासआयव ओहाओहा२३ए। औहोऔहो२३वा (ऊ. ए. ४९०) इति **सदोविशीये प्रतिहारादिरुच्चः।** मत्सरा१सा२ः। एवं प्रतिहारादिरुच्चः ॥ २६ ॥

अस्थाः ॥ २७ ॥

वि.&भा. अधयदिमायां (ऊ. ए. ५२४) सदोविशीये स्थाशब्दो नीची-भवति ॥ २७ ॥

दी. अकारः प्रतिषेधे। अधयदिमेपत्रमा ओहा ओहा२३ए। औहोऔहो२३वा (ऊ. ए. ५२४)इति **सदोविशीये स्था**-शब्दो नीचीभवति। स्थावार्षा१सा२ः। अत्र स्था-शब्दो नीचः ॥ २७ ॥

शृङ्गे च ॥ २८ ॥

वि.&भा. गौशृङ्गे च प्रतिहारादिरुच्चीभवति। ऊहविषये ॥ २८ ॥

दी. आजागृविर्विप्रः। ऋता२३म्। ((ऊ. क्षु. ९१९) इति **गौशृङ्गे** प्रतिहारादिरुच्चीभवति। वोरथिरासःसोवा२३ओ२३४वा। अत्र प्रतिहारादिरुच्चः। योनौ नीचः। नेमिन्तष्टेवसोवा२३ओ२३४वा (ग्रा. ६. १. २३८. ३)। अत्र प्रतिहारा-दिर्नीचः ॥ २८ ॥

कौत्से वे सूष्वा **चतुर्थमेकोना** ॥ २९ ॥

भा. ऐडकौत्से प्रस्तावविषये सूष्वा चतुर्थस्वरमापद्यते। **एकाक्षरोना** सती ॥

---

1. A[3]M[1]-[2]T om. दोवीशीये...भवति ॥

12. M[1]-[3]B[4] शृङ्गे for गौशृङ्गे; PV[1] om. गौशृङ्ग च; वि. उच्चैः for उच्ची°

14. E उच्चैः for उच्चीभवति

18. P भवति for आपद्यते

वि. ऐडकौत्से सूष्वा चतुर्थे भवति प्रस्तावे विषये एकाक्षरोना ॥ २९ ॥

दी. स्वादिष्ठि२३ (ऊ. प्रा. ८१९) इत्यैडकौत्से प्रस्तावे एकाक्षरेणोना सूष्वा चतुर्थस्वरे भवति। यामदिष्ठयाईया। या-शब्दो मन्द्रस्वरो भवतीत्यर्थः। सूष्वाणासाः (ग्रा.५३३) इति सूष्वापर्व भवति ॥ २९ ॥

मन्ते राधाया अन्त्यानि वर्धन्ते ॥ ३० ॥

वि.&भा. समन्ते वसोराधाया अन्त्यानि त्रीण्यक्षराणि वर्धन्ते ॥ ३० ॥

दी. पुनानस्सोमधारया (ऊ. सं. २२४) इत्यादिसमन्ते वसोराधायाः अन्त्यानि त्रीण्यक्षराणि वर्धन्ते। स्यसाइदासा। अत्र अन्त्यानि त्रीण्यक्षराणि वृद्धानि। त्वन्ना२३श्चित्रऊत्या (ग्रा. १. ४- ४१. १) इति साम्नि वसोरधा इति पर्व भवति ॥

स्पत्योत्तरयोश्च ॥ ३१ ॥

वि.&भा. दाशस्पत्ये उत्तरयोः स्तोत्रीययोः वसोराधाया अन्त्यानि त्रीण्यक्षराणि वर्धन्ते ॥ ३१ ॥

दी. इन्दुरोहोवाहाईया (ऊ. द. ९५) इति दाशस्पत्ये उत्तरयोः स्तोत्रीययोः वसोराधायाः अन्त्यानि त्रीण्यक्षराणि वर्धन्ते। द्वितीयायां पवान्ताआउ। अत्र त्रीणि अक्षराणि वृद्धानि। तृतीयायां देवोदाइवा। अत्र त्रीण्यक्षराणि वृद्धानि ॥ ३१ ॥

तिरोवत्यां योनिवत् ॥ ३२ ॥

वि.&भा. तिरो-शब्दवत्यां वसोराधायां योनिवद् वृद्धिः ॥ ३२ ॥

---

3. L[1] मन्द्रस्वरे for मन्द्रस्वरो

4. E after भवति adds: कौत्से चेत सर्ववर्णानां चतुर्थस्वरे प्राप्ते अन्त्यवर्णस्य याशब्दस्य पुनर्मन्द्र-स्वरविधानम् ॥

6. PV[2] after वर्धन्ते add: नऊतावसोराधास्य साईदासा

17. PB[4]L[2] वृद्धावृद्धं॰ भवति, V[2] वृद्धावृद्धानि भवन्ति, A[1] वृद्धं भवति for वृद्धिः M[1-2] after वृद्धिः add: मध्ये द्व्यक्षरमित्यर्थः

दी. दाशस्पत्ये (ऊ. द. ९५) **तिरो**-शब्दवत्यां **वसोराधायां योनिवत्** मध्यमाक्षरद्वयं वृद्धं भवति । **तिरोरोम** । एवमक्षरद्वयं योनियद् धृद्धम् । योनौ इन्द्राइसोमः । (ग्रा. १५. ७. ५४०. ३) एवम् ॥ ३२ ॥

आद्यायामन्ते सर्वासु ॥ ३३ ॥

वि. **सर्वासु** स्तोत्रीयासु **आद्यायां** बसोराधायामन्ते द्वे अक्षरे वर्धेते । **पवते गोनियोधाउ** (ऊ. द. ९५) ॥ ३३ ॥

भा. **आद्यायां** वसोराधायामन्त्ये द्वे अक्षरे **सर्वासु** स्तोत्रीयासु वर्धेते ॥ ३३ ॥

दी. दाशस्पत्ये (ऊ. द. ९५) आद्यायां वसोराधायाम् **अन्ते** द्वे अक्षरे वर्धेते । **सर्वासु** स्तोत्रीयासु । प्रथमायां **पवतेगोनियोधाउ** । अत्रान्ते अक्षरद्वयं वृद्धम् । द्वितीयायां **यामधुवाप्रचनाउ** । अत्रान्ते अक्षरद्वयं वृद्धम् । तृतीयायां **निपवतेपुनानाउ** । अत्रान्ते अक्षरद्वयं वृद्धम् ॥ ३३ ॥

घृतनिधनाद्यायां च ॥ ३४ ॥

वि. **घृतनिधनाद्यायां** स्तोत्रीयायामाद्यायां वसोराधायामन्ते द्वे द्वे अक्षरे वर्धेते । **सुतऽराधा** ॥ ३४ ॥

भा. **घृतनिधनाद्ययां च** स्तोत्रीयायां किम्? अधिकारादाद्यायां वसोराधायामन्त्ये द्वे अक्षरे वर्धेते ॥ ३४ ॥

दी. **इदऽह्यनूऽ३ओजसा** (ऊ. द. २७) इति **घृतश्चुन्निधने** प्रतिस्तोत्रीयं पञ्च वसोराधाः सन्ति । प्रथमायां स्तोत्रीयायामाद्यायाः वसोरधायाः अन्ते द्वे अक्षरे बर्धेते । **सुतऽराधा** । अत्रान्ते अक्षरद्वयं वृद्धम् ॥ ३४ ॥

---

7. $A^{2}M^{1-2}$ IS^{1-2} द्वे द्वे for द्वे; A^{2} om. पवते...वर्धते(L.16)

18. L^{1} My^{1-3} om. आद्यायाः

शूवत्यां मन्तवत् ॥ ३५ ॥

वि.&भा. शू-शब्दवत्यां वसोराधायां मन्तवदन्त्यानि त्रीण्यक्षराणि वर्धन्ते।
२१ २र
प्रबाहूशू ॥ ५३ ॥

२ २र
दी. इदँह्यनूऽ२ओजसा (ऊ. द. २७) इति घृतश्चुन्निधने तृतीयायां शू-शब्दवत्यां वसोराधायामन्त्यानि त्रीण्यक्षराणि वर्धन्ते। प्रबाहूशू। अत्रान्ते अक्षरत्रयं वृद्धम्। वसोराधाया: समन्तवत ॥ ३५ ॥

दान्त्ये होपरे द्वे ॥ ३६ ॥

२ १
वि. पादान्त्ये हो-शब्दपरे अक्षरे परतो द्वे अक्षरे वर्धेते घृतनिधने। वसो-
२ १ २र ३र २
राधानां पातौ। होवाऽ३हाइ ॥ ३६ ॥

भा. पादान्ते अक्षरे हो-शब्दपरे प्रत्यये द्वे अक्षरे वर्धेते ॥ ३६ ॥

दी. होशब्दपरे पादान्त्ये अक्षरे प्रत्यये पूर्वाक्षरयो: वृद्धि:। स्वगाईर्वाणौ। अत्र गिर्वि एतयोर्वृद्धि:। पादान्त्ये प्रत्यये सति ॥ ३६ ॥

शावि च ॥ ३७ ॥

वि. अपदान्तेऽपि होशब्दपरे शौ-शब्दे प्रत्यये द्वे अक्षरे वर्धेते। ग्रहणात्। प्रबाहूशौ (ऊ. द. २७) ॥ ३७ ॥

भा. अपदान्तीयेऽपि शावि शौशब्दे होशब्दपरे प्रत्यये द्वे अक्षरे वर्धेते। ग्रहणात् ॥ ३७ ॥

---

2. वि. शूकार° for शूशब्द°; वि. om. अन्त्यानि

3. भा. om. प्रबाहूशू

4. My[23] om. इदं...इति

7. A[2]M[1-2] दान्ते, T पदान्ते for दान्त्ये, दी. removes द्वे to the following sutra

8. A[2]M[1-2] पादान्ते, T पदान्ते for पादान्त्ये

10. V[2]B[4] पदान्ते for पादान्ते

12. My[1] पादान्ते for पादान्त्ये

14. A[2] अपदान्ते T अपादान्तो for अपादान्ते

दी. (द्वे शावि च) अपदान्तेऽपि शावि शौ परे सति पूर्वे द्वे अक्षरे वृद्धे भवतः । प्रवाहूशौ (ऊ.द.२७) । अत्र बाहू एतयोर्वृद्धिः । अपदान्ते शौ परे सति ॥३७॥

ऊनायामाद्यं संकर्षात् ॥ ३८ ॥

वि. &भा. ऊनायां वसोराधायामाद्यमक्षरं वर्धते । संकर्षाद्धेतोः । प्राइन्द्रत्र (ऊ. द. २७) ॥ ३८ ॥

दी. चतुरक्षरत ऊनायां वसोराधायामाद्यमक्षरं वर्धते । संकर्षात् । अक्षरयोरेकीभावात् इति हेतोः तृतीयायां प्राइन्द्रत्र (ऊ. द. २७) । अत्र आद्यमक्षरं वृद्धम् ॥ ३८ ॥

द्वितयिमन्यस्याम् ॥ ३९ ॥

वि. उक्तैर्विशेषैर्या न गृहीता तस्यां वसोराधायां द्वितीयं वर्धते ॥ ३९ ॥

भा. उक्तैर्लक्षणैरन्यस्य वसोराधायां द्वितीयमक्षरं वर्धते ॥ ३९ ॥

दी. पूर्वोक्तैर्विशेषैरन्यस्यां वसोराधायां द्वितीयमक्षरं वर्धते । पिबातुवौ (ऊ. द.२७) । अत्र द्वितीयाक्षरस्य वृद्धिः । एवमादीनि ॥ ३९ ॥

वारे च नौ ॥ ४० ॥

वि.&भा. वारवन्तीये च योनौ वसोराधायां द्वितीयमक्षरं वर्धते । अग्नाइन्नमाऽ२३४ । औहोवावा ॥ ४० ॥

---

1. E अपादन्त्ये for अपदान्ते; E after शौ adds: इत्यक्षरे
4. A² संकर्ष for अक्षरं; T om. संकर्षाद्धेतोः
7. E after हेतोः adds: अत्र प्रेशब्दस्य आइभावः । प्रशब्दस्यातालव्यात् अनन्तरं संकर्षात् तालव्यम्; R अद्याक्षरस्य वृद्धिः for अद्यमक्षरं वृद्धम्
9. K. यानि for या न; M¹M² यान्यभिहिता for या न गृहीता A²M¹M²S¹T after वर्धते add: उदाहरणमुत्तरसूत्रे
10. P उक्तलक्षणयां for उक्तैर्लक्षणैः
11. EL¹ before पिबातुवौ add: पिबातुव । अत्र द्वितीयाक्षरस्य वृद्धिः
14. वि. om. अक्षरं; भा. om. अग्नाइ...होवा

दी. अग्नन्नत्राऔहोहाइ (ग्रा. १.२.१७.३) इति वारवन्तीये योनौ वसोराधाया द्वितीयमक्षरं वर्धते । अग्नाइन्नमाऽ३४ । औहोवा । अत्र द्वितीयाक्षरस्य वृद्धिः । ऊहे निषेधः । द्वितीयायां गामासुशाऽ३४ । औहोवा । तृतीयायां याद्याऽ३४ । औहोवा । अत्र द्वितीयाक्षरस्य वृद्धिनिषेधः ॥ ४० ॥

राहे नौ तृतीये दे वृधान्तातरुताम् ॥ ४१ ॥

वि.&भा. वाराहे योनौ (ग्रा. १५.६.५२४.४) तृतीये पादे वृधन्तातरुतामापद्यते । अन्यत्र निवृत्त्यर्थम् ॥ ४१ ॥

दी. हाउहाउ । हुप् । प्रकावियाम् (ग्र. १५.६.५२४.४) इति वाराहे योनौ तृतीये पादे वृधन्ताम् इति पर्व तरुतामापद्यते । ऊहे निवृत्त्यर्थम् । शुचिवाऽ३ । तरुताऽ३ । एवं तरुता भवति । योनाविति वचनादूहे निषिध्यते ॥ ४१ ॥

श्री वासिष्ठ उतद्विषा पतिःकवीम् ॥ ४२ ॥

वि &भा. श्रीणन्तोगोभिर्वासिष्ठे (ऊ. द. १२७) उतद्विषा पतिःकवीमापद्यते । इन्द्रक्रतुम् (ग्रा. ७.३.२५९.२) इति यस्य योनिः ॥ ४२ ॥

दी. श्रीणन्तोगोभिरुत्तराम् (ऊ. द. १८७) इति वासिष्ठे उताद्वाऽ१इषाऽ२ः इति पर्व पतिःकवीमापद्यते । वमादाऽ१नाऽ२ः । पताईःकाऽ१वीऽ२ः इति पर्व पतिः कवीमापद्यते । योनौ इन्द्रक्रतूऽ५न्नआभरा (ग्रा. ७.३.२५९.२) इति वासिष्ठे तयामाऽ१नीऽ२ इति उतद्विषापर्व भवति ॥ ४२ ॥

अयं दासोत्तरयोस्तृतीयोच्चाच्छतोत्पत्तिः ॥ ४३ ॥

1. L[1]My[2-3] वारवन्तीयोत्तरे for वारवन्तीये

7. A[1]T निवृत्त्यर्थः M[1-3] निवृत्त इत्यर्थः for निवृत्त्यर्थम्

16. L[1] कवी भवति for कवीमापद्यते

वि.&भा. अयंत इन्द्रसोम (ऊ. द. २२) इति दैवोदासोत्तरयोः स्तोत्रीययोः तृतीयोच्चात् परस्तात् शतोत्पत्तिर्भवति । जनाऽ३ ॥ ४३ ॥

दी. अयन्तइन्द्रसोऽ४मः (ऊ. द. २३) इति रात्रिदैवोदासे तृतीयोच्चात् तृतीयस्वरपर्यन्तम् उच्चस्वरो यस्य तस्मात् शतापर्वेण उत्पत्तिर्भवति । द्वितीयायां जनाऽ३ । तृतीयायां नपाऽ३त् । एव शतापर्वोत्पत्तिः । शताक्राऽ२३४तूम् । अत्र शता इत्यक्षरद्वयस्य ग्रहणम् ॥ ४३ ॥

ष्कले जास्वर उपाशिक्षायां प्राक् प्रहूयसायाः ॥ ४४ ॥

वि. उपशिक्षायां पौष्कले (ऊ. प्रा. ८१४) प्रहूयसायाः प्राक् जास्वरो भवति धाइ ॥ ४४ ॥

भा. पौष्कले जास्वरोत्पत्तिर्भवति । उपशिक्षायामृचि (ऊ. प्रा ८१४) प्राक् प्रहूयसायाः ॥ ४४ ॥

दी. उपाशीऽ३क्षाय । तस्थूऽ२३४षाः (ऊ. प्रा. ८१४) इति पौष्कले प्रहूयसायाः पर्वणः प्राक् जास्वरो भवति । धाइ । हीशात्राऽ२३४बाइ । अत्र धाइ इति जास्वरः । उदुत्यम् । ओहाइ । जा (ग्रा. १.३.३१.१) । इति साम्नि जास्वरो भवति । प्रतित्याऽ२३श्वारुमध्वराम् (ग्रा. १.२.१६.१) इति साम्नि प्रहूयाऽ२३४साइ इति प्रहूयसापर्व भवति ॥ ४४ ॥

क्रेष्वायास्ये पुनान इत्यत्र सोमँसोँदे वृद्धे ॥ ४५ ॥

वि. साद्यस्क्रायास्ये सोमंसोरायां सो-दे-शब्दौ वृद्धौ भवतः । उत्सोदेवाऽ३१ः ॥ ४५ ॥

भा. साद्यःक्रैष्वायास्ये पुनानः सोमायां (ऊ.द.४०) पुनानःसोम उत्सोशब्द-देशब्दौवृद्धौ भवतः ॥ ४५ ॥

---

2. P चान्यत्रीर for तृतीयोच्चात्...त्पत्तिर्

4. My[1-3] उच्चात् पर for उच्चीस्वरो यस्य तस्मात्.

दी. साद्यस्क्रेषु यज्ञेषु **पुनानःसोमे** (ग्रा. १४.५.५११.५)त्यस्यामैडमायास्ये योनौ आइपुना । **नास्सो** (ऊ. द. ४०) इत्यैडमायास्ये । **उत्सोदेवाऽ३१ः** अत्र त्सो शब्द-दे-शब्दौ वृद्धौ भवतः । ऊहे निषेधः । **प्रात्नँसधाऽ३१** । अत्र त्नंः-स-शब्दौ अवृद्धौ भवतः । एवमादीनि ॥ ४५ ॥

धौ च ॥ ४६ ॥

वि. प्रतिहारे **धौ**-शब्दश्च वृद्धो भवति । तस्मिन्नेव ॥ ४६ ॥

भा. धौशब्दश्च तस्मिन्नेव वृद्धो भवति ॥ ४६ ॥

दी. आइपुना (४. द. ४०) इत्यैडमायास्ये तृतीयायां **नृभिर्द्धौधाऽ३१ः**। अत्र **धौ**-शब्दो वृद्धः ॥ ४६ ॥

अथ साद्यस्क्रेष्वायास्ये विशेषमाह—

इन्द्रमच्छायां द्व्यक्षरायामादिः ॥ ४७ ॥

वि.&भा. साद्यस्क एवायास्ये **इन्द्रमच्छायां** (ऊ. ए. ३९०) **द्व्यक्षरायां** सोमंसोमायामादिर्वर्धते । **सोमंसोमाऽ३१** इति **आयाह्ययमिन्द्वायाम्** (ग्रा. ११.६. ४०२.३) ॥ ४७ ॥

दी. **आइन्द्राम्** (ऊ. ए. ३९०) इति साद्यस्क्रायास्ये **द्व्यक्षरायां** सोमायामादिर्वर्धते । श्रूष्टाऽ३१इ इति द्व्यक्षरा सोमा । **आयाह्ययमिन्दाऽ६वाइ** (ग्रा. ११.६. ४०२.३) इति साम्नि **सोम सोमाऽ३१** इति सोमपर्व भवति । अत्रोत्तरा द्व्यक्षरा सोमा गृह्यते ॥ ४७ ॥

मीढे मोच्चे नीचम् ॥ ४८ ॥

---

13. A[2] भा. om. सोमंसोमाऽ३१....इन्द्वायाम् ; M[1]-[2]TS[1] सोमंसोमपतेपिबेतिपर्वग्रहणन् for सोमंसोमाऽ३१ इति

19. A[2] om. मीढे...आपद्यते; M[1]-[2]T मोच्चदिः, S[1] मोच; B[4]PV[2]A[1]L[2] मोचं for मोच्चे

वि. **पौरुमीढे प्रथमोच्चे** पर्वणि **नीचस्वरमापद्यते । त्वमङ्गप्रशंसिष** (ऊ. स. ७१८) उद्गीथे ॥ ४८ ॥

भा. **पौरुमीढे** प्रथमोच्चादि नीचं स्वरमापद्यते । यथा **त्वमङ्गप्रश२ँसेति** (ऊ. स. ७१८) ॥ ४८ ॥

दी. **म** तुवे । गप्राऽ३४ औहोवा (ऊ. स. ७१८) इति **पौरुमीढे** योनौ प्रथमतः [यद्] उच्चे अक्षरे, ऊहे तन्नीचं भवति । देवःशवि । अत्र दे-शब्दो नीचः । एवमादीनि ॥ ४८ ॥

द्व्युच्चं पितापवमानामाशिवासश्च ॥ ४९ ॥

वि. **पितापुत्रे । पवमाना माशिवासो** । एतेषु प्रथमोच्चे पर्वणि अक्षरद्वयमुच्चं भवति ॥ ४९ ॥

भा. **पितापुत्रे** (ऊ. सं. ३६१) । **पवमानाभ्यर्षसि** (ऊ. सं. ३५४) । **माशिवासो अवक्रमुः** (ऊ. सं. ३६१) । एतेषु प्रथमोच्चादेर्नीचीभावप्रतिषेधः ॥ ४९ ॥

दी. इन्द्रक । तुन्नाऽ३४औहोवा (ऊ. सं. ३६१) इति पौरुमीढे **पितापुत्रे** । अत्रादावक्षरद्वयमुच्चं भवति । तृतीयायां **माशिवासः** । अत्रादावक्षरद्वयमुच्चं भवति । **पवभा । नाभाऽ३४औहोवा** (ऊ. सं ३५४) इति पौरुमीढे । **पवमाना** । अत्रादावक्षरद्वयमुच्चं भवति ॥ ४९ ॥

---

1. $M^{1-2}TS^{1}$ प्रथमोच्चादिः for प्रथमोच्चे पर्वणि
2. $A^{2}M^{1-2}TS^{1}$ उद्गीथादौ for उद्गीथे
5. $EM^{4}S^{2}$ after पौरुमीढे add: गाथाभिः शी
9. M^{1-2} om. पिता ...शिवासो; $A^{2}TS^{1}$ प्रथमोच्चादेर्नीचीभावप्रतिषेधः, M^{1-2} प्रथमोच्चादेर्भावप्रतिषेधः for प्रथमोच्चे...भवति
11. भा. before पिता...adds: अकारः प्रतिषेधार्थः but in the sutra अ,....the prohibitive particle is not fonnd. We have; therefore; removed it
13. $L^{1}My^{2-3}$ after ॰पुत्रे add: पाइतापुत्र
15. E om. पावमा....भवति ॥

जयसितश्यैतेषु शपेव[ाः] चतुर्थे ववपा मन्द्रे ॥ ५० ॥

वि. **संजयगायत्र्यासितेषु** श । प । इव । इत्येते शब्दाश्चतुर्थस्वरे भवन्ति । व । व । प । इत्येते शब्दास्त्रयो **मन्द्रे** यथाक्रमेण भवन्ति । **आतेअग्नान्त्यायां** (ऊ. द. ९६) **पवस्वदेवा**-(ऊ. द. १६०) न्त्यायाम् **इमाउत्वान्त्यायां** (ऊ. ए. ४६४) च ॥ ५० ॥

इति फुल्लविवरणे पञ्चमप्रपाठकस्य चतुर्थः खण्डः ॥ ४ ॥

भा. **संजयगायत्र्यासितश्यैतेषु** सामसु श । प । इव । ा । एते त्रयः शब्दाः यथाक्रमेण चतुर्थे स्वरे भवन्ति । व । व । प । एते त्रयः पूर्ववन्मन्द्रे भवन्ति । **आतेअग्न**-(ऊ. द. ९६) तृतीयायां संजये । **पवस्वदेवा**-(ऊ. द. १६०) **तृतीयायां** गायत्र्यासिते । **इमाउत्वा**-(ऊ. ए. ४६४) तृतीयायां श्यैते ॥ ५० ॥

इति पुष्पभूत्रभाष्ये पञ्चमस्य चतुर्थी कण्डिका ॥ ४ ॥

दी. **आतेअग्नइधी । माऽ३हाइ** (ऊ. द. ९६) इति **संजये** तृतीयायाम् **उतोन उत्पुपूर्या उक्थेषुशवसा** । अत्र चतुर्थे स्वरे श-शब्दो भवति । व-शब्दो मन्द्रे स्वरे भवति । **पवस्वदेवआ । इयाऽ४४३ईऽ३४या** (ऊ. द. १६०) इति **गायत्र्यासिते** तृतीयायाम् **अपघ्नन्पवसे** । अत्र चतुर्थे स्वरे प-शब्दो भवति । व-शब्दो मन्द्रे स्वरे भवति । **इमाउत्वापुरू । वसाऽ३४औहोवा** (ऊ. ए. ४६४) इति श्यैते तृतीयायां **समुद्रइवप** । अत्र चतुर्थे स्वरे **इव**-शब्दो भवति । **प**-शब्दो मन्द्रे स्वरे भवति ॥ ५० ॥

। इति फुल्लदीपे नवमप्रपाठकस्य चतुर्थः खण्डः ॥ ४ ॥

---

1. KS[2] पवपा, My[2] ववसा for ववपा

2. A[2]S[2] स्वराः, T स्वरेः for स्वरे; T भवति for भवन्ति

4. S[1] उत्वायां for उत्वान्त्यायां

पञ्चमः खण्डः

प्रत्युत्क्रमः

आदिद्वोदा तस्या हृदुक्थरूपयोर्द्वितीयं घं प्रत्युत्क्रान्तं प्राप्तं **चाभिगीतम्** ॥ १ ॥

वि. आदिद्वोदा आवृत् । तस्या । बार्हदुक्थवैरूपयोः साम्नोः द्वितीयमक्षरं दीर्घं प्रत्युत्क्रान्तं भवति । योनिवद् बार्हदुक्थेऽभिगानं प्राप्तं प्रत्युत्क्रमप्राप्तं च । वैरूपे ह्रस्वमक्षरं योनिवदभिगीयते । परीतोषि-(ऊ. सं. ३६९) तवाहंसोमा- (ऊ. स. ७७४)दिषु बार्हदुक्थे योनिवद्भावाद्दीर्घस्याप्यभिगीतं प्राप्तम् । ह्रस्वस्याप्युत्क्रमः । अध्वर्यो अद्रिभिः (ऊ. द. १४०) । उच्चाते (ऊ. सं. २५४) वैरूपे दीर्घं प्रत्युत्क्रम्यते । ह्रस्वमभिगीयते । योनिवद्भावादप्राप्तं प्राप्तं च ॥ १ ॥

भा. आदिद्वोदा आवृत् । तस्या बार्हदुक्थवैरूपयोः साम्नोर्द्वितीयमक्षरं दीर्घं प्रत्युक्तं भवति । योनिवद्गानं प्राप्तम् । प्रत्युत्क्रमप्राप्तं च । ह्रस्वमक्षरं योनिवदभिगीयते । परीतोषि-(ऊ. सं. ३६९) तृतीयायां तवाहंसोमादिषु (ऊ. स. ७७४) च । बार्हदुक्थे । अध्वर्यो अद्रिभिः (ऊ. द. १४०) । उच्चातेजा (ऊ. सं. २५४) वैरूपे ॥

दी. देवोऽ३वोऽ३द्रविणोदाः (ग्रा. २. ६. ५५. १) इति साम्नि आदिद्वोदेऽ२ इति पर्वणि । परीतोषिञ्च । ताऽ२सुताम् (ऊ. सं. ३६९) इति बार्हदुक्थे तस्याः आदिद्वोदायाः द्वितीयं दीर्घमक्षरं प्रत्युत्क्रान्तं प्रथमस्वरं प्रतिक्रामति । सूतेऽ१चाइत्वाऽ२ । अत्र दीर्घस्य द्वितीयाक्षरस्य प्रत्युत्क्रमः । दितीयस्य ह्रस्वाक्षरस्य योनिवद्गानं प्राप्तम् । योनिवदभिगीतं भवति । दाधान्वाऽयाऽ२ः । अत्र ह्रस्वस्य दितीयाक्षरस्य अभिगीतः । एवमादीनि । अध्वर्योऽ३४आ (ऊ. द. १४०) इति वैरूपे दितीयस्य दीर्घाक्षरस्य प्रत्युत्क्रमो भवति । त्वाआऽ१नायाऽ२ । अत्र दीर्घस्य

---

5. T अव्रतः, S[1] अव्रत्तः for आवृत्; S[1] after तस्याः adds: आदिद्वोदायाः; A[2]M[1-3] तस्य for तस्याः

7. M[1-2] om. परीतोषि....अभिगियते; (L-10)

10. A[2]TS[1] om. ह्रस्वमभिगीयते

20. EM[4]S[2] द्वितीयस्य ह्रस्वा० for ह्रस्वस्य द्वितीया०

द्वितीयाक्षरस्य प्रत्युत्क्रमो भवति । तृतीयायां यावन्त्राइणाऽ२इ । अत्र **ह्रस्वस्य** द्वितीयाक्षरस्य अभिगीतो भवति ॥ १ ॥

आभीशवगतश्यैताजिगोत्तरानित्रस्वारयामैषिरवाम्रवार्षाहरवाचः-सामहत्कप्रियेषु ॥ २ ॥

वि. योनिवद्भावादप्राप्तम् । प्राप्तमप्यभिगानप्राप्तमपि दीर्घं प्रत्युत्क्रामति । प्रत्युत्क्रमप्राप्तमपि ह्रस्वमभिगीयते । एतेषु सामसु आभीशवे **तवाहंसोमादिषु** योनिवदभिगानप्राप्तं प्रत्युत्क्रमति । **पुनापरीतयोर्द्वैगते** योनिवत् प्रत्युत्क्रमप्राप्तमभिगीयते । **श्यैता** जिगोत्तरजनित्रस्वारयामैषिरवाम्रवार्षाहरवाचःसामवृहत्कवसिष्ठस्यप्रियेष्ट पूर्ववत् ॥ २ ॥

भा. आभीशवादिषु यदधिकृतं तद्भवति । किंचाधिकृतं दीर्घमभिगीतं प्राप्तं प्रत्युत्क्रामति । ह्रस्वं च प्रत्युत्क्रमप्राप्तं योनिवद्भावादभिगीयते । आभीशवे (ऊ. द. ७०) **तवाहं सोमादिषु** । योनिवदभिगानप्राप्तं प्रत्युत्क्र मति । **पुना** । (ऊ. स. ७९५)**परीतयो**- (ऊ. अ. ६१९) द्वैगते योनिवत्प्रत्युत्क्रमप्राप्तमभिगीयते । **पुरोजित्युत्तमायामुत्तरे** जनित्रे अभिगानप्राप्तं प्रत्युत्क्रमति । **वसिष्ठप्रिये** (ऊ. द. ८१) स्वासूत्तमायाम् अभिगीतं प्राप्तं प्रत्युत्क्रमति । बृहत्के **त्वँह्याङ्गदैव्यायाम्** (ऊ. द. ७६) उत्तरयोरभिगानप्राप्तस्य प्रत्युत्क्रमः । **तदिदासो**-(ऊ. ए. ५२६)**त्तरयोरभिगानप्राप्तस्य** प्रत्युत्क्रमः । आजिगे **उद्वा** (ऊ. द. २०९) मध्यमायां प्रत्युत्क्रामप्राप्तस्याभिगानम् । **प्रो आयासां** (ग्रा. १६. ९. ५५७. ५) यत्स्वारयामं तस्मिन् यदभिगीयते अक्षरं तदूहगीतावप्यृगन्तरे तथैव प्राप्नोति यच्च प्रत्युत्क्रान्तं तदपि तथैव योनिवद्भावात् । एवं प्राप्तम् । एतस्माद्वचनात् । **वृषामती** (ऊ. द, ५०) यामे दीर्घमभिगानं प्रत्युत्क्रमति । ह्रस्वं च प्रत्युत्क्रमप्राप्तममिगीयते । **अभिद्युम्न** । **यामैषिर** (ऊ. द. १६१)त्रैतयो (?वाचः साम्नो) योनिवदभिगानप्राप्तस्य प्रत्युत्क्रमः ।

---

6. A[2]T om. अभि
7. प्रत्युद्गान° for प्रत्युत्क्रम°
15. B[4] after प्रत्युत्क्रम. adds: व्यैते
20. My2 त्रैतयो: This evidently wrong. On अभिद्युम्न° only 3 gānas, viz ऐषिर, सफ & वाचःसाम are sung and not Therfore, the reading should be वाचः साम्नः ।

यस्तेमदायां (र. ए. ७४) वार्षाहरे योनिवद्भावप्राप्तस्याभिगानम् । **सोमउष्वा**-(ऊ. द. ८७) वाभ्रे अभिगानप्राप्तस्य प्रत्युत्क्रमः । **अभिग्र** (ऊ. अ. ५६६) वाचःसाम्नि योनिवद्भावादभिगानप्राप्तस्य दीर्घत्वं प्रत्युत्क्रमः ॥ २ ॥

दी. आभीशवादिषु सामसु आदिद्वोदाया द्वितीयमक्षरं दीर्घं योनिवदभिगीतप्राप्तं प्रत्युत्क्रामति । द्वितीयमक्षरं ह्रस्वं योनिवत्प्रत्युत्क्रमप्राप्तमभिगीतं भवति । तद्यहं-**सोमरारणए** । ए (ऊ. द. ७०) इत्याभीशवोत्तरे णित्रश्रोनिचरन्ताइम्याऽ१मवा । अत्र योनिवदभिगीतप्राप्तं द्वितीयं दीर्घमक्षरं प्रत्युत्क्रामति । तृतीयायां तपन्तमतिसूरायं पारः । अत्र द्वितीयमक्षरं ह्रस्वं योनिवदभिगीतं भवति । अभिसोऽ३मास आयवाः (ऊ. द. १५०) इति द्वैगते **मित्रस्यवरुणस्याधर्माणा**ऽ२ । अत्र योनिवत् प्रत्युत्क्रमप्राप्तमभिगीतं भवति । **तदिदासभुव** (ऊ. ए. ५२६) इति श्यैते द्वितीयायां सन्दाधाऽ१ताऽ२३४इ । अत्र योतिवदभिगीतप्राप्तं प्रत्युत्क्रामति । उच्चातेजात । मान्धासाः (ऊ. स. २०९) इत्याजिगे द्वितीयायां **मारद्भाऽ२३याः** । अत्र योनिवत् प्रत्युत्क्रमप्राप्तमभिगीतं भवति । **तंवोदस्ममृती** । **पहाऽ३म्** । (ऊ. अ. ५४२) इत्युत्तरे जतित्रे द्वितियायां **भिर्नावाऽ१माहाऽ२३४इ** । अत्र योनीवदभिगीतप्राप्तं प्रत्युत्क्रामति । आऽ२इ । इया । **वृषामताइ नाऽ१म् पवताऽ२३** (ऊ. द. ५०) इति स्वारयामे **प्राणासिन्धूनाऽ१म्कलशाऽ२३म्** । अत्र योनिवदभिगीतप्रातं प्रत्युत्क्रामति । अभिद्युम्नंबृहद्याऽ२शाः (ऊ. द. १६१) इत्यैषिरे **वादाऽ१इवायूऽ२म्** । अत्र योनिवदभिगीतप्राप्तं प्रत्युत्क्रामति । द्वितीयायां **सूदक्षाचा**ऽ२ । अत्र योनिवत् प्रत्युत्क्रमप्राप्तम् अभिगीतं भवति । **सोम उष्वाणस्सो** । **हा२हाऽ३इ** । (ऊ. द. ८७) इति वाभ्रे **आवाऽ१इनाऽ२म्** । अत्र

---

10. L[1] My[2] trans. तदिदस...जातमन्धा (L. 11) after वृषाम० (L. 15) and then om. ०सा इत्याजिगे....प्रत्युत्क्रम प्राप्तम्

14. R My[2] after ०क्रामति । ins. इमनीऽ२३ । द्रसुत पिब । इति वासिष्ठप्रिये तृतीयायां निचऽ३न्ना-ततानाऽ२ । अत्र योनि वदभि गीप्राप्त प्रत्युत्क्रमः ।

15. My[2] after वृषाम० ins. अभिगीतं भवति । and thereafter adds: तदिदास्य भुव...मन्ध

योनिवदभिगीतप्राप्तं प्रत्युत्क्रामति । **यस्तेमदोऽहोहाइ** (र. ए. ७४) इति वार्षाहरे स्वाअन्धासा । अत्र योनिवत प्रत्युत्क्रमप्राप्तम् अभिगीतं भवति । **दाइवा१ वाइरा२** । अत्र योनिवदभिगीतप्राप्तं प्रत्युत्क्रामति । **अभिद्युम्नाम्** । **होइ** (ऊ. अ.-५६६) इति वाचस्साम्नि **दाइदी१ हाइदे२** । अत्र योनिवदभिगीतप्राप्तं प्रत्युत्क्रामति । **तुवँही** । **अङ्गदेवा२३या** (ऊ. द. ७६) इति बृहत्के द्वितीयायाम् **आपो१र्णूता२** । अत्र योनिवदभिगीतप्राप्तं प्रत्युत्क्रामति । **इममी२३** । **द्रसुतंपिब** (ऊ. द. ८१) इति वसिष्ठप्रिये तृतीयायां **निचा३न्नावी१ताना२** । अत्र योनिवदभिगीतप्राप्तं प्रत्युत्क्रामति ॥ २ ॥

अगृरमिस्निर्दन्वन्नयोऽक्षाश्च ॥ ३ ॥

वि. उत्सर्गप्राप्तानामेतेषां ग्रहणादपवादः । **प्रसोमदेवा** (ऊ. स. ६९०) द्यान्त्ययोर्द्वैगते गृ-शब्द र-शब्दौ ह्रस्वावपि प्रत्युत्क्राम्येते । **यस्तेमदोत्तरयोर्वार्षाहरे** (र. ए. ७४) मि-स्निर्-दन्-शब्दाः । **अभिद्युम्नोत्तमायां** वाचस्सामै-(ऊ. द. १६१) षिरयोः (ऊ. अ. ५६६) न्वन् शब्दा पःशब्दौ । **सोमउप्वोत्तमायां** वाभ्रे (उ. द. ८७) अक्षाः-शब्दस्य ग्रहणात् प्रत्युत्क्रमः ॥ ३ ॥

भा. अकारः प्रतिषेधार्थः । उत्सर्गप्राप्तानामेतेषां ग्रहणान्न भावः । **प्रसोमदेवा**-(ऊ. स. ६९०) द्यान्त्ययोः द्वैगते गृशब्दरशब्दौ । **यस्तेमदोत्तरयोः** वार्षाहरे (र. ए. ७४) मिशब्दस्निःशब्ददंशब्दाः । **अभिद्युम्नोत्तमायामैषिरे** (ऊ. द. १६१) वाचःसाम्नि (ऊ. अ. ५६६) न्वशब्दः । ऐषिरे अपःशब्दः । **सोमउप्वोत्तमायां** वाभ्रे अक्षःशब्दस्य ग्रहणात् प्रत्युत्क्रमः ॥ ३ ॥

---

10. A^2TS^1 उत्सजर्न for उत्सर्ग

12. $A^3M^{1-2}TS^1$ साम्नि न्वन् शब्दः for सामैषिरयोः न्वन्शब्दापःशब्दौ

15. V^2 गहणात् भावः, B^4 ग्रहगानुभावः for ग्रहणान्न भावः

17. PV^2B^1 ०शब्दौ दंशब्दानां for ०शब्ददंशब्दाः

दी' अकारः प्रतीषेधे। उत्सर्गप्राप्तानां गृरादीनां ग्रहणात् पूर्वोक्तं न भवति। प्रसोमाऽ३देववीताइ (ऊ स. ६९०) इति द्वैगते प्रथमायां पयसामदिरोनजागऽ१वीऽ२ः। अत्र ह्रस्वस्य गृ-शब्दस्याभिगीतं न भवति। तृतीयायां हिन्वन्त्यपसो यथारा१थाऽ२म्। अत्र ह्रस्वस्य र-शब्दस्याभिगीतं न भवति। यस्तेमदोहोहाइ (र. ए. ७४) इति वार्षाहरोत्तरे द्वितीयायाम् आमाऽ१ ३त्रायाऽ२म्। अत्र ह्रस्वस्य त्रि-शब्दस्य अभिगीतं न भवति। द्वितीयायामेव। सास्नाऽ१इर्वाजाऽ२म्। अत्र ह्रस्वस्य स्नि-शब्दस्याभिगीतं न भवति। तृतीयायां साइदाऽ१स्छयाइनाऽ२ः। अत्र ह्रस्वस्य दं-शब्दस्य अभिगीतं न भवति। अभिद्युम्नं बृहद्याऽ३शाः (ऊ. द. १६१) इत्यैषिरे तृतीयायां जाइन्वाऽ१नुगावाऽ२३इ। अत्र ह्रस्वस्य न्व-शब्दस्य अभिगीतं न भवति। तृतीयायामेव। ताइमाऽ१पाऽ२ः। अत्राप:-शब्दस्याकारस्याभिगीतं न भवति। अभिद्युम्नाम् (ऊ. अ. ५६६) इति वाचःसाम्नि तृतीयायां जाइन्वाऽ१म् गावाऽ२३इ। अत्र ह्रस्वस्य न्व-शब्दस्याभिगीतं न भवति। सोमउ-ष्वाणस्सो (ऊ. द. ८७) इति वाभ्रे तृतीयायां भाइराऽ१क्षाऽ२ः। अत्र ह्रस्वस्य रशब्दस्याभिगीतं न भवति ॥ ३ ॥

बोधीये सर्वमयोनौ ॥ ४ ॥

वि.&भा. जराबोधीये सर्वं प्रत्युत्क्रामति। ह्रस्वं दीर्घं ज सर्वत्र योनिवर्जम् ॥

दी. अयोनौ ऊहे येसोमासोवा (ऊ. द. १३६) इत्यादिजराबोधीये सर्वं दीर्घं ह्रस्वं च प्रत्युत्क्रामति। येवादाऽ१श्शाऽ२३र्या। अत्र ह्रस्वं दकारं प्रत्युत्क्रामति। तृतीयायां स्वानादाऽ१इऽ२३साः। अत्र दीर्घं देशब्दं प्रत्युत्क्रामति ॥ ४ ॥

नित्रे च पूर्वे ॥ ५ ॥

---

6. My²-³ एवम् for एव
9. E om. अत्राया....भवति
12. R My¹ अकारस्य for रशब्दस्य
15. Ks² trans. दीर्घं after ह्रस्वं; A²Ts¹ om. ह्रस्वं
18. E दीर्घः देशब्दः for दीर्घं देशब्दं
19. My²-³ om. पूर्वे

वि·&भा. **पूर्वे जनित्रे** सर्वं प्रत्यु क्रामति योनिवर्जम् ॥ ५ ॥

५ २ ४५ ४२ ५
दी. इन्द्रक्राऽ३तुन्नआभरा (ऊ. सं. ३६५) **पूर्वे जनित्रे** सर्वं ह्रस्वं दीर्घं च प्रत्युत्क्रामति योनिवर्जम् । १ २ २ ३ **पितापुत्रेभियोयाऽ१थाऽ२** । अत्र ह्रस्वस्य यकारस्य प्रत्युत्कामः । एवमादीनि ॥ ५ ॥

हविषे च गीथे ॥ ६ ॥

वि. भा **सौहविषे चोद्गीथे** सर्वं प्रत्युत्क्रामति ॥ ६ ॥

१२२ १ २ २ २१ २ २
दी. **प्रवाजियक्षाः** (ऊ. द. १३५) इति **सौहविषे उद्गीथे सहस्रधारास्ताऽ१-इवाऽ२३४ः** । अत्र दीर्घं प्रत्युत्क्रामति ॥ ६ ॥

न प्रवाज्युत्तरयोः ॥ ७ ॥

वि. भा. **प्रवाज्यक्षायां** सौहविषे (ऊ.दे. १३५) **उत्तरयोः** स्तोत्रीययोः प्रत्युत्क्रमप्रतिषेधः ॥ ७ ॥

१२२ १२ १
दी. **नकारः** प्रतिषेधे । **प्रवाजियक्षाः** (ऊ. द. १३५) इति सौहविषे द्वितीयायां
२१ २ १
सहस्र रेताआद्धाऽ२३४इः । अत्र प्रत्युत्क्रमो न भवति । तृतीयायां **इन्द्रस्य कुक्षा नृभाऽ२३४इः** । अत्र प्रत्युत्क्रमो न भवति ॥ ७ ॥

त्रेयानिधनयोरभि ॥ ८ ॥

हितपौष्कलहव्यगारमानववन्तीयभरपर्णयामसु ॥ ९ ॥

वि. **आत्रेयानिधनयोर्दीर्घस्यापि** प्रत्युत्क्रमप्रतिषेधः भिवर्जम् । **तन्दुरोषमभीनर** इत्यत्र यथा **पुरोजित्याम्** ॥ ८ ॥

---

8. E ह्रस्व for दीर्घं
10. वि. om. स्तोत्रीययोः प्रत्युत्क्रमः
15. R reads अभि as a saparate sutra
18. M[1-2] trans. यथा after ०जित्याम्

संहितेऽपि प्रत्युत्क्रमप्रतिषेधः । यथा **मदच्युतायाम्** (ऊ. द. ३४) पौष्कले **सखाय** आद्यायाम (ऊ. सं. ३४०) । वैतह्व्ये च **पुरोजित्याम्** (ऊ. ए. ३८६) । गारे इदंवमोऽन्त्यायाम् (ऊ. द. २६) । मानवे सोमउष्वा-(ऊ. द. ८५) मध्यमायाम् । **उपात्वा-** (ऊ. ए.४२६) द्यायां वारवन्तीये । **एवाहि**-(ऊ. प्रा. ८२१) सौभरे । एडसौपर्णे **इन्द्र-मभिजायमानम्** (ऊ ए. ५२२) इति । **पुनानो अक्रमीदभि** (ऊ. क्षु. ९२०) । इति यामे ह्स्वमभिगीयते । दीर्घं प्रत्युत्क्रामतीति यदुक्तं तस्योत्सर्गस्यापवादः एतेषां साम्नाम् ॥ ९ ॥

। इति पुल्लत्रिवरणे पञ्चमप्रपाठकस्य पञ्चमः खण्डः ॥ ५ ॥

भा. आत्रेयादीनां साम्नां प्रत्युत्क्रमप्रतिषेधः । आत्रेये पवस्व-(ऊ. अ. ६२३) मध्यमायां **पुरो**जित्युत्तरयोश्च प्रत्युत्क्रमप्रतिषेधः । उत्सर्गप्राप्तस्य ह्स्वमभिगीयते । दीर्घं प्रत्युत्क्रामतीति । अनेनोत्सर्गेण प्रत्युत्क्रमान्निवर्तते । आनिधने च **पुरोजित्याम्** (ऊ. स. ७९२) उत्तरयोरुत्सर्गप्रतिषेधः । अभि [इत्यत्र] अकारः प्रतिषेधार्थः । **अभीनर** इत्यत्र प्रत्युत्क्रम एव भवति । न प्रतिषिध्यते ॥ ८ ॥

संहिते **प्रसोमासोमदच्युतायां** (ऊ. द. ३४) प्रत्युत्क्रमप्रतिषेधः । **सखाय आ** (ऊ. सं. ३४०) पौष्कलाद्यायाम् उत्सर्गप्रतिषेधः । **पुरोजी**-(ऊ. ए. ४८६) । मध्यमा-यां वैतहव्ये । **इदंवसो**-(ऊ. द २६) त्तमायां गारे । **सोमउष्वा**–(ऊ. द ८५) मध्यमायां मानवयोर्दीर्घस्य प्रत्युत्क्रमप्रतिषेधः । **उपत्वाजा**-(ऊ. ए.४२७) द्यायां वारवन्तीये प्रत्युत्क्रमप्रतिषेधः । **एवाहि**-(ऊ. प्रा.८२१) सौभरे मध्यमायां प्रत्युत्क्रमप्रतिषेधः । ऐडसौपर्णे **इन्द्रमभिजायमान**-(ऊ. ए. ५२२) मित्यत्र प्रत्युत्क्रमप्रतिषेधः । **पुनानो अक्रमीदभीति** (ऊ. क्षु. ९२०) यामे उत्सर्गप्राप्तस्य प्रतिषेधः । कतमस्य । आह । ह्स्व-मभिगीयते । दीर्घं प्रत्युत्क्रामतीत्यस्य ॥ ९ ॥

---

1. M[1-2] om· यथा मदच्युतायां····मध्यमायां (L. 3)
3. KS[2] ऐडे, M[1-2] एड for ऐड; TS[1] after मध्यमायाम् add: दीर्घस्यापि प्रत्युत्क्रमप्रतिषेधः;
6. A[2] before ह्स्वं adds: दीर्घं
11. B[4] प्रत्युत्क्रम for प्रत्युत्क्रमात् A[1] निवर्त्यं तेforनिवर्तते
17. तृतीयायां for मध्मायां

इति पुष्पसुत्र भाष्ये पञ्चमि पञ्चमीकण्डिका ॥ ५ ॥

दी एतस्सला । जसाताऽ२३याइ (ऊ. अ. ६२३) इत्याग्नेये द्वितीयायां नामा-ताराऽ२ः । अत्र दीर्घस्य प्रत्युत्क्रमो न भवति । पुरोजितीवो अन्धसः । सुताहाउ (ऊ स. ७९२) इति आकारणिधने परिप्रस्याऽ३न्दातेसूताऽ२ः । अत्र दीर्घस्य प्रत्युत्क्रमो न भवति ॥

अकारः प्रतिषेधे । पुरोजित्याकारणिधने (ऊ. स. ७९२) तृतीयायां रोषाऽ३माभीऽ१नाराऽ२ । अत्र दीर्घस्य प्रत्युत्क्रमो भवति । न प्रतिषेधः ॥ ८ ॥

प्रसोमासोम । दाऽ२च्युताः (ऊ. द. ३४) इति संहिते थेआऽ२३ । अत्र दीर्घस्य प्रत्युत्क्रमो न भवति । सखायाऽ३ आनि (ऊ. सं. ३४०) इयि पौष्कले ङ्गैःपाऽ-२राऽ२३४इभूऽ६५६ । अत्र ङ्गैशब्दस्य प्रत्युत्क्रमो न भवति । पूऽ५रोजि । ताऽ३-ईवोऽ२३अन्धसाः (ऊ. ए. ४८६) इति वैतहव्ये द्वितीयायां पावाऽ२काऽ२३४या । अत्र पा-शब्दस्य प्रत्युत्क्रमो न भवति । इदंवसोसुतमन्धसाऽ३ए (ऊ. द. २६) इति गारे तृतीयायां स्वादुमकाऽ३माश्रीणन्तौ । अत्र दीर्घस्य प्रत्युत्क्रमो न भवति । होवाइ । सोमउष्त्राणस्सोतृभिः । होवाइ (ऊ. द. ८५) इति मानदोत्तरे द्वितीयायाम् आनूपेगोमान्गोऽ३१ । अत्र दीर्घस्य प्रत्युत्क्रमो न भवति । उपत्वाजाऔहोहाइ (ऊ. ए. ४२७) इति वारवन्तीये प्रथमायां नाइकेअस्थाऽ३४ । औहोवा । अत्र के-शब्दस्य दीर्घस्य प्रत्युत्क्रमो न भवति । एवाऽ३होऽ३असिवीरयोवा (ऊ. प्रा. ८२१) इति सौभरे तृतीयायां सुवोवाऽ२जानाऽ२३म् । अत्र दीर्घस्य प्रत्युत्क्रमप्रतिषेधः । इन्द्रम-भवोवा । जायामाऽ२३४नाम् (ऊ. ए. ५२३) इत्यैडसौपर्णे अदाऽ३इक्रःऽ२३४इचीत् । अत्राकारस्य न प्रत्युत्क्रमो भवति । पुनानो आऽ२ । क्रमीदाऽ२३४मी (ऊ. क्षु. ९२०) इति यामे पुनानोआऽ२ । अत्र नो-शब्दस्य प्रत्युत्क्रमो न भवति ॥ ९ ॥

। इति फुल्लदीपे नवमप्रपाठकस्य पञ्चमः खण्डः ॥ ५ ॥

---

3. E आनिधने for आकारणिधने

षष्ठः खण्डः

उस्थभावः

अथोस्थभावः ॥ १ ॥

वि. & भा. कोऽस्याभिसंबन्धः ? उच्यते । **तालव्यमाइ यद्वृद्धम्** (पु. सू. ३.१.१) इति तालव्यानां प्रकृतिविकारभाव उक्तः । अथेदानीमुस्थानां प्रकृतिविकारभावोऽनुक्तोऽवशिष्यते । सः वक्तव्य इत्यनेन संबन्धेनेदमारभ्यते—अथोस्थभाव इति । उकार-ऊकार-ओकार-औकारा उस्थाः । एतेषां च उस्थानां लक्षणान्तरेण पूर्वोक्तेन विकारो न प्राप्नोति । यथा **ओवौकारयोरेकीभावे लोपः** (७. १० ३०)। यथा **ओवौकारयोरनन्तरस्वरनीचाद्ययोः प्रत्यययोः सर्वं वृद्धमाभवत्यन्तलोपश्च** (पु. सू. ८.२.१) इति। तथा **तृतीयादिन्यामौहोवायां चतुर्थस्थो वृद्धः पदान्तः सर्वत्राभवति** (पु सू. ८.३.६)। तथा **आउवाव्यहितमाउ ऋवति** (पु. सू ८.३.६)। तथा **ओमापद्यते** य ओकारो निष्पद्यते । तस्य च नेहाधिकारः । तस्याप्यन्यदेव लक्षणम्। **अःकारो वृद्धः पदगीतः पदान्त्य** (पु. सू ६.१.१) इत्येवमारभ्यते । तस्मादेतैर्लक्षणैर्यत् स्पृष्टमुस्थं तस्येहाधिकारो वर्तिष्यते ॥

दी. अथ तालव्यानामाइभावकथनानन्तरमुस्थभाव उच्यते । उकार-ऊकार-ओकार-औकाराः उस्थाः । तेषां प्रकृतिविकारभाव उच्यते ॥ १ ॥

वृद्धमाउ ॥ २ ॥

· A[4] प्रकृतेभावः for प्रकृतिविकारभाव उक्तः; वि. om. अथ

9. A[2]T om. प्रत्यययोः

10. T after पदान्तः adds: कीभावलोपः । तथा ओवौकारयोरनन्तरस्वरनीचाद्ययोः सर्वं वृद्धमाभवत्यन्तलोपश्चेति । यथा तृतीयादिन्यामौहोवायां च चतुर्थे वृद्धं पदान्तः; B[4] यथा for तथा; A[3]M[1-3]TS[1] o.m. तथा

11. A[2]M[1-2]T ओमावान्त्यायां, B[4] उमापत्याय, PV[3] ओमापत्याय, S[1] औहोवान्त्यायां for ओमापद्यते यः A[2]M[1-2]T एकारः, S[1] ओकारे for ओकारः

13. K न S[1]M[1-2]T यत्र for यत्

वि. यद् वृद्धमुस्थं तदाउ भवति । उदाहरणानि । **रवस्तावे । पाहि-चतसृ॒ऽ३भिर्वाऽ२३४साऽ२** (ऊ. ए. ४१०) । उपद्रवविषये **ओवौकारयोरित्यपवादः** । तद्वद्यौधाजये हीषीस्वरस्थस्यापवादः । निधनत्वात् । **निधने हीषीस्थं सर्वत्र** (पु. सू. ३.१.१२) इति । **आयद्दुवः शतक्रतो** (र. सं. ६३) आउभावः ! **राधस्तन्नो विपद्वसो** (ऊ. द. १३९) वीङ्के । **विचक्षणोजागृविर्देववीतौ** (ऊ. सं. २६८) औकारो वासिष्ठे । ओकारौकारोदाहरणानि । उकारस्य तु प्रकृतिभावं वक्ष्यत्युपरिष्टात् ॥ २ ॥

भा. यद् वृद्धमुस्थं तदाउ भवति । उगतिर्भवतीत्यर्थः । उदाहरणानि । **पहि चतसृभिर्वसो** रौरवे । उपद्रवविषये ओवौकारयोरित्यपवादः । यथा यौधाजये हीषीस्वरस्यापवादः । निधनत्वात् । **निधने हीषीस्थम्** (पु. सू. ३.१.१२) इति । तथा **यज्ञस्य सहसो यहो** (ऊ. ए ४१५) इति वामदेव्ये । ओवौकारयोरित्येवापवादः । **आयद्दुवः शतक्रतो** (र. सं. ६३) रेवतीष्वाउभावः । **राधस्तंनोविदद्वसो** (ऊ. द. १३९) वीङ्के । त्वं-हिनः पितावसो (ऊ. द. १३८) सौश्रयसे । **स्तोतारमिद्धिषेरदावसो** (ऊ. क्षु. ८६९) महावैष्टम्भे । **तुविशुष्मतुविक्रतो** (ऊ. प्रा. ८१७) कालेये । **त्वंगव्युः शतक्रतो** । **त्वँहि रण्ययुर्वसो** । (ऊ. द. १९) इति च शाक्त्ये । **कँहनः कंवसौ** । **अस्माःइन्द्रवसौ** बार्हद्गिर (र. द. १२) पार्थुरश्मयोः (र. द. १३) । **बज्रिन्नपसोनविष्टौ** (ऊ. द. २०) काण्वे । **इन्द्रस्ये ववग्नुराशृण्व आजौ** पार्थ- (ऊ. सं. २४८) वासिष्ठयोः (ऊ. द. ४२) । **विचक्षणोजागृविर्देववीतौ** (ऊ. सं. २६८) वासिष्ठे । ओकारऔकारयोरुदाहरणान्येतानि । उकारस्य तु प्रकृतिभावं वक्ष्यत्युपरिष्टात् ॥ २ ॥

दी. **वृद्धमुस्थमाउ** भवति । वृद्धानामुस्थाक्षराणाम् आउभाव आदेशो भवतीत्यर्थः । उदाहरणानि । **पाहिनो अग्नाऽ३आइकाऽ२३४या** (ऊ. ए. ४१०) इति रौर वेद्वितीयायां **पाहिचतसृऽ३भिर्वा२३४साउ** । अत्र सो-मध्ये आउभावः । **एईन्द्रा** । **ओऽ२३४वा** । इति पार्थुरश्मे (र. द. १३) द्वितीयायाम् । **तेभूरिताऽ२इवसाउ** । अत्र उकारस्य आउ-भावः । तृतीयायां **नः कंवसाऽ२उदधाः** । अत्र **सो**-मध्ये आउभावः ॥ २ ॥

यत्प्रकृत्या तस्य ग्रहणम् ॥ ३ ॥

वि. यद् वृद्धमुस्थं प्रकृत्या भवति तस्य ग्रहणम् । तद्वक्ष्याम इति प्रतिज्ञा ॥

भो. यद् वृद्धमुस्थं प्रकृति तस्य ग्रहणम् । यदुस्थं वृद्धं प्रकृत्या भवति तद्वक्ष्याम इति प्रतिज्ञा ॥ ३ ॥

दी. यत्प्रकृत्या तस्य वचनम् ॥ यद् वृद्धमुस्थं प्रकृत्या प्रकृति भवति तस्य वचनम् । ग्रहणं कर्तव्यम् ॥ ३ ॥

अपदान्तः ॥ ४ ॥

वि. **अपदान्तः** उकार ऊकार ओकार औकारश्चान्तःपदिकाः प्रकृत्या भवन्ति । अपदान्तः अन्तःपदिक इत्यर्थः । **दिविसद्भ्यू वरुणाय मरुद्भ्यः** (सा. ६७३) आमहीयवादिषु । **हूयते** संजये (ऊ. द. ९६) । **तवाहंसो** । **तवाहंनक्तमिति** स्वःपृष्ठे (ऊ. द. ७१) । **सरोगौर** (ऊ. द. २५) इति आर्षभे । **नृभिर्धौतो** । **प्रत्नं सधस्थम्** (ऊ. द. ४१) आयास्ये ॥ ४ ॥

भा. यत् प्रकृत्या भवति तद् वक्ष्याम इति प्रतिज्ञातम् । तदिदानीमुच्यते । उकार ऊकार ओकार औकारः अन्तःपदिकाः प्रकृत्या भवन्ति । अपदान्तः अन्तःपदिक इत्यर्थः । उदाहरणानि वक्ष्यामः । **तवाहसो तवाहंनक्तमुतसो** इति च स्वःपृष्ठे (ऊ. द ७९) । **पुनानःसो**·ऐडायास्ये (ऊ. ड. ४१) **आयोनि**-सत्रासाहीय-(ऊ. द. ७२) यामयोः (ऊ. क्षु. ९२०) । एवमादीनि । औकारोदाहरणानि । **सारोगौर** आर्षभे (ऊ. द. २४) । **नृभिर्धौतः** । **पुनानः सोम**- तृतीयायाम् सर्वसामसु । **यथा गौरः** (ऊ. स. ७१७) गौतमस्य मनाज्ये । **पौरो अश्वस्य** अभीवर्ते (ऊ. ए. ४४०) । **पुरूण्यस्य पौंस्या**

---

1. E $A^{2}M^{1-2}S^{1}TL^{1}$ वाचनम् for ग्रहणम्

3. $A^{2}M^{1-2}TS^{1}$ वचनं for ग्रहणं; $A^{2}T$ तद्वति, M^{1-2} तस्य for तद्

17. PV^{2} om. औकारो...एवमादीनि (P.955, L.1); $R^{4}L^{1}$. after उदाहरणानि add: वक्ष्यामः

तैरश्चे (ऊ. द. ६७)। **अग्मन्नुक्थानि पौंस्या** वत्सासु (र. ए. ८२)। एवमादीनि ॥

दी. न पदान्तः अन्तःपदिक उकारः। अन्तःपदिक ऊकारः। अन्तःपदिक ओकारः। अन्तःपदिक औकारः। प्रकृतिर्भवति। उदाहरणानि– **तवाऽ२हं॰सोऽ३४ औहोऽ५मरारुणा** (ऊ. द. ७१) इति स्वःपृष्ठे द्वितीयायाम् **औहोऽ५क्तमुत्तमो**। अत्रान्तःपदिकस्य **सो**-कारस्य न आउभावः। तृतीयायाम् **औहोऽ५न्तमूतिम्**। अत्रान्तःपदिकस्य ऊकारस्य न आउभावः। **अभित्वावृषभासुते** (ऊ. द. २५) इत्यार्षभे तृतीयायां **गौऽ२राऽ२३४ औहोवा**। अत्र **गौ**-मध्ये न आउभावः ॥ ४ ॥

समानं च ॥ ५ ॥

वि. उकारः समानाक्षरः। उकारा वृद्धा अन्तःपदिका अनन्तःपदिकाश्च प्रकृत्या भवन्ति। **उत्सः** ऐडायास्ये (ऊ. द. ४१)। **देवान् गच्छन्तु** बृहति (र. अ. ११३) रथन्तरे (र. क्षु. १९३) च। एवमादीनि ॥ ५ ॥

भा. समानाक्षरं वृद्धं प्रकृत्या भवति। उकारः समानाक्षरः। ननु उस्थत्वादेवास्य प्राप्तिः कस्मान्न गृह्यते इति। उच्यते। विशेषार्थम्। पूर्वसूत्रे अन्तःपदिकानामुस्थानामधिकारः। उकारस्य तु पदान्तीयस्य च प्रकृतिभावार्थं पुनर्ग्रहणम्। तस्मात् सर्वप्रकार उकारस्य प्रकृतिभावः। अन्तःपदिकस्योदाहरणान्युक्तानि। पुरस्तात् पदान्तीयोदाहरणानि वक्ष्यामः। **उत्स** ऐडायास्ये (ऊ द. ४१) प्रतिहारोद्गीथयोः। **देवान् गच्छन्तु** उपद्रवे। बृहति (र. अ. ११३) रथन्तरे (र. क्षु. १९३) **च**। प्रतिहारे। **भदेषु** हाविष्कृतशाम्मदंदावसुनिधनप्रतीचेनेडहाविष्कृतवैदन्वताद्यचतुर्थेषु। एवमादीनि संक्षेपः। उकारः पदान्तीयश्चापदान्तीयश्च प्रकृत्या भवति ॥ ५ ॥

---

4. L[1] स्वः पृष्ठमाङ्गिरसे for स्वःपृष्ठे

9. M[1]-[2] rS[1]A[2] उस्थेन उकारस्थेनाक्षरेण समानमक्षरसमानम्। उस्थशब्देन उकारः-ऊकार-ओकार-औकरा गृह्यन्ते। उकारवृद्धा अन्तःपदिका अनन्तपदिकाश्च प्रकृत्या भवन्ति उत्से ऐडायास्ये for उकारः ...रथन्तरे च

13. B[4] अप्राप्तिः तस्मात् for प्राप्तिः कस्मात्

दी. समानाक्षरमुकारं चकारात् पदान्तमपदान्तं च प्रकृति भवति । पदान्तीयस्य उकारस्योदाहरणम् । **औ३ोइसुतासोमधुमत्तमाऽ२ए** (र. अ. ११३) इति बृहति तूऽ२वोमाऽ२३४ । दाः । अत्र पदान्तीयस्य उकारस्य प्रकृतिभावः ॥ ५ ॥

न रवे विकल्पे प्रियावसु सिसीदतु भूरितेवसु न सन्तनिनि निधनत्वात् सोम्यं मधु वि ॥ ६ ॥

वि. उकारस्य पदान्तीयस्यापदान्तीयस्य च प्रकृतिभाव उक्तः । पदान्तीयस्य अपवादो वक्ष्यमाणेषूदाहरणेषु । **रौरवे विकल्पे** पदान्तीयस्य उकारस्य प्रकृतिभाव प्राप्तस्य आउभावः । परेष्वप्युदाहरणेषु एवमेव द्रष्टव्यम् । **प्रियावसु** । ये ददति प्रियावसु (ऊ. अ. ५९१) वामदेव्ये **प्रियावसु** प्रस्तावे प्रकृतिभावापवादः । उपद्रवे त्वोवौकार-लोपः । **सिसीदतु** । **अयोनि मरुणो रुहायां** (ऊ. क्षु. ९२१) ध्रुवे सदसि सीदतु प्रकृतिभावापवादः यामादिषु । सत्रासाहीये (ऊ. द. ७२) घोषप्रत्ययत्वादोकारः । **भे घोषे दुह्यक्ष** इति । **भूरितेवसु** पार्थुरश्मे। **इन्द्रोमदायां** (र. द. १३) सुन्वते भूरितेवसु । **न सन्तनिनि निधनत्वात्** । सन्तनिनि प्रतिषेधः । सोऽयमपवादः । एष एव शब्दः संतनिनि प्रकृतिर्भवति । **सोम्यं मधु वि** । उकारे प्रत्यये विक्रियते । **पिबतंसोम्यंधु** (र. प्रा. १४७) बृहत्युपद्रवेऽन्यप्रत्ययस्य प्रकृतित्वमेव । यथा वारवन्तीये । वीति सप्तम्यन्तस्योकारस्य ग्रहणम् । उइ एवं स्थिते उकारस्यान्तस्थापत्तिः ॥ ६ ॥

भा. पदान्तीयस्याप्युकारस्यय प्रकृतिभाव इत्युक्तम् । इदानीं पदन्तीयस्याप्युकार-स्यापवादः वक्ष्यमाणेषु एवोदाहरणेषु। रौरवविकल्पविषये पदान्तीयस्य प्रकृतिभावप्राप्तस्य उकारभाव उच्यते । **नेमिन्तष्टेवसा२३३उहा३इ** (ऊ. द. ५९) । इति उकारस्य आ-

---

1. L[1] प्रकृती, for प्रकृति; M[4]ES[3] after भवति add: प्रकृति । उकारः समानाक्षरः
9. A[1] om. उपद्रवे...॰भावापवादः (L. 11)
12. S[1]T प्रत्यय B[4] दुह्यकृक्ष for दुह्यक्ष; A[2] om. दुह्यक्ष...वसु
14. KS[2] प्रकृति for प्रकृतिः
15. S[4] after ॰वन्तीये adds: प्रकृतिभावमाह
19. PV[2] om. नेमिं....आभावः

भावः । परेष्वप्युदाहरणेषु एवमेव द्रष्टव्यम् । **प्रियावसु** । **ये ददति प्रियावसु** (ऊ. अ. ५९१) । वामदेव्ये प्रस्तावे प्रकृतिभावापवादः । **सुन्वते भूरि ते वसु** (र. द. १३) पार्थुरश्मे । न **सन्तनिनि** एष एव शब्दो न विक्रियते । **निधनत्वात्** । सन्तनिनि । सोऽयमपवादः । **सिसीदतु** ॥ ध्रुवे **सदसि सीदतु** (ऊ. क्षु. ९२०-१) यामयोर्गोराङ्गिरसस्य [साम्नि] (ऊ. क्षु. ९२२) साहीये (ऊ. द. ७२) तु घोषप्रत्ययत्वात् ओभावः । भे घोषे दुह्यक्ष इति । **सोम्यं मधु** । उकारे प्रत्यये विक्रियते । बृहति (र. प्रा. १५७) उपद्रवविषये अन्यप्रत्ययस्य तु प्रकृतित्वमेव । यथा वारवन्तीये (ऊ. प्रा. ८२१) मधु उ[इ] एवं स्थिते उकारस्यान्तस्थापत्तिः । पर[म्] एवं स्थिते प्रत्ययत्वेन निर्देशात् सप्तमीप्रयोगः । **वि उकारे प्रत्यये** इति ॥ ६ ॥

दी. इदानीं पदान्तीयस्याप्युकारस्यापवादः । नकारः प्रतिषेधे । **तरणिरित्सा-ऽ३इषासाऽ२३४ती** (ऊ. द. ५९) इति रौरवे **नेमिन्नष्टेनसाऽ२३उहाइ** । अत्र विकल्पे सुमध्ये उकारस्य पदान्तीयस्य न प्रकृतिभावः । **काऽ५स्तम्** । **इन्द्राऽ२तूऽ३वावसाउ** इति वामदेव्ये तृतीयायां **दाताऽ३इप्रीऽ३यावसाउ** । अत्र सुमध्ये पदान्तीयस्य उकारस्य न प्रकृतिभावः । **पुनानो आऽ२** । **क्रमीदाऽ२३४भी** (ऊ. क्षु. ९२०) इति पूर्वे यामे द्वितीयायां **सिसाऽ५इदाऽ६ताऽ६५६उ** । अत्र तुमध्ये पदान्तीयस्य उकारस्य न प्रकृतिभावः । उत्तरे यामे एवमेव । **एईन्द्रा** । **ओ२३४वा** (र. द. १३) इति पार्थुरश्मे द्वितीयायां **तेभूरिताऽ२इवसाउ** । अत्र सुमध्येपदान्तीयस्य उकारस्य न प्रकृतिभावः । **इन्द्रोहाउ** । **मादायवाऽ३१उवाऽ२३** (ऊ. स. ७४२) इति सन्तनिनि **ताइभूरिताऽ३१उवाऽ२३इ** । **वाऽ२३४सू** । अत्र सु-मध्ये पदान्तीयस्य उकारस्य प्रकृतिभावः । निधनत्वात् । **निधने हीषीस्थं सर्वत्र** (पु. सू. ३.१.१२) इति वचनात् । **औहोइमाउवान्दिविष्टयाऽ३ए** (र. प्रा. १५७) इति बृहति तृतीयायां **माऽ२यम्माऽ२३४** । **धाउ** । अत्र धु-मध्ये पदान्तीयस्य उकारस्य न प्रकृतिभावः । **वि** इति सप्तम्येकवचनम् । उकारे प्रत्यये इत्यर्थः ॥ ६ ॥

---

6. PV[1] मो भावः, A[2] तु भावः; B[4] भावः for ओभावः; B[4] दुह्य ऋक्ष, L[2] दुह्यक्ष, A[1] दुह्यः क्ष PV[1] दुष्वष्ठ for दुह्यक्ष

ओकारः पादमध्ये ॥ ७ ॥

वि. ओकारस्यापि पदान्तीयस्यैव विशिष्टे विषये प्रकृतिभावमाह । ओकारः पदान्तीयः प्रकृत्या भवति । किं सर्वत्र विषये । नेत्याह । पादमध्ये य ओकारः पदान्तीयः स प्रकृत्या भवति । अन्तःपदिकश्च प्रकृत्या भवतीत्युक्तम् । पादान्तीयस्तु विक्रियत एव । उदाहरणानि । **सख्य इन्दो** (ऊ. द. ७१) स्वःपृष्ठे । **इन्दो समुद्रमाविश** काक्षीवता-(ऊ. द. १५९)द्विषु । एवमादीनि ॥ ७ ॥

भा. पदान्तीयाधिकारमुपजीवन्नोकारस्यापि पदन्तीयस्य विशिष्टे विषये प्रकृतिभावमाह । ओकारः पदान्तीयः प्रकृत्या भवति । किं सर्वत्र ? न । पादमध्ये [य] ओकारः पदान्तीयः स प्रकृत्या भवति । अन्तःपदिकः स पश्चात् प्रकृत्या भवतीत्युक्तम् । पदान्तीयस्तु विक्रियते एव । उदाहरणानि । **सख्य इन्दो**—स्वःपृष्ठे (ऊ. द. ७१) मराये (ऊ क्षु. ८८३) द्विनिधनायास्ये (ऊ. अ. ६१) बृहति (र. क्षु. १९४) उत्सेधे (ऊ. सं. ४४२) **तृतीयादिन्यामौहोवायाम्** (पु. सू. ८.३.६) इत्यपवादादाभावः । **इन्दोसहस्र** यज्ञायज्ञीये । **इन्दोसमुद्रमाविशेति** भास-(ऊ. द. १५८) काक्षीवत-(ऊ. द. १५९) आसितेषु (ऊ. द. १६०) । **गोजीरया** श्यावाश्वे (ऊ. द. २१८) । एवमादीनि ॥

दी. पादमध्ये पदान्तीय **ओकारः** प्रकृतिर्भवति । उदाहरणम् । **तवाऽ२हँसोऽ६४** (ऊ. द. ७१) इति स्वःपृष्ठे । **सख्याऽ२इन्दोऽ३४** । अत्र पादमध्ये पदान्तीयस्य ओकारस्य प्रकृतिभावः । पादमध्ये इति किं ? पादान्ते आउभावः । यथा **अभिनोवाजसातमम्** (ऊ. द. १६४) इति ऐडकौत्से **ते अभ्राऽ२३इगाऽ३४३उ** । एवमाउभावः ॥ ७ ॥

---

3. $A^2M^{1-2}T$ om. नेत्याह; KS^2My^1 om. य ओकारः and सः; S^1 om. यः and सः

7. PV^2 विकृष्टे for विशिष्टे

9. PV^2 पदान्तीयस्य for पदान्तीयः स; PV^2 पदान्तीयस्य for पदान्तीयस्तु

17. RMy^{2-3} om. पादमध्ये इति किम्...आउभावः (L 19)

अयेन्दो ॥ ८ ॥

वि. ओकारः पादमध्ये पदान्तीयः प्रकृत्या भवतीत्युत्सर्गप्राप्तस्यापवादः। **इन्द्रायेन्दो** मरुत्वते। **इषोवृधीया**–(ऊ. द. ९९) दिषु दोशब्दः प्रकृत्या न भवति ॥ ८ ॥

भा. ओकारः पादमध्ये पदान्तीयः प्रकृत्या भवतीत्यस्योत्सर्गस्यायमपवादः। **इन्द्रायेन्दो** इति अपवादः। इषोवृधीय–(ऊ. द. ९९) कौञ्च–(ऊ. द १००) वाजदावर्या-(ऊ द १०१)दिषु न प्रकृत्या भवति। उगतिर्भवतीत्यर्थः ॥ ८ ॥

दी. अकारः प्रतिषेधे। **इन्द्रायेन्दाउ**। **मरुत्वताइ** (ऊ. द. ९९)। इतीषोवृधीये येन्दाउ। अत्र पादमध्ये पदान्तीयस्य ओकारस्य न प्रकृतिभावः। **इन्द्रायेन्दाउ**। **मेरूऽ२त्वाऽ२३४ताइ** (ऊ. द. १०१) इति वाजदावर्ये ओकारस्य न प्रकृतिभावः। आउभावो भवतीत्यर्थः। एवमादीनि ॥ ८ ॥

बभ्रो रे ॥ ९ ॥

वि. **बभ्रो**-शब्दस्य प्रकृतिभावप्राप्तस्य आउभावः **स्वरे** प्रत्यये। यथा महावराजा (र. क्षु. १८८) दिषु। **दुहानोबभ्रऊधनीति** ॥ ९ ॥

भा. अत्रापि प्रकृतिप्राप्तस्यैवाउकारः। किमविशेषेण। न। स्वरे प्रत्यये। यथा महावैराजे (र. क्षु. १८९) सहोदैर्धतमसे (ऊ. क्षु. ८८१) च। तृतीयायाम् उद्गीथमध्ये **दुहानोबभ्रऊधनि** ॥ ९ ॥

दी. अत्र प्रकृतिभावप्राप्तस्य ओकारस्य आउभावः स्वरे परे। उदाहरणम्। **होइया होऽया होइयाऽ२३४२तव** ॥ **अहाम्** (र. क्षु. १८९) इति महावैराजे द्वितीयायां **दुहानोब**। **भ्राउ**। **ऊधनि**। अत्र **भ्रो** इत्योकारस्य न प्रकृतिभावः। स्वरे प्रत्यये ॥

---

८. L^1My^{2-3} उकारस्य for ओकारस्य

12. KA^2M^{1-3} प्रकृत्या for प्रकृतिभाव

17. E न प्रकृतिभावः, L^1 उभाव for आउभावः

अतरे ॥ १० ॥

वि. रथन्तरे (र. सं. ६०) स्वरप्रत्ययस्य **बभ्रो**-शब्दस्य आउभावप्राप्तस्यापवादः । प्रकृतिरेव ॥ १० ॥

भा. रथन्तरे (र. सं. ६०) बभ्रोशब्दस्य स्वरप्रत्ययस्यापि प्रकृतिभाव एव ॥ १० ॥

दी. अकारः प्रतिषेधे । तवाहँसोमरारणोवा (र. सं. ६०) इति रथन्तरे **भ्रो**-शब्दस्य स्वरे प्रत्यये प्रकृतिर्भवति । दूहानोवाऽ३४भ्रोऽ३ । अत्र भ्रोशब्दस्य स्वरे प्रत्यये प्रकृतिभावः ॥ १० ॥

वसो ॥ ११ ॥

वि. अत्राप्योकारः **पादमध्ये** इति प्रकृतिभावप्राप्तस्य पदान्तस्य **वसोर्वसो पुरुस्पृहः** (ऊ. द. १६५) इति **वसो**-शब्दस्य आउभावः कौञ्चरयिष्ठादिषु ॥ ११ ॥

भा. वसोर्वसो इत्यत्रापि ओकारः पादमध्ये पदान्तीयः प्रकृत्या भवतीत्यस्यापवादः । उगतिर्भवतीत्यर्थः । क्रौञ्चारिष्ठौदलादिषु **अभीनोवा** इत्यत्र ॥ ११ ॥

दी. अभीनोवौहो । जासांतमाम् (ऊ. द. १६६) इति क्रौञ्च द्वितीयाय वसोर्वसाऽ२उ । अत्र **सो**-मध्ये ओकारस्य न प्रकृतिभावः । **अभीनोवा** । जसाताऽ२-माम् । इति रयिष्ठे द्वितीयायां **वसोर्वसाउ** । अत्र सोशब्दस्य न प्रकृतिभावः ॥ ११ ॥

अवसोनि ॥ १२ ॥

वि. वसोनिरेक उक्थिन (सा. ८६५) इत्यत्र पादमध्यस्य पदान्तीयस्य **वसो**-शब्दस्य आउभावापवादः । प्रकृतिरेव ॥ १२ ॥

---

6. RL[1]My[2]-[3] om. second स्वरे प्रत्यये; and E after प्रत्यये adds: प्रकृति भवति
14. RMy[2]-[3] om. उकारस्य for ओकारस्य
16. RE L[1]PB[4] अत्रसूनि for अवसोनि
18 KS[2] My[1] after प्रकृतेरेव add: अभि.नेधनकाण्वे

भा. अकारः प्रतिषेधार्थः । इह ओकारः पादमध्ये पदान्तीयः प्रकृत्या भवति इत्येतदेव औत्सर्गिकं प्रतिप्रसृ(सू?)तम् ॥ १२ ॥

दी. ॥ अवम्नि ॥ अकारः प्रतिषेधे । सर्वेसामसु वम्नि । अत्र सूशब्दस्य प्रकृतिभावः । उदाहरणम् । हिन्वाहिम् । ताऽ३इम्न् (ऊ. द. १७०) इति विशोविशीये द्वितीयायां वाऽ२३४म्न् । अत्र प्रकृतिभावः ॥ १२ ॥

दान्ते यहो ध्रिगोस्तावे मिन्दो ॥ १३ ॥

वि. अन्तःपदिकस्य ओकारस्य प्रकृतिभाव उक्तः । पादमध्ये पदान्तीयस्यापि प्रकृतिभाव उक्तः । इदानीं पदान्तावस्थितस्य विशिष्टविषये परिसंख्यानरूपेण प्रकृतिभाव उच्यते । उदाहरणानि त्रीणि । यहो । ईशा नः सहसो यहो । श्रुध्य-(ऊ. ए. ४११) पौष्कलयोः (ऊ. क्षु. ९२०) । ध्रिगो । स्यामरुम्ने ते अध्रिगो (ऊ. अ. ६६६) स्तावे पदान्तीयः प्रकृति ज्ञीये । गोपा ॥ मिन्दो । नूनो रयिंमहामिन्दो यामे (ऊ. सु. ९२०) । एतेषु त्रिषु पदान्तीयस्योक्तः प्रकृतिभावः ॥ १३ ॥

भा. अन्तःपदिकस्य ओकारस्य प्रकृतिभाव उक्तः । इदानीं पदान्तावस्थितस्य ओकारस्य विशिष्टविषये परिसंख्यानरूपेण प्रकृतिभाव उच्यते उदाहरणत्रयेण । यहो ईशानः सहसोयहो श्रुध्य–(ऊ. ए. ४२१) पौष्कलयोः (ऊ. ए. ४२०) । अध्रिगो-स्तावे यज्ञायज्ञीये (ऊ. अ. ६६६) । गो३पा२ । मिन्दो । नूनोरयिंमहामिन्दो यामे (ऊ. क्षु. ९२०) । एतेष्वेव त्रिषूदाहरणेषु उकारस्य पदान्ते प्रकृतिभावः । अन्यत्र विक्रियते । तदुदाहृतम् । वृद्धमाउ (पु सु ९. ६. २)इत्यत्र ॥ १३ ॥

दी. अन्तःपदिकस्य ओकारस्य प्रकृतिभाव उक्तः । इदानीं पदान्तावस्थितस्य ओकारस्य प्रकृतिभाव उच्यते । अग्नेवाऽ३जस्य । गोमाऽ२३४ताः (ऊ. ए. ४२०) इति पौष्कले हासोयाऽ२३४हो । अत्र पदान्ते अवस्थितस्य ओकारस्य प्रकृतिभावः ।

2. PA[1] ०प्रस्तृतम् for ०प्रसृतम्

8. A[2] om. ०रूपेण ...नूनो (L. 11)

अभाऽ५इनः । बाऽ३जाऽ३सातामाम् (ऊ. अ. ६६६) इति यज्ञायज्ञीये तृतीयायां प्रस्तावे **गोपा ।** अत्र पदान्तेऽवस्थितस्य **गो**-शब्दस्य प्रकृतिभावः । **पुनानोआऽ२ । क्रमीदा-ऽ२३४भीः** (ऊ. क्षु. ९२०) इति यामे तृतीयायां **महामाऽ२३४इन्दो ।** अत्र पदान्तेऽस्थितस्य **दो**-शब्दस्य प्रकृतिभावः । एतेष्वेव प्रकृतिभावः । अन्यत्र आउभावः ॥ १३ ॥

औकार उराविमौ मधौ मतौ तस्थौ ॥ १४ ॥

वि. अपदान्तः प्रकृत्या भवतीत्यन्तःपदिकस्य प्रकृतिरुक्तः । परिशेषात् पादमध्ये पदान्ते च पदान्तीयस्य औकारस्य आउभाव प्राप्तः । वक्ष्यमाणेषूदाहरणेषु प्रकृतिभावः। औकारस्य **उरौ रथउरुयुगे** नार्मेधे (ऊ. द. १७) प्रकृतिः । **इमौ भद्रौ धुर्याविभि** (ऊ. ए ५२८) वारवन्तीये । **मधौ न मक्ष आसते** । गायत्रपार्श्वे (ऊ. अ. ५६१) **भूयाम ते सुमतौ** जमवर्ते (ऊ. स. ७१५) । **तस्थौ नाकस्य शर्मणीति** अभिनिधने (ऊ. क्षु. ९६१) ॥

भा. औकारस्यौत्सर्गिकेन लक्षणेन किं प्रप्तम् । पदान्तः प्रकृत्या भवतीति । अन्तःपदिकस्यौकारस्य प्रकृतिभाव उक्तः । परिशेषात् पादमध्ये सर्वत्र पदान्ते च पदान्तीयस्य औकारस्य आउभावो भवतीति स्थितम् । एवं स्थिते वक्ष्यमाणेष्वेवोदाहरणेषु परिसंख्यानरूपेण पादमध्ये पदान्तीयस्य औकारस्य प्रकृतिभाव उक्तः । तस्याभावः प्रतिषेधः अत्रोच्यते । यथा उरौरथ-नार्मेधे (ऊ. द. १७) । **इमौ भद्रौ** वन्तीये (ऊ. क्षु. ५२८) । **मधौ नमक्ष** गायत्रपार्श्वे (ऊ. अ. ५६१ । **सुमतौ वाजिनो** वयं जमदग्नेरभीवर्ते (ऊ. स. ७१५) । **तस्थौ नाकस्य शर्मणि** अभिनिधने काण्वे (ऊ. क्षु. ९३१) ॥ १४ ॥

दी. इदानीं पदान्ते अवस्थितस्य औकारस्य प्रकृतिभाव उच्यते । **अधाहीन्द्र गिर्वणाऽ३ए** (ऊ. द. १७) इति नार्मेधे तृतीयायाम् **उरौराऽ३थाइ ।** अत्र **रौ**-शब्दस्य

---

5. A^2M^1-$^2My^2$ ओ० for औ०; $A^2M^{1-2}TS^1$ उकारा० for उरा०

7. A^2T ओवौकारस्य, M^{1-2} ओउकारयोः for औकारस्य

13. B^4 आउभावा, A^1 आउ वा for आउभावः

14. PV^2 तस्य स्तोभप्रतिषेधस्य for तस्याभावः प्रतिषेधः; A^1 चोयते for अत्रोच्यते

17. PV^2 om. काण्वे

18. My^2 ओकारस्य for औकारस्य

प्रकृतिभावः । साऔहोहाइ । माऽ२३४न्मा (ऊ. ए. ५२८) इति वारवन्तीये द्वितीयायां ताविमौ । अत्र मौ-शब्दस्य प्रकृतिभावः । मोषू । त्वावाघताऽ३१उवाऽ२३ (ऊ. अ. ५६१) इति गायत्रपार्श्वे तृतीयायां माधौ । अत्र धौ-शब्दस्य प्रकृतिभावः । पिबा-सुतस्यरसिनोमत्स्वाहाउ (ऊ. स. ७१५) इति जमदग्नेरभीवर्ते द्वितीयायां सूमतौवाऽ२ । अत्र तौ-शब्दस्य प्रकृतिभावः । औहोहोहाइ । आइही । आदा (ऊ. क्षु. ९६१) इत्यभिनिधने काण्वे तृतीयायां तास्थौनाऽ२३४का । अत्र स्थौ-शब्दस्य प्रकृतिभावः ॥ १४ ॥

योनौ च ॥ १५ ॥

वि.& भा योनौ-शब्दे य औकारः पादमध्ये पदान्तीयः स च प्रकृत्या भवति सीदन्योनौ वार्षाहरे ॥ १५ ॥

दी. हावर्षासोमा । सोमसोमा (र. ए. ७३) इति वार्षाहराद्ये सीदन्योऽ२३नौ । अत्र नौ-शब्दस्य पदान्ते वर्तमानस्य प्रकृतिभावः ॥ १५ ॥

अभे ॥ १६ ॥

वि. स्तोभे प्रत्यये योनौ शब्दे औकारस्यापवादः । वार्शे ॥ १६ ॥

इति फुल्लविवरणे पञ्चमप्रपाठकस्य षष्ठः खण्डः ॥

भा. अकारः प्रतिषेधे । योनौ-शब्दे औकारास्य प्रकृतिभाव उक्तः । तस्य स्तोभे प्रतिषेधः । आउ भवतीत्यर्थः । यथा पार्श्वे (वार्शे) तथा कवियौनौ आथर्वणे । स्तोभे तु विशेषः । पुनरुक्तमिदं सूत्रम् । स्तोभे प्रत्यये औत्सिर्गिक एव लक्षणविशेषो भवति । यथा आथर्वणवार्शयोः । अथवा अन्यथा वर्ण्यते ॥ १६ ॥

इति पुष्पसूत्रभाष्ये पञ्चमस्य षष्ठा कण्डिका ॥ ६ ॥

---

8. भा॰ च for यः
17. PV² पार्थे for पार्श्वे

दी. अकारः प्रतिषेधे। योनौ-शब्दस्य **स्तोभे** प्रत्यये न प्रकृतिभावः। **अर्षा-सोमा। द्युमत्ताऽ३। माः** (ऊ. द. ८४)। इति वार्शे। **साइदन्योनाऽ२३उ। ईऽ३या।** अत्र स्तोभे प्रत्यये **नौ**-शब्दस्य न प्रकृतिभावः ॥ १६ ॥

। इति फुल्लदीपे नवमप्रपाठकस्य षष्ठः खण्डः ॥ ६ ॥

सप्तमः खण्डः

रथन्तरे स्तावाद्यमाद्यायां वृत्सर्वत्र ॥ १ ॥

वि.&भा. रथन्तरे प्रस्तावाद्यमक्षर**माद्यायां** स्तोत्रीयायां सर्वत्र वृद्धं भवति ॥

दी. अभित्वाशूरनोनुमोवा (र. द. १) इत्यादिरथन्तरे प्रथमायां **प्रस्तावस्य** आद्यमक्षरं **वृद्धं** भवति रथन्तरगीत्योत्पन्नेषु सर्वसामसु। **अभित्वाशूरनोनुमोवा।** अत्र आद्याक्षरस्य वृद्धिः ॥ १ ॥

ण्वतरे तुरीयं नीचं सर्वत्र ॥ २ ॥

वि.&भा. कण्वरथन्तरे प्रस्तावे चतुर्थमक्षरं सर्वत्र **नीचं** भवति ॥ २ ॥

२र २ १ १र १र २ १
दी. पूनानस्सोमधारया (ऊ. द. १२४) इति **कण्वरथन्तरे** प्रस्तावस्य चतुर्थ-

२र १र १र २र १ २ १
मक्षरं **नीचं** भवति सर्वसामसु। **ऊत्सोदेवोहिरण्ययाः।** अत्र चतुर्थो वोशब्दः नीचः। अत्र सिद्धोपन्यासो विशेषविवक्षया ॥ २ ॥

चमं न जातोऽदब्धः सुदेवो वः ॥ ३ ॥

वि.&भा. न जातो न जनिष्यते। अदब्धः सुरभिन्तरः। देवो वो द्रविणोदाः। एतेषु पञ्चममक्षरं नीचं भवति ॥ ३ ॥

---

8. भा. om. स्तोत्रीयायां
10. E वृषभासुतो वा for नोनुमोवा
19. भा. om. अक्षरं

दी. **आभित्त्वाशूरनोनुमाः** (ऊ. ए. ४७३) इति कण्वरथन्तरे तृतीयायां **नाजातोनजनिष्यताइ** । अत्र पञ्चममक्षरं नीचं भवति। **परीतोपिश्वतांसुताम्** (ऊ. स. ७३६) इति कण्वरथन्तरे तृतीयायाम् **आदध्वःसुरभिन्तराः** । अत्र पञ्चममक्षरं नीचं भवति । **देवोवोद्रविणोदाः** (ऊ. क्षु. ८९६) इति कण्वरथन्तरे । अत्रैव पञ्चमं **नीचं** भवति ॥ ३ ॥

षेधे च तृतीयचतुर्थे दे दुरितावसते ॥ ४ ॥

वि. **सिमानान्निषेधे** (ऊ. क्षु. ९२९) **च तृतीयचतर्थे पादे** विषये **दुरितावसते**-शब्दयोः पञ्चमं नीचं भवति चतुर्थस्वरे ॥ ४ ॥

भा. **सिमानांनिषेधे** (ऊ. क्षु. ९२९) तृतीयचतुर्थपादविषये **अपसेधन् दुरिता सोम नो मृड** । **सं ग्रावभिर्वसते वीते अध्वर** इति । एतयोः पञ्चममक्षरं नीचं भवति ॥ ४ ॥

दी. **असो** । **वाहाइ** । **वाइसोमोअरुषो**। (ऊ. क्षु. ९२९) इति **सिमानां निषेधे** तृतीयायां तृतीये पादे **दुरितासोमनः** । अत्र दु इति पञ्चममक्षरं नीचं भवति । द्वितीयायां चतुर्थे पादे **वसतेवी** । अत्र व इति पञ्चममक्षरं नीचं भवति ॥ ४ ॥

आजा वितोत्तरयोरेन्द्रयाहिपूर्वयोः पर्यूषु चोपान्त्योच्चापातिं गिरा ॥ ५ ॥

वि. **आजागृविरन्त्ययोर्गौरीविते एन्द्रयाहि**-(ऊ. क्षु. ८९५)**पूर्वयोः पर्यूषु** (ऊ. क्षु. ७८४) **चैकर्चे पतिंगिरायां** पर्वणि उपान्त्यमक्षरमुच्चं भवति ॥ ५ ॥

भा. **आजागृवि**-(ऊ. द. २१४)रित्यत्र गौरीवितोत्तरयोः **एन्द्रयाहि**-(ऊ. क्षु. ८९५) पूर्वयोः **पर्यूषु** (ऊ. स. ७८४) चैकर्चे च उपान्त्यमक्षरम् उच्चं भवति पतिङ्गिराद्ये पर्वणि ॥ ५ ॥

---

5. A[2]M[1]-[2]TS[1] सिमासामराजे च चतुर्थतृतीये देवसते दुरिता for षेधे च...सते

7. A[2]S[1] after भवति add: सामराजेऽसाविसोमान्त्ययोः संरावभिर्वसतेपसेयन्दुरितासोमयोश्चतुर्थतृतीययोर्विषययोः पञ्चममक्षरं नीचं भवति; T adds: सामराजेऽसाविसोमायां संग्रावभिर्वसन्ते च सोधदुरितासोमयोश्चतुर्थयोः पञ्चममक्षरं नीचीभवति ।

दी. आजा । गृत्वाऽ३इः । विप्रक्रताम् (ऊ. द. २१४) इति **गौरीविते उत्तरयोः** स्तोत्रीययोः **पतिङ्गिरा** उपान्त्ये अक्षरे तृतीये अक्षरे उच्चीभवति । द्वितीयायाम् **उपस्तूराइ** । इयं पतिंगिरा तृतीयेऽक्षरे उच्चीभवति । तृतीयायां **वर्धनःपू** । इयं **पतिंगिरा** । तृतीये अक्षरे उच्चीभवति । एन्द्र । याहाऽ३इ । **हरिभाइः** (ऊ. क्षु. ८९५) इति **गौरीविते** पूर्वयोः स्तोत्रीययोः पतिंगिरा **उपान्त्ये** अक्षरे उच्चीभवति । हरिभाइः । इयं पतिंगिरा । उपान्त्ये अक्षरे उच्चीभवति । द्वितीयायां **मिरेषम्** । इयम् पतिंगिरा । उपान्त्ये अक्षरे उच्चीभवति । **परि** । ऊषूऽ२ (ऊ. स. ७८४) इत्येकर्चे गौरीविते प्रधन्वावा । इयं पतिंगिरा । उपान्त्ये अक्षरे उच्चीभवति । अभि । प्रगोऽ३ । **पतिंगिरा** (ग्रा. ५. ६. ९६८.३) इति गौरीविते साम्नि **पतिंगिरापर्व** भवति ॥ ५ ॥

सिते च देवाद्ययोस्तृतीयोच्चान्त्यमाग्निमी ॥ ६ ॥

वि.&भा. गायत्र्यासिते (ऊ. द. १६०) पवस्वदेवाद्ययोस्तृतीयोच्चान्त्यं द्र्यक्षरम् अग्निमीस्वरं भवति । **अग्निमीडिष्वावसे** (ग्रा. २. ५. ४९. १) ॥ ६ ॥

दी. **पवस्वदेव आ** (ऊ. द. १६०) इति **गायत्र्यासिते** प्रथमद्वितीययोः स्तोत्रीययोः तृतीयस्वरपर्यन्तम् **उच्चान्त्यं** त्र्यक्षरमग्निमीस्वरं भवति । प्रथमायां **देवआ** । इति त्र्यक्षरमग्निमीस्वरं भवति । द्वितीयायां **पवमाननिरो** । अत्र **ननिरो** इति त्र्यक्षरमग्निमीस्वरं भवति । **अग्निमी** । डिष्वाऽ३४औहोवा (ग्रा. २. ५. ४९. १) इति साम्नि **अग्निमीपर्व** भवति ॥६॥

सैधे चाभिसोमाद्ययोः ॥ ७ ॥

---

5. My[2] om. हरिभाइ· ···उच्चीभवति

10. E om. गौरीविते ; L[1] My[2] om. साम्नि

11. S[1]A[2]M[1-2]T स्व for च

12. A[2]M[1-2]T after आद्ययोः add; स्तोत्रीययोः

13. M[1-2] भा. om. अग्निमीडिष्वावसे

वि. अभिसोमाद्ययोरुत्सेधे (ऊ. ए. ४५७) तृतीयोच्चान्त्यं द्रव्यमग्निमीस्वरं भवति ॥ ७ ॥

भा. उत्सेधे (ऊ. ए. ४५७) चाभिसोमाद्ययोः स्तोत्रीययोस्तृतीयोच्चान्त्यं द्रव्यम् अग्निमीस्वरं भवति ॥ ७ ॥

दी. **अभिसोमास आयवः।** **पव** (ऊ. ए. ४५७) इत्युत्सेधे प्रथमद्वितीययोः स्तोत्रीययोः तृतीयोच्चान्त्यं त्र्यक्षरमग्निमीस्वरं भवति। **आयवः**। इति त्र्यक्षरमग्निमीस्वरं भवति। द्वितीयायां **मत्सरासोमदच्युतः**। अत्र **दच्युतः** इति त्र्यक्षरमग्निमीस्वरं भवति ॥ ७ ॥

पिबासु चाद्यायाम् ॥ ८ ॥

वि. पिबासुतायामुत्सेधे (ऊ. ए. ५१०) **आद्यायां** तृतीयोच्चान्त्यं द्रव्यमग्निमीस्वरं भवति ॥ ८ ॥

भा. तृतीयोच्चान्त्यं द्रव्यमग्निमीस्वरं भवति ॥ ८ ॥

दी. **पिबासुतस्यरसिनः**। **मत्स्वा** (ऊ. ए. ५१०) इत्युत्सेधे प्रथमायां तृतीयोच्चस्य तृतीयस्वरपर्यन्तमुच्चस्यान्त्यं त्र्यक्षरमग्निमीस्वरं भवति। **रसिनः** इति त्र्यक्षरमग्निमीस्वरं भवति ॥ ८ ॥

नदे च स्वास्वाद्ययोः ॥ ९ ॥

वि. स्वासु नानदे आद्ययोः स्तोत्रीययोः तृतीयोच्चन्त्यमग्निमीस्वरं भवति ॥ ९ ॥

भा. नानादे च स्वास्वाद्ययोस्तृतीयोच्चान्त्यं पूर्ववत् ॥ ९ ॥

दी. **प्रत्यस्मैपिपी**। **षाता**ऽ२इ (ऊ. ए. ३७५) इति **स्वासु नानदे** प्रथमद्वितीययोः स्तोत्रीययोः तृतीयोच्चस्य अन्त्यं त्र्यक्षरमग्निमीस्वरं भवति। प्रथमायां **स्मै**

---

1. T तृतीयोच्चान्त्यमग्निमी उत्सेधे चाग्निमीडरातृतीयोच्चान्त्यं for उत्सेधे...भवति; S[1] अग्निमीश्वरं तृतीयोच्चान्त्यम् for तृतीयोच्चान्त्यम्... भवति

9. A[2]M[1-2]T om. पिबासु···वति (L.11)

10. S[1] om. पिबा...भवति

16 S[1] स्वानदे for नदे

17. M[1-3] after भवति adds: अग्निमीडिष्वावसे

पिपी इति त्र्यक्षरमभिमीस्वरं भवति। द्वितीयायाम् **एमेनंप्रत्ये** अत्र नंप्रत्ये। इति त्र्यक्षरमभिमीस्वरं भवति ॥ ९ ॥

डिने चतुर्थोच्चानि यथा योनावाद्यं द्वितीयायां प्रथमे निघातान्मन्द्रे तृतीयायां च प्रतृतीययोः ॥ १० ॥

वि. **शैखण्डिने चतुर्थोच्चानि यथा योनावाद्यं** चतुर्थोच्चं तथोहे भवन्ति। **द्वितीयायां** स्तोत्रीयायां **प्रथमे** पादे **निघातात्** परतो मन्द्रे चत्वार्यक्षराणि भवन्ति। **तृतीयायां** स्तोत्रीयायां **प्रथमतृतीययोः** पादयोः निघातात् परतो मन्द्रे चत्वार्यक्षराणि भवन्ति ॥ १० ॥

भा. शैखण्डिने चतुर्थोच्चस्याद्यमक्षरमनीचं भवति। द्वितीयायां स्तोत्रीयायां च प्रथमतृतीययोः पादयोः ॥ १० ॥

दी. **प्रताऽ३होइ**। **आश्वीऽ३होऽ२३४** (ऊ. सु. ९०६) इति **शैखण्डिने चतुर्थोच्चानि** चतुर्थस्वरपर्यन्तमुच्चानि पर्वाणि **यथा यौनौ** योनिगीतौ प्रथमं चतुर्थोच्चं तथोहे भवन्ति। **नीऽपवमानघे**। इत्यादीनि चतुर्थोच्चानि। **द्वितीयायां प्रथमे** पादे चतुर्थोच्चस्याद्यमक्षरम् उच्चं भवति। **निघातादुच्चात्** पराण्यक्षराणि मन्द्रस्वरे भवन्ति। **पवमानस्यर**। अत्र प्रथममुच्चं भवति। तृतीयायां स्तोत्रीयायां प्रथमे पादे तृतीये पादे च चतुर्थोच्चस्याद्यमक्षरमुच्चं भवति। उच्चात् पराण्यक्षराणि मन्द्रस्वरे भवन्ति। तृतीयायां। प्रथमे पादे **निःविश्वचक्षस्र**। अत्र प्रथममुच्चं भवति। तृतीये पादे **पवसे सोमध**। अत्र प्रथममुच्चं भवति ॥ १० ॥

कौल्म इष्टा सिकृणुषाम् ॥ ११ ॥

---

1. L[1] om. अत्र नेप्रत्ये; E om. इति

5. S[1]A[2]M[1-2]T योनि for यौनौ and om: आद्यं...ऊहे

9. P नीच for अनीचम्;

10. P after च adds: प्रथपतृतीयायां स्तोत्रीयायां

वि.&भा. कौल्मलबर्हिषे इष्टा सिकृणुषास्वरमापद्यते । धर्तायाम् । इष्टा[1] इष्टाहोत्रायाम् ॥

दी. पाराऽ२इतोऽ२पिश्वतासुताम् (ऊ. द. १८२) इति कौल्मलबर्हिषे इष्टा होता इति पर्व सिकृणुषामापद्यते । सिकृणुषा । दधन्वांयोनर्योआ इति सिकृणुषापर्व भवति । धर्ताओहोहोहाइ (ग्रा. १६. ९. ५५८. २) इति साम्नि सिकृणुषा- इति पर्व भवति । योनौ तुवाऽ२ऽहोऽ२एहिचेरवाइ (ग्रा. ६. १. २४०) इति कौल्मलबर्हिषे उद्वाव्रृषस्वमघावान् इति इष्टाहोत्रा भवति ॥ १० ॥

आशुभार्गवे त्र्यक्षरोद्घा ॥ १२ ॥

वि.&भा. आशुभार्गवे त्र्यक्षरोद्धा भवति सर्वत्र । उद्घापर्व उद्घेदभि-द्वितीये (ग्रा. ३. २. १२५. २) ॥ १२ ॥

दी. अध्वर्योअद्रि । भिरस्सूऽ२ताम् (ऊ. द. ७२३) इत्याद्याशुभार्गवे त्र्यक्षरं भिरस्सूऽ२ताम् इति उद्घापर्व भवति । उद्धेदभिश्रुतामाऽ२घाम् (ग्रा.२.२. १२५.२) एवम् उद्घापर्व भवति । योनौ वृषापव । स्वधाराऽ२या (ग्रा. १२.१.४६९. ३) इति चतुरक्षरा भवति ॥ १२ ॥

पञ्चाक्षरोच्चाद्ययोः ॥ १३ ॥

वि. उच्चाद्ययोः पञ्चाक्षरोद्घा भवति ॥ १३ ॥

भा. उच्चातायामाशुभार्गवे (ऊ. स. ७२९) आद्ययोः स्तोत्रीययोः पञ्चाक्षरा उद्घा भवति ॥ १३ ॥

---

1. भा. om. धर्तायाम्...होत्रायाम्
8. $S^1M^{1-2}A^2T$ पञ्चाक्षरोद्धा for त्र्यक्षरोद्धा
9. A^2TS^1 उद्धा (T उद्धाता) भवन्ति । पञ्चाक्षरस्सर्वात्रभेदेन सर्वत्र । योनौ चतुरक्षर (T °रक्षराणि) उद्घा for त्र्यक्षरोद्धा...द्वितीये
15. $S^1A^2M^{1-2}T$ त्र्यक्षर० for पञ्चाक्षार०
16. $S^1A^2M^{1-2}T$ त्र्यक्षरोद्धा भवन्ति for पञ्चाक्षरोद्धा भवति

दी. उच्चाते । जातमन्धाऽ३सा: (ऊ. स. ७२९) इत्याशुभार्गवे पञ्चाक्षरोद्घापर्व भवति । जातमन्धाऽ३सा: । भिश्रुतामाऽ३घाम् एवं पञ्चाक्षरोद्घापर्व भवति । द्वितीयायां द्रायायज्याऽ३वाइ । एवं पञ्चाक्षरोद्घापर्व भवति ॥ १३ ॥

योनिवदस्य ध्यमायाम् ॥ १४ ॥

वि. अस्यप्रत्ना-(ऊ. अ. ५५१) मध्यमायामाशुनि योनिवदुद्घा भवति ।

भा. अस्यप्रत्नेत्यत्राशुभार्गवे (ऊ. अ. ५५१) मध्यमायां योनिवदुद्घा भवति । चतुरक्षरेत्यर्थः ॥ १४ ॥

दी. अस्यप्रत्नामं । नुग्रूऽ२ताम् (ऊ. अ. ५५१) इत्याशुभार्गवे द्वितीयायां योनिवत् चतुरक्षरोद्घा भवति । इवोपाऽ३इक् । स्वधाराऽ३या । एवम् ॥ १४ ॥

आतूनाकूपारे चाद्यायाम् ॥ १५ ॥

वि. आतूनाकूपारे (ऊ. द. २४) आद्यायां चतुरक्षरोद्घा भवति ॥ १५ ॥

भा. चतुरक्षरोद्घा भवति ॥ १५ ॥

दी. आतूनाइ । द्रक्षुमाऽ३न्ताम् (ऊ. द. २४) इत्याकूपारे योनिवच्चतुरक्षरोद्घा भवति । द्रक्षुमाऽ३न्ताम् । एवम् ॥ १५ ॥

द्व्यक्षरोत्तरयोः ॥ १६ ॥

वि.&भा. आतूनाकूपारे (ऊ. द. २४) उत्तरयोर्द्व्यक्षरोद्घा भवति ॥ १६ ॥

दी. आतूनाइ (ऊ. द. २४) इत्याकूपारे उत्तरयोः स्तोत्रीययोः द्व्यक्षरोद्घापर्व भवति । द्वितीयायां कूऽ३र्मीम् । तृतीयायां दाऽ३इवाः । एवं द्व्यक्षरोद्घा ॥

5. Kɔ² My¹ om. आशुनि; M¹⁻² आशुभार्गवे for आशुनि; A²M¹-²TS¹ trans. योनिवत् after उद्घ; A²M¹-³ उद्घाता for उद्घा

6. A²T भवन्ति for भवति;

7 A²¹M-²TS¹ om. चतुरक्षरेत्यर्थः

11. S¹A²M¹-²T trans; आद्यायां before भवति

12. S¹A²M¹-²T भवन्ति for भवति

15. S¹after द्व्यक्षरोत्तरयोः adds: षट्पञ्चाक्षरोत्तरयोः; M¹-³ षट्पञ्चाक्षरोत्तरयोः for द्व्यक्षरोत्तरयोः

16 वि. om. आतूनाकूपारे; S¹A²M¹⁻¹T षट्पञ्चाक्षरो; for द्व्यक्षरो०; M¹⁻³ उद्घाता for उद्घा; M¹-²S¹ A² भवन्ति for भवति

अच्छिद्रैकर्चे णो नचिः से तःशब्दश्चावृद्धो विचे प्रत्यये ॥ १७ ॥

वि. प्रहिन्वानाया (ऊ. स. ७४६) णोशब्दो नीचः । अभ्यासे । पर्वादौ तःशब्दश्चावृद्धो भवति विचे शब्दे प्रत्यये ॥ १७ ॥

भा. प्रहिन्वानाच्छिद्रे (ऊ. स. ७४६) णो-शब्दो नीचो भवति । तःशब्दः अवृद्धो भवति विचे प्रत्यये ॥ १७ ॥

दी. प्रहिन्वानाः (ऊ. स. ७४६) इत्येकर्चे अच्छिद्रे योनौ अभ्यासे णोहर्य । अत्र णो-शब्दो नीचो भवति । तः इति तःशब्दोऽवृद्धो भवति । विचेशब्दे प्रत्यये ॥ १७ ॥

वृध्दः सिते वृण्यन्तः ॥ १८ ॥

वि &भा. आसिते अयंपूषादिषु वृणीमहाया अन्तो वर्धते ॥ सर्वमार्चिकमवृद्धमुत्तरे पुष्पे योनिवद्भावात् कर्षणकृता वृद्धिः प्राप्नोति । तन्निवृत्तये इदमुच्यते सर्वमार्चिकमवृद्धमुत्तरे पुष्प इति । आर्चिकं गानं सर्वमवृद्धं भवति ॥ १८ ॥

दी. अयंपूषारयाइः (ऊ. ए. ४४५) इत्यासिताद्ये वृणीमहाया अन्तो वृद्धो भवति । योनौ राये अग्नेमहाइ (ग्रा. ३. १० ९३१) इत्यासिते महेवृषन् । अत्रान्तो ह्रस्वः ॥ १८ ॥

क्षीवते द्वितीयपादान्त्यमद्वितीयस्वरम् ॥ १९ ॥

---

2. A^{2} नीचैः for नीचः; $S^{1}A^{2}M^{1-2}T$ om. अभ्यासे

4. A^{1} अभ्यासतः शब्दः for तःशब्दः

6. $L^{1}My^{3}$ om. योनौ; E after योनौ adds: अभ्यासविषये अस्य पर्वगः वृद्धप्राप्ते अनेनावृद्ध वेधानम्

10. वि. वृण्यन्तः for वृणीमहाया अन्तः; $KS^{2}My^{1}$ om. सर्वमार्चिकमवृद्धमुत्तरे पुष्पे योनिवद्भावात् कर्षणकृता···भवति (L. 12)

11. भा. आकर्षण० for कर्षण०

14. E om. इत्यासिते

16. A^{3} $S^{1}M^{1-3}T$ after पादान्त्यम् add: अक्षरम्

वि.&भा. काक्षीवते द्वितीयपादान्त्यमक्षरमद्वितीयस्वरं भवति । अतिक्रमो भवतीत्यर्थः ॥ १९ ॥

दी. पवस्वाऽ३देव आयुषाक् (ऊ. द. १५९) इति काक्षीवते । द्वितीयपादस्य अन्त्यमक्षरमद्वितीयस्वरं न द्वितीयस्वरं भवति । अतिक्रमो भवतीत्यर्थः । तुतेमदाऽ३ः एवम् । मात्रालक्षणे चतुर्विधोऽतिक्रमो मोपुत्वारोहान् यज्ञादीनि । अयन्तरोऽश्विनो र्व्रते ॥ क्रुष्टः प्रथममतिक्रामति । ऊऽ२ । नआगाऽ२३४ही ॥ प्रथमो द्वितीयम् । आरोऽ२३हान् । तृतीयश्चतुर्थम् । यज्ञाऽ५य ॥ प्रथमस्त्रीनतिक्रामति अश्विनोर्व्रते । ईऽ५ हीहीहीहीही (मा. ल. १. २७-३१) ॥ योनौ सोमाऽ३नाऽस्वरणाम् (ग्रा. ४. ३. १३९. १) इति काक्षीवते ह्यणस्पताएऽ३ । एवं भवति ॥ १९ ॥

विशीये मोच्चादिर्नीचो नौ ॥ २० ॥

वि.&भा. विशोविशीये (ग्रा. २. ९. ८७. १) प्रथमोच्चस्याद्यमक्षरं नीचं भवति योनौ । अग्निं वोऽ२ ॥ २० ॥

दी. विशोविशो हिंवोऽ३ अतिथाइम् (ग्रा. २. ९. ८७. १) इति योनौ विशोविशीये प्रथमोच्चस्याद्यमक्षरं नीचं भवति । अग्निंवोऽ२ । ऊहे न भवति । द्वितीयायां (ऊ. अ. ५७५) मित्राऽ२न्न । तृतीयायां योदेंऽ२व ॥ २० ॥

आहिन्वन्ति सर्वासु ॥ २१ ॥

वि.&भा. अकारः प्रतिषेधे । हिन्वन्ति (ऊ, द, १७७) विशोविशीये प्रथमोच्चाद्यमक्षरं सर्वासु न नीचं भवति । अर्थादन्यत्सर्वं नीचम् ॥ २१ ॥

---

1. KS² om. अक्षरं

5. A²S¹M¹-²T परित्रान (M¹-² ०स्वानो) षष्ठे पवित्रे सोमो अक्षरदिति अतिक्रमात् M¹-² कामत्, T कामन for अतिक्रमः;

7. E after आरोऽ२३हान् adds: अतिक्रामति

11. A²M¹-²T आदिः for आद्यम्; वि. om. अक्षरं

17. वि. om. प्रतिषेधे; T उच्चान्त्यम् for उच्चाद्यम्;

18 भा. om. न; वि. om. भवति; T om. अर्थात्...नीचम्; B⁴अथ for अर्थात्; भा: उच्चम् for नीचम्

दी. अकारः प्रतिषेधे। हिन्वहुताऽ३इस्त्र् (ऊ. द. १७०) इति विशोविशीये प्रथमोच्चस्याद्यमक्षरं न नीचं भवति। प्रथमायां स्वसारः। अत्राद्यं न नीचम्। द्वितीयायां देवदें। अत्राद्यं न नीचम्। तृतीयायां वृष्टिन्दे। अत्राद्यं न नीचम्। योनौ तृतीयपादप्रथमपर्वणि आद्यस्याक्षरस्य नीचत्वम्। उत्तरयोः उच्चत्वम्। अत्र सर्वासु तत्स्थानभूतस्य आद्यस्योच्चत्वम्। इतरयोरनुच्चत्वम्। शिष्टानां सर्वत्रोच्चत्वम्। तुहर (ऊ. द. ४९६) ॥ २१ ॥

ज्ञीयक्ष्वाद्यायां ज्ञीयवत् ॥ २२ ॥

वि. यज्ञायज्ञीयक्ष्वु विशीये (ऊ. ए. ४७९) प्रथमोच्चं ज्ञीयवत् आद्यायाम् ॥

भा. यक्षायज्ञीयक्ष्वु विशोविशीये (ऊ. ए. ४७९) आद्यायां यज्ञायज्ञीयवत् प्रथमोच्चं भवति ॥ २२ ॥

दी. यज्ञायज्ञाहुँवोऽ३अग्नयाइ (ऊ. ए. ४७९) इति विशोविशीये प्रथमायां यज्ञायज्ञीयवत् भवति। पप्रीऽ२म्त्रयममृतम्। द्वितीयायां तत्स्वाहि। तृतीयायां स्वाहि ॥

अन्यदुच्चम् ॥ २३ ॥

वि.&भा. अन्यत् प्रथमोच्चं विशोविशीये सर्वमुच्चं भवति ॥ २३ ॥

दी. विशोविशीये अन्यत् सर्वं प्रथमोच्चमुच्चं भवति। उदाहरणम्। इन्द्रमच्छहिम (ऊ. ए. ४९६) इत्यादिविशोविशीये प्रथमायां तुहर। अत्र सर्वमुच्चम्। एवमादीनि ॥

---

4. L^1My^{2-3} R om. योनौ....तुहर (L.5)

8. $S^1A^2M^{1-2}T$ ज्ञीयक्षु for यज्ञायज्ञीयक्षु; M^{1-2} after ज्ञीयवत् add: भवति

14. $KM^1{-}^3S^1{-}^3$ तृतीये पादे A^2T द्वितीये पादे for विशोविशीये; A^3 सर्वत्र न $M^1{-}^2TS^1$ सर्वत्रैवं न for सर्वम्

सकृत्कृष्टं च तृतीयं नौ ॥ २४ ॥

वि. **योनौ** विशीये प्रथमोच्चं **तृतीयमक्षरं सकृत् कृष्टं** भवति ॥ २४ ॥

भा. **सकृत् कृष्टं** चाक्षरं प्रथमोच्चं तृतीयोच्चं भवति । योनौ विशोविशीये ॥

दी. **विशोविशोहुम्** (ग्रा. २. ९. ८७. १) इति **योनौ** विशोविशीये प्रथमोच्चस्य **तृतीयमक्षरं सकृत् कृष्टं** भवति । **अग्निंवोऽ२** । अत्र तृतीयं **वो**-अक्षरं **कृष्टं** भवति ॥ २४ ॥

द्वितीयमुत्तरयोः ॥ २५ ॥

वि. **उत्तरयोः** स्तोत्रीययोः **द्वितीयमक्षरं** सकृत् कृष्टं च भवति ॥ २५ ॥

भा. योनावेवोत्तरयोः प्रथमोच्चद्वितीयमक्षरं सकृत् कृष्टं भवति ॥ २५ ॥

दी. **विशोविशोहुम्** (ऊ अ. ५७५) इति विशोविशीये **उत्तरयोः** स्तोत्रीययोः **द्वितीयमक्षरं** सकृत्कृष्ट भवति । द्वितीयायां **मित्राऽ२न्न** । तृतीयायां **योदेऽ२व** । अत्र द्वितीयं सकृत् कृष्टम् ॥ २५ ॥

एकाक्षरणिधने च जये शताद्वितीयम् ॥ २६ ॥

वि.&भा. **एकाक्षरणिधने च** यौधाजये **शताया द्वितीयस्वरापत्तिर्भवति** ॥

इति फुलविषरणे पञ्चमस्य सप्तमः खण्डः ॥ ७ ॥

इति पुष्पसूत्रभाष्ये पञ्चमस्य सप्तमी कण्डिका समाप्ता ॥ ७ ॥

दी. **प्रसोऽ३१** । **माऽ३दे** । **व** । **वाइताऽ२३४याइ** (ऊ. अ. ५४७) इति **एकाक्षरणिधने यौधाजये शतापर्व** द्वितीयस्वरमापद्यते । **प्ये अर्णाऽ३४५** । अत्र **प्रथमा**-क्षरत्रयस्य द्वितीयस्वरापत्तिः । एवं **नजागृऽ३४५** इत्यादीनि ॥ २६ ॥

इति फुलदीपे नवमप्रपाठकस्य सप्तमः खण्डः ॥ ७ ॥

---

2. A[2]M[1]-[3]T after भवति add: अग्निंवो

14. KA[2] शतायां, M[1]-[2]T शता for शताया

अष्टमः खण्डः

गूर्दे उत्तरयोर्होता यक्षाम् ॥ १ ॥

वि.&भा. गूर्दे उत्तरयोः स्तोत्रीययोः होता यक्षासंघातमापद्यते । यक्षाइया ऽ२३सीऽ३समन्ते ॥ १ ॥

दी. ओम्राइ । त्वन्नोऽ२३आ (ऊ. द. ११९) इति-गूर्दे उत्तरयोः स्तोत्रीययोः होतापर्व यक्षासंघातमापद्यते । द्वितीयायाम् अ । ग्राइर्वाऽ२३म् । तृतीयायां शो । चाइष्ठाऽ२३दी । अग्निन्दूताम् (ग्रा. १. १. ३. १) इति साम्नि होताराऽ-२३ग्नी इति होतापर्व भवति । त्वमग्ने गृहपताइः (ग्रा. २. ६. ६१. १) इति साम्नि य । क्षाइयाऽ२३सीऽ३ । इति यक्षापर्व भवति ॥ १ ॥

ऋतुष्ठाज्ञीयवत्तौरे प्रस्तावो योनौ ॥ २ ॥

वि. तौरश्रवसे (अ. ३. ३. ११७) प्रस्तावः ऋतुष्ठायज्ञायज्ञीयवद्–(अ. ५. ५. २१५) भवति । योनावेव । चतुर्थस्य वृद्धिरित्यर्थः ॥ २ ॥

भा. ऋतुष्ठायज्ञायज्ञीये (अ. ५. ५. २१५) यद्रूपः प्रस्तावः तौरश्रवसे (अ. ६. ६. ११७)ऽपि तद्रूपः प्रस्तावो भवति । योनौ तु प्रकृतिमापद्यते विकारविवक्षया ॥

दी. वाऽ५सन्तः । ईऽ३न्नूऽ३रन्तायाः (अ. ५. ५. २१५) इति ऋतुष्ठाय-ज्ञीयवत् तौरे । याऽ४दिन्द्र । शाऽ३सोऽ३अन्नाताम् (अ. ३. ३. ११७) इति तौरश्रवसे योनौ प्रस्तावो भवति ॥ २ ॥

प्रत्नं सधस्थायां याजिसंघातवत् ॥ ३ ॥

वि.&भा. प्रत्नंसधस्थायां तौरश्रवसे (र. प्रा. १५९) प्रस्तावो यजिसंघातवत् भवति ॥ ३ ॥

---

3. KS^2 om. संघातम्
10. $A^2M^{1-2}T$ यज्ञायज्ञीयवत् for ज्ञीयवत्
12. KS^2My^1 सिद्धो गन्यातो विशेषविवक्षया for चतुर्थस्य...अर्थः; A^2T चतुर्थः तस्य for चतुर्थस्य
19. भा. प्रस्तावे for प्रस्तावः
20. भा. before भवति adds: प्रस्तावः; वि. after भवति add: साध्यवत्

दी. प्राऽ५त्नम् । सधाऽ३स्थाऽ३मासादात् (र. ग्रा. १५१) इति तौरश्रवसे यजिगंगातवत् । याऽ५जि । छुन्त्वाऽ३वाऽ३वृमहाइ (ग्रा. ३. १२. १११) एवं प्रस्तावो भवति ॥ ३ ॥

पूर्वार्कपुष्परयिष्ठयोः स्तौभिकं पर्वानुपादम् ॥ ४ ॥

वि.& भा. पूर्वार्कपुष्परयिष्ठयोः स्तौभिकमेव पर्व अनुपादं भवति । पादानुगतं भवति ॥ ४ ॥

दी. परीतोषिञ्चतासुतम् । हुवेऽ२३ (ऊ. द. १८३) इति पूर्वे अर्कपुष्पे हुवेऽ२३ इति स्तौभिकं स्तोभस्य पर्व प्रतिपादं भवति । अभीनोवा । जसाताऽ३-माम् (ऊ. द. १६७) इति रयिष्ठे औऽ३होऽ२वा इति स्तोभस्य पर्व प्रतिपादं भवति ॥

सामान्ते सर्वाणि ॥ ५ ॥

वि. भा. सामान्ते सर्वाणि स्तौभिकानि पर्वाणि भवन्ति यथा परीतोषि- (ऊ- द. १८३) पवस्वा-(ऊ. सं. २८४)दिषु ॥ ५ ॥

दी. पूर्वार्कपुष्परयिष्ठयोः साम्नोः अन्ते सर्वाणि स्तौभिकानि पर्वाणि भवन्ति । पूर्वे अर्कपुष्पे (ऊ. द. १८३) हुवेऽ२३ । हुवेऽ२३ । होवाऽ३हाऽ३ । हाऽ३४ । औहोवा । सामान्ते इमानि पर्वाणि भवन्ति । रयिष्ठे (ऊ. द. १६७) औऽ३होऽ३ वा । ईऽ३या । ईऽ३याऽ३४ । हा । हाउवाऽ२ । सामान्ते इमानि पर्वाणि भवन्ति ॥ ५ ॥

आर्चिकमकृष्टं सर्वत्रायोनौ ॥ ६ ॥

वि.& भा. पूर्वार्कपुष्परयिष्ठयोः आर्चिकमक्षरमकृष्टं भवति सर्वत्रायोनौ । योनावेव कर्षणं भवति । नान्यत्र ॥ ६ ॥

5. A²M¹-²T एकं for एव; KS²S¹ om. My¹ एव
11. भा. om. सामान्ते and trans. सर्वाणि after पर्वाणि; वि. om. यथा
13. L¹ सर्वाणि for पर्वाणि
19. A²S¹M¹-²T om. सर्वत्रायोनौ
20. वि. om. भवति

दी. पूर्वार्कपुष्परयिष्ठयोराद्विकम् ऋगक्षरसंबन्धि अक्षरम् अक्रुष्टं न क्रुष्टं भवति। अयोनौ ऊहे सर्वसामसु। योनौ तु कर्षणं भवति। नान्यत्रेत्यर्थः। पूर्वे अर्कपुष्पे उदाहरणम्। परीतोषिञ्चतासुतम् (ऊ. द. १८३) अत्र तकारस्य न कर्षणं भवति। सोमोयउत्तमँहविः। अत्र वि-शब्दस्य न कर्षणं भवति। एवमादीनि। योनौ तु भवति। पवित्रंते विततंब्रह्मणस्पतेऽ३ (सा. १६. ९. ५६५. १) अत्र तेशब्दस्य कर्षणं भवति। एवमादीनि। रयिष्ठे उदाहरणम्। रयिमर्षशतास्पृहाऽ२३४५म्। (ऊ. द. १६७) अत्र यिशब्दस्य कर्षणप्राप्तस्य न कर्षणं भवति। अत्र निधनान्ते स्वरितत्वात् स्वरो भवति। इन्दोसहस्रभर्णसाऽ२३४५म्। अत्र दोशब्दस्य न कर्षणं भवति। योनौ तु भवति। सोमोऽ२यउत्तमँहवीः। (ग्रा १४. ५. ५१२. २) अत्र मो-शब्दस्य कर्षणं भवति। एवमादीनि ॥ ६ ॥

वैधृते ष्ठे नौ थे रे च द्वितीयम् ॥ ७ ॥

वि. & भा. वैधृते वासिष्ठे योनौ उद्गीथे प्रतिहारे च द्वितीयमक्षरं वृद्धं भवति। एषप्रकोशे। नोहगीतौ। अभिप्रियाण्याम् ॥ ७ ॥

दी. एषप्रकोशेऽ२ (ग्र. १६. ९. ५५६. १) इति योनौ वैधृते वासिष्ठे उद्गीथे प्रतिहारे च द्वितीयमक्षरं वृद्धं भवति। इदं पदविभाग्यम्। इन्द्रास्यवाज्राऽ२ः। अत्रोद्गीथे द्रशब्दो वृद्धः। अभाऋतास्याऽ२। अत्र प्रतिहारे भिशब्दो वृद्धः। ऊहे न वृद्धः। अभिप्रियाणीऽ२ (ऊ स. ७३२) इति वैधृते वासिष्ठे उद्गीथे। नामानियाह्वोऽ२। अत्र मा-शब्दो न वृद्धः। प्रतिहारे। आव्रियास्वऽ२। अत्र सू-शब्दो न वृद्धः ॥ ७ ॥

वाम्रे चायानौ ॥ ८ ॥

---

7. My[2]-[3] R om. कर्षणप्राप्तस्य

12. B[4]A[1] after अक्षरं adds: क्रुष्टं

13. वि. om. एषप्रकोशे; भा. ऊह गीतौ न भवतीत्यर्थः for नोहगीतौ; My[1] om. अभिप्रियाण्याम्

वि. & भा. वाम्रे चोद्गीथे द्वितियमक्षरं वर्धतेऽयोनौ ॥ ८ ॥

दी. **सोम३ष्वाणस्सो** । हाऽ३हाऽ३इ (ऊ. द. ८७) इति वाम्रे उद्गीथस्य द्वितीयम् अक्षरं वर्धते । **अयोनौ** ऊहे । अधाहोऽ२इ । अत्रोद्गीथे धि-शब्दो वृद्धः । योनौ तु न वृद्धः। **नसीमदेवआ** (ग्रा. ७. ४. २६८.१) इति वाम्रे इष२होऽ२इ । अत्रोद्गीथे द्वीतीयं न वृद्धम् ॥ ८ ॥

छिद्रेऽभिसोमाद्यायां नीचं ध्यभ्यासे ॥ ९ ॥

वि. **अभिसोमाद्यायामच्छिद्रे** (ऊ. द. १५२) अभ्यासे विषये धिशब्दो नीचैर्भवति । न पुर्वस्मिन् प्रथमोच्चे ॥ ९ ॥

भा. अच्छिद्रे अभिसोमाद्यायां धीत्येतदक्षरं नीचं भवति । अक्षरसंघातविषये धिशब्दो नीचो भवति । न पूर्वस्मिन् प्रथमोच्चे ॥ ९ ॥

दी. **अभिसोमा** । सआऽ२३उवाऽ२३ (ऊ. द. १५२) इत्यच्छिद्रे प्रथमायाम् **अभ्यासे** धि-अक्षरं **नीचं** भवति । समुद्रस्या । धिवि । अत्र धि-शब्दो नीचः ॥ ९ ॥

ज्ञीयर्क्षु विशीयान्त्यायां स्यामान्माभयोरेकत्वान्मा भा संपूर्यते ॥ १० ॥

वि.&भा. **यज्ञायज्ञीयर्क्षु** **विशोविशीयान्त्यायां** (ऊ ए. ४७९) स्तोत्रीयायां **स्यामान्माभायोरेक**पर्वत्वं कृत्वा **न्माभा** **संपूर्यते** । योनौ स्याऽ३माऽ३न्माऽ२३४ भाइ । इति स्यामान्माभा । ताऽ२नूऽ३१२३४नाम् ॥ १० ॥

---

1. P after वर्धते adds: अधीषुवोरयीगामित्येवमादिषु । and after अयोनौ adds: योनौ तु प्रतिषेधः; B[4] after अयोनौ adds: अघिष्णुभिरवीनामित्येवमादिषु

7. M[1-3] om. अभि०....अभ्यासे

17. भा. एकत्वं for एकपर्वत्वम्; M[1-3] om. स्यामान्मा...योनौ

दी· यज्ञायज्ञाहिंवोऽ३अग्नयाइ (ऊ. ए. ४७९) इति **विशोविशीये** तृतीयायां स्तोत्रीयायां ताऽ३नूऽ३१२३४नाम्। अत्र स्याऽ३माऽ३न्माऽ२३४भाइ। **एतयोः** पर्वणोरेकत्वात् एकीभावात् **न्माभापर्व संपूयते**। संपूर्णं क्रियते ॥ १० ॥

द्विस्वरे विराममेके ॥ ११ ॥

वि. न्मांभायां चतुर्थे स्वरे **विरामं** मन्यन्ते एके आचार्याः ॥ ११ ॥

भा. तस्या एव माभायाः चतुर्थे स्वरे एके आचार्याः विरामं मन्यन्ते ॥ ११ ॥

दी. तस्या **न्माभायाश्चतुर्थस्वरे विराममवसानमेके** आचार्या मन्यन्ते। **दाऽ२-३४योऽ६हाइ** इति द्विस्वरे। चतुर्थस्वरे विरामं मन्यन्ते इत्यर्थः। **प्रेष्ठँवाः** (ग्रा-१.-१.५.१) इति साम्नि द्विस्वरः। उदाहरणम्। **ताऽ३नूऽ१२३४नाम्**। (ऊ. ए.-४७९) एवं चतुर्थे स्वरे विरामः ॥ ११ ॥

ण्वबृहति च शतान्माभयोः ॥ १२ ॥

वि.&भा. यज्ञीयर्क्षु **कण्वबृहति** (ऊ. क्षु. ८९७) अन्त्यायां **शतान्माभयोः** एकत्वं **न्माभा** संपूर्यते। अत्रापि विरामं मन्यन्ते एके चतुर्थस्वरे ॥ १२ ॥

दी. **औहोयज्ञायज्ञाऽ३ए** (ऊ. क्षु. ८९६) इति **कण्वबृहति** तृतीयायां **शतान्म-भयोः** पर्वणोः एकत्वात्**न्माभापर्व** संपूर्यते। संपूर्णं क्रियते। **ताऽ३२नूऽ३१२३४नाम्**। अत्र न्माभापर्व संपूर्णं क्रियते। **शताक्राऽ२३४तूः**। इति **शतापर्व** भवति। **द्विस्वरे** विराममेके आचार्या मन्यन्ते ॥ १२ ॥

---

4. A[2]M[1]-[2]TS[1] थे स्वरे, KP द्विस्वरे for द्विस्वरे

7. L[1]My[2]-[3] after मन्यन्ते add: उदोऽ२३४ इति विस्वरे (My[2] विवस्वरे)

9. E om. उदाहरणम्

13. भा. द्विस्वरे विरामं मन्यन्ते एके आचार्याः for अत्रापि..चतुर्थस्वरे; A[2]M[1]-[2]T तृतीय° for चतुर्थ°

15. & 16. EM[4]S[2] संपूरणं for संपूर्णं

16. R My[2] विवस्वरे for द्विस्वरे

अङ्जोरूपध्यमायामुस्थमाउवायां विरामम् ॥ १३ ॥

वि. अङ्गोवैरूप(र.सं. ३१)मध्यमायामुस्थमक्षरमाउवायां प्रत्ययभूतायां विराममापद्यते। न संधीयत इत्यर्थः ॥ १३ ॥

भा. अङ्गोवैरूप-(र. सं ३१) मध्यमायाम् उस्थमक्षरम् आउवायां परभूतायां विरामं [अपद्यते । न] संधीयत इत्यर्थः ॥ १३ ॥

दी. (२ २) अग्निस्तोमा। स आऽ३१उवाऽ२३ (र. सं. ३१) इत्यङ्गोवैरूपे द्वितीयायां स्तोत्रीयायाम् आउवायां परभूतायाम् उस्थमक्षरं विराममवसानं प्राप्नोति (२) नऊऽ३ । (१) आउवाऽ२३ । एवम् ॥ १३ ॥

ङिनतृतीयायां स्तावेऽभ्यासाभावमेके ॥ १४ ॥

वि.&भा. शैखण्डिने (ऊ. क्षु. ९०३) तृतीयायां स्तोत्रीयायां प्रस्तावेऽभ्यासे प्रत्यये आभावमेके मन्यन्ते (४ ५ ४ ५) भ्वसाभ्वसाः ॥ १४ ॥

दी. (३ २ १) प्रताऽ३होइ (ऊ. क्षु. ९०६) इति शैखण्डिने तृतीयायां प्रस्तावे अभ्यासे प्रत्यये अभावमेके आचार्याः मन्यन्ते। (४ ५ ४ ५) भ्वसाभ्वसः। अत्र सकारस्याभावः ॥ १४ ॥

रंघोषे वा विसर्जनीय आम्नायसिद्धत्वात् ॥ १५ ॥

वि.& भा. रेफापत्तिर्वा विसर्जनीयस्य भवति घोषे प्रत्यये। कस्मात्। आम्नायसिद्धत्वात्। तथैव ह्याम्नातमूहगाने ॥ १४ ॥

दी. शैखण्डिने विसर्जनीयस्य रेफास्यापत्तिर्वा भवति। घोषे प्रत्यये। कस्मात्। आम्नाये अध्ययने विसर्जनीयस्य लोपसिद्धत्वात्। ऊहगाने तथैवाध्ययनं कृतम्।

---

1. R औहोवायां for आउवायां

11. भा. आचार्याः for भ्वसाभ्वसाः

16. $A^2M^{1-2}TS^1$ रेफधर्मः A^1 रेफोत्पत्तिः for रेफपत्तिर्वा; $KS^2M^{1-3}T$ विसर्जनीयस्स for विसर्जनीयस्य

17. भा आम्नाने कृतं S^1 T आम्नातः for आम्नातम्

नत्रानवाः । धसाधसाः । श्मयाश्मायाः । अस्य विसर्जनीयस्य लोपः । शिक्षायाम्-

"अकारान्तं यदूष्मान्ते घोषं च परतः स्थितम् ।
सघोषवति लोपस्तु विदागाधन्तु दर्शनम् ॥" (ता. शि. . .?)

तृतीये रेफापत्तिपक्षे भ्वसाभ्र्वसाः ॥ १५ ॥

बृहतीक्रौञ्चे तृतीये पादे तृतीयोच्चमभीवर्तवत् ॥ १६ ॥

वि.& भा. बृहत्यां वाङ्निधने **क्रौञ्चे तृतीये पादे तृतीयोच्चमभीवर्तवद्** भवति । यथा **तंवोदस्माभिप्रवयोः** ॥ १६ ॥

दी. **तंवोदास्माऽ३१२३४म्** । **ऋती** । **षहाऽ३म्** (ऊ.क्षु.८२३) इति बृहत्यां वाङ्निधने क्रौञ्चे तृतीये पादे तृतीयोच्चं तृतीयस्वरपर्यन्तमुच्चं पर्व अभीवर्तवत् भवति । **नस्वसरेषुधे** । योनौ । **अभीनोवाऽ३१२३४** (ग्रा. १६.८.५४९.४) इति वाङ्निधने क्रौञ्चे तृतीये पादे **इन्दोसहा३१२३४** । **स्त्रभ** । अत्र चतुर्थोच्चम् । **अभाइप्रवाऽ३१२३४ः** (ऊ. क्षु. ८६४) इति बृहत्यां वाङ्निधने **क्रौञ्चे** तृतीये पादे तृतीयोच्चं पर्व अभीवर्तद् भवति । **भ्योमघवापुरू** । एवम् ॥ १६ ॥

दद्राणतृतीयायां च रक्षा शतासूष्वे ॥ १७ ॥

वि.& भा. **विधुंदद्राण तृतीयायां चाग्नेरक्षा शतासूष्वे** यथा तद्वत्प्रत्येतव्या । आद्यस्याक्षरस्य लोपार्थं वचनमिदं प्रत्येतव्यम् । **अन्ये** पुनरिहा**प्येके** इत्यधिकारमनुसारयन्ति । चशब्दात् । तेषां पक्षे **रक्षाशता** तृतीयादीत्येवं भवति ॥ १७ ॥

---

5. A[2]S[1]M[1-2]T बृहत्यां वाङ्निधने for बृहतीक्रौञ्चे
6. A[2]M[1-2]T बृहती B[4] बृहतीविषये for बृहत्यां;
11. My[2-3] om. क्रौञ्चे
15. M[1-2] after यथा add: भवतः तथा; M[1-2] after प्रत्येतव्या add: रक्षाशताग्रहणात्
16. KS[1-2]A[2]My[1] om. इदं; वि. om. अन्ये
17. वि. after °सारायन्ति add: इति; B[4] गशता for रक्षाशता; KS[1] तृतीये इत्येवं TS[2] तृतीयादित्येव P तृतीयादिना एव for तृतीयादीत्येवम्; KS[1] after भवति adds: इति; M[12] वृद्धिः for भवति

दी. विधुंदद्राण॑ समने (ऊ. प्रा. ८४४) इति वषट्कारणिधने **तृतीयायाम्** **अमेराऽ२क्ष।णोअ॑हसाः** इति पर्व **शताभृष्वे** द्वे पर्वणी अप्नोति । **य।ना ऽ२इष्वा।या** **पौंऽसियानाइ** । अत्रादौ शता । तदनन्तरं **सूष्वोणासां:** (ग्रा. ३१६. १) । इति भवति । योनौ **अमित्वोऽ२पूर्वपीतयाइ** (ग्रा. २५६. १) । एवं भवति ॥ १७ ॥

पतिःकवीषु चान्त्यस्याक्षरस्याभ्यासः सर्वास्वतृतीये दे ॥ १८ ॥

वि.&भा. **पतिःकवीषु** चान्त्यस्याक्षरस्याभ्यासो भवति । सर्वासु स्तोत्रीयासु तृतीयपादवर्जम् । **विधुन्दद्राणायाम्** ॥ १८ ॥

दी. **विधुन्दद्राणम्** (ऊ. प्रा. ८४४) इति वषट्कारणिधते सर्वासु स्तोत्रीयासु **पताइःकाऽ१वीरः** इति पर्वणोऽन्त्यस्याक्षरस्याभ्यासो भवति सर्वासु तृतीयपादवर्जम् । प्रथमायां **युवना॑सन्तं पलितो जाऽ३गाराऽ२** । **राऽ२३** । अत्रान्त्यस्याक्षरस्याभ्यासः । तृतीये पादे **वियम्माहाऽ१इत्वाऽ२३** । अत्र **पतिःकवी** भवति । द्वितीयायाम् **आयोमहःशूरः** । **सनादाऽ३माइडाऽ२ः** । **डाऽ२३ः** । अत्र अन्त्याक्षरस्याभ्यासः । तृतीये पादे **इत्तन्नामोऽ१घाऽ२३म्** । अत्र **पतिःकवी** भवति । तृतीयायां **ये भिरौ-क्षद्वृत्रहत्यायाऽ३वाज्राऽ२इ** । **ज्राऽ२३इ** । अत्रान्त्यस्याक्षरस्याभ्यासः । तृतीये पादे **माणःस्यामाऽह्वाऽ२३** । अत्र **पतिःकवी** भवति ॥१८ ॥

कृष्टवृध्दयोर्मध्ये गीतं लुप्यते ॥ १९ ॥

वि.&भा. **कृष्टवृद्धयोरक्षरयोर्मध्ये** अभिगीतं लुप्यते । सर्वमेतत् **दद्राणवतीषु** ॥

दी. **युवान**मित्यादि । **गाराऽ२** । अत्र **मध्ये अभिगीतं लुप्यते** । **योनौ** । **रायवाऽ२ः** (ग्रा. ७.६.२५६.१) । अत्र मध्ये अभिगितं भवति ॥ १५ ॥

---

6. भा. om. भवति; भा. om. स्तोत्रीयासु;

7. भा. A[2] om. विधु०दद्राणायाम्

16. KS[1] My[1] वृद्धकृष्टयोः for कृष्टवृद्धयोः; M[1]-[2]TS[1] अभिगीतं for गीतं;

कीर्त्ययशःसंसर्पेषु वान्ते यतिःशब्दौ नीचौ ॥ २० ॥

वि. दिवाकीर्त्ययशःसंसर्पेषु प्रस्तावान्ते य-शब्दति-शब्दौ **नीचौ** भवतः इन्द्रमिद्दे–आयन्त - पुनानादिषु । भद्रा इन्द्रस्य रातयः। अनुत्तश्चर्षणीधृतिः ॥

भा. कीर्त्ययशःसंसर्पेषु प्रस्तावान्ते वर्णान्तस्थो वर्णो नीचो भवति । इन्द्रमिद्देवतातये आयन्तइव-(र. सं. ५१२) पुनानादिषु ॥ २० ॥

दी. आयन्तइवसूर्यम् (र. सं. ५२) इति **महादिवाकीर्त्ये** तृतीयायां प्रस्तावान्ते य-शब्दो नीचः। भद्राइन्द्रस्यरातयः। अत्र प्रस्तावान्ते **यःशब्दो** नीचः। त्वमिन्द्रयशाअसि (र. स. ८८) इति यशसि द्वितीयायां प्रस्तावान्ते ति-शब्दो नीचः। अनुत्तश्चर्षणीधृतिः। अत्र प्रस्तावान्ते **तिश्शब्दो** नीचः। उत्सोदेवोहिरण्ययः (र. स. १३२) इति संसर्पे प्रस्तावान्ते यःशब्दो नीचः ॥ २० ॥

अरोचयत्सर्वत्र ॥ २१ ॥

वि. इन्द्रः सूर्यमरोचयत् (र. सं. ५१) **सर्वत्र** प्रस्तावेऽपि नीचो भवति ॥

भा. इन्द्रः सूर्यमरोचयत् (र. स. ५१) इति **सर्वत्र** नीचीभावः । **त्वमिन्द्र यशा असि** (इन्द्रमिद्देवतातये) इत्यत्र ॥

दी. इन्द्रः सूर्यमरोचयत् (र. सं. ५१) इति महादिवाकीर्त्ये **सर्वत्र** उपद्रवे प्रस्तावे उद्गीथे चारोचयदिति नीचीभावः ॥ २१ ॥

असूर्यम् ॥ २२ ॥

वि. सूर्यशब्दस्य प्रस्तावान्ते नीचीभावप्रतिषेधः। **आयन्त इव सूर्यम्** (र. सं. ५२) ॥ २२ ॥

---

1. A[2]M[1-2]TS[1] अन्तस्थो नीचः for यतिःशब्दौ नीचौ
2. M[1-2] प्रस्तावान्तः for प्रस्तावान्ते; A[2]S[1] वर्णोऽन्तस्थो नीचो भवति M[1-3] अन्तस्थो नीचो भवति for यशब्द०...भवतः;
3. K om. इन्द्र०...पुनानादिषु; S[2] om. इन्द्र०...धृतिः; B[1] after पुनानादिषु adds: प्रस्तावान्तेषु

भा. अकारः प्रतिषेधार्थः । अन्तःस्थोऽपि न नीचो भवति । **आयन्त इव सूर्यम्** ॥ २२ ॥

दी. अकारः प्रतिषेधे । सूर्यमिति शब्दो न नीचः । यकारस्य नीचभावः प्राप्तः प्रतिषिध्यते । आयन्त इव सूर्यम् (र. सं. ५२) । अत्र सूर्यशब्द उच्चः ॥ २२ ॥

श्यैते हुम्मा ज्ञीयवत् ॥ २३ ॥

वि. श्यैते (ऊ. द ४३) हुम्मा ज्ञीयवद् भवति । कर्षणस्य निवृत्यर्थं वचनम् । अनेन सूत्रारम्भेण सर्वेषां स्तौभिकानां कर्षणनिवृत्तिर्भवति ॥ २३ ॥

भा. श्यैते (ऊ. द. ४६) हुम्मा यज्ञायज्ञीयवद् भवति । कर्षणस्य निवृत्त्यर्थं वचनम् ॥ २३ ॥

दी. अभिवप्रस्सुरा (ऊ. द. ४३) इत्यादिश्यैते यज्ञायज्ञीयवत् हुम्मा-शब्द उच्चः । हुम्माइ । इति प्रथमस्वरे उच्चः । कर्षणस्य निवृत्त्यर्थमिदं वचनम् ॥ २३ ॥

जारादिश्च गौश्शृङ्गे ॥ २४ ॥

वि.&भा. गोशृङ्गे जरादिर्यज्ञायज्ञीयवद् भवति प्रस्तावान्ते ॥ २४ ॥

दी आजागृविर्विप्रः (ऊ. क्ष. ९१९) इति गौशृङ्गे प्रस्तावान्ते जाराया आदि र्यज्ञायज्ञीयवत् । पूता । योनौ । तरणिरित्तिसषा । सतीऽ२ (ग्रा. ६.१.२३८.३) इति गौशृङ्गे युजा । अत्रादिर्ह्रस्वः ॥ २४ ॥

संजयाभीशववैयश्वसाम्राादिषु लक्षणसिद्धत्वाद् द्रव्यान्तर एकं पर्व भवति ॥ २५ ॥

---

7. A^2T कर्षणस्य for कर्षण०

11. E after वचनम् adds: नन्दायाः त्सिब्यकर्षणम् । इत्यनेन नन्दाभावात् कर्षणं न निवर्तते । कर्षणनिवृत्त्यर्थं श्यैते हिम्माज्ञीयवत् इति वचनम्

13. A^2M^1-^{2}T om. जारादिः

15. My^2 E after ०यज्ञीयवत् add: वृद्धं भवति

17. My^{2} ^{3} om. ०वैयश्व०

वि & भा. संजयाभीशववैयश्वसाध्रादिषु लक्षणसिद्धत्वात् द्रव्यान्तरे ऊह-गीतावेकं पर्व भवति। कथं सा सिद्धिरिति चेत्। आह त्राँइणायां च यत् प्रकृतं प्रथमोच्चात् संहन्यते इति। अत्र त्वं वृत्राणीति ग्रहणात्। तथात्रैवोत्तमे गीते वर्धत इति। अत्र तथा देनीचानामित्यत्र पानीयसीति ग्रहणात ॥ २५ ॥

दी. आते अग्नइधीमाऽ३हाइ (ऊ. द. ९६) इति संजये योनौ द्रव्यान्तरे सति पृथक्पर्वणि सति ऊहगीतौ एकं पर्व भवति। कस्मात्। लक्षणैः वचनैः सिद्धत्वात्। द्वितीयायां सुश्चन्द्रदस्मविश्पतेहव्यवाट्तुभ्यंहू। अत्र पर्वद्वयस्य एकं पर्व भवति। तृतीयायाम् उतोनउत्पुप्र्या उक्थेषुशवसा। अत्र पर्वद्वयस्य एकं पर्व भवति। परीतोषिश्चतासुतम्। ए (ऊ. द. १८६) इत्याभीशवे योनौ द्रव्यान्तरे सति ऊहगीतौ एकं पर्व भवति। द्वितियायां सुषावसोममद्रिभिरे। अत्र पर्वद्वयस्यैकं पर्व भवति। तृतीयायाम् अदब्धस्सुरभिन्तरए। अत्र पर्वद्वयस्य एकं पर्व भवति। उभयꣳशृणवच्चनाऽ३ए। (ऊ. द. १५६) इत्यादिवैयश्वे द्वितीयायां तꣳहिस्वराजाऽ२-म्वृषभाम्। अत्र पर्वद्वयस्य एकं पर्व भवति। तृतीयायाम् उतोपमानाऽ२म्प्रथमो। अत्र पर्वद्वयस्यैकं पर्व भवति। परित्या३ꣳहर्यतँहराइम् (ऊ. द. २०२) इत्यादिसाध्रे योदेवाब्विश्वाꣳइत्पराऽ२३४५इ। अत्र पर्वद्वयस्य एकं पर्व भवति। द्वितीयायां प्रियमिन्द्रस्यकामियऽ२३४५म्। अत्र पर्वद्वयस्य एकं पर्व भवति। तृतीयायां नरे-चदक्षिणावताऽ२३४५इ। अत्र पर्वद्वयस्य एकं पर्व भवति। योनौ त्वमाऽ३इन्द्रा यशाअसाइ। (ग्रा. ६.२.२४८.२) इति साध्रे त्वंवृत्राणिहँस्यप्रतीन्येकइत्पु। रू। अत्र पर्वद्वयं भवति। सूत्रे आदिशब्दात् यज्ञायज्ञाहुम् (ऊ. ए. ४७९) इति विशोविशीये तृतीयायां ताऽ३नूऽ३१२३४ऽनाम्। अत्र पर्वद्वयस्यैकं पर्व भवति ॥ २५ ॥

नमसा लेयवच्छ्रायन्तोये ॥ २६ ॥

---

1. M[1]-[2] om. संजाया०...पर्व भवति; भा. before लक्षण add: बृहल्ल
2. s[1] after प्रकृतं adds: अपकृतं
3. T om. वृत्राणीति...तथादे; s[1] कृष्टगृद्धत्व for वृत्राणीति
   s[1]A[2]M[1]-[2] उत्तरे for उत्तमे
4. s[1]A[2]M[1]-[2]T विनीय यसीति श्रवणम् for पानीयसीति ग्रहणात

वि.&भा. अच्छानःआयन्तीये अच्छा यज्ञासो नमसा इति कालेयवदुच्चनीचं भवति। अच्छायज्ञासोनमसा ॥ २६ ॥

दी. अच्छानश्शीरशोऽ१चाइषाम् (ऊ. क्षु. ९३९) इति आयन्तीये अच्छा-नाऽ३श्शीरशीरशोचिषाम् (ऊ. ए. ४३७) इति कालोयवत उच्चनीचं भवति। अच्छा यज्ञासोनमसा। अत्र नकारो नीचः। मकार उच्चः। साशब्दो नीचः ॥ २६ ॥

मराये हाउवान्तः क्रुष्टः ॥ २७ ॥

वि. ऊहगीतौ मराये हाउवायाम् अन्त्यमक्षरं क्रुष्टं भवति ॥ २७ ॥

भा. मराये हाउवान्तमक्षरं सकृत् क्रुष्टं भवतिं। ऊहगीतौ ॥ २७ ॥

दी. हाउहाउहाउ। आग्नीम् (ऊ क्षु. ९००) इति मराये तृतीयायां हाउ-हाउहाउ। वाऽ२३। अत्र वा-शब्दः क्रुष्टो भवति। यौनौ न क्रुष्टः ॥ २७ ॥

वैराजे चायोनौ विनतप्रतिषेधः ॥ २८ ॥

वि.&भा. महावैराजे (र. द. १०) चायोनौ विनतं प्रतिषिध्यते ॥ २८ ॥

दी. होइयाहोइयाहोइयाऽ३४३पित्र (र. द. १०) इत्यादि महावैराजे अयोनौ ऊहे विनतस्वरस्य प्रतिषेधः। द्वितीयायां श्वह॰सि। तत्र विनतस्वरो न भवति। तृतीयायां ममनु (? जुशस्व)। अत्र विनतस्वरो न भवति। योनौ विनत-स्वरो भवति। आद्रीऽ२ः (अ. २. ७. ८३)। एवम्। विनतं प्रथमादि द्वितीयान्तम् ॥ २८ ॥

वैरूपे तु देवता पदं दवता पदं निधने ॥ २९ ॥

---

1. A[2] om. अच्छानः आयन्तीये; वि. om. अच्छायज्ञासो
2. भा. om. अच्छा····नमसा
8. P संकृष्टं for सकृत्क्रुष्टम्
12. भा. विनतपर्षग: प्रतिषेधः for विनातं प्रतिषिध्यते
18. A[2]M[1-2]T om. second देवता पदम्

वि.&भा. वैरूपे तु देवता पदं देवता पदमित्येष निधनक्रमो भवति ऊहगीतौ ॥

इति फुल्लसूत्रविवरणे पञ्चमस्याष्टमः खण्डः ॥ ८ ॥

इति पुष्पसूत्रभाष्ये नवमस्य प्रपाठकस्य अष्टमी कण्डिका ॥ ८ ॥

१ २ २ २ १
दी. यद्याव इन्द्रतेशतम् (र. द. ७) इति पञ्चनिधने वैरूपे दिशंविँशहम्
२ २ १२१२ १२ १२ २२
इति देवता भवति । नत्वावज्रिन्सहस्रँसूर्याअनु इति पदं भवति । अश्वाशिशुमती इति
१ २ २१२२२
देवता भवति । न जातमष्टरोदसी इति पदं भवति । एवं निधने क्रमो भवति ऊहगीतौ ॥ २९ ॥

इति फुल्लदीपे नवमप्रपाठकस्य अष्टमः खण्डः ॥ ८ ॥

1. SA[12]M[1-3] पद० for एषः

नवमः खण्डः

अग्नेस्त्रिणिधन उष्त्रायां द्वितीयपाददद्वितीयं वृत् प्र ॥ १ ॥

वि & भा. सोमउष्वायाम् (ऊ. द. ८८) अग्नेस्त्रिणिधने द्वितीये पादे द्वितीयमक्षरं वृद्धं भवति प्रथमायां स्तोत्रीयायाम् ॥ १ ॥

दी. सोमउष्वा । णस्सोतृऽ१३४भी (ऊ द. ८८) इत्यग्नेस्त्रिणिधने द्वितीये पादे द्वितीयमक्षरं वृद्धं भवति प्रथमायां स्तोत्रीयायाम् । अधाइष्णुभिराऽ६२वाऽ२३ । अत्र धिशब्दो वृद्धः । अत्रैव द्वितीयमक्षरं वृद्धम् । नान्यत्र ॥ १ ॥

मान्गोवत्यां चानीकयायामाद्यम् ॥ २ ॥

वि. सोमउष्वाग्नेस्त्रिणिधने (ऊ. द. ८८) मान्गोशब्दवत्यामानीकयायामाद्यमक्षरं वर्धते ॥ २ ॥

भा. मान्गोशब्दवत्यां चानीकयायाम् आद्यमक्षरं वर्धते । सोमउष्वात्रिणिधने (ऊ. द.८८) ॥ २ ॥

दी. मन्गोभिराऽ३१उवाऽ२३ (उ. द. ८८)। अत्राद्यो मा-शब्दो वृद्धः । अगन्मवृम । अस्मिन् साम्नि आनीकयाऽ३१उवायेऽ२ इति पर्व भवति ॥ २ ॥

नुष्पि च शोके प्रस्वरे ॥ ३ ॥

वि. नुरशब्दपिशब्दौ च प्रथमस्वरे वर्धते त्रैशोके (ऊ. द. ७३) । सजूस्ततक्षुरिन्द्रं जजनुः । अपिकर्णे पि-शब्दश्च ॥ ३ ॥

भा. नुःशब्दे (ब्दः?) पिशब्दे (ब्दः?) च प्रथमे स्वरेऽवस्थितो वर्धते त्रैशोके (ऊ. द. ७३) । जजनूः । अपाइ ॥ ३ ॥

---

3. भा. trans. सोमउष्वायाम् after अग्नेस्त्रिणिधने; M[1]-[3] om. द्वितीये पादे; KS[1]-[3]TA[2] द्वितीयपाद० for द्वितीये पादे
4. वि. om. स्तोत्रीयायाम्
11. B[4]P after त्रिणिधने add: द्वितीयायां

दी. विश्वोहाइ (ऊ. द. ७३) इति त्रैशोके नुश्शब्दे पि-शब्दे च प्रथमस्वरेऽवस्थिते वर्धते। प्रथमायां सजूस्ततक्षुराइन्द्रंजजनूः। अत्र नूःशब्दो वृद्धः। ऊहे न वृद्धः। तृतीयायाम् इल्द्रँसोमं। अत्र मशब्दो न वृद्धः। द्वितीयायाम् अपाइ काऽ२३४र्णं। अत्र पिशब्दो वृद्धः॥ ३॥

था उत्तरे दंष्ट्रे॥ ४॥

वि.& भा. उत्तरे आष्टादंष्ट्रे था-शब्दो वर्धते। रथीतमम्॥

दी. इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः। रथीतमं रथीनां वाजानाँ सत्पतिं पतिम्॥ इत्युत्तरे आष्टादंष्ट्रे प्रथमायां थिशब्दो वर्धते। रथाईतमँर। अत्र थिशब्दो वृद्धः। ऊहे न वृद्धः। तृतीयायां यदावाजस्य गो। अत्र दाशब्दो न वृद्धः॥ ४॥

सोशब्दो दासे॥ ५॥

वि.& भा. रात्रिदैवोदासे (ऊ. द. ३३) सो-शब्दो वर्धते। अयंतइन्द्रसोऽ४मः॥ ५॥

दी अयंतइन्द्रसोऽ४म (ऊ. द. २२) इति रात्रिदैवोदासे सोशब्दो वृद्धः। अयन्तइन्द्रसोऽ४म। अत्र सो-शब्दो वृद्धः। ऊहे न वृद्धः। शाचिगोशाचिपू। अत्र उत्तरचि-शब्दो न वृद्धः॥ ५॥

दुक्थेभिगीतक्रमयोः॥ ६॥

---

2. My[2]-[3] वर्द्धते for वृद्धः

3. S[1]A[2]S[2]M[1]-[2]T before द्वितीयायाम् add: जये च स्तावान्त्यमयोनौ॥ जये च प्रस्तावान्त्यमक्षरं वर्धते योनिवर्जम्॥ मे चाकारान्तः क्रान्तमयोनौ॥ शाक्वरऋषभे च आकारान्तमेव प्रत्युत्क्रान्तं भवति योनिवर्जम्

6. वि. थाइ for था; M[1-3] om. रथीतमम्...वर्धते (L.11)

8. My[2] वृद्धः for वर्धते; M[4]ES[2] om. ऊहे न वृद्धः

11. भा. trans. रात्रिदैवोदासे after सोशब्दः

वि.&भा. बार्हदुक्थे अभिगीतप्रत्युत्क्रमयोः परमक्षरं वर्धते ॥ ६ ॥

दी. परीतोषिञ्चत.ऽ२सुताम् (ऊ. स. ३६१) इति बार्हदुक्थे अभीगीतात् परो न्वांशब्दो वर्धते। दाधन्वायाऽ२ः इति। नारियोआ२। अत्र यो-शब्दो वर्धते। तृतीयायां सुतेऽ१चाइत्वाऽ२। अत्र प्रत्युत्क्रमात् परोऽचिशब्दो वर्धते। प्रत्युत्क्रमोऽष्टविधः अतिस्वारो मन्द्रं प्रत्युत्क्रामति परिस्वारे। बाऽ६५६ कयाऽ३स्थाऽ५ इराऽ६५६व्र मन्द्रश्चतुर्थम्। श्रायन्तस्तरोभिः पुरः॥ श्रायन्त इव सूऽ१रायाम्। तरोभिर्वोवि-दाऽ१द्वासूम्। पुरोजितीवोऽ४न्धासः॥ चतुर्थस्तृतीयम्। दूतंदेवोमाना। दूताऽ३म्। देवोऽ२। मानाऽ३॥ तृतीयो द्वितीयं हीष्यादौ। हीऽ२३४षी॥ द्वितीयः प्रथमम्। औहोऽ१इ अग्ने। इति। औहोऽ२इ। अग्नेराथाऽ२३म्॥ मन्द्रश्चतुर्थ-मतिक्रम्य तृतीयं प्रत्युत्क्रामति। संधौ पाव्ने। सुनोतसोमपा।व्नओऽ२३४वा॥ मन्द्रश्चतुर्थतृतीयावतिक्रम्य द्वितीयं प्रत्युत्क्रामति। षिभाभिप्रि। षिभाऽ२। उवा-ऽ२३४५। एऽ५। अभिप्रियाऽ२॥ तृतीयो द्वितीयमतिक्रम्य प्रथमं प्रत्युत्-क्रामति पुनानायाम्। पुनाऽ३१॥ (मा. ल. १.१८-२६) इति॥ ६॥

अहर्य ॥ ७ ॥

वि. प्रहिन्वानायां बार्हदुक्थे (ऊ. द. १५३) वृद्धिप्राप्तस्य हर्यशब्दस्य प्रतिषेधः॥

भा. अकारः प्रतिषेधार्थः। बार्हदुक्थे (ऊ. द. १५३) वृद्धिप्राप्तस्य अपवादः हर्यशब्दस्य॥ ७॥

दी. अकारः प्रतिषेधे। प्रहिन्वानऋ। ताऽ२म्बृहात् (ऊ. द. १५३) इति बार्हदुक्थे णोहर्यतोऽ२। अत्राभिगीतात् परो र्य-शब्दो न वर्धते॥ ५॥

मेधे हाइस्तोभात् तृतीयमयोनौ ॥ ८ ॥

---

3. My₈³-om. दधान्वायाऽ२: इति

20. M¹⁻²TS¹⁻³ before मेधे add: वैश्वज्योतिषे च आद्य अकारो गो च नौ॥ वैश्वज्योतिषे च अभिगीतात् पर आद्य अकारः वर्धते। योनावेव गोशब्दो वर्धते। अत्येषि अन्यं पवमान पवसे धाम गोनाम्॥

त्रि.&भा. नार्मेत्रे हाइस्तोभात् परं तृतीयमक्षरं वर्धते योनिवर्जम् । चतासूभा (ग्रा. १.४.३६ २) ॥ ७ ॥

दी. अथाहीन्द्रगिर्वणा॒ऽ३ए (ऊ. द. १७) इत्यादिनार्मेधे हाइ-स्तोभात् परं तृतीयमक्षरं वर्धते । अयोनौ ऊहे । चाऽ२३४इदहाइ । द्रिवोदाइवा । अत्र द्रिशब्दो वृद्धः । योनौ पाहिनोअग्नएकायऽ६ए (ग्रा. १.४.३६.२) इति नार्मेधे चतासूभा । अत्र तृतीयमक्षरं न वर्धते ॥ ८ ॥

कावे गीथषष्ठं सर्वत्र ॥ ९ ॥

वि.&भा. कावे उद्गिथषष्ठमक्षरं वर्धते सर्वत्र ॥ ८ ॥

दी. अभ्योवा (ऊ. द. १३) इत्यादिकावे उद्गीथस्य षष्ठमक्षरं वर्धते सर्वत्र योनौ ऊहे च । योनौ प्रियाणिपवताइ (ग्रा. १६ ९ ५५४.२) । ऊहे स्यजिह्वापवताइ । एवमादीनि ॥ ८ ॥

अञ्ज प्र पञ्चमम् ॥ १० ॥

वि.&भा. अञ्जतायां कावे (ऊ. द. ४७१) उद्गीथपञ्चममक्षरं वर्धते प्रथमायाम् ॥ १० ॥

दी. अञ्जोवा (ऊ. ए ४७१) इति कावे प्रथमायाम् उद्गीथस्य पञ्चममक्षरं वर्धते । ताईवियञ्जताइ । अत्रोद्गीथस्य पञ्चममक्षरं वर्धते ॥ ९ ॥

प्रो अयास्यां सप्तमम् ॥ ११ ॥

---

1. भा. परस्तात् for परं

8. वि. A[2]T om. सर्वत्र; KM[1-2]S[12] trans. सर्वत्र before कावे

13. वि. अञ्जतायायां for अञ्जतायां; M[1-2] before अञ्जतायायां adds: प्रोअयास्यायां सप्तमम्; T after वर्धते adds: योनिवर्जम्

14. वि. om. प्रथमायाम्

17. A[2]M[1] [2]TS[2] अयास्यायां for अयास्यां; A[1] after सप्तमम् adds: वृद्धम्

वि.&**भा. प्रोअयास्यायां** कावे (ऊ. सं. २३२) **सप्तममक्षरं** वर्ध **प्रथमायाम्** ॥ १० ॥

दी. प्रोवा (ऊ. सं. २३२) इति कावे **अयासीदिन्दुरिन्द्रा** । अत्रोद्गीथस्य **सप्तममक्षरं** वर्धते ॥ ११ ॥

त्वां दूतोदपत्तयोश्च ॥ १२ ॥

वि. सप्तममक्षरं वृद्धं भवति ॥ १२ ॥

भा. त्वांदूतमग्ने (ऊ. प. ४२६) **उदपप्तम्** (ऊ. स. ७३४) इति च एतयोः कावे उद्गीथे सप्तममक्षरं वर्धते ॥ १२ ॥

दी, समोवा (ऊ. ए. ४२६) इति कावे द्वितीयायां **तुवोवा । दूतमग्ने अमृताम्** । अत्रोद्गीथस्य सप्तममक्षरं वर्धते । **एतोवा** (ऊ. स. ७३४) इति कावे द्वितीयायाम् **उदोवा ॥ अपप्तन्नरुणाभा** । अत्रोद्गीथस्य सप्तममक्षरं वर्धते ॥ १२ ॥

वैराजे प्रसशब्दाववृद्धैराजे प्रसशब्दाववृत् ॥ १३ ॥

वि. महावैराजे (र. द. १०) **प्रसशब्दौ** वृद्धौ न भवतः । **सत्वामिन्द्रा । प्रभूवसाउ । इमाब्रह्मा । सधमादाइ** । योनिवद्भावाद् वृद्धिप्राप्तौ । अभ्यासः प्रकरणसमाप्त्यर्थः ॥ १२ ॥

इति अजातशत्रुभट्टोपाध्यायकृते फुल्लविवरणे पञ्चमप्रपठकस्य नवमः खण्डः ॥ ९ ॥

पञ्चमः प्रपाठकः समाप्तः ॥ ५ ॥

---

1. भा. अयास्यां for आयस्यायां; $A^2M^{1-3}T$ om, प्रो....प्रथमायाम्; My^1KS^{1-3} वृद्धं भवति for वर्धते

2. वि. om. प्रथमायाम्

6. $A^2M^{1-2}T$ om. अक्षरं; M^{1-2} before सप्तमं add: स्वांदूतोदप्तयोश्च

14. $M^{1-2}S^2$ योनिवद्वृद्धि, A^2 योनिवद्भाववृद्धि for योनिवद्भावाद् वृद्धि° A^2M^{1-2} om. अभ्यासः.... प्रपाठकः; T चतुर्दशः for अभ्यासः....प्रपाठकः

भा. महावैराजे प्रशब्दसशब्दौ अवृद्धौ भवतः । सत्वामिन्द्र **प्रभूवसाउ इमा-ब्रह्मा** । सं ॥ १२ ॥

इति उपाध्यायाजातशत्रुकृतपुष्पसूत्रभाष्ये पञ्चमस्य प्रपाठकस्य नवमी कण्डिका समाप्ता ॥ ९ ॥

पञ्चमः प्रपाठकः समाप्तः ॥ ५ ॥

दी. होइयाहोइयाहोइयाऽ३४३ पिब (र. द. १०) इति **महावैराजे प्रशब्दस-शब्दाववृद्धौ** भवतः । द्वितीयायां **प्रभूवसाउ** । अत्र प्रशब्दो न वृद्धः । **योनौ वृद्धः** । **भ्यांसुयुतो** । अत्र **भ्यां**-शब्दो वृद्धः । तृतीयायां **सधमादाइ** । **अत्र स-शब्दो न** वृद्धः । योनौ भ्याःशब्दो वृद्धः । अभ्यासः प्रकरणसमाप्त्यर्थः ॥

इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नान्हाभाई-द्वितीयनाम्ना कृते फुल्लदीपे नवमप्रपाठकस्य नवमः खण्डः ॥ ९ ॥

नवमः प्रपाठकः समाप्तः ॥ ९ ॥

ॐ

दशमः प्रपाठकः

प्रथमः खण्डः

नकारश्च भवति संध्यगीतः कुवित्सुनायां बोधीये ॥ १ ॥

वि.&भा. **कुवित्सुनायां** (ऊ. अ. ६२९b) जराबोधीये उपद्रवविषये **नकारः संध्यगीतो** भवति। पदगीतो भवति। विरते पदगीतत्वप्राप्तौ संध्यगीतत्वमुच्यते। **उरू कृदूरुणः** ॥ १ ॥

दी. **नमस्तओवा** (ऊ. अ. ६२९) इति जराबोधीये उपद्रवविषये **नकारः संध्यगीतः** संधिवत् गीतो भवति। विरामे पदवत्। नकारप्राप्तौ णकारो भवतीत्यर्थः। **उरूकृऽ१ दूऽ२३रूऽ४। णः।** अत्र विरामे णकारो भवति। बचनात् ॥ १ ॥

इहवद्दैवोदासे चोत्तमायामप्रथमः ॥ २ ॥

वि.&भा. **इहवद्दैवोदासे** (ऊ. द २२) **चोत्तमायां** स्तोत्रीयायां नशब्दद्वित्वेऽपि सति द्वितीय एव नशब्दः संध्यगीतो भवति। **प्राऽ२३४। णपात् कुण्ड-**

---

4. भा. trans. कुवित्सुनायां after जराबोधीये; M^{1-2} om. जराबोधीये
5. वि. om. पदगीतो भवति; भा. °गीतप्राप्तौ for °गीतत्वप्राप्तौ; $A^{2}M^{1-2}T$ संधि° for संध्य°
9. E after भवति adds: इत्यर्थः
11. $A^{2}M^{1-2}T$ °दासोत्तमायां for °दासे चोत्तमायां; A^{2} om. अप्रथमः ॥....भवति (L.13); M^{1-2} om. अप्रथमः; T प्रथमः for अप्रथमः
12. भा. रात्रि for इहवद्; $M^{1-2}T$ °दासोत्तमायां for °दासे चोत्तमायां KS^{1-2} नशब्दो द्वित्वे M^{12} नशब्देऽपि; V^{2} तशब्दत्वद्वित्व for नशब्दद्वित्वे; B^{4} om. नशब्दः T. नशब्दो द्वितीयेऽपि संधिद्वितीय एव नःशब्द for नशब्द°... नशब्दः, $M^{1-2}T$ संधि° for संध्य°

13 S^{1} शब्द K नःशब्दः for नशब्दः

पायियाः ॥ २ ॥

दी. अयन्तइन्द्रसोऽ४मः (ऊ. द. २२) इति **इहवद्दैवोदासे च** तृतीयायां द्वितीयो नकारः संधिवद् गीतो भवति। न प्रथमो नकारः। प्राऽ२३४। णपात् कुण्डपायियाः। अत्र विरामे णकारो भवति। वचनात् ॥ २ ॥

स्वासु साहीये चोत्तमायाम् ॥ ३ ॥

वि. स्वासु सत्रासाहीये (ऊ. ए. ५१८) **चोत्तमायां** स्तोत्रीयायां प्रस्तावे संध्यगीतः। शिक्षाऽ३४ण। इन्द्ररायआ ॥ ३ ॥

भा. स्वासु सत्रासाहीये च उत्तमायां प्रस्तावविषये नकारः संध्यगीतो भवति। अधिकारात्। शिक्षाऽ३४ण। इन्द्ररायआ ॥ ३ ॥

दी. त्याऽ३४म्। उत्रःसत्रासाहम्। ओऽ६वा (ऊ. ए. ५१८) इति **स्वासु सत्रासाहीये** तृतीयायां प्रस्तावविषये नकारः संधिवत् गीतो भवति। शिक्षा ऽ ३४। णइन्द्ररायआ। अत्र विरामे णकारो भवति ॥ ३ ॥

अभिसोमाघ्यास्यायां सर्वत्र ॥ ४ ॥

वि. **अभिसोमाध्यास्यायां प्रहिन्वानायां सर्वत्र** नकारः संध्यगीतो भवति। आष्कारणिधना-(ऊ. द. ५६)दिषु ॥ ४ ॥

भा. अभिसोमाध्यास्ये प्रहिन्वानायां सर्वसामसु नकारः संध्यगीतो भवति। बार्हदुक्था(ऊ. द. १५३) दिषु। णोहर्यता२३ ॥ ४ ॥

---

2. E· om अयन्त.........इति·

7· M[1-2]T. संधि० for संध्य०.

दी. **अग्निसोमास्रआयव** इत्येतासु अध्यास्यायां **प्रहिन्वानायां** सर्वसामसु नकारः संधिवत् गीतो भवति।
१ २र१ २ १
प्रहिन्वानश्च। **ताऽ२मूबृहात्**। (ऊ. द. १५३) इति बार्हदुक्थे
१ १
नूमिर्येमाऽ२। **णोहर्यतोऽ२**। अत्र विरामे णकारो भवति। एवमादीनि ॥ ४ ॥

योनौ द्वीडे धर्ता द्व्यक्षरं पर्व दीचोद्धातपरत्वादेकाक्षरमूनमाधिकपर्वत्वाच्च प्रथमस्वरे प्रत्यये कृष्यते ॥ ५ ॥

वि. **योनौ द्वीडे धर्ता द्व्यक्षरं पर्व** उद्धातपरत्वात् **एकाक्षरमूनं** यद् ऊहगीतावधिकपर्वत्वात् **प्रथमे स्वरे** प्रत्यये दीशब्दः कृष्यते। सिद्धोपन्यासो विशेषविवक्षया। **धर्ता**। **दीऽ२**। वःप। वा (अ. १. ४. ५५) ॥ ५ ॥

भा. **योनौ द्वीडे धर्ता द्व्यक्षरमूनं** यत् ऊहगीतावधिकपर्वत्वाच्च **प्रथमे स्वरे प्रत्यये** दीशब्दः **कृष्यते**। सिद्धोपन्यासो विशेषविवक्षया। धर्तादी३३ ॥ ५ ॥

२ ३र४ ५ २र १र र ३र२
दी. **आऔहोवाहाइ**। **ए**। **औहौहोवाहाउ**। वा। (अ. १.४.५५) इति द्विरिडपदस्तोभे
१र
योनौ धर्ता इति द्व्यक्षरं न्यूनं पर्व भवति। दी इति च **एकाक्षरं** पर्व एकाक्षरेण ऊनस्य पर्वणः पूरणार्थं भवति। धर्तेत्युद्धातस्य परत्वात्। अग्रेऽभावात्। दी च

---

1. EL^{1} My^{2-3} **R**०सोमासु for ०सोमास्रः; REL^{1} om. आयव इत्येतासु
5. $M^{1-2}TS^{2}$ द्विरीडे for द्वीडे; A^{2} नीचो M^{1-2} नीचं for दीचो०; S^{1} om. दीच० M^{1-2} उद्धात....प्रत्यये; A^{2} om. ऊनम्
6. om. T om. प्रथमस्वरे....कृष्यते
7. $M^{1-2}T$ द्विरीडे for द्वीडे; $A^{2}S^{1}M^{1-2}$ om. धर्ता; T om. यद् ....कृष्यते; $A^{2}M^{1-2}TS^{1}$ दीशब्दः पर्वाधिकत्वात् प्रथमस्वरे प्रत्यये कृष्यते। for यद्
10. A^{1} द्विपर्वत्वात् for अधिकपर्वत्वात्; $B^{4}PV^{2}$ before प्रथमे add: अन्तः
13. My^{1} om. च
14. S^{4} aftcr अग्रेभावात् adds: अग्रेऽक्षराभावात्

एकाक्षरं पर्व । **योनौ अधिकपर्वत्वात्** । पादे षट्पदपर्वत्वाच्च । दीशब्दः **प्रथमस्वरे** प्रत्यये **कृष्यते** । कर्षणं क्रियते । **धर्ता । दीऽ२ । त्र्श्पा ।** अत्र **दी**-शब्दः कृष्यते । सिद्धोपन्यासो विशेषविवक्षया ॥ ५ ॥

अभिप्रि त्र्यक्षराणि सर्वासु ॥ ६ ॥

वि.&भा. अभिप्रियायां द्विरिडे **सर्वासु** स्तोत्रीयासु **त्र्यक्षराणि** पर्वाणि भवन्ति ॥ ६ ॥

दी. अभिप्रि । **याणिप** । **वतेच** । (र. अ. १०७) इति द्विरिडपद-
२ १ २   १र २   १२र२
स्तोत्रीयासु **त्र्यक्षराणि** पर्वाणि भवन्ति । प्रथमायाम् **अभिप्रि । याणिप । वतेच ।**
२र   १रर.२ १र २१र२१ २र
नेहितः । अनन्तरम् । **नामानियह्वोअधियेषुवर्धते ।** इत्यन्तर्णिधनम् ।
१रर   र रर   १ २
ईहा । इति च । अनन्तरम् । त्र्यक्षराणि पर्वाणि । **आह्वरि । यस्यवृ ।**
१२र१   २   १२ १ २   ३२
हतोवृ । हव्वधि । अनन्तरम् । **रथंविष्वश्चमरुहद्विचक्षणाऽ१ः ।** इत्यन्त-
र र   २ १   २१र
र्णिधनम् । **ईडा** इति च । एवं द्वितीयायाम् **ऋतस्य । जिह्वाप ।** एवमादीनि ।
१ २
एवमेव तृतीयायाम् । **अवद्यु** । इत्यादीनि ॥ ६ ॥

न द्वितीयचतुर्थे पादे ॥ ७ ॥

वि. द्वितीयचतुर्थे पादे **न** त्र्यक्षरे भवतः ॥ ७ ॥

भा. त्र्यक्षराणि पर्वाणि भवन्तीति यदुक्तं तस्यापवादः । किमविशेषेणेत्यत्राह न द्वितीयचतुर्थपादे ॥ ७ ॥

---

1. My om. ०पद०
4. S¹T सर्वाणि for सर्वासु
5. भा. द्वीडे for द्विरिडे; भा. trans. सर्वासु स्तोत्रीयासु after त्र्यक्षराणि and om. पर्वाणिः; A²M¹-²TS¹ सर्वाणि for सर्वासु and om. स्तोत्रीयासु
6. B⁴ after भवन्ति । adds: अभिप्रि
12. My²-³ om. जिह्वाप; My² इत्यादीनि for एवमादीनि
16. B⁴L² सर्वाणि, A¹ सर्वासु for पर्वाणि

दी. द्विरिडपदस्तोभे द्वितीये पादे चतुर्थे पादे च त्र्यक्षराणि पर्वाणि न भवन्ति ।
१रर २ १र २१रर १ २र १२ १ ३ २
नामानि यह्वो अधियेषु वर्धते । इति द्वितीयः पादः । **रथंबिष्वश्चमरुहद्विचक्षणाऽ१ः** इति चतुर्थः पादः । एतयोः पादयोः त्र्यक्षराणि पर्वाणि न भवन्ति ॥ ७ ॥

मरायेऽभ्यास एकाक्षरस्त्रिरुक्तः पादान्ते सर्वत्र ॥ ८ ॥

वि. **मराये** (ऊ. क्षु. ९००) **सर्वत्राभ्यास एकाक्षरः**, स च **त्रिरुक्तः**, **पादान्ते सर्वत्र** भवति । सिद्धोपन्यासो विशेषविवक्षया । ण्यो । ण्यो । ण्योः ॥ ८ ॥

भा. **मराये** (ऊ. क्षु. ९००) साम्नि अभ्यास एकाक्षरः सर्वत्र त्रिरुक्तः । पादान्ते सर्वत्र भवति । सिद्धोपन्यासो विशेषविवक्षया । ण्यो । ण्यो । ण्योः ।

२र २ र १ २
दी. **हाउ हाउ हाउ । आग्नीम्** (ऊ. क्षु. ९००) इति **मराये पादान्ते एकाक्षरस्त्रिरुक्तः अभ्यासो** भवति सर्वत्र । सर्वेषु पादेषु । प्रथमे पादान्ते **ण्यो** । **ण्यो** । **ण्योः** । द्वितीये पादान्ते **स्तम्** । **स्तम्** । **स्तम्** । तृतीये पादान्ते **व्युम्** । **व्युम्** । **व्युम्** ॥ ८ ॥

अपुरो नः ॥ ९ ॥

वि. **प्रेद्धो अग्ने दीदिहि पुरोनः** (ऊ. क्षु. ९००c) इत्यत्र पादे प्रतिषेधः । उदाहरणमुत्तरसूत्रम् ॥ ९ ॥

---

1. S⁴ before द्विरिड० adds: पूर्वोक्त०; EL¹ द्वीडा for द्विरिड०
2. EL¹My²⁻³ om. नामानि....न भवन्ति (L 5)
4. T om. पादान्ते सर्वत्र
5. A²T om. स च
6. S¹ after सर्वत्र adds पादे; M¹⁻²T after सर्वत्र add: पादान्ते सर्वत्र
17. A² उक्तसूत्रे for उत्तरसूत्रम्

भा. प्रेद्धो अग्ने दीदिहि पुरोन इत्यत्र पादान्तोऽभ्यासः प्रतिषिध्यते । पूरोऽ३नो३ पौहि ॥ ९ ॥

दी. अकारः प्रतिषेधे । पुरोनः । इति पादान्ते न त्रिरुक्तोऽभ्यासो भवति । प्रेद्धो अग्ने दीदिहि । पुरोनः (सा. १३७५) । अत्र नकारे पादान्तः ॥ ९ ॥

पादमध्ये च हिशब्दस्याभ्यासः प्रेद्धायामग्ने दीदिहि ॥ १० ॥

वि.&भा. अत्रैव पादमध्ये च हिशब्दस्याभ्यासो भवति । वचनात् । प्रेद्धायामग्ने दीदिहि (ऊ. क्षु. ९००c) एतस्मिन् हिशब्दे ॥ १० ॥

इति फुल्लविवरणे षष्ठस्य प्रपाठकस्य प्रथमः खण्डः ॥ १ ॥

भा. इति पुष्पसूत्रभाष्ये दशमस्य प्रपाठकस्य प्रथमी कण्डिका ॥ १ ॥

दि. प्रेद्धो (१२) । अग्ने (१ र) दीदिहि (२र) । हि । हि । (ऊ. क्षु. ९००) अत्र पादमध्ये सप्ताक्षरे हिशब्दस्य त्रिरुक्तोऽभ्यासो भवति । वचनात् ॥ १० ॥

इति फुल्लदीपे दशमप्रपाठकस्य प्रथमः खण्डः ॥ १ ॥

---

2. B[4] after पौहि adds: पुरोप्रत्यये हिशब्दस्याभ्यासः

4. S[4] नकारो for नकारे

7. A[2]M[1-2]TS[1] before अत्र add: पुरोन इति; वि. om. एव

8. वि. om. प्रेद्धायाम्... हिशब्दे

द्वितीयः खण्डः

गूर्हे वृद्ध ओ भवत्यकारोऽग्निप्रत्यये वादौ ॥ १ ॥

वि. गूर्हे (ऊ. द. ११९) प्रस्तावादौ वृद्धः अकारः ओकारो भवति ग्निप्रत्यये ॥ १ ॥

भा. गूर्हे (ऊ. द. ११९) वृद्धः अकारः ओभवत्यग्निप्रत्यये प्रस्तावादौ ॥ १ ॥

दी. ओग्नाइ । त्वेनोऽ२३आ (ऊ. द. ११९) इति गूर्हे अग्ने । अत्र अकारो वृद्धः सन् ओकारो भवति ग्निप्रत्यये प्रस्तावादौ । ततोऽग्नेमध्ये एकारस्याइभावे जाते ओग्नाइ इति रूपं भवति ॥ १ ॥

हिशब्दः सौभरामहीयवकौल्मलानां ॥ २ ॥

वि.&भा. हिशब्द ओ भवति एवाह्यसीति तृचे प्रथमायां सौभर–(ऊ. प्रा. ८२१) आमहीयवयोः (ऊ. द. ५१) । कौल्मलबर्हिषि (ऊ. ए. ४३२) च स्वासु ॥ २ ॥

दी. एवाहोऽ३ असि बीरयोवा (ऊ. प्रा. ८२९) इति सौभरे प्रथमायां प्रस्तावे हिशब्द ओ भवति । एवाऽ३होऽ३ । अत्र हिशब्दस्य ओ भवति । एवाहोऽ३ असिवीरयूः (ऊ. द. ५१) इत्यामहीयवे एवाहोऽ३ । अत्र हिशब्दस्य ओ भवति ।

2. S¹A²M¹-²T अकारो for ओ

4. T अग्नि० for ग्नि०

11. KS¹-² om. तृचे

५४ २ ४र ५र
तुवाऽ३॰होऽ३ए हिंचरवाइ (ऊ. ए. ४३३) इति **कौल्मलबर्हिषे** । **तुवा३॰होऽ३** ।
अत्र हिशब्दस्य ओ भवति ॥ २ ॥

दासे च ॥ ३ ॥

वि.&भा. **रात्रिदैवोदासे** (ऊ. द. २२) **च** हिशब्द ओ भवति । **ऐहोइमा-ऽ२३४या** ॥ ३ ॥

२१ २ १र २
दी. **अयन्तइन्द्रसोऽ४मः** (ऊ. द. २२) **इति** **रात्रिदैवोदासे** **च**-शब्दात् हिशब्दस्य ओ भवति । नियमार्थमिदं सूत्रम् ॥ ३ ॥

कावपर्णकूलीयानामो भवति ॥ ४ ॥

वि.&भा. कावैडसौपर्णयोः प्रस्तावे रोहितकूलीये उपद्रवे । कुतः । **अनुषङ्गो भवति** । **वाचि सर्वमो भवति** (पु. सू. १०.२.९) इति । तेन एतेष्वपि वाचि प्रत्ययभूतायामोभावः । तस्मादाद्ययोः प्रस्तावे इतरत्र उपद्रव इति सिद्धम् ॥ ४ ॥

२ १
दी. **अभ्योवा** (ऊ.द. १३) इति **कावे** वाचि प्रत्यये अकरस्य ओ भवति । **अभ्योवा** । अत्र वाचि प्रत्यये अकारस्य ओभावः । **वाचि सर्वमो भवति**(पु. सू. १०.२.९) इति वचनात् । २र र १ २ **उच्चातेजोवा** । (ऊ. ए. ५१२) **इत्यैडसौपर्णे** वाचि प्रत्यये **जा**-मध्ये आकारस्य ओभावः । १२र १ २ १ २ **वृषापवस्वधा** । **रयाऽ२** (ऊ. द. १२३)इत्यादि**रोहितकूलीये** उपद्रवे वाचि प्रत्यये पूर्वस्य ओ भवति । द्वितीयायां **षुवोऽ२३५** वा । अत्र वाचि प्रत्यये आकारस्य ओ-भावः ॥ ४ ॥

साहीये च भिशब्दः ॥ ५ ॥

---

4. भा. om. ऐहोइमास्या
7. S[4]. om. नियमार्थमिदं सूत्रम्.
9. B[4] S[2] ०षङ्गे वक्ष्यति for ०षङ्गो भवति; S[1]A[2] T भविष्यति for भवति
10. KA[2]T. भविष्यति for भवति; B[4] भवति for भावः
11. वि. उत्तरत्र for इतरत्र.
15. R कूलीयोत्तरे for कूलीये

वि.&भा. सत्रासाहीये (ऊ. ए. ५२३) **च वसुरुचायां** भिशब्दः ओ भवति ॥ ५ ॥

दी. वसूऽ३४ । रुचोदिव्याऽ । भोऽ६वा (ऊ. ए. ५२३) इति **सत्रासाहीये** भोऽ६वा । अत्र वाचि प्रत्यये भिमध्ये इकार ओ भवति ॥ ५ ॥

अनुत्काव ॥ ६ ॥

वि. कावे (ऊ. स. ७३४) **उदपप्तन्नित्यत्र** ओभाव[स्य]प्रतिषेधः । पूर्वलक्षण-प्राप्तस्य ॥ ६ ॥

भा. अकारः प्रतिषेधार्थः । कावे उदपप्तन्नित्यत्र उच्छब्दस्य ओभाव[स्य]प्रतिषेधः पूर्वलक्षणप्राप्तस्य ॥ ६ ॥

दी. अन्-शब्दः प्रतिषेधे । **एतोवा** । **उत्याउषसःकाइ** (ऊ. स. ७३४) इति **कावे** द्वितीयायाम् **उदोवा** । अत्र **उत्**--शब्दस्य ओ न भवति । पूर्वलक्षणेन प्राप्तस्य ओकारस्य प्रतिषेधः ॥ ६ ॥

नाध्वतवत्य पर्णे ॥ ७ ॥

वि.&भा. ऐडसौपर्णे अध्वर्योअद्रिभिः (ऊ. अ. ६४५)इत्यत्र **र्योशब्दस्य, तवत्य इन्दो** इत्यत्र **त्यशब्दस्य** च ओभावप्रतिषेधः । **संध्यमयवायावम्** (ऋक्तन्त्र. ३.६.१.) इति वकारयकारौ प्रप्नुतः । तत्प्रतिषेधार्थं वचनम् ॥ ७ ॥

दी. नकारः प्रतिषेधे । **आध्वर्यओवा** (ऊ. अ. ६४५) **इत्यैडसौपर्णे अध्वर्यो** । **अत्र यो**-मध्ये ओकारस्य न ओभावः । **सन्ध्यमयवायावम्** (ऋक्तन्त्र ३.६.१.)इत्यनेन

---

3. S^3. इकारस्य for इकारः; E21 My $^{2-3}$ after भवति add:-भोऽ३का । एवम्

13. K A^2 S^1 ऐडे for ऐड; भा. before तवत्य adds:– प्रकृतस्यव ओभावप्रतिषेधः

14. भा. after इत्यत्र adds:- अपि and om. च

15. भा. यकारः प्राप्नोति $A^2M^{1-2}TS^1$ वकारः प्राप्नोति for वकारयकरौ प्राप्नुतः My^1 तत् for तयोः

17. S^4 अकारस्य ओ न भवति for ओकारस्य....भावः

ओकारस्याव् भवति । ततो **रमध्ये** (ऋक्तन्त्र-४.२.१०) इति वकारलोपः । **द्वितीयायां तवत्यओवा** । अत्र त्ये-मध्ये एकारस्य न ओभावः । अत्राय् भवति । ततो यकार-लोपः ॥ ७ ॥

बोधीये च ॥ ८ ॥

वि.&भा. जराबोधीये (ऊ. द. २३६) **च** वाक्प्रत्यये ओभावो भवति ॥ ८ ॥

२र२ र १ २   २ र १ २

दी॰ **येसोमासोवा** (ऊ. द. १३६) इत्यादिजराबोधीये **मासोवा** । अत्र वाचि प्रत्यये स-मध्ये अकारस्य ओ भवति ॥ ८ ॥

वाचि सर्वभो भवति ॥ ९ ॥

वि॰& भा॰ **गूर्हे वृद्ध ओ भवति** (पु. सू. १०.२.१) इत्यारभ्य ओभावः उक्तः । स कस्मिन् प्रत्यये ओभावो भवतीत्यत **अह वाचि** प्रत्यये सर्वेषामेतेषामो-भावो भवति नान्यस्मिन्निति । सर्वशब्दः अधिकाराव्यतिरेकार्थः । अन्यत्रापि **सर्वत्र** वाचि प्रत्यये ओभावो भवतीत्यर्थः । यथा श्रौतकक्षार्षभगौरीविताभीवर्त-वात्सगूर्दादिषु ॥ ९ ॥

दी. वाचि प्रत्यये पूर्वस्य स्वरस्य ओ भवति । अत्र सर्वशब्दात् **वाचि**

---

1. My^{2-3} om. रमध्य इति
5. M^{1} M^{2} वाचि प्रत्ययस्य, T. प्रत्ययस्य for वाक्प्रत्यये;
   S^{1} वाक्प्रत्ययस्य ओ भवति for वाक्....भवति;
9. भा अतः, M^{1-2} T. अत्र for इति; M^{1-2} T S^{1} ओकारः for ओभावः
10. भा॰ om. सः; वि॰ om. भावः; भा॰ om॰ अतः, $A^{2}M^{1-2}T$. अत्र for अतः
    वि॰ om. एतेषाम्
11. वि om भवति; भा॰ अन्यथा for अन्यस्मिन्; B^{4}. शब्दस्य for शब्दः; $B^{4}V^{2}A^{1}M^{1-2}$ अधिकारव्यतिरेकार्थः, L^{2} अधिकारप्रत्ययार्थः $A^{2}T$ अधिकाव्यतिरेकार्थः for अधिकाराव्य-तिरेकार्थः: वि om. सर्वत्र
12. $A^{2}T$. अवाचि for वाचि; My om. श्रौतकक्षार्षभादिषु for श्रौत....गूर्दादिषु

प्रत्यये सर्वत्र ओभावो भवतीत्यर्थः । यथा श्रौतकक्षार्षभगौरीविताभिवर्तवात्सगूर्द्धादिषु ॥ ९ ॥

अनुस्थम् ॥ १० ॥

वि. उस्थस्य वाक्प्रत्ययस्य ओभावप्रतिषेधः । यथा स्वासु स्वारसौपर्णे **पिप्र्यु** इत्यत्रैव । अन्यत्र उस्थस्य ओभावो भवतीत्यर्थः । उस्थग्रहणेनेह उकार-ऊकारौ गृह्येते ॥ १० ॥

भा. अकारः प्रतिषेधार्थः । उस्थस्य वाक्प्रत्ययस्यापि ओभावप्रतिषेधः । यथा स्वासु स्वारसौपर्णे (ऊ. अ. ५४८) **पिप्र्यु** इत्यत्र । उस्थग्रहणेन उकार-ऊकारौ गृह्येते ॥ १० ॥

दी. **अन्**-शब्दः प्रतिषेधे । उस्थस्य उकारस्य ऊकारस्य ओकारस्य औकारस्य न ओभावो भवति । उदाहरणम्- उद्धदभिश्रुतामाऽ३घाम् (ऊ. अ. ५४८) इति स्वारसौपर्णे **पितुऽ२३४वा** । अत्र वाचि प्रत्यये ऊकारस्य न ओभावः ॥ १० ॥

ओवापरायान्वो भवति ॥ ११ ॥

वि.&भा. **ओवापरायां** वाचि प्रत्यये उस्थमो भवति । यथा **आजागृविविंप्रः** (ऊ. क्षु. ९१९) इत्यत्र **गौशृङ्गे** **वोरथिरासःसोवाऽ३ओऽ२३म्** । **वा** । तथा

---

4. S[4] om. अन्यत्र....भवतीत्यर्थः

13. भा. A[2] om. प्रत्यये; भा. after उस्थम् adds: अपि

हारायणे **प्रसोमदेववीतये** (ऊ. स. ६९२) इत्याद्यायाम्। **अच्छाकोशमधो३वा३३।** तथा कौल्मलबर्हिषे **परीतोष्युत्तमायां** (ऊ. द. १८२) **श्रीणन्तोगोभिरो३वा३३ ॥ ११ ॥**

दी. ओवापरायां वाचि प्रत्ययभूतायां तु उस्थस्य ओ **भवति**। उदाहरणम्।
३२४२ ३४ ५ १२ २ २ ५
आजागृविर्विप्रः (ऊ. क्षु. ९१९) इति गौशृङ्गे **वोरथि(ासस्सोवा**ऽ३ओऽ२३४वा। अत्र सु–मध्ये उकारस्य ओभावः ॥ ११ ॥

अनातृतीयं कृष्टम् ॥ १२ ॥

वि.&भा. अकारः प्रतिषेधार्थः। **वाचि सर्वमो भवति** (पु. सू. १०. २. ९) इत्यस्योत्सर्गस्यापवादः। तृतीयं कृष्टं तु वाक्प्रत्ययमपि न ओ भवति। यथान्धीगवबृहद्-आग्नेयस्वारसौपर्णेषु प्रतिहारे ॥ १२ ॥

दी. अन्–शब्दः प्रतिषेधे। **आतृतीयस्वर**पर्यन्तं **कृष्टमुस्थं** न ओ भवति।
२ २ २
उदाहरणम्–**उद्धेदभिश्रुतामा**ऽ३**घाम्** (ऊ. अ. ५४८) इति स्वारसौपर्णे तृतीयायां प्रतिहारे ऊराऽ३उवा। अत्र रु–मध्ये उकारस्य न ओभावः ॥ १२ ॥

अप्रत्युत्क्रान्तम् ॥ १३ ॥

---

1. My[1] om. अच्छा....गोभिरो३वा३३।
4. S[4] after अत्र add: रथिरासःसु इत्यत्र
6. वि. अनातृतीय for अनातृतीयं
7. वि. om. अकारः प्रतिषेधार्थः
8. A[2] om. उत्सर्गस्य; KS[1-2] तृतीय for तृतीयं; वि. स्वप्रतिहारे for यथान्धीगव....प्रतिहारे

वि. प्रत्युत्क्रान्तं यद्वाक्प्रत्ययं तस्य प्रतिषेधः । यथा अच्छिद्राञ्जोवैरूपसन्तनिषु ॥ १३ ॥

भा. अकारः प्रतिषेधे । इह वाक्प्रत्ययस्यैव पूर्ववदपवादः । यत् प्रत्युत्क्रान्तं वाक्प्रत्ययं तस्य ओभावप्रतिषेधः । यथा अच्छिद्राञ्जोवैरूपसन्तानिषु ॥ १३ ॥

दी. अकारः प्रतिषेधे । वाचि प्रत्यये प्रत्युत्क्रान्तस्य अक्षरस्य न ओभावः । **अभिसोमा** (र. सं. ३१) इत्यञ्जोवैरूपे सआऽ३१उवाऽ२३ । अत्र प्रत्युत्क्रान्तस्य आकारस्य न ओभवः ॥ १३ ॥

आचतुर्थकृष्टं तु पादान्ते ॥ १४ ॥

वि.&भा. इह **वाचि सर्वमो भवति** (पु. सू. १०. २. ९) इति यदुक्तं तस्य विधेरत्राविशेषोदाहरणग्रहणात् **आचतुर्थकृष्टं तु** यदि पादान्ते भवति ततः सर्वमो भवति । ओभावाधिकारोऽनुवर्तते । उदाहरणं बृहतीष्वाद्यासु **श्रुधीहवायां** (ऊ. ए. ५०९) च सर्वासु स्तोत्रीयासु वारवन्तीये ॥ १४ ॥

---

3. PB⁴V² पूर्वपदापवादः for पूर्ववदपवादः

7. E आउकारस्य for आकारस्य

8. वि. L¹R पदान्ते for पादान्ते

9. PV² इत्यत्र, A¹ अत्र तु, B⁴ इत्यत्र । अत्र तु for इति यदुक्तं तस्य विधेः अत्र

10. PV² अविशेषोदाहरणात् for अविशेषोदाहरण; भा. आकृष्टचतुर्थं for आचतुर्थकृष्टं वि. om. यदि; V²P पदान्ते for पादान्ते

11. वि. इति for ओभावाधिकारः A²T बृहत्प्रोष्ठाद्यायां for बृहतीष्वाद्यासु

12. A²M¹-²T भा.om. स्तोत्रीयासु

दी. पादान्ते आचतुर्थस्वरपर्यन्तं क्रुष्टमक्षरं तु ओ भवति । उदाहरणम्- श्रुधीहया औहोहाइ (ऊ- ए. ५०९) इति वारवन्तीये इन्द्रयस्त्वासपर्यातोऽ२३४हाइ । अत्र पादान्ते तिशब्दस्य चतुर्थस्वरपर्यन्तं क्रुष्टस्य ओभावः । एवमादीनि ॥ ८४ ॥

मन्द्रक्रुष्टं चामन्द्रक्रुष्टं च ॥१५॥

वि. पादान्ते मन्द्रक्रुष्टं च अमन्द्रक्रुष्टं च ओ भवति सर्वत्र । यथा दाऽ३४५योऽ६हाइ । प्रेष्ठंवो-(ऊ. द. १७१)द्वितीये मन्द्रक्रुष्टम् । वाऽ२र्तोऽ३५हाइ (ऊ. द. ५) इति अमन्द्रक्रुष्टम् ॥ १५ ॥

भा. मन्द्रक्रुष्टं च ओ भवति । अमन्द्रक्रुष्टं च सर्वत्र । यथा दायोहादीनि मन्द्रक्रुष्टे । वार्त्तोहादीति अमन्द्रक्रुष्टे ॥१५ ॥

दी. पादान्ते मन्द्रस्वरात् क्रुष्टं चाक्षरमो भवति । न मन्द्रस्वरे क्रुष्टं चाक्षरमो भवति । उदाहरणम् । प्रेष्ठंवाः (ऊ. द. १७१) इति गायत्र्यौशने दाऽ२३४योऽ६हाइ । अत्र य-शब्दो मन्द्रात् क्रुष्ट ओ भवति । अमन्द्रक्रुष्टस्योदाहरणम् । काऽ५या । (ऊ. द. ५) इति वामदेव्ये वाऽ२र्तोऽ३५हाइ । अत्र ता-शब्दो द्वितियस्वरात् क्रुष्ट ओ भवति । न मन्द्रस्वरे क्रुष्टः ॥ १५ ॥

वृधे न्यं जनानां स नित्यइत्येभ्यः परोऽभ्यासश्च देव्ये ॥१६॥

वि. & भा. एदुमधोस्तृतीयायां (ऊ. अ. ४९८) न्यशब्दे अकराभ्यासः । एनातृतीयायां नाशब्दे आकाराभ्यासः । अग्निंनरायां(ऊ. द. २२२) त्यशब्दे यकाराभ्यासः ।

---

4. S¹ T- after अमन्द्रक्रुष्टं च add:-ओ भवति सर्वत्र
5. M¹-²S¹T. before पादान्ते add: श्रुधीहवायां च सर्वासु स्तोत्रीयासु वारवन्तीये मन्द्रक्रुष्टमो भवति.
10. E ᶜस्वरात् for ᶜस्वरे
16. KS¹-² after मधोः add इति

एतेषामभ्यासानामो भवति । तदेतत्पुनरुक्तं देव्य आकाराकारयकाराभ्यास एनातंवोऽग्निमिति । निधने च नित्यमोत्वं भवती(पु. सू. ८. ५. २४)ति सिद्धत्वात् ॥ १६ ॥

दी. एऽ५दु । मघोऽ३माऽ३दिन्तराम् । (ऊ. अ. ५९८) इति वामदेव्ये तृतीयायां वृधेन्यमिति शब्दात् परोऽकाराभ्यास ओ भवति । न्याऽ२मोऽ३५ हाइ । न्यं-शब्दात् परोऽकाराभ्यासः ओ भवति । आऽ५इना । वोआऽ३ग्नाऽ३इन्नमसा (ऊ. प्रा. ८३०) इति वामदेव्ये तृतीयायां जनानामिति शब्दात् परः आकाराभ्यास ओ भवति । नाऽ२मोऽ३५हाइ । अत्र नां-शब्दात् परः आकाराभ्यास ओ भवति । आऽ५ग्निम् । नरोऽ३दाऽ३इधीतिभाइः (ऊ. द. २२२) इति वामदेव्ये द्वितीयायां सनित्य इति शब्दात् परो यकाराभ्यास ओ भवति । त्याऽ२योऽ३५हाइ । अत्र त्य-शब्दात् परो यकाराभ्यास ओ भवति वृधेन्यज्ञनानाम् (पु. सू. १०. २. १६) इति सूत्रं पुनरुक्तम् । देव्ये अकाराकारयकाराभ्यास एना तंवोग्निमिति सूत्रेण निधने च नित्यमोत्वम् । (पु. सू. ८. ५. २४) इत्यनेन च सिद्धत्वात् ॥ १६ ॥

और्णायवयोरो भवति यकारे ॥ १७ ॥

वि.&भा. और्णायवयोः स्तोभे यकारे प्रत्यये । इदमपि पुनरुक्तमेव ॥ १७ ॥

---

1. वि. तेषाम् for एतेषाम्; वि. om. तत्
2. भा. om. भवति
10. S[4] om वृधे....सिद्धत्वात् (L. 12)
13. A[2]T after यकारे add: प्रत्यये
14. A[3]L[2]B[4]M[3] स्वो भवति यकारे for स्तोभे यकारे; S[1] om. और्णायवयोः---प्रत्यये; A[2] om. और्णायवयोः अकारे प्रत्यये (P. 1009, L. 5)

दी. परिप्रियादिवःकावीः (ऊ. सं. २७०) इति पूर्वे **और्णायवे** द्वितीयायाम् ऋतावृधोऽ२। याऽ२३४। अत्र यकारे प्रत्यये **धा**-शब्दस्य ओभावः। **परि**-प्रियाऽ२दिवः कवाइः (ऊ. द. ७५) इत्यौर्णायवोत्तरे द्वितीयायां एवमेव ॥ १७ ॥

सानौ शब्दश्च सर्वत्राकारे ॥ १८ ॥

वि.&भा. **सानौशब्दश्च सर्वत्र** ओ भवति **अकारे** प्रत्यये। **नौशब्दश्च** सर्वत्राकारे ओ भवतीति सिद्धमेतत्। तस्मादिदमपि पुनरुक्तमेव। उदाहरणम्– वृषापवित्रे अधि **सानो अव्ये** (सा. ५२९; सा. १२५३) **दश क्षिपो अव्यत सानो** अव्ये (सा. १०२१) ॥ **१८** ॥

दी. अक्रान्त्समुद्रः (सा. ५२९; १२५३) इत्यस्यां सर्वसामसु **सानौ**-शब्दः ओ भवति अकारे प्रत्यये। उदाहरणम्– हाउ। **उहुवाइ। अक्राऽ३४औहोवा** (ऊ. अ. ६७३.) इति वासिष्ठे प्रथमायां **सानो** अव्याइ। अत्र **नौ**-मध्ये औकारस्य ओ भवति अकारे प्रत्यये। ततः **सानो**-इति सिद्धम् ॥ १८ ॥

बोधीयनिधने च घोषे ॥ १९ ॥

वि.&भा. **बोधीयनिधने च घोषे** प्रत्यये न तु डाशब्दः। घोष एव

---

3 R उत्तरे और्णायवे for और्णायवोत्तरे; S[4] after एवमेव adds: यकारे प्रत्यये धाशब्दस्य ओभाव:।

5. M[1-2] ओकार: for ओ; M[1-2] before नौशब्दश्च add: एतौ नौ and S[1] नौ।

6. वि. om. सर्वत्र; A[2]M[1-2]TS[1] after अकारे add: प्रत्यये; My[1] om. उदाहरणम्

14. A[2]M[1-2]F चाघोषे for च घोषे; A[2]M[1-2]T om. एव

विशेषणं नोपपद्यते इति चेत् आह। प्रदर्शनार्थमेतदुच्यते। **घोषे** प्रत्यये ओ भवतीति। यथा **भे घोषे दुह्रक्ष** इति। अथवा विप्रतिपत्तेर्नियमार्थम्। घोष एव प्रत्यये ओ भवतीति नाघोष इति। कथं विप्रतिपत्तिरिति। उच्यते। ऊर्ध्वं **व्यञ्जनादि विप्रश्लिष्टमुपेयु**रित्येवमारभ्यते ॥ १९ ॥

इति पुष्पसूत्रविवरणे षष्ठस्य द्वितीयः [खण्डः] ॥ २ ॥

इति पुष्पसूत्रभाष्ये दशमस्य द्वितीया कण्डिका ॥ २ ॥

२ र र र १ २
दी. **येसोमासोवा** (ऊ. द. १३६) इत्यादिजराबोधीयस्य **निधने** घोषाक्षरे प्रत्यये पूर्वस्य ओ भवति। उदाहरणम्--वतोऽ३४५इ। डा। (३ २ over तो) इति जराबोधीयस्य निधने ति-मध्ये ओ भवति इकारे घोषाक्षरे प्रत्यये। स्वरा घोषवन्तः (ऋतन्त्र. १. ३. १०) इति ऋक्तन्त्रे ॥ १९ ॥

इति फुल्लदीपे दशमप्रपाठकस्य द्वितीयः खण्डः ॥ २ ॥

---

2. My[1] om. ओभवतीति; वि. ०पत्तिः for ०पत्तेः

4. S[1] उभे व्यञ्जमानमिति प्रतिषेधात् कृष्टमुपेयुरुपेद्मित्यारभ्य, A[2] ऊभे व्यञ्जनमिति प्रतिषेधात् कृत्यते पेयुरिंदेतमित्येवमारभ्यते, M[1-2]T उवै (T उभै) व्यञ्जनमादि (T ०माति) प्रतिषेधात् कृप्यमुपेयुरिवे (T रुये) दमित्या (T मित्येवमा) रभ्यते for ऊर्ध्वं .. आरभ्यते

तृतीयः खण्डः

त्रीक्रौञ्चप्रमशाक्त्यसंजयभरक्रन्दाभिकार्णश्रव-
श्यैताकूपविशोविभीशककुभ स्वापर्णरश्च्यादिषु ।
आयास्यद्विनिकाण्वकार्तययवाश्याक्श्वयश्वेषु च
ज्ञेया मध्यसमान्विता न निधनं हीष्येषु या सामसु ॥ १ ॥

वि. गायत्रीक्रौञ्चे इदंह्यन्वोजसा (ग्रा. ५. ६. १६५. १) इति यस्य योनिः । **प्रमंहिष्ठीयशाकृत्यसंजयसौभरवायोरभिक्रन्दाभिनिधनकार्णश्रवसश्यैताकूपार-विशोविशीयाभिशवत्रैककुभस्वारसौपर्णतैरश्च्यादिषु द्विनिधनायास्यकाण्वकार्तयशमार्गो-यवश्यावाश्ववैयश्वेषु च** एतेषु हीपीवत्सु मध्ये **या हीषी** भवति सा **निधनं न** भवति । ततः किमिदमुच्यते । **तालव्यमाइ** (पु. सू. ३. १. १) इत्याइभावप्राप्तस्य **निधने हीषीस्थम्** (पु. सू. ३. १. १२) इति प्रतिषिद्धस्य आइभावप्राप्त्यर्थमेतेषां साम्नाम् ॥ १ ॥

इति फुल्लविवरणे षष्ठस्य तृतीयः [खण्डः] ॥ ३ ॥

भा. **एषु सामसु या हीषी** साममध्ये सा **न निधनं** भवति । ततः किमुच्यते । **तालव्यमाइ** (पु. सू. ३. १. १) इत्याइप्राप्तस्य **निधने हीषीस्थम्**

---

11. M[1-2] before ततः add: हीषीस्वरं च द्व्यक्षरमित्यन्तं निधनलक्षणात्; M[1-2] after उच्यते add: अयमप्यधिकारः

14. PV[2] सा मध्येसाम for साममध्ये सा न

(पु. सू. ३. १. १२) इति प्रतिषिद्धस्य प्रतिप्रसवार्थम् ।

इति पुष्पसूत्रभाष्ये षष्ठस्य तृतीया कण्डिका ॥ ३ ॥

दी. **एषु सामसु या हीषी** साममध्यगता सा **निधनं न** भवतीति **ज्ञेया** । **निधने हीषीस्थं सर्वत्र** (पु. सू. ३. १. १२) इत्यनेन सूत्रेण प्रकृतिभावप्राप्ते **तालव्यमाइ** (पु. सू. ३. १. १) इति आइभावप्राप्त्यर्थं निधनमपि (? निधनस्यापि) निवृत्त्यर्थमिदं सूत्रमारभ्यते । **इन्द्रायेन्द्राऽ१औहो** (ऊ. द. १००) इति **गायत्रीक्रौञ्चे ताऽ२३४माः** । इति निधनं न भवति । निमित्ताभावात् । **आर्चिकं** चावृद्धमिति पूर्वेषामिहकारेडाथ-काराणां त्रयाणां निमित्तं भवति । नान्येषाम् । **प्रमंहाऽ३इष्ठायगायता** (ऊ. द. ६५) इति **प्रमंहिष्ठीये चाऽ२३४ षाइ** इति निधनं न भवति । निमित्ताभावात् । **प्रवइन्द्राऽ२** (ऊ. द. १९) इति **शाक्त्ये याऽ२४३मा** । इति निधनं न भवति । निमित्ताभावात् । **आतेअग्नइधी** (ऊ. द. ९६) इति **संजये द्याऽ२३४वी** इति निधनं न भवति । निमित्ता-भावात् । **वयाऽ३मूऽ३त्वामपूर्वीयोवा** (ऊ. द. १६) इति **सौभरे स्वाऽ२३४वाः** इति निधनं न भवति । निमित्ताभावात् । **घर्तादिवःपवते कृत्वियौ** (ऊ. क्षु. ९२८) इति **वायोरभिक्रन्दे वाऽ२३४याँ** । **पाऽ२३४जा** । इति निधनद्वयं न भवति । निमित्ताभावात् । **औहोहोहाइ** । **आइही** । **वायाम्** (ऊ. द. १२८) इत्यभिनिधने **काण्वे घाऽ२३४त्वा** इति निधनं न भवति । निमित्ताभावात् । **ताऽ२३४म्नः** (ऊ. द. ११३) इति **कार्णश्रवसे साऽ५३४खा** इति निधनं न भवति । निमित्ताभावात् । **अभिप्रवस्सुरा**

---

4. S[4] गायत्रीक्रौञ्चप्रमंहिष्ठीयशाक्त्यसंजयसौभरवायोरभिक्रन्दाभिनिधनकाण्वकार्णश्रवसइयैताकूपार-विशोविशीयाभीशववाद्याभीशवोत्तरत्रैककुभस्वारसौपर्णतैरश्चद्विनिधनायास्यत्रिणिधनायास्यकाण्व-कार्तयशमार्गीयवइयावाश्ववैयश्वादिषु for एषु

5. My[3] om. इति; My[3]ER यज्ञे for ज्ञेया; EL[1]R My[2-3] om. निधने....आरभ्यते (L. 7)

(ऊ. द. ४३) इति श्यैते वाऽ५३४स्व: इति निधनं न भवति। निमित्ताभावात्। आतूनइ (ऊ. द. २४) इत्याकूपारे भाऽ५३४या इति निधनं न भवति। निमित्ताभावात्। हिन्वाहुम् ताऽ३इस्व (ऊ. द. १७०) इति विशोविशीये ईऽ५३४न्दूम्। इति निधनं न भवति। निमित्ताभावात्। परीतोषिञ्चतासुतम्। ए (ऊ. द. १८६) इत्याभीशवाद्ये दाऽ५३४धा। स्वऽ१३४षा इति निधनद्वयं न भवति। निमित्ताभावात्। एवमेवाभीशवोत्तरे यएकइद्विदायाऽ३ताइ (ऊ. द. २०७) इति त्रैककुभे शूऽ५३४षाइ। ष्कूऽ५३४ताः। इति निधनद्वयं न भवति। निनित्ताभावात्। त्वंहयङ्गदेवाऽ३या (ऊ. द. १९६) इति स्वारसौपर्णे ताऽ५३४माः इति निधनं न भवति। निमित्ताभावात्। श्रुधीहाऽ३वन्तिरश्रियाः (ऊ. द. ६७) इति तैरश्च्ये स्याऽ५३४गो इति निधनं न भवति। निमित्ताभावात्। अत्रादिशब्दात् त्रिणिधनायास्यादिषु द्विनिधनायास्यादीनि गृह्यन्ते। पुनानःसोमधारया। एऽ३। (ऊ. द. १२६) इति द्विनिधने आयास्ये दाऽ५३४सी इति निधनं न भवति। निमित्ताभावात्। वयमूऽ३त्वा तदिदर्थाः (ऊ. द. २०) इति काण्वे काऽ५३४ण्वाः इति निधनं न भवति। निमित्ताभावात्। पुरोहाहाउ (ऊ. द. १३४) इति कार्तयशे जाऽ५३४इती। इति निधनं न भवति। निमित्ताभावात्। अध्वोहोवा (ऊ. द. १४२) इति मार्गीयवे हीऽ५३४न्द्रा इति निधनं न भवति। निमित्ताभावात्। पुरोऽ३१। जीऽ३तो (ऊ. द. ११) इति श्यावाश्वे ष्टाऽ५३४ना इति निधनं न भवति। निमित्ताभावात्। उभयंश्रृणवच्चनाऽ३ए ((ऊ. द. १५६) इति वैयश्वे ताऽ५३४याइ। इति निधनं न भवति। निमित्ताभावात्॥ १॥

6. R om एव
10. RMy² om. त्रिणिधनायास्यादिषु; My² त्रि for द्वि०

इति फुल्लदीपे दशमप्रप्राठकस्य तृतीयः खण्डः ॥ ३ ॥

चतुर्थः खण्डः

श्यैते तृतीयादिन्या औहोवायाः परं तृतीयं नीचम् ॥ १ ॥

वि. & भा. श्यैते तृतीयादिन्या **औहोवायाः** वरं यत् पर्व ऋग्द्रव्यं वा तत्र **तृतीयमक्षरं नीचं** भवति। द्वितीये स्वरे भवतीत्यर्थः। तृतीयादिन्याः इति विशेषणम्। मन्द्रस्वरायाः **औहोवायाः** प्राक् तृतीयं विद्यत इत्यतो विशिष्यते। **तृतीयादिन्या** इति ॥ १ ॥

दी. अग्निप्रवःसुरा (ऊ. द. ४३) इत्यादिश्यैते। तृतीयः स्वरः आदिर्यस्याः सा तृतीयस्वरादिनी। तस्याः **तृतीयादिन्या औहोवायाः परं तृतीयमक्षरं नीचं** भवति। **घसाऽ३४ औहोवा। आइन्द्रमर्च।** सिद्धोपन्यासो विशेषविवक्षया ॥ १ ॥

न तदिप्रान्त्ययोः ॥ २ ॥

वि. तदिदास- (ऊ. ए. ५२६) **प्रथमान्त्ययोः** प्रतिषेधः। द्वितीस्यैव ॥ २ ॥

भा. पूर्वलक्षणप्राप्तस्यापवादः। **तदिदाश्यैते** (ऊ. ए. ५५२३) **प्रथमान्त्ययोः** स्तोत्रीययोः द्वितियस्याक्षरस्य नीचीभावो न तृतीयस्य ॥ २ ॥

---

4. PV^2. om. ऋग्द्रव्यं वा;

5. $KA^2S^1M^{1-2}S^2$ om. वा; T तत् for तत्र; KMy^1 om. भवतीत्यर्थः; $A^1M^{1-2}TS$ om. इत्यर्थः; वि. तृतीयादिन्याम् for तृतीयादिन्याः

6. भा. स्वरादौहोवाप्राङ्निधनात् for °स्वराया........तृतीयं

दी. नकारः प्रतिषेधे। तादिदासभुव (ऊ. ए. ५२६) इति श्यैते प्रथमतृतीययोः स्तोत्रीययोः औहोवायाः परं द्वितीयस्याक्षरस्य नीचीभावः। न द्वितीयायां स्तोत्रीयायाम्। प्रथमायां ज्याइष्टुंयतो जज्ञउग्रः। तृतीयायां वाद्दश्वेद्विदेतेत्रिर्भ। द्वितीयायां न। राओजाश्शत्रुर्दासायभिय ॥ २ ॥

बृहति च द्रासाद् द्वितीये कं सर्वत्र ॥ ३ ॥

वि.& भा. बृहति च द्रासात् पर्वणः परस्तात् द्वितीये स्वरे एकमक्षरं सर्वत्र भवति। कतमस्याक्षरस्य द्वितीयस्वरापत्तिरिति। द्वितीयस्येति ब्रूमः। कुतः। न तद्विप्रान्त्ययोरिति द्वितीयाधिकारात् ॥ ३ ॥

दी. औहोइत्वामिद्धिहवामहाऽ३ए (र. द. ५) इत्यादिबृहति द्रासाऽ३१त्। इति पर्वणः परस्य द्वितीये स्वरे एकमक्षरं सर्वत्र सर्वसामसु भवति। द्रासाऽ३१त्। पतिम्। अत्र द्वितीये स्वरे एकमक्षरं भवति। न तद्विप्रान्त्ययोः (पु. सू. १०.४.२) इत्यनेन द्वितीयस्याधिकारात् द्वितीयमक्षरम् ॥ ६ ॥

---

2. EL[1] om. औहोवायाः परं

3. ES[1]My[2-3] om. स्तोत्रीयायाम्: S[4] before तृतीयायां adds:- द्वितीयाक्षरं इमिति नीचैः; S[4] before द्वितीयायां adds:- इति द्वितीयाक्षरं इवे इति नीचैः

4. S[4] before शत्रुर्दा adds: अत्र तृतीयमक्षरं नीचं भवति.

5. वि. trans. सर्वत्र before बृहति

12. S[4] after अक्षरम् adds:- नीचम्

अदर्शभ्यम च ॥ ४ ॥

वि. **सोमाःपवन्तायाम्** (र.क्षु.१९७) उत्तरयोः बृहति द्रासात् पर्वणः परस्तात् प्रथमात्स्वरात् द्वितीये स्वरे भवति। प्रथमस्वरस्य द्वितीयस्वरापत्तिर्भवति। द्वितीयस्याक्षरस्य द्वितीयस्वरापत्तिर्न भवति। सूरासोनदर्श। **इषमस्मभ्यम्** इत्यत्र **दर्शभ्यमशब्दौ** द्वितीयं स्वरमापद्येते ॥ ४ ॥

भा. सोमाःपवन्तायां (र. सु. १९७) बृहति उत्तरयोः स्तोत्रीययोः अपवादः। तृतीयं नीचं भवतीत्यर्थः। **सूरासोनदर्श**। **इषमस्मभ्यम** च ॥ ४ ॥

१रर र र २
दी. । अकारः प्रतिषेधे। **औहोइसोमाःपवन्तइन्दवाऽ३ए**। (र. क्षु. १९७) इति **बृहति** उत्तरयोः स्तोत्रीययोः द्वितीयमक्षरं न नीचं भवति। पञ्चमं नीचं भवतीत्यर्थः। द्वितीयायां
२ररर २ ३
सूरासोनदर्शताऽ२३४साः। अत्र दर्शशब्दो नीचः। तृतीयायाम्
२ ३ ५
इषमस्मभ्यमभाऽ२३४इताः। अत्र भ्यमशब्दो नीचः ॥ ४ ॥

प्रथमात् तृतीय इदययंयीसूच ॥५॥

वि. **इदययंयीसु** इति **प्रथमात्तृतीयस्वरे** भवति। एकाक्षराण्युदाहरणानि। **मत्स्य** (र. स. ३७) प्रथमायामिकारः। दकारः **किम्मित्ते** (र. ए. ८५) प्रथमायाम्।

---

2. A^2M^{1-2} T. before **पर्वणः** add:-**परस्यैव**
3. A^2TS^1 **तृतीये** for **द्वितीये**; M^{1-2} **स्वरापत्तिः** for **स्वरे**; A^2TS^1 **तृतीय**० for **द्वितीय**०
4. $M^{1-2}T$ om. **न**; A^2TKS^3 trans. **सूरासोनदर्श । इषमस्मभ्यम्** after **आपद्येते**
13 $A^1M^{1-1}TS^2$ om **इदययं भवति**; T. om. **एकाक्षराणि ...इकारः**; M^{1-2} after **उदाहरणानि।** add:- **उच्यन्ते**

यकारोऽत्रैव द्वितीयायाम् । यंशब्दोऽत्रैव तृतीयायाम् । यी-शब्दः **सहस्रधारायाम्** । (र. अ. ११३) । सू-शब्दः **सदुद्रवायाम्** (र. प्रा. १४४) ॥ ५ ॥

भा. **इदयंयंयीसूचेति** पाठः । द्रासात् परस्यैव पर्वणः अयं विशेषः उच्यते । प्रथमस्वरात् तृतीयस्वरे भवति । प्रथमस्वरस्य तृतीयस्वरापत्तिर्भवतीत्यर्थः । एकाक्षराण्युदाहरणानि । इकारः मत्स्य-बृहति (र. सं. ३७) प्रथमायाम् । **वृषातेवृष्ण** इति इकारः । **किमित्ते विष्णविति** (र. ए. ८५) प्रथमायामस्यइयदगूह । पदे दकारः । अत्रैव द्वितीयायां **तव्यानृक्षयं** यशब्दः । अत्रैव तृतीयायां **गिरोमेयूयंकारः** । **सहस्रधार यां** (र. अ. ११३) **सोमस्पतीरयी** यीकारः । सदुद्रवायां (र. प्रा. १४४) बृहत्येव सुशर्मास्सू ॥ ५ ॥

दी. द्रासात् परमेव पर्वणि इकारादीनि **प्रथमस्वरात्** तृतीयस्वरे भवन्ति ।

२रर र र २ २३ ५
औहोइमत्स्यपायितेमहाऽ३ए (र. सं. ३७) इति बृहति प्रथमायां **ष्णआऽ२४३इन्दूः** ।

२रर र र २
अत्र इकारः प्रथमस्वरात् तृतीयस्वरे भवति । **औहोइकिमित्तेविष्णोपरिचाऽ३ए**

र ३ ५
(र. ए. ८५) इति बृहति प्रथमायाम् **एतद्यदाऽ२३४न्या** । अत्र दकारः प्रथमस्वरात्

२ र ३ ५
तृतीयस्वरे भवति । अत्रैव द्वितीयायां **तव्यानृक्षयाऽ२३४न्ताम्** । अत्र य-शब्दः

२ र र र३ ५
प्रथमस्वरात् तृतीयस्वरे भवति । अत्रैव तृतीयायां **गिरोमेयूयाऽ२३४म्पा** । अत्र यं-शब्दः

२रर र र २
प्रथमस्वरात् । तृतीयस्वरे भवति । **औहोइसुतासोमाधुमत्तमाऽ३ए** (र. अ. ११३) इति

---

1. AT यकारे प्रत्यये for यकारः; A²M¹-² Г. अन्त्यायाम् for तृतीयायाम्ः

10. E परे for परमेव

12,13,15,16. EL¹My²-³ om. प्रथमस्वरात्

२र र ३ ५
बृहति तृतीयायां सोमस्पतीरयाऽ२३४इणाम् । अत्र यी-शब्दः प्रथमस्वरात् तृतीयस्वरे भवति । २र१र र र २ औहोएन।वोअग्निन्नमसाऽ३ए (र. प्रा. १४५) इति बृहति तृतीयायां ३ ५ वसूऽ२३४नाम् । अत्र सू-शब्दः प्रथमस्वरात् तृतीयस्वरे भवति ॥ ५ ॥

आकूस्तावतृतीयं नीचमाद्यायाम् ॥ ६ ॥

वि.&भा. राज्याकूपाराद्यायां प्रस्तावतृतीयमक्षरं नीचं भवति । १रर२१ आतूनइ (ऊ. द. २४) ॥ ६ ॥

१रर२१
दी. आतूनइ द्रक्षुमाऽ३न्ताम् (ऊ. द. २४) इत्याकूपारे प्रथमायां प्रस्तावे तृतीयमक्षरं नीचं भवति । १रर२१ आतूनइ । अत्र नशब्दो नीचः ॥ ६ ॥

आद्यं मध्यमायाम् ॥ ७ ॥

वि. राज्याकूपारमध्यमायां प्रस्तावाद्यं नीचं भवति ॥ ७ ॥

भा. मध्यमायां स्तोत्रीयायाम् आकूपारे प्रस्तावाद्यस्य नीचीभावः ॥ ७ ॥

१रर२१
दी. आतूनइ (ऊ. द. २४) इत्याकूपारे मध्यमायां प्रस्तावस्याद्यमक्षरं नीचं

1,3 EL[1] My[2-3] om. प्रथमस्वरात्

5. B[4]A[1] राज्याकूपारे स्तोत्रीयायां for राज्याकूपाराद्यायां प्रस्ताव०

9. A[2] आद्यं मध्यमायाम् दीर्घतमसे.

भवति । **विद्माहित्वातुवि** । अत्र प्रस्तावस्याद्यमक्षरं नीचम् ॥ ७ ॥

तमसे चान्धाद्वितीयेऽनेकं सर्वत्रायोनौ प्रथमे दे ॥ ८ ॥

वि. **दीर्घतमसे आन्धात्** परस्य पर्वणो **द्वितीये** स्वरे **अनेकमक्षरं भवति । प्रथमे** पादे योनिवर्जम् । अनेकाक्षराभावात् ॥ ८ ॥

भा. सहोदैर्घतमसे (ऊ. क्षु. ८७१) **च आन्धात्** पर्वण: परस्तात् । आद्यात् परस्तादित्यर्थ: । द्वितीये स्वरे अनेकमक्षरं सर्वत्र भवति । प्रथमे पादे अयोनौ योनिवर्जम् इत्यर्थ: । अनेकाक्षराभावात् । **यस्तेबोधासुमे श्रुधीहवायाँ** सर्वासु । एवमादीनि उदाहरणानि ॥ ८ ॥

दी. **हाउश्रुधाइ** (ऊ. क्षु. ८७१) इत्यादिसहोदैर्घतमसे **प्रथमे पादे आन्धा-** पर्वण: आद्यपर्वण: परस्तात् पर्वणि **द्वितीये** स्वरे **अनेकं** बह्वक्षरं **चकारान्नीचं** भवति । **सर्वत्र** । सर्वसामसु । **अयोनौ** । ऊहे । **हावंविपिपा** । अत्र त्रीण्यक्षराणि द्वितीये स्वरे भवन्ति । एवमादीनि । **हाउपिबा** (ग्रा. ६९४) इति योनौ आन्धाया: परे पर्वणि द्वितीये स्वरे बह्वक्षरं नास्ति ॥ ८ ॥

---

3. A[2]M[1]-[2]T affer पर्वण: add:- पर: स्यादित्यर्थ:, S[1] तद्द्वितीये for द्वितीये
4. M[1]-[2] द्वितीयपादमारभ्यान्यत्र [....] क्षरमेव योनौ कथमिति चेत्प्रथमपादमिति परिशेषत् for अनेकाक्षराभावात्.
9. E आन्धात् for आन्धा-
12. S[4] before हाउ adds:- अयोनौ; E before योनौ adds: सहोदैर्घतमसे.
13. E.after नास्ति adds:-ऊहे आन्धाया: आन्धाप्रत्यये अनेकं न नीचै: । किन्तु ? अन्धाया: परं भिन्नपर्वणि चेत् अनेकं न नीचै: । हाउपुरा: । जाइती । अत्र न भवति

स्तोभे चोत्तरे वकार ओ भवत्यत्वे ॥ ९ ॥

वि. उत्तरे च संस्तोभे वकार ओ भवत्यत्वे अक्षरे प्रत्यये। नदंवोअदतीनाम् (र.ए. ७८) इति ॥ ९ ॥

भा. उत्तरे संस्तोभे च वकार ओ भवति। किं सर्वत्र। न। अत्वे। किमुक्तं भवति। यस्य वर्णस्य अत्वं कृतं तस्मिन्नत्वमापन्ने वर्णे प्रत्ययभूत इत्यर्थः। यथा नदंवायां वशब्दस्य ओत्वं भवति ॥ ९ ॥

दी. नदंवो अदतीनाम् (र. ए. ७८) इत्युत्तरे संस्तोभे वकारमध्ये अकारस्य ओ भवति। अत्वे। अत्वमापन्ने अकारे प्रत्यये। नदंवोअदतीनम्। अत्र वकारस्य ओभावः ॥ ९ ॥

हिष्ठीयगवसितेषु सचप वृत्सर्वत्रान्त्यमयोनौ ॥१०॥

वि. यद्वाहिष्ठीयपूर्वौपगवानुष्टुभासितेषु यथासंख्येन सप्तमचतुर्थपञ्चमेषु पर्वसु अन्त्यं वृद्धं भवति योनिवर्जम्। परित्यंहर्यतायां (ऊ.द. २००) यद्वाहिष्ठीये। श्वाँइत्पराइ। एवमन्त्ययोरपि ॥ १० ॥

भा. यद्वाहिष्ठीयपूर्वौपगवानुष्टुभासितेषु यथासंख्येन सप्तमचतुर्थपञ्चमेषु

---

2. A²T. ओकारः for ओ

8 My². om. अत्वमापन्ने

12. A²T, सर्वासु for पर्वसु.

पर्वसु चान्त्यमक्षरं वृद्धं भवति। यद्वाहिष्ठीयसप्तमे पर्वण्यन्त्यस्याक्षरस्य **वृद्धिः**। **एवमेव** परयोः ॥ १० ॥

दी. अयोनौ ऊहे **यद्वाहिष्ठीये** पूर्वे **औपगवे** अनुष्टुभि **आसिते च यथा**-संख्येन **सप्तमे** पर्वणि **चतुर्थे पञ्चमे च अन्त्यमक्षरं** वृद्धं भवति। सर्वसामसु। यद्वा-हिष्ठीयस्य सप्तमे पर्वणि अन्त्यस्याक्षरस्य वृद्धिः। **परित्यँहर्यतँहरिम्** (ऊ. द. २००) इति यद्वाहिष्ठीयोत्तरे श्वॉ **इत्पराइ**। इति सप्तमे पर्वणि अन्त्यमक्षरं वृद्धम्। **योनौ** न वृद्धम्। **त्वद्रयिः**। पूर्वौपगवस्य चतुर्थे पर्वणि अन्त्यस्याक्षरस्य वृद्धिः। **इन्द्रमच्छा**। सुताइमाइ (ऊ. ए. ३९५) इति पूर्वे औपगवे **तुहरयश्रुष्टेजाता**। अत्र चतुर्थे पर्वणि अन्त्याक्षरं वृद्धम्। **योनौ** न वृद्धम्। **प्रहोषिणः** (ग्रा. ४. ४. १४५. १)। अनुष्टुभि आसितस्य पञ्चमे पर्वणि अन्त्यस्य अक्षरस्य वृद्धिः। **अयंपूषारयाइः** (ऊ. ए. ४५४) इत्यासिते **स्यभूमनाः**। अत्र पञ्चमे पर्वणि अन्त्याक्षरं वृद्धम्। **योनौ महेवृषन्** (ग्रा. ३. १०. ९३. १) अत्र अन्त्याक्षरं न वृद्धम् ॥ १० ॥

वसु च द्वितीयात् ॥ ११ ॥

वि. & भा. त्रैककुभे **द्वितीयात्** स्वरात् परो व-शब्दो वर्धते। **वासुमर्ताषा** ॥

---

6. My² अन्त्यस्याक्षरस्य वृद्धिः for अन्त्यमक्षरं वृद्धम्

9. My² ०अक्षरस्य वृद्धिः। योनौ न वृद्धिः; for ०अक्षरं वृद्धम्। योनौ न वृद्धम्

12. My³om. अन्त्याक्षरम्

२र र २
दी. यएकइद्विदायाऽ३ताइ (ऊ. द. २०७) इति त्रैककुभे द्वितीयात् स्वरात्
१ २ २
परो व-शब्दः वर्धते। वासुमर्तायाऽ३दा। अत्र व-शब्दो वृद्धः ॥ ११ ॥

असु ॥ १२ ॥

वि. & भा. अत्रैव सु-शब्दो न वर्धते ॥ १२ ॥

१ २ २
दी. अकारः प्रतिषेधे। वासुमर्तायाऽ३दा। अत्र सु-शब्दो न वर्धते ॥

तिथे च तृतीये प्रथमं योनौ ॥ १३ ॥

वि. & भा. दैवातिथे च तृतीये पादे प्रथममक्षरं वर्धते योनौ ॥ १३ ॥

२र२ रर ५र ५
दी. आतूऽ३४। एतानि। षीदाऽ६ता (आ. ५. ५. १६४. १) इति
१ २र १र
दैवातिथे योनौ तृतीये पादे प्रथममक्षरं वर्धते। साखायस्तोमवा। अत्र स-शब्दो वृद्धः।
१ २१र२र१
अत्र योनाविति वचनात् ऊहे प्रथममक्षरं न वर्धते। द्वितीयायाम् इन्द्रंसोमेस (ऊ. द. २८)।
२१र२र१
अत्र ऊहे प्रथममक्षरं न वृद्धम्। तृतीयायां गमद्वाजेभिः। अत्र ऊहे प्रथममक्षरं न वृद्धम् ॥ १३ ॥

जये च स्तावान्त्यमयोनौ ॥ १४ ॥

वि. & भा. सञ्जये च प्रस्तावान्त्यमक्षरं वर्धते। अयोनौ ॥ १४ ॥

इति फुल्लविवरणे षष्ठस्य प्रपाठकस्य चतुर्थः खण्डः ॥ ४ ॥

---

3. A²M¹-²TS¹ om असु ॥ ...वर्धते (L. 4)
6. A²S¹ after तृतीये add: दे
10. My³ om. द्वितीयायां
11. My² om. तृतीयायां; My³EL¹R om. तृतीयायां....वृद्धम् ॥

भा. पुष्पसूत्रभाष्ये दशमस्य चतुर्थी कण्डिका ॥ ४ ॥

३र४र५ र
दी. आतेअग्नइधी (ऊ. द. ९६) इति सञ्ज्ञये अयोनौ ऊहे प्रस्तावस्यान्त्य-
३र४र५ र २ ४ ५ २ ४र५ ४
मक्षरं वर्धते । द्वितीयायाम् आतेअग्नऋचा । हाऽ३वाइः । शुक्रस्याऽ३ज्योतिषस्य-
५ ५र २ ४र ५ ४र ५
ताइ । अत्र प्रस्तावान्ते ते-शब्दो वृद्धः । तृतीयायां दर्वीश्राऽ३इणीष आसनाइ ।
५ २ ४र५
अत्र प्रस्तावान्ते निशब्दो वृद्धः । योनौ प्रस्तावस्यान्तो न वर्धते । द्युमन्ताऽ३न्देव
४ ५
अजरम् (श्रा. ११. ८. ४१९. २)। अत्र प्रस्तावस्यान्ते रंशब्दो न वृद्धः ॥ १४ ॥

इति फुल्लदीपे दशमप्रपाठकस्य चतुर्थः खण्डः ॥ ४ ॥

पञ्चमः खण्डः

क्रौञ्चे दे चमात्प्रथमोच्चम् ॥ १ ॥

वि.&भा. आष्टमिके क्रौञ्चे पादे पञ्चम.दक्षरात् परस्तात् प्रथममुच्चं भवति । प्रथमतृतीयेषु पादेषु षष्ठमक्षरमुच्चं भवतीत्यर्थः ॥ १ ॥

२ र १र र
दी. अभीनोवौहो (ऊ. द. १६६) इत्यादिक्रौञ्चे प्रथमे पादे तृतीये पादे च

---

5 ELᵃMy¹⁻² R om. तृतीयायां ... निशब्दो वृद्धः

6. My²⁻³ वृद्धः for वर्धते

7. My²⁻³ om. अत्र .... न वृद्धः

12. वि पञ्चमाक्षरात् for पञ्चमादक्षरात्; वि. trans. प्रथमम् after भवति;

13. A²S¹M¹⁻² Γ. om. पादेषु

14. S⁴ क्रौञ्चाद्ये for क्रौञ्चे

२र१र
पञ्चमादक्षरात् परमक्षरं प्रथमे स्वरे उच्चं भवति। प्रथमे पादे जासातमाम्।
२र१
अत्र पञ्चमाक्षरात् जशब्दात् परमक्षरमुच्चम्। तृतीये पादे स्राभर्णसाम्। अत्र पञ्चमाक्षरात् सशब्दात् परमुच्चम्। एवमादीनि ॥ १ ॥

असूरासः ॥ २ ॥

वि. & भा. अकारः प्रतिषेधार्थः। सूरासो न दर्शतासः (ऊ. अ. ६१४) इत्यत्र सप्तममुच्चं भवति ॥ २ ॥

२र २ १ र
दी. अकारः प्रतिषेधे। सोमाःपवौहो (ऊ. अ. ६१४) इति क्रौञ्चे द्वितीयायां
२१र
तृतीये पादे षष्ठाक्षरात् परमक्षरं प्रथमे स्वरे उच्चं भवति। दर्शतासाः पञ्चमाक्षरात् परं नोच्चम् ॥ २ ॥

ये च तृतीयाद्देष्णात् तृतीयम् ॥ ३ ॥

वि. & भा. जराबोधीये च तृतीयात् पर्वणः परस्ताच्चतुर्थे पर्वणि तृतीयमक्षरमुच्चं भवति ॥ ३ ॥

१र १ २
दी. प्रवाजियोवा (ऊ. क्षु. ९३०) इत्यादिजराबोधीये तृतीयात् पर्वणः परे

---

2. EL[1]My[2-3] om. पञ्चमाक्षरात्; S[4] जकारात् for जशब्दात् My[2-3] om. अक्षरम्
8. S[4] My[3] R om. अक्षरम्
11. A[2]T. after जराबोधीये च add: तृतीये च; A[1] ततीयमक्षरमुच्चं भवति। किंच। चतुर्थे पर्व णितृतीयाक्षरस्य चकारात् पूर्वसूत्रप्राप्त उच्चीभावः। तत्र प्रतिषेधः for परस्तात् उच्चं भवति

२र १
पर्वणि । गेष्णादुद्गीथात् परे तृतीये पर्वणि तृतीयमक्षरमुच्चं भवति । धारास्ता-इराः ॥ ३ ॥

न प्रसो ॥४॥

वि. **प्रसोमयाहि** (ऊ. क्षु. ९.३०) इत्यत्र बोधीये तृतीयस्य प्रतिषेधः । द्वितीयमुच्चं भवति ॥ ४ ॥

भा. **प्रसोमयाही**-(ऊ. क्षु. ९.३०) त्यत्र जराबोधीये चतुर्थे पर्वणि तृतीयस्योच्चीभावप्रतिषेधः । अत्र तु द्वितीयमक्षरमुच्चं भवति ॥ ४ ॥

२र १ १
दी. **प्रसोमयोवा** (ऊ. क्षु. ९.३०) इति जराबोधीये तृतीयायाम् उद्गीथात्

२र१
तृतीये पर्वणि तृतीयस्याक्षरस्य न उच्चीभावः । **क्षानूभाइः** । द्वितीयमक्षरमुच्चं भवतीत्यर्थः ॥ ४ ॥

श्रवस आइन्द्रान्ताज्जनिलोपः ॥५॥

वि. & भा. **तौरश्रवसे** योनौ तृतीये पादे चत्वारि पर्वाणि । **आऽ२३इन्द्रा । जनि । उत्ताद्वाऽ१इषाऽ२ः । श्रवाऽ२सा२३४इनाः इति । आऽ२३स्माकम । शुम्भाघाऽ१वाऽ२३न् । पूरूऽ२स्पृऽ२३४हाम् ।** अत्र ऊहगीतौ **आइन्द्रान्तात्**

---

2. S² after इराः। adds: इति तृतीयमक्षरमुच्चम्
4. A¹ प्रसोमायां हीन्द्रस्येत्यत्र चतर्थपर्वणः द्वितीयमक्षरमुच्चं भवति इन्द्रमच्छादिषु ऊनानामन्यथा गीतिः पदानामाधिकाश्च ये । for प्रसोमयाहीत्यत्र भवति
12. भा. A²M¹⁻²TS¹ आइन्द्रान्ताज्जनि । उतद्विषा for आऽ१३ इषाऽ२ः ।
13 भा श्रवा च, A²M¹⁻²S¹ । श्रवसे नाः इति for श्रवासाऽ२३४ इनाः इति
14. वि. om. अत्र ऊहगीतौ; वि. आइन्द्रात् for आइन्द्रान्तात्

पर्वणः परस्ताज्जनिलोपो भवति । सखायोदीत्यत्र तृतीये पादे पाऽ२३राइ । प्रास्थाऽ१न्द्राऽ२३ताऽ२इह्वऽ५३४ताः । त्रीणि पर्वाणि भवन्तीत्यर्थः ॥ ५ ॥

दी. यदिन्द्रशासोअव्रताम् (अ. ११६) इति तौरश्रवसे योनौ तृतीये पादे चत्वारि पर्वाणि सन्ति । आऽ२३स्मा । कम । शुम्भाधाऽ१वाऽ२३न् । पूरूऽ२स्पृ२३४हाम् । तत्र ऊहगितौ आइन्द्रापर्वणः परस्तात् द्व्यक्षरस्य जनिपर्वणो लोपः । त्रीणि पर्वाणि भवन्तीत्यर्थः । सखायो दीर्घजिह्वायाम् (र. प्रा. १५२) इति तौरश्रवसाद्ये तृतीये पादे पाऽ२३राइ । प्रास्थाऽ१न्दाऽ२३ । ताऽ२इह्वऽ२३४ताः । अत्र कम इति जनिपर्वणो लोपः । ताऽ२३४म् । वोदस्ममृती । षाहाम्(ग्रा.६.१.२३६.५) इति नौधसे आऽ२३न्द्राम् इति पर्व भवति । अहमिद्धाऽ५इपितुःपराइ (ग्रा. ४.४.१५२.१) इति साम्नि जनि । प्रथमस्वरे जनि-पर्व भवति ॥५॥

उताद्विषायाश्चाद्यम् ॥ ६ ॥

वि. &भा. उतद्विषायाश्चाद्यमक्षरं लुप्यते । त्र्यक्षरा भवतीत्यर्थः । प्राऽ३स्थाऽन्दाऽ२३ ॥ ६ ॥

---

1. वि om. भवति । सखायोदीत्यत्र तृतीये पादे

12. K. द्विषायां for द्विषायाः; T. अवृन्त्म् for आद्यम्.

13. भा. या वा उतद्विषा तस्याः for उतद्विषायाः; वि. त्र्यक्षराणि भवन्ति for त्र्यक्षरा भवतीत्यर्थः

दी. सखायोदीर्घजिह्वायाम् (र. प्रा. १५२) इति तौरश्रवसाये उतद्विषापर्वण: आद्यमक्षरं लुप्यते। त्र्यक्षरा उतद्विषा भवतीत्यर्थ:। प्रास्याऽ१न्दाऽ२३। अत्राद्यमक्षरं लुप्यते। त्वम्नोया। (ग्रा. १. १ ६१.) इति साम्नि उताद्वाऽ१इषाऽ२:। इति पर्व भवति ॥ ६ ॥

श्रावायाश्च ॥ ७ ॥

वि. श्रवसायाश्चाद्यमक्षरं लुप्यते । ताऽ२इसूऽ२३४ता: । श्रवसा प्रसोमासो मदच्युत इत्यत्र ॥ ७ ॥

भा. श्रवायाश्चाद्यमक्षरं लुप्यते । श्रवा३सा३३३इना३: । एषा श्रवाया(? श्रवा) विज्ञेया । ता३सूइ३३३ता३: । यत्र चत्वारि पर्वाण्यधीयन्ते तेषां कथमिति । ऊहगाने योनिवत्स्वरा ऊहास्यास्वविरामा: (पु. सू.८.५.१) इति योनिवदेव चत्वारि पर्वाणि प्राप्नुवन्ति । अल्पाक्षराणि भवन्ति । कनीयस्यादितो लोप: (पु.सू.८.२.१७) इति वचनात् ॥ ७ ॥

दी. अत्रैव तौरश्रवसे श्रवापर्वण आद्यमक्षरं लुप्यते । ताऽ२इसूऽ३४ता: । अत्राद्यमक्षरं लुप्यते । प्रसोमाऽ२३४सा: (ग्रा. १३.२.४७७.१) । इति साम्नि श्रवाऽ२-साऽ२ऽ३४इना: इति इति श्रावापर्व भवति ॥ ७ ॥

---

1. My² ०पर्वणि for ०पर्वण
2. S² अपरा My अवृत्. My³अपूरा for त्र्यक्षरा
5 M¹-²T श्रवसाया: for श्रवाया:
9. P¹·² अभिधीयन्ते for अधीयन्ते

सेधे तु प्रत्नं पीयूषाद्यायां सत्राद्यस्य लोपः ॥८॥

वि. प्रत्नं पीयूषाद्यायां उत्सेधे (ऊ. ए. ५२५) सत्रासंघातस्याद्यस्य पर्वणो
४ र ३ ४३र४५
लोपो भवति । सत्राहणंदाधृषिं (ग्रा.९.११.३३५.१) प्रथमायाम् ॥८॥

भा. उत्सेधे तु प्रत्नंपीयूषाद्यायां सत्राहणमित्याद्यसाम्नि यः संघातः तस्य संघातस्याद्यं यदक्षरं तल्लुप्यते ॥८॥

४ ३४र३र४र ३ ४५
दी. **प्रत्नंपीयूषम्पूर्व्यंयदु** (ऊ. ए. ५२५) इत्युत्सेधे प्रथमायां तु सत्रेति
३४र र ४र५र
आद्यस्य साम्नः सत्रापर्वणो लोपः । योनौ प्रसोमदेववीतये । सिन्धुः (ग्रा.१४.५-५१४.४)
५ र ३२ ३र४र५
इदं सत्रापर्व भवति । **सत्रा** । हणऽ३४औहोवा (ग्रा. ९. ११.३३५.१) । इति
साम्नि **सत्रा**-पर्व ॥८॥

कृतिनि तृतीये दे सर्वत्र रम्यते ॥ ९॥

वि. **सर्वत्र संकृतिनि** बृहतीषु गीयमाने ऊहगीतौ तृतीये पादे विरामो भवति ॥९॥

भा. संकृतिनि ऊहगीतौ बृहतीषु गीयमानस्य तृतीये पादे विरामो

---

2. SA[2] संवाताद्यस्य for संघातस्याद्यस्य.
11. A[1]K गीयमानेषु for गीयमाने

भवति ॥ ९ ॥

दी. एपारी । तोषिश्वताऽ२३होऽ२३इ (र. द. २४) इति **संक्रतिनि तृतीये पादे** सर्वसामसु **रम्यते** । विरामो भवति । **दधन्वां योनर्योआ** । **प्सुवन्तरा** । अत्र तृतियपादमध्ये विरामः । एवं सर्वसामसु ॥ ९ ॥

अनुष्टुप् द्वितीये च ॥ १० ॥

वि. &भा. अनुष्टुभि गीयमाने संक्रतिनि द्वितीये पादे विरामो भवति ॥ १० ॥

दी. एपारी । त्यँहर्यताऽ२३म् होऽ२३इ (र. स. १२९) इत्यनुष्टुभि संक्रतिनि द्वितीये पादे विरम्यते । **बभ्रुंपुन** । **तिवारेण** । अत्र द्वितीयपादमध्ये विरामः ॥ १० ॥

षभे च ॥ ११ ॥

वि.&भा. शाक्वरर्षभे चानुष्टुभि गीयमाने द्वितीये पादे विरामो भवति । **पवस्वशाजेत्यत्र** पाङ्क्तस्यानुष्टुप्सु द्वितीयं पादं **द्वैधं न्यूहेदित्येतदुक्तं** भवति ॥ ११ ॥

4. EL[1]My[2-3] om तृतीय० and सर्वसामसु

6. वि. अनुष्टुप्सु for अनुष्टुभि·

11. वि· अनुष्टुप्सु for अनुष्टुभि; A[2] after गीयमाने adds·–ऊहगीतौ.

12. PV[2] पादस्य for पाङ्क्तस्य; वि. om· एतत् M[2-3] द्वितीयपदद्वैधं, T· द्वितीयं पदद्वयं for द्वितीयं....द्वैधं

२ र र र र र र २ १

दी. ओऽ३१म् । **पवाएस्ववाएजसाएतयआ** (र. द. १५) इत्यनुष्टुमि

र र र र र र र २ र र र र र र र २ १

शाक्करर्षभे च द्वितीये पादे विरामः । **पाएवाएत्राएभाऽ१** । **राएयाएम्नूएतआ** । अत्र द्वितीयपादमध्ये विरामः । उक्तं च लाट्यायने श्रौतसूत्रे **पाङ्क्तस्यानुष्टुप्सु द्वितीयं पादं द्वैधं व्यूहेत्** (ला. श्रौ. २०. ४. १३) इति ॥ ११ ॥

प्राक्चतुर्णेष्वयोनावोमिति नीचः ॥ १२ ॥

वि.&भा. प्रागुक्तं द्वितीये पादे तृतीये च रम्यत इति स विरामः कथं भवति इत्यत आह—**प्राक् चतुर्षु वर्णेषु** स विरामो भवति । द्वादशाक्षरेऽष्टाक्षरे वा **ओमिति** । एतच्च प्राक् चतुर्षु वर्णेषु भवति । पाङ्क्तत्वादेनयोः साम्नोः । पाङ्क्तत्वसंपादनार्थमेतदारभ्यते । **अयोनावेतदेव** । योनौ तु पञ्चपदैव । **स्वादोरीत्थेति** । अथवा **प्राक्चतुर्थेष्वोमिति** । एवमन्तं सूत्रम् । प्राक् चतुर्षु निधनेषु **शंयोः हविः सुवः ज्योतिः** इत्येतेषु प्रागोंकारो भवति **नीचः** । एवं पाठः । वाचि प्रत्यये ओमित्येतन्नीचं भवति ॥ १२ ॥

---

3. E om. उक्तं व्यूहेदिति
6. $A^2TM^{1-2}S^1$ संकृतिनि for प्रागुक्तं; $S^1KS^2My^1$ द्वितीयतृतीययोः पादयोः A^2TM^{1-2} द्वितीयपादे for द्वितीये पादे तृतीये
7. भा. om. इत्यत:; $A^1S^1M^{1-2}T$ विकार: for विराम:; भा. द्वादशाक्षरेषु for द्वादशाक्षरे; वि. एव for वा
8. A^2 एषु for एतच्च; $A^2M^{1-2}T$ om. प्राक्; भा. इदम् for एतत्
9. B^4P पञ्चदैव, A^1 पञ्चपादे, L^2 पञ्चदेव $A^2S^1M^{1-2}T$ पञ्चपदायां नैवम् for पन्चपदैव
11. भा. विनीच: for नीच:

दी. प्रागुक्तं द्वितीये पादे विरम्यत इति। स विरामः कुत्र भवतीत्यत आह। चतुर्षु वर्णेषु अक्षरेषु सत्सु प्राक् विरामो भवति। अयोनौ ऊहे। शाक्वर्षभे (र. द. १५) द्वितीये पादे चतुर्षु वर्णेषु परेषु सत्सु प्राङ्नीचः। चतुर्षु वर्णेषु परेषु सत्सु प्राक् ओ१ऽम् इत्यादि यज्ञे भवति ॥ १३ ॥

वैं तृतीये प तृ षट्परे ॥ १३ ॥

वि.&भा. अयोनावित्यधिकारः। वैयश्व-(ऊ. द.५६) तृतीये पादे योनिवर्जं तृतीयमक्षरं नीचं भवति। षष्ठं च परं च षट्परे। ते च नीचे भवतः। षष्ठसप्तमे इत्यर्थः ॥ १३ ॥

दी. अयोनावित्यधिकारः। उभयँ२शृणवच्चान२ऽ३ए (ऊ. द. १५६) इत्यादि-वैयश्वे योनिवर्जम्। तृतीये पादे तृतीयमक्षरं नीचं भवति। द्वितीयायां तँ१हि२स्व१र२राजाऽ१२म्वृषभाम्। अत्र स्वशब्दो नीचः। षष्ठं च परं च षट्परे। षष्ठसप्तमे अक्षरे नीचे भवतः। वृषभाम् इत्यत्र वृष इति द्वे अक्षरे नीचे भवतः ॥ १३ ॥

---

2 My²R ऋषभशाक्वरे for शाक्वर्षभे
4. S⁴ after ओम् adds:- इति यज्ञे क्रियते.
6. A²M¹-²S¹. om. अयोनावित्यधिकारः; A²M¹-²T. om. तृतीये पादे; भा trans. तृतीये पादे after योनिवर्जं
7. वि. after परं adds:- यत्; वि. om. ते च
12. R om. वृषभाम् इत्यत्र

एकर्चे द्वे ॥१४॥

वि. & भा. एकर्चे वैयश्वे पुनानायां (ऋ. ए. ५२९) तृतीये पादे पूर्वोद्दिष्टानां तृतीयषष्ठसप्तमानां द्वे नीचे भवतः। तृतीयषष्ठे इत्यर्थः ॥ ४४ ॥

२र र र २
दी. पुनानरसोमधारयाऽ३ए (ऊ. ए. ५२९) इत्येकर्चे वैयश्वे तृतीये पादे
१र २ १र र२ १
द्वे अक्षरे नीचे भवतः। तृतीयषष्ठे अक्षरे इत्यर्थः। आरत्नधायोनिमृताऽ२। अत्र त्न-नि-शब्दौ नीचौ ॥ ४४ ॥

दसे ज्ञीये हाराद्योनिवत् ॥१५॥

वि.&भा. वैच्छन्दसे यज्ञायज्ञीये प्रतिहारात् परं यत् पर्व तद् योनिवद् भवति। अष्टाक्षरं भवतीत्यर्थः। सिद्धारम्भो विशेषविवक्षया ॥ १५ ॥

४ ३ ४ २
दी. वैच्छन्दसे योनिवच्छन्दसोऽन्यच्छन्दसि। सभाऽ५इद्धम्। अऽ३ग्नाऽ३
ईसमिधा (ऊ. ए. ४२५) इति यज्ञायज्ञीये प्रतिहारात् परं पर्व योनिवत् अष्टाक्षरं भवति।
१ रर ३ २
आइमहेजातवाऽ२इदसाउ। इति अष्टाक्षरं भवति। सिद्धारम्भो विशेषविवक्षया ॥ ४५ ॥

[ग] विशोत्तमायाम् ॥१६॥

---

3 भा. त्र्याणामुद्दिष्टानां for पूर्वोद्दिष्टानां; PB^{4} तृतीये for तृतीय; भा पूर्वे for द्वे

7. M^{3-2} om. दसे ज्ञीये

8. वि. om. यत् and तत्; A^{2} M^{1-2} यज्ञीयवत् for योनिवत्; S^{2} before योनिवत् adds:- ज्ञीये

9. A^{2} षष्ठा० for अष्टा०; A^{2} M^{1-2} S^{1} ०विवक्षायाम् for ०विवक्षया

भा. & वि. **विशोविशोऽन्त्यायां** प्रतिहारात् परस्य योनिवद्भावप्रतिषेधः। सप्ताक्षरं भवतीत्यर्थः ॥ ६ ॥

४ ३ ४ २ ४ ५
दी. अकारः प्रतिषेधे। **विशोऽ५वि। शोऽ३वोऽ३अताइथाइम्** (ऊ. ए. ४२४) इति यज्ञायज्ञीये तृतीयायां प्रतिहारात् परं पर्व न योनिवद्भवति।
१ र र
हाव्यान्यैरषाऽ२द्दिवाउ इति पर्व सप्ताक्षरं भवति ॥ १६ ॥

सोमाद्ययोश्च ॥ १७ ॥

वि. **सोमःपवतेजनितायाद्ययोः** ज्ञीये योनिवद्भावप्रतिषेधः ॥ १७ ॥

दी. **सौमाऽ५ःप। वऽ३ताऽ३जनिता** (ऊ. क्षु. ८९९) इति यज्ञायज्ञीये
१ र
आद्ययोः स्तोत्रीययोः प्रतिहारात् परं पर्व न योनिवद्भवति। प्रथमायां **जानितेन्द्रस्यजनि**
र ३ २ १ र ३र५
तोताऽ२विष्णाउ। इति पर्व एकादशाक्षरं भवति। द्वितीयायां **वाइत्रमत्यैताऽ२इरेभाउ** इति पर्व सप्ताक्षरं भवति ॥ १७ ॥

भा. **अविशोत्तमायां सोमाद्ययोश्च** ॥ विशोविशोत्तमायां यज्ञायज्ञीये सोमः पवतेजनितायां ज्ञीये आद्ययोः स्तोत्रीययोः प्रतिहारात् परस्य पर्वणो योनिवद्भाव-प्रतिषेधः ॥ १६-१७ ॥

आग्नेये जास्वरं वृत ॥ १८ ॥

---

7. M[1-2] trans. जनितायाद्ययोः after ज्ञीये
11. My[3] om. भवति.
15. A[2]T वृद्धम् for वृत

वि. **बृहदाग्नेये जास्वरो वृद्धो** भवति। **योनौ** जास्वरास्त्रयः ॥ १८ ॥

भा. बृहदाग्नेये जास्वरस्य वृद्धिः। योनौ जास्वरः। सिद्धोपन्यासो विशेषार्थः ॥ १८ ॥

४ र५ ४ ५
दी. **त्वँहिक्षैतवद्यशः** (ग्रा. ५. ९. ८४) इति योनौ बृहदाग्नेये जास्वरस्य
१ ४५ ४
वृद्धिः। **त्रो** इति जास्वरः। **उदुत्यम्**। **ओहाइ** (ग्रा. १. ३. ३१. १) इत्यत्र **जा** इति जास्वरः। सिद्धोपन्यासो विशेषविवक्षया ॥ १८ ॥

न विच्छन्दस्सु ॥ १९ ॥

वि.&भा. **विच्छन्दःसु** बृहदाग्नेये जास्वरो न वर्धते। अग्निनरायाम् (ऊ. अ. ६४२) आद्यस्य जास्वरस्य **वृद्धिप्रतिषेधः** ॥ १९ ॥

२ १ २ र१र २
दी. योनिच्छन्दसोऽन्यच्छन्दस्सु **अग्निन्नरोदीधितिभिः** (ऊ. अ. ६४२) इति
० २र १
बृहदाग्नेये जास्वरस्य न वृद्धिः। **आरण्योः**। **हृ**। अत्र हृ-शब्दस्य जास्वरस्य **न वृद्धिः** ॥ १९ ॥

---

2. P om. **योनौ जास्वरः**
3. A[1] **विशेषविवक्षया** for **विशेषार्थः**
8. S[1] वैच्छन्दसाग्नेये for विच्छन्दःसु बृहदाग्नेये; भा. जास्वरस्य वृद्धिप्रतिषेधः for जास्वरो न वर्धते
11. L[1]EMy[2-3] om. अरण्योः; My[2-3]LE[1] हृ। अत्र न वृद्धिः for अत्र हृशब्दस्य....न वृद्धिः
12. S[4] after वृद्धिः adds: एवमुत्तरयोः स्तोत्रीययोरपि

प्रहूयसायाश्च द्व्यक्षरमवृत् ॥ २० ॥

वि.&भा. तस्मिन्नेव वैच्छन्दसे बृहदाग्नेये प्रहूयसायाः आद्यं द्व्यक्षरमवृद्धं भवति । अग्निन्नरायाम् (ऊ. अ. ६४२) एव ॥ २० ॥

२ १ २र २
दी. अग्निन्नरो दीधितिभिः (ऊ. अ. ६४२) इति बृहदाग्नेये प्रहूयसा-पर्वण
२ ३ ५
आद्यं द्व्यक्षरं न वृद्धं भवति । स्तच्युताऽ२३४ञ्जा ।' अत्राद्यं द्व्यक्षरमवृद्धं भवति ।
२१ ४र ५ २ ३ ५
प्रतीत्याऽ३४श्वारुमध्वराम् (ग्रा. १. २. १६. १) इत्यत्र प्राहूयाऽ२३४साइ इति
प्रहूयसापर्व ॥ २० ॥

दादिस्तनिपार्श्वयोर्यथर्चस्सर्वत्र ॥ २१ ॥

वि.&भा. पादादिः संतनिगायत्रपार्श्वयोः सर्वत्र सर्वर्क्षु यथर्चः भवति ॥ २० ॥

१ २
दि. असाहाउ (ऊ. द. ९०) इत्यादि सन्तनिनि पादादिर्यथर्चो भवति ।
२ १ र २ १ २र १र२र१ २ १ २
सर्वत्र सर्वर्क्षु । अप्सुदक्षो । शुभ्रमन्धो । आदीमश्वम् । एवमादीनि । आभी ।
१ र २
सोमासआऽ३१उवाऽ२३ (ऊ. द. १४८) इत्यादिगायत्रपार्श्वे पादादिर्यथर्चो भवति
१ २र१ २ १र२ १र२ २र
सर्वर्क्षु । पदन्तेमदि । मत्सारासो । राज.देवः । एवमादीनि ॥ २१ ॥

---

2. वि. om. तस्मिन्नेव; KMy^1 विच्छन्दस्सु for वैच्छन्दसे; $A^2M^{1-2}\Gamma S^1$ च for आद्यम्; KS^2 आद्यायाः for आद्यं
3. वि om. अग्निन्नरायामेव
6. My^3 om. प्रतीत्या इत्यत्र
9. वि. trans. पादादिः after ॰पार्श्वयोः; $A^2M^{1-2}\Gamma$ om. सन्तनिगायत्रपार्श्वयोः; T भा यथर्च for यथर्चः
13. S^4 after एवमादीनि adds: पादानि

अस्तावहारयोरवश्येहिस्तोमसुमराप्रमरजी च ॥ २२ ॥

वि. अकारः प्रतिषेधार्थः। पादादीनां यथर्चप्रतिषेधः। एकाक्षराण्युदाहरणानि। **अभिसोमायायां प्रस्तावे** अकारो न यथर्चो भवति। सन्तनिगायत्रपार्श्वयोः **इन्द्रोमदा**न्त्यायां सन्तनिनि प्रतिहारे **अस्मांइन्द्र**। आया। गायत्रपार्श्वे प्रस्तावे वकारः। **वयां**हाउ। **श्वेनोहाउ**। हिन्वेहाउ। स्तोतूहाउ। मत्साहाउ। मक्षुहाउ। **सुन्वाहाउ**। सन्तनिनि। गायत्रपार्श्वे प्रस्तावे। मात्सा। राजदऽ१इवाऽ२ः। **प्रहाइन्वाऽ१नाऽ२ः**। **मघौनाऽ१माऽ२**। रथाइनाऽ१याऽ२। गायत्रपार्श्वे प्रतिहारे। **जीराहाउ**। सन्तनिनि प्रतिहारे। **आइहा**। गायत्रपार्श्वे प्रस्तावे ॥ २२ ॥

भा. अकारः प्रतिषेधार्थः। प्रस्तावप्रतिहारयोः पदादेर्वक्ष्यमाणेषूदाहरणेषु यथर्चाभावः। उदाहरणानि। अ। व। श्वे। हि। स्तो। म। सु। म। रा। प्र। म। र। जी। एकक्षराण्युदाहरणानि। यथासंख्येन अकारादीन्युदाहरिष्यामः। अकारः **अभिसोमायां** प्रस्तावे संतनि- (ऊ. अ. ५५९)

---

3. KS^1My^2 मदायां for मदान्त्यायां
4. $A^2M^{1-2}TS^1$ om आया ...प्रस्तावे
5. $A^2M^{1-2}TS^1$ मत्साहाउ
6. $A^2M^{1-2}TS^1$ सन्तनिगायत्रपार्श्वयोः for संतनिनि
7. A^2 om. रथाइना ..गायत्र; S^1 °पार्श्वे प्रतिहारः। जीरास्सन्तनिनि for °पार्श्वे प्रतिहारे। जीराहाउ....प्रस्तावे
8. M^{1-2} om. प्रतिहारे....प्रस्तावे; A^2 om आइहा....प्रस्तावे; T प्रतिहारान्त योनौ for प्रतिहारे... प्रस्तावे

गायत्रपार्श्वयोः (ऊ. द. १४८)। इन्द्रोमदा-(ऊ. स. ७४२) तृतीयायां च संतनिनि अस्मांहाउ। प्रतिहारे विकारः। वयांहाउ। श्येनोंहाउ। हिन्वेहाउ। स्तोतूहांउ। मत्साहाउ। सुन्वाहाउ। संतनिनि। गायत्रपार्श्वे (ऊ. द. १४८) प्रस्तावे मत्सरासः। राजादेवः। प्रतिहारे। प्रहिन्वानः। प्रतिहार एव। मधौ न मक्ष। रथेनपादमिति च। एतानि गायत्रपार्श्व-(ऊ. अ. ५६१) प्रतिहारे। जीराः संतनिनि (ऊ. अ. ६८४) प्रतिहारे ॥ २२ ॥

दि. अकारः प्रतिषेधे। अभीहाउ। (ऊ. अ. ५५९) इति सन्तनिनि प्रस्तावे पादादिरकारो यथर्चं ऋकुस्वरो न भवति। आभी। (ऊ. द. १४८) इति गायत्रपार्श्वे प्रस्तावे अकारः ऋकुस्वरो न भवति। इन्द्रोहाउ (ऊ. स. ७४३) इति सन्तनिनि तृतीयायां प्रतिहारे अस्मांहाउ। अत्राकारो ऋकुस्वरो न भवति। वयांहाउ (ऊ. स. ७४५) इति सन्तनिनि प्रस्तावे वकारः ऋकुस्वरो न भवति। असाहाउ। (ऊ. द. ९०) इति सन्तनिनि प्रतिहारे। श्येनोहाउ। अत्र श्येशब्दः ऋकुस्वरो न भवति। वृषाहाउ (ऊ. द. १२१) इति सन्तनिनि प्रतिहारे द्वितीयायाम्। हिन्वेहाउ। अत्र हि-शब्दः ऋकुस्वरो न भवति। अस्ताहाउ (ऊ. अ. ५६२) इति सन्तनिनि प्रथमायां प्रतिहारे स्तोतूहांउ। अत्र स्तोशब्दः ऋकुस्वरो न भवति। अभीहाउ

---

2 V² बकारः for विकारः

10· अकारस्य for अकारः

11. वकारस्य for वकारः

(ऊ. अ. ५५९) इति सन्तनिनि प्रतिहारे। मत्साहाउ। अत्र मशब्दः ऋक्स्वरो न भवति। इन्द्रोहाउ। (ऊ. स. ७४३) इति सन्तनिनि द्वितीयायां प्रतिहारे। सुन्वाहाउ। अत्र सुशब्दः ऋक्स्वरो न भवति। आभी। सोमास आऽ३४उवाऽ२३ (ऊ. द. १४८) इति गायत्रपार्श्वे प्रस्तावे द्वितीयायां मात्सा। अत्र मकारः ऋक्स्वरो न भवति। अत्रैव द्वितीयायां प्रतिहारे राजाद।ऽ१इवाऽ२ः। अत्र राशब्दः ऋक्स्वरो न भवति। तृतीयायां प्रतिहारे प्रहाइन्वाऽ१नाऽ२ः। अत्र प्रशब्दः ऋक्स्वरो न भवति। मोषू (ऊ. अ. ५६१) इति गायत्रपार्श्वे द्वितीयायां प्रतिहारे मघौनाऽ१माऽ२। अत्र मकारः ऋक्स्वरो न भवति। तृतीयायां प्रतिहारे रथाइनाऽ१पाऽ२। अत्र रशब्दः ऋक्स्वरो न भवति। पवाहाउ (ऊ. स. ६८४) इति सन्तनिनि प्रथमायां प्रतिहारे जीराहाउ। अत्र जीशब्दः ऋक्स्वरो न भवति॥

भे चाकारान्तक्रान्तमयोनौ ॥ २३ ॥

वि. शाकरर्षभे (र. द. १५) **अकारान्तं** यत् पर्व तत् प्रत्युत्क्रामति। योनिवर्जम्॥

भा. शाकरर्षभे (र. द. १५) आकारान्तं यत् [पर्व तत्] प्रत्युत्क्रान्तं भवति। योनिवर्जम्। उदाहरणानि। **पाएवाएत्र।एधा३।** **पाएथाएवाएंचा३।** **पवाएमा-नाएमहाएत्वना३** ॥ २३ ॥

---

1. EMy[2] मत्स्या for मत्सा
5. L[1]EMy[2-3]om. अत्रैव.
6. S[4] before तृतीयायां adds: अत्रैव.
12. T.om. भे चाकारान्त .. अयोनौ.

२   र र र र र र २ १

दी. ओऽ३२म् । पवाएस्ववाएजसाएतयआ (र. द. १५) इति शाक्वर-

र र र र र

र्षभे यत् आकारान्तं तत् प्रत्युत्क्रान्तं भवति । अयोनौ । ऊहे । पाएवाएत्रा-

र २   र र र र र र र र   र र र र र र र   २

एधाऽ१ । पाएर्थाएवाएश्वाऽ१ । पवाएमानाएमहाएत्वनाऽ१ । एतानि आकारान्तानि भवन्ति ॥ २३ ॥

उदूहः सर्वत्र ॥ २४ ॥

वि&भा. द्व्यन्तरमुच्चमुदूहः । इत्यनेन लक्षणेन येषु सामसु उदूहः प्राप्तः तेषु उदूहः सर्वत्र भवति । सिद्धोपन्यासो विशेषविवक्षया ॥ २४ ॥

दी. चतुर्थमन्द्रातिस्वार्याणां स्वराणां द्व्यन्तरमुच्चमुदह इति लक्षणेन येषु सामसु उदूहः प्राप्नोति तेषु उदूहः सर्वत्र कार्यः इति । सिद्धोपन्यासो विशेष-विवक्षया ॥ २५ ॥

अमीढे ॥ २५ ॥

वि.&भा. पौरुमीढे अभ्युदूहो न भवति ! षभेच ॥ प्राक्चतुर्णेषु

---

6 वि om: लक्षणेन; वि. trans. सामसु after तेषु; भा. प्राप्नोति for प्राप्तः

7. PM[1-2]1S[1] कार्य इति for भवति; A[2]M[1-2]TS[3] om. सिद्धोयन्यासः

12. भा स्वमङ्गादिपु उदूहः for अभ्युदूहः

(पु. सू. १०. ५. ११-१२) इत्येतस्मिन् सूत्रे द्वितीयेऽपि वर्णे अनेनाभ्युपायेन स्तोभानुसंहार एवोपदिश्यते। प्राक् चतुर्षु निधनेषु ओमिति स्तोभः। निधने प्रत्ययभूते इत्यर्थः ॥ २५ ॥

५४५ ३२ ३२४२५

दी. अकारः प्रतिषेधे। **तुवम**। **गम्राऽ३४औहोवा** (ऊ. स. ७१८) इत्यादि **पौरुमीढे** उदूहो न भवति। अत्र पौरुमीढे फुल्लकारेण वान्तः प्रस्तावः उक्तः। तदा उदूहो निषिद्धः। पञ्चविधकारेण **अवसानं पूर्वं प्रस्ताव** आद्योत्पत्तिषु (प. वि. सू. १. १. ४) इत्यनेन त्र्यक्षरः प्रस्ताव उक्तः। तदा उदूहः प्राप्तः। तन्निवृत्त्यर्थम**मीढ** इति वचनम्। गौरीवितादिष्वेवम्। अत्र संहितोपनिषदि विशेषः। **न चेत् समानपुरुषवचने तृतीयप्रभृतीनामुदात्ततमः कश्चित् स्वरो भवति। तमुदूह इत्याचक्षते** (सं. उ. ब्रा. ३. २३) इति। अस्यार्थः। समानपुरुषवचने। समानभक्तौ **यदि** तृतीयप्रभृतीनां मध्ये उदात्ततमः कश्चित् स्वरो भवति तदापि उदूहस्वरं कुर्युः। यथा धर्मविधर्मादिषु। तृतीयद्वितीयप्रथमस्वरवतां पौरुमीढगौरीवितसाकमश्वादिनाम् उदात्ततमः कश्चित् स्वरो न भवति ॥ २५ ॥

---

1. भा om. इति; M[1]PM[2] वर्णके कठिनेन, A[2]T वर्णेर्थे अनेन, B[4] वर्णे ने अनेन, V[2] वर्णनेन, P वर्णेन अनेन for वर्णे अनेन;
2. वि. °संहारपक्ष for °संहार एव; भा. after इति adds: एव; वि. निधने निधने प्रत्ययभूते कर्तव्य इत्यर्थः for निधने ...इत्यर्थः
13. My[2] om. न; S[4] after भवति adds: इति चेत्

गतेश्च कनीयस्यत्वम् ॥ २६ ॥

वि॰ **इन्द्रायेन्दायां** क्रौञ्चो (ऊ. द. १००) **गतेरत्वं** भवति । **कनीयसि** वर्णे औकारे प्रत्यये । कथमौकारस्य कनीयस्तमित्यत आह । **संध्याद्यश्च वर्णस्त्रिकालो भवति** (ऋक्तन्त्र- २. ३. ९०) ति वचनात् ॥ २६ ॥

भा. इन्द्रायेन्दायां क्रौञ्चे उगतेः अत्वं भवति । किमविशेषण । न । कनीयसि वर्णे प्रत्ययभूते । औकारे प्रत्ययभूते । कथमौकारस्य कनीयस्त्वमिति । उच्यते । **संध्याद्यश्च वर्णस्त्रिकालो भवति** इति वचनात् ॥ २६ ॥

२ २२ २

दी. **इन्द्रायेन्दाऽ१ औहो** (ऊ. द. १००) **इति गायत्रीक्रोञ्चे** चकारात् **वृद्धमाउ** (९. ६. २) इति आउभावे कृते **दाऽ१उऔहोवा** । एवं स्थिते उगतेः **अत्वं** भवति लघीयसि अकारे स्थिते । अकारे प्रत्यये । अकारः संध्यक्षरः । संध्यस्याद्योऽकारस्त्रिकालो भवतीति ॥ २६ ॥

ओकारस्य कृतलेययोरत्वम् ॥ २७ ॥

वि. & भा. **ओकारस्य हाविष्कृतकालेययोरत्वं** भवति । **त्वंसुष्वाणो अद्रिमि**

---

3. M^{1-2} after औकारे add: च; M^{1-2} I S^{1} A^{2} संध्यश्च for संध्याद्यश्च.
6. L^{2} औकार PV^{2} औकारस्य for औकारे
7. B^{4} रुध्यः for सध्याद्यः
12. भा. $RB^{1}B^{2}$ लेये for लेययोः

हाविष्कृते (ऊ. द. १६५) तुभ्येत्सों । विप्रासो कालेये ॥ २७ ॥

२ र र र र र र
दी- त्वँसोमासिधाहाउरायूः (ऊ. द. १६५) इति हाविष्कृते तृतीयायां
२ र र र ० २ ५ र २
त्वँसुष्याणआ।हा।उद्राइभाइः । अत्र णो-मध्ये ओकारस्य अत्वं भवति । यस्याय।ऽ३-
४ ५र ४ ५
स्विश्वाअर्याः (ऊ. ए. ४३५) इति कालेये द्वितीयायां तुभ्येत्सोऽ३अज्यतेरयाइः । अस्यां विप्रासऔ । अत्र सो-मध्ये ओंकारस्य अत्वं भवति । तृतीयायां शाऽ३वाः । अत्र वोमध्ये ओकारस्य अत्वं भवति ॥ २७ ॥

पदगीतस्त्वसिद्धत्वात् ॥ २८ ॥

वि.&भा. तु-शब्दः पक्षव्यावृत्तये । यदुक्तं कृतलेययोरत्वम् (पु.सू.१०.४.२७) इति तन्न । कस्मात् । असिद्धत्वात् । किमुक्तं भवति । उच्यते । अत्वमध्येऽग्रहणादित्यर्थः । तस्मात् पदगीत एव । नात्वमिति ॥ २८ ॥

इति फुलविवरणे षष्ठस्य प्रपाठकस्य पञ्चमः खण्डः ॥ ५ ॥

इति पुष्पसूत्रभाष्ये षष्ठस्य पञ्चमी कण्डिका ॥ ५ ॥

---

1. वि. om. हाविष्कृते; वि. अप्रतिहारे for कालेये.

8. B^4 ०वृत्तः for ०वृत्तये; भा.लेये, $A^2M^{1-2}T$ कालेये for ०लेययोः

9. $B^4V^2KA^2$ तत्र, P. तत् for तन्न; वि. om. उच्यते.

10. वि. om. इत्यर्थः; भा. ०गीतम् for ०गीतः; A^2 om. इति; $M^{1-2}S^1$ अत्वमध्येऽसिद्धत्वात्नात्वं भवति for इति.

दी. तुशब्दः पक्षनिवृत्त्यर्थः । यदुक्तम् **ओकारस्य कृतलेययोरत्वम्** (पु. सू. १०.४.२७) इति तन्न । कस्मात् ? असिद्धत्वात् । अत्वमध्ये **अग्रहणात्** इत्यर्थः । तस्मात् ओकारः पदवद् गीतो भवति । न अत्वम् । **त्वँसोमासीति हाविष्कृते** (ऊ. द. १३५) तृतियायां **त्वँसुष्वाणआहाउद्राइभाइः** । अत्र **णो**-मध्ये **ओकारः** पदवद्गीतः यस्यायंविश्वाआर्याः (ऊ. ए. ४३५) इति कालेये **तृम्येत्साआ**। अत्र सोमध्ये ओकारः पदवद्गीतो भवति ॥ एवमादीनि ॥ ५ ॥

इति फुल्लदीपे दशमप्रपाठकस्य पञ्चमः ख ॥ ५ ॥

षष्ठः खण्डः

श्रुध्ये स्तावे तुरीये ष्यते सर्वत्र ॥ २ ॥

वि. **श्रुध्ये सर्वत्र प्रस्तावे** चतुर्थमक्षरं **कृष्यते** ॥ १ ॥

भा. **श्रुध्ये प्रस्तावे तुरीये** चतुर्थमक्षरं कृष्यते **सर्वत्र** । सर्वक्षु ॥ १ ॥

दी **उयोषुजाऽरतम्** । **अप्तुरोवा** (ऊ. २०५) **इत्यादि श्रुध्ये प्रस्तावे** चतुर्थमक्षरं **कृष्यते** । कर्षणं भवति । सर्वसामसु । उयोषुजाऽ२ । अत्र **चतुर्थो** जाशब्दः कृष्यते ॥ १ ॥

---

1. S[4] हाविष्कृतकालेये, L[1] कृतकालेवे for कृतकालेययोः

12. om· तरीये;

14. E चतुर्थे for चतुर्थो

संवत्सायां तु तृतीये ॥ २ ॥

वि.&भा. संवत्सायां तु श्रुध्ये (ऊ. स. ६८०) **तृतीयमक्षरं** क्रुष्यते प्रस्ताव एव ॥ २ ॥

दी. **तंवःसखाऽ२यः** (ऊ. स. ६८०) इति श्रुध्ये द्वितीयायां **संवत्साऽ२ इव**। अत्र **त्सा** इति **तृतीये** अक्षरे कर्षणं भवति ॥ २ ॥

गोमन्नश्च ॥ ३ ॥

वि. **गोमन्न इन्दो** (ऊ. ए. ४६८) तृतीयं क्रुष्यते ॥ ३ ॥

भा. गोमन्नायां च श्रुध्ये (ऊ. ए. ४६८) प्रस्तावे तृतीयमक्षरं क्रुष्यते। उत्सर्गाच्चतुर्थकर्षणप्राप्तेः एतयोः सूत्रयोरपवादः ॥ ३ ॥

दी. **गोमन्नाऽ२इन्दो** (ऊ. ए. ४६८) अत्र तृतीये अक्षरे कर्षणं भवति ॥ ३ ॥

---

2. वि. trans. तु after श्रुध्ये; PV[2] तृतीये अक्षरे कर्षणं भवति। for तृतीयमक्षरं क्रुष्यते

3 My[1] om प्रस्ताव एव

5. EL[1]My[2-3] om. त्साइति

9. P चतुर्थस्य कर्षः प्राप्तः, V[2] उत्सर्गचतुर्थमक्षर कर्षणं भवति for उत्सर्गात्....प्राप्तेः

10. M[4]S[2] after इन्दो add: इति श्रुध्ये

मरुतामिद्राँ स्वासूत्तमायाम् ॥४॥

वि.&भा मरुतां धेनौ (ऊ. सं. २९५) स्वासूत्तमायां प्रस्तावे इन्द्रामापद्यते ।
४ ३र र ४५
इन्द्रायसोमसुषुतः परिस्रवद्वितीये (ग्रा.१६.९.५६१.२) इन्द्राय । सा उत्तमायामापद्यते । मध्यमायामप्यविशिष्टेति चेत् । न । मध्यमायां चतुर्थे स्वरे एकमक्षरं तिष्ठत इत्येष विशेषः ॥४॥

५र ४५र४३
दी. त्राऽ२३४इः । अस्मैसप्तधेनवोदुदौ (ऊ.सं.२९५) इति स्वासु मरुतांधेनौ
५ र४५र र
तृतीयायां प्रस्तावे । तेऽ२३४ । अस्य सन्तुकेतवो अमौ । अत्र अस्य सन्त्विति पर्व इन्द्रामापद्यते । इन्द्रायसोमसुषुतःपर्यौं इति इन्द्रापर्व भवति । द्वितीयायां भक्षमाणो अमृतस्य चौ । अत्र ऋक्स्वरवत् ॥४॥

धसे चतुर्थोच्चाद्यं योनिवत् ॥५॥

वि.&भा. नौधसे चतुर्थोच्चस्याद्यमक्षरं योनिवद् भवति । ताऽ२३४म् ।

---

2. वि. trans. स्वासु before मरुतां; PB^{4}. योनौ for धेनौ.
3. $KSMy^{1}$ om. परिस्रव and इन्द्राय .. आपद्यते; $S^{1}A^{2}M^{1-2}$ om. इन्द्राय.... आपद्यते... चेत् । न.
4. My^{1} ०शेषे for ०शिष्टेति; A^{1}.वचनात् for चेत्; S^{2} तिष्ठति, $A^{1}M^{1-2}S^{1}$ क्रूयते, P तिष्टत् for तिष्टते
10. भा.$RB^{1-2}B^{4}$ चतुर्थाद्यं for चतृर्थोच्चाद्यं

२५४५
वोदस्समृतीषाऽ हाम् (ऊ. द. ९) एतच्चतुर्थोच्चम् । तदेतत् सूत्रमसारमिव । सर्वत्राव्यभि-
चारात् । अथवा घसे अचतुर्थाद्यं योनिवत् । चतुर्थोच्चादन्यद्यथर्चं भवति । प्रथमोच्चे
१ २ २२ १
आद्यमक्षरं यथर्चं भवतीत्यर्थः । **वात्सन्न । स्वस । राइ ।** एतत् प्रथमोच्चम् ।
एतदप्यसारमेव । अव्यभिचारात् ॥५॥

२ २५४२५ २
दि. आऽ२३४इ । माउत्वापुरू (ऊ. स. ८०४) इत्यादिनौधसे **माउत्वापुरू ।** इति चतुर्थोच्चस्य आद्यमक्षरं योनिवत् भवति । न ऋक्स्वरवत् ॥५॥

ध्यमायां स्तावे द्वितीयं घातं रुणसाम्नि ॥ ६ ॥

वि. & भा. ज्योतिर्यज्ञस्य (ऊ. सु. १११) वरुणसाम्नि मध्यामायां प्रस्तावे द्वितीयमक्षरं निहन्यते । मन्द्रे भवति । अभिक्रन्दन् इत्य(त्रेत्य)र्थः ॥ ६ ॥

---

1. वि. om. एतच्चतुर्थोच्चम्; PV^2 समानम् for असारम्
2. वि. om.. घसे .... योनिवत्; A^2M^1-$^2TS^1$ असारात् for चतुर्थोच्चात्; My^1 after अन्यद् ins. अपि;
3. A^2M^1-$^2TS^1$ अन्यत् for आद्यम् M^1-^{2}trans. यथर्चं after भवति; भा. after अक्षरं adds सर्वत्र;
4. After प्रथमोच्चम् adds भवति A^2M^1-$^2TS^1PV^2A^1$ व्यभिचारत् for अव्यभिचारात्
7 $A^2S^1EL^1S^4$ मध्यमायां for ध्यमायां
14. T. योनावाद्यमुपान्त्यम् इत्यशेषों पादे शात्सर्वपर्वण्युपाद्यस्याक्षरस्म वृद्धिः for योनौ .... भवति; M[1-2] वृद्धिप्रतिषेधः । प्रथमे पादे इत्यर्थः for वृद्धिर्न भवति; My[1] om. वृद्धिर्न भवति........उपान्त्यस्य (P. 1093, L. 10)

भा. यौनौ तु पात्यग्निरित्यनुगाने पर्वणि उपान्त्यस्य अक्षरस्य वृद्धिप्रतिषेध: प्रथमे पादे ।। १८ ॥

इति पुष्पसूत्रभाष्ये दशमप्रपाठकस्य अष्टमी कण्डिका ।। ८ ।।

दी· अकार: प्रतिषेधे । पात्यग्निर्विपोअग्रंपदंवे: (अ, ५.५ २०९) इति योनिगाने उपान्त्यमक्षरं न वर्धते प्रथमे पादे ।। १८ ॥

इति फुल्लदोपे दशमप्रपाठकस्य अष्टमः खण्ड:।। ८ ॥

नवम: खण्ड:

यस्ते हरे च ।। १ ॥

वि· & भा· यस्तेमदायां वार्षाहरेऽविशेषोपदेशात् सर्वपर्वणि उपान्त्यस्याक्षरस्य वृद्धि: । योनौ तु मध्यमयो: पदयोर्व्यभिचारदर्शनादिदमुच्यते । योनिबद्धावो मा भूदिति । स्वमेतद्धोहाइ इत्यत्र ।। १ ॥

---

1. PB[4] V[2] अयोनौ for योनौ
5. S[4] after पादे adds: एव
10. TS[1] om यस्ते .... इत्यत्र (L.12); KS[2] अविशेषोपादानात् for अविशेषोपदेशात्; KS[2]A[2]M[1-2] सर्वपर्वणां; L[2] सर्वत्र पर्वणां for सर्वपर्वणि
11. K. om पदयो:; A[2]· om. योनौ ... ...श्रुत्कर्णवायाम् । (P. 1094, L. 7); भा· व्यभिचारात् for व्यभिचारदर्शनात्; वि· om. योनिबद्धावो ......इत्यत्र

दी यस्तेमदोंहोहाइ (र. ए. ७४) इति वार्षाहरोत्तरे। अविशेषोपदेशात् सर्वपर्वणि। उपान्त्यस्याक्षरस्य वृद्धिः। ताइनाऽ१पावाऽ२। अत्र पशब्दो वृध्दः। स्वाअन्धासाऽ२। अत्र धशब्दो वृद्धः। एवमादीनि। त्वमेतध्दोहाइ (अ. २. २. ११०)। इति योनौ मध्यमयोः पादयोः वृध्यभावादिदमुच्यते ॥ १ ॥

श्येने दानाध्वराम् ॥ २॥

वि. गोविच्छ्येने दानाध्वरामापद्यते। दाऽ३नाम्। प्रवइन्द्रायमाये ध्वरआ। श्रुधिश्रुत्कर्णवायाम् ॥ २ ॥

भा. गोविच्छ्येने दाना योनिदृष्टा इहाष्टमे पर्वणि ध्वरामापद्यते। सोमआ। दानाँ। प्रवइन्द्रायामाये साम्नि। दा३ना३ ॥ २ ॥

दी. गोवित्पवस्ववसुन्नाइत् (ऊ. क्षु. ९०७) इति श्येने योनिदृष्टा दाना इहाष्टमे. पर्वणि ध्वरामापद्यते। सोमआ। एवं ध्वरा भवति। प्रवइन्द्राऽ२ (ग्रा. ४. ५ १५६.१) इति प्रथमे साम्नि दाऽ३नाम् इति पर्व भवति। श्रुधीऽ३। श्रूऽ२३४ धिश्रुत्कर्णव। ह्विभाइः (ग्रा. २. ५. ५०.१) इति साम्नि ध्वरआ इति पर्व भवति। उभे यदिन्द्ररोदसाइ (ग्रा. १०. ३.३७९.१) इति योनौ श्येने नाऽ३माइति भवति ॥ २ ॥

---

6. S[1]. श्येने साम्नि for गोविच्छ्येने T. om गोविच्छ्येने .... श्रुत्कर्णवायाम्; M[1-2] om. दाऽ३नाम् .... कर्णवायाम्;

7 S[1] श्रुत्कर्ण इत्यत्र for श्रुत्कर्णवायाम्

8. B[4]A[1]. om गोविच्छयेने। B[4] सोरम१आरए। ध्वरआ। for सोमआ.

13. S[4] पर्वणः आद्यक्षरस्य वृद्धिः for पर्व

प्रोवाराह ऊता कयस्थिराम् ॥ ३ ॥

वि· प्रोअयास्यायां वाराहे ऊता कयस्थिरामापद्यते । कया॒ऽ३स्था॒ऽ५इराऽ६५६न् । उपत्वाजा-(ग्रा. १.२.१३.१) प्रथमे ॥ ३ ॥

भा· प्रोवाराहे अन्त्ये पादे ऊत एका कयस्थिरामापद्यये ॥ ३ ॥

दी· हाउ हाउ । हुप् । प्रोअयासाइत् (ऊ. क्षु. ९२४) इति वाराहे अन्त्ये पादे ऊत एकाम् इति पर्व कयस्थिरामापद्यते । मनाऽ३पाऽ५आऽ६५६ कया-स्थिरा भवति । उपत्वाजा (ग्रा. १.२.१३.१) प्रथमे साम्नि कयाऽ३स्थाऽ५इराऽ६५६न् । इति पर्व भवति ॥ ३ ॥

धर्तासादिसो च ॥ ४ ॥

---

2. S^1 trans. प्रोअयास्यायां after वाराहे; S^1 ०स्थिरास्वरम् for ०स्थिराम्; T. या तु मध्यमयोकायास्वरम् for प्रोअयास्यायां .. स्थिराम्; T. A^2 वायोरवीके (A^2 ०रतीवेद्) अस्थिरत् for कया प्रथमे
4. PV^2 या for पादे; PV^2 after आपद्यते add:- अन्त्येष्वेव पादेषु
6. S^4 after आपद्यते adds:- योनौ अन्त्ये पादे । तीऽ३राऽ५इभाऽ६५६न् । इति द्वितीयस्वरारम्भः । ऊहे । हाउहाउ । हुप् । प्रोअयासाइत् । इति वाराहे । अन्त्ये पादे.
7. S^4 after भवति । adds:- अत्रान्त्यपर्वणः तृतीयस्वरारम्भेस्यर्थः ।
8. S^4 तृतीस्वरारम्भः for भवति.

वि. & भा. धर्तासाविसोमतृचयोश्च वासिष्ठे अन्त्येष्वेव च पादेषु ऊतएका कयस्थिरामापद्यते ॥ ४ ॥

         ३ २   ३ २   ३ २ ४ ५
दी. उहुवाइ । धर्ताऽ३४औहोवा (ऊ. क्षु. ९२५) इति वासिष्ठे उत्तमे पादे
                                  ३ २   ४   २
ऊतएका कयस्थिरामापद्यते । नदाऽ३इषूऽ५वाऽ६५६ । एवम् । हाइ । ऊहुवाइ ।
३ २   ३ २ ४ २ ५
असाऽ३४औहोवा (ऊ. क्षु. ९२६) इति वासिष्ठे उत्तमे पादे ऊतएका कयस्थिरामापद्यते ।
३ २   ४
तमाऽ३साऽ५दाऽ६५६त् । एवम् ॥ ४ ॥

द्वितीयमकर्षणम् ॥ ५ ॥

वि. अन्त्येष्वेव च पादेषु ऊताद्द्वितीयस्थस्याक्षरस्य कर्षणं न भवति ॥ ५ ॥

भा. एतेष्वेव वाराहवासिष्ठेषु पादेषु द्वितीये स्वरे यत्कर्षणमासीत् योनौ तद् द्वितीयकर्षणं न भवति । काम्पा न भवतीत्यर्थः ॥ ५ ॥

दी. एतेषु वाराहवासिष्ठेषु उत्तमेषु पादेषु यत् द्वितीयं कर्षणमासीत् तत्
                                  २   २   १   २ २ १ २
द्वितीयं कर्षणम् ऊहे न भवति । हाउ हाउ । हुप् । प्रोअयासाइत् । (ऊ. क्षु.९२४)
               २ २   २ २   २
इति वाराहे प्रथमायां या । द्वितीयायां सत् । तृतीयायां मत् ॥

---

1. $B^{4}L^{2}$ trans. अन्त्येष्वेव च पादेषु after आपद्यते; A^{2}.T om अन्त्येषु .... आपद्यते; M^{1-2} om. अन्त्येष्वेव च पादेषु

4. S^{4} after एवं adds:- तृतीयस्वरारम्भः

8. S^{1} अकर्षणं द्वितीयस्वरस्थं for ऊता .... न.

10. P. तु for तद्; P om. काम्पा न भवति.

11. E अन्त्येषु for उत्तमेषु

12. $L^{1}EMy^{2-3}$ om. ऊहे.

२र २र २र
षर्ता (ऊ. क्षु. ९२५) वासिष्ठे प्रथमायां षे। द्वितीयायां ते। तृतीयायां षा॥
२ २र २र
एवम् असा- वासिष्ठे प्रथमायां व। द्वितीयायां वी। तृतीयायां या। योनौ
२
प्रकाव्यम् (ग्रा. १५. ६. ५२४. ४; ऊ.अ. ६५२) इति वाराहे। उत्तमे पादे आऽ३४३ इ इति द्वितीयं कर्षणम्। योनौ अस्यप्रेषा (ऊ. सं. २६८) इति वासिष्ठे उत्तमे पादे
१
माऽ३४३ इति द्वितीयं कर्षणम्। जगतीषु च वाराहे॥ परयोश्चान्त्येषु (पु. सू. ५. ४. १३-१४) इति सूत्राभ्यामेतेषु सामसु काम्पास्वरस्य प्रतिषेध: कृत: ॥ ५ ॥

ससु सफे मादा त्र्यक्षराम् ॥ ६ ॥

वि. ससुन्वे सफे योनिदृष्टा मादा त्र्यक्षरामापद्यते। इडानामित्यत्र ॥ ६ ॥

भा. योनिदृष्टा या त्र्यक्षरा प्रह्वयसा आसीत् सा त्रिकदुकायां द्वितीये। तां त्र्यक्षरामापद्यते। इडानाम् ॥ ६ ॥

२ १ २ ५
दी. ससुन्वेऽ३य: (अ. प्रा- ८१३) इति सफे योनिदृष्टा माऽ३२३४ दा: इति
२ ५
मादा (ग्रा. १७. ११. ५७८. २) त्र्यक्षरामापाद्यते। इडाऽ३२३४ नाम्। एवं त्र्यक्षरा भवति ॥ ६ ॥

देव्येप्रह्वद्वितीयेऽमन्थताम् ॥ ७ ॥

---

2. L[1]EMy[2]-[3]om. प्रथमायां तृतीयायां या।
7. A[2]M[1]-[2]TS[1]. त्र्यक्षरामिडानाम् for त्र्यक्षराम्.
8. A[2]TS[1]त्र्यक्षरं (S[1]त्र्यक्षरा) भवति for त्र्यक्षरामापद्यते.
9. V[2] om. त्र्यक्षरा प्रह्वयसा आसीत् सा त्रिकदुकायां द्वितीये ताम्
11. My[2]-[3]. om. योनिदृष्टा
13. My[2]-[3] om. भवति
14. S[1]A[2]Γ.ins त्रिक after प्रह्व.

वि. & भा. पञ्चनिधने **वामदेव्ये द्वितीये** पादे या **प्रहूयसा** आसीत् सा त्रिकदुकायां द्वितीये पादे **अमन्थतामापद्यते**। **अमाऽ२न्थऽ२३४तात्वामग्नेपुष्करायाम्** ॥ ७ ॥

दी. **त्रिकद्रुकेषु महिषो यवाशिराम्** (र. सं. ९८) इति पञ्चनिधने **वामदेव्ये** योनौ **द्वितीये** पादे या **प्रहूयसा** सा इह द्वितीये पादे **अमन्थतामापद्यते**। **यथाऽ२वाऽ२ ३४शाम्**। एवममन्थता भवति। **प्राहूयाऽ२३४साइ** (ग्रा. २६)। इति प्रहूयसापर्व। **त्वाम ग्नेपुष्क्राऽ६रादधी** (ग्रा. १. १. ९. १) इति साम्नि **अमाऽ२न्थाऽ२३४ता**। इति अमन्थतापर्व भवति ॥ ७ ॥

वैराजे योनावन्त्ययोर्नतम् ॥ ८ ॥

वि. & भा. **महावैराजे योनौ** आद्यायामन्त्ययोः पादयोः **विनतं** भवति। अन्यत्र न भवतीत्यर्थः ॥ ८ ॥

दी. **होइयाहोइयाहोइयाऽ३४३पिब** (र. द. १०) इति **योनौ वैराजे** प्रथमायामन्त्ययोः पादयोः **विनतं** भवति। प्रथमादि द्वितीयान्तं विनतं स्वरम्। द्वितीये पादे **श्वाद्रीऽ२ः**। तृतीये पादे **नार्वाऽ२**। ऊहे विनतं न भवति। द्वितीयायां स्तोत्रीयायां द्वितीये पादे **श्वहँसि**। तृतीये पादे **ममत्तु**। एवमादीनि ॥ ८ ॥

---

1. वि. adds: कयानायां after देव्ये;, वि. om. आसीत्
2. भा. पुष्करादधीत्यत्र for पुष्करायाम्
5. S[4]. after एवम् adds: द्वितीये पादे; S[2]M[4] ofter भवति add: योनौ वार्द्यस्याऽ२ ३४स्वा। एवं प्रहूयसापर्व भवति।
9. वि. om. आद्यायाम्; KS[1]TA[2]om. पादयोः
10. A[2]. om. अन्यत्र न भवतीत्यर्थः
11. My[2]. om. योनौ
13. LEMy[2-3] om. द्वितीयायां स्तोत्रीयायां
14. M[4]S[2] after आदीनि add: पर्वाणि

वैश्वमनसेऽत्वात् स्तोभार्चिकसंधेर्ग्रहणात् ॥ ९ ॥

वि॰ & भा॰ **वैश्वमनसे** प्रश्लेषो न भवति । जस आ कलशमित्यत्र । कस्मात् । **अत्वात्** । अत्वोपदेशाभावादित्यर्थः । जस आ वैश्वमनस इति । यदि पुनरत्र रौप्यसंधिन्यायेन प्रश्लेषः क्रियते तथा सति अत्वोपदेशोऽनर्थकः स्यात् । किंच । **स्तोभार्चिकसंधेर्ग्रहणात्** एव विश्लेषो भवति । नान्यथा । कथमयं स्तोभार्चिकसंधिरिति । उच्यते । योऽसावाकारः अत्वमापादितः स स्तोभः इत्यभिप्रायः ॥ ९ ॥

२ र र २ १ र२१ १ २र

दी पवस्वदेववीताऽ३याइ (ऊ. द. १९७) इति **वैश्वमनसे** जसआकलशम्मधुमान् इत्यत्र सकारो विश्लेषो भवति । कस्मात् । **अत्वात्** । अत्वभावात् । जसा वैश्वमनसे (पु. सू. ६. ५. ४) इति सूत्रेण । यदि जस आ इति अत्र अकः सवर्णे दीर्घः (पा. ६. ९. १०१) इति न्यायेन संश्लेषः क्रियते तथा सति अत्वभावोऽनर्थकः स्यात् । जसआ । एवम् । किंच । योनिस्तोभेन आकारेण सह आर्चिकस्य संधेश्च पादान्त्यात् परः स्वरो **विकृष्यते** (पु. सू. ६.९.२२) इति सूत्रेण ग्रहणाद् विश्लेषो भवति । नान्यथा । कथमय

---

2. भा. संश्लेषः for प्रश्लेषः and om. न.
3. वि om. अत्वात्; भा. तत्र for अत्र; A^2 रौहसीव, M^{1-2} रौहस्ति; S^1T रौहास्वि॰ V^2 चौपसन्धि; P. चौपसंधि, B^4A^1 रौपसंधि for रौप्यसंधि॰
4. T ॰देशात् for ॰देशः; A^2S^1T ग्रहणम् for ॰ग्रहणात्; वि॰ स्तौभार्चिक for स्तोभार्चिक॰;
5. भा. संश्लेषः for विश्लेषः; वि. आह for उच्यते;
8. E आकारः for सकारः My^2

स्तोभेनार्चिकसंधिरित्युच्यते । योऽसौ आकारो योनिस्तोभो न सामस्तोभ इत्यभिप्रायः ॥ ९ ॥

त्सप्रे द्वितीयान्ते प्र ॥ १० ॥

वि. & भा. अक्रान् वात्सप्रे (ऊ. क्षु. ९१८)द्वितीयान्ते पादे नीचादी भवतः । प्रथमायां स्तोत्रीयायाम् ॥ १० ॥

१   १ र २   १ २
दी. होईऽ२ (त्रि.) । अक्रान्त्समुद्रःप्रथ (ऊ. क्षु. ९१८) इतीनिधने वात्सप्रे
२ १   २ १ र
प्रथमायां स्तोत्रीयायां द्वितीयपादान्त्यपादे नीचादी भवतः । द्वितीये पादे **जनयन्प्रजाभुव** । अत्र
२ १ र र २ र र   र
ज-कारो नीचः । चतुर्थे पादे **बृहत्सोमोवावृधेसुवा** । अत्र **बृ**-शब्दो नीचः ॥ १० ॥

उत्तमायामाद्ये ॥ ११ ॥

वि. अस्मिन्नेव वात्सप्रे (ऊ. क्षु. ९१८) अन्त्यायां प्रथमद्वितीये पादे नीचादी

---

1. ES^4 ०स्तोभेन for ०स्तोभो न; E after अभिप्रायः ॥ adds:- वैश्वमनसे स्तोभार्चीकसंधेर्ग्रहणात् अत्वाच्च उःसाआ इति रुपं भवति ॥

3. A^1 प्रक्षुल्लक for अक्रान्; KS^2 My^1 द्वितीयतुरीये, $A^2S^1M^{1-2}T$ पादान्त्ये द्वितीयौ for द्वितीयान्ते पादे

4. My^1 om. स्तोत्रीयायाम्; KS^2 om. प्रथमायां स्तोत्रीयायाम्; A^1 after स्तोत्रीयायाम् adds:- होइअक्रान्त्समुद्र इत्यत्र जनयन् प्रजाभुव । बृहत्सोमो ।

6. My^4S^2 ०पादान्त्ये for पादान्त्यपादे; ES^1My^4 नीचौ for नीचादी

9. $A^2M^{1-2}TS^1$ ०द्वितीयपादौ for ०द्वितीये पादे

भवतः ॥ ११ ॥

भा. वात्सप्रे अन्त्यायां स्तोत्रीयायां प्रथमद्वितीये पादे निचादी भवतः ॥ ११ ॥

१ १र २ १ २
दी. होईऽ२ (त्रिः)। अक्रान्त्समुद्रःथप्र (ऊ. क्षु. ९१८) इतीनिधने वात्सप्रे उत्तमायां स्तोत्रीयायां प्रथमद्वितीये पादे नीचादी भवतः। उत्तमायां प्रथमे पादे
२१ २र१र २ २ १र २ र
महत्तत्सोमोमहि। अत्र म-कारो नीचः। द्वितीये पादे **अपायद्गर्भोऽवृ**। अत्र अकारो नीचः ॥ ११ ॥

शोके चाद्ययोः ॥ १२ ॥

वि. **त्रैशोके अद्ययोः** द्वितीयपादादिर्नीचीभवति ॥ १२ ॥

भा. त्रैशोके चाद्ययोः स्तोत्रीययोः यथासंभवं पादादयो नीचा भवन्ति ॥ १२ ॥

२ १
दि. **विश्वोहाइ** (ऊ. द. ७३) इति त्रैशोके प्रथमाद्वितीययोः स्तोत्रीययोः प्रथम-
२ १ २१र २
द्वितीये पादे नीचादी भवतः। प्रथमा ऋक् योनिः। **विश्वोहोइ**। **सजूस्ततक्षुः**। अत्र
२र १
विशब्दसशब्दो नीचादी भवतः। द्वितीयायां प्रथमे पादे **नेमोहाइ**। अत्र ने-शब्दो
२र १ २र
नीचः। द्वितीये पादे **मेषंविप्राः**। अत्र मे-शब्दो नीचः ॥ १२ ॥

शौक्ते च ॥ १३ ॥

---

8. A²M¹-²TS¹ मध्यमयोः स्तोत्रीययोः for आद्ययोर्द्वितीयपादादिः; A²T नीचीभवतः, S¹M¹-² नीचीभावः for नीचीभवति; My¹ नीचैः for नीची·

10. My om. विश्वो .... भवतः (L. 12)

वि. & भा. शौक्ते (ऊ. अ. ५६७) चाद्ययोः स्तोत्रीययोः पादादिर्नीचैः ॥ १३॥

५ र ३ २ ३ ५
दि. सखा । यआओ२३४वा (ऊ. अ. ५६७) इति **शौक्ते** प्रथमाद्वितीययोः
५ र
स्योत्रीययोः प्रथमद्वितीये पादे नीचादी भवतः । **सखा** । अत्र **स**-कारो नीचः । द्वितीये
२ र१र ५ र
पादे पुनानायग्र । अत्र **पु**-शब्दो नीचः । द्वितीयायां स्तोत्रीयायां **सभी** । अत्र **स**-कारो
२ १र
नीचः । द्वितीये पादे सुजनाग । अत्र **सु**-शब्दो नीचः ॥ १३ ॥

सुषा श्रीणप्रत्नं रुणसाम्नि ॥ १४ ॥

वि॰ & भा. वरुणसाम्नि एते शब्दाः प्रतिहारविषये नीचा भवन्ति ।
२१र२१र २र१२र
सुषावसो । श्रीणन्तः) प्रत्नंसधस्थम् ॥ १५ ॥

२र र र १२
दी. परीतोषिञ्चतासुतोवा । ओआ (ऊ. ए. ४८२) इति **वरुणसाम्नि प्रथमायां**
२१र२१र२१ २ २र १२र१र
प्रतिहारे सुषावसोममद्रिभिः । अत्र **सु**-शब्दो नीचः । तृतीयायां प्रतिहारे **श्रीणन्तोगो**
२ १ २ २र र १२
भिरुत्तरम् । अत्र श्री-शब्दो नीचः । **पुनानस्सोमधारयोवा** (ऊ. ए. ५१४) इति
२ १२१ २१र २
वरुणसाम्नि द्वितियायां प्रतिहारे प्रत्नंधस्थमासदत् । अत्र **प्र**-शब्दो नीचः ॥ १४ ॥

इलान्दे हीषीप्रभृत्युध्दारः ॥ १५ ॥

---

1. A² पादाद्ययोः for चाद्ययोः; KS² द्वितीय for स्तोत्रीययोः; A²M¹-²TS¹. om स्तोत्रीयायोः; KS¹My¹ after नीचै add भवति.

4. R My² om. स्तोत्रीयायां

7. A². om· वरुण ....भवन्ति; वि· om एते शब्दाः

10. R. ०हारः for ०हारे

वि· इलान्दे तृतीयेऽनुगाने हीषीप्रभृतेरुद्धारः । सुवःप्रभृतिस्तोभस्योद्धारः इत्यर्थः ॥ १५ ॥

भा. इलान्दे तृतीयेऽनुगाने बृहद्भानोश इत्येतस्मिन् हिषीप्रभृत्युद्धारः । सुवा । एषा हीषी । एतस्मात् परस्तात् सर्वे स्तोभा उध्द्रियन्ते इत्यर्थः ॥ १५ ॥

दी. अग्नेतवश्र (र. सं. ७०) इतीलान्दे बृहद्भानोश इति तृतीयेऽनुगाने हीषीपर्व भवति । सूऽ२३४वाः । एतदारभ्य सर्वे स्तोभा उध्द्रियन्ते इत्यर्थः । सूऽ२३४वाः । इह । हाऽ३उवाऽ१३ । ज्योऽ२३४तीः । एतेषां स्तोभानामुद्धारः ॥१५ ॥

अन्त्यायामनुद्धारः ॥ १६ ॥

वि· & भा· एतस्मिन्नेवानुगाने अन्त्यायां विधायां हीषीप्रभृत्यनुद्धारः ॥ १६ ॥

दी· तृतीयेऽनुगाने अन्त्यायां विधायां दाशुषेकावे इत्यस्यां सूऽ२३४वाः । एतदारभ्य स्तोभानामनुद्धारः ॥ १६ ॥

---

1. T. om· इलान्दे ……..उद्धारः·
2. A^2M^{1}-$^2TS^1$. om. इत्यर्थः
4. PV^2B^4. एतास्याः; for एतस्मात्.
6. My^3. प्रभृति for भवति
9. भा. दाशुषे कावे इत्येतस्याम् for हीषीप्रभृति.
10. S^4. अन्यपादगीतायाम् + एतेषां स्तोभनामनुध्दारः । दाशुषे कावे । हाऽ३१ उवाऽ२३ । सूऽ२३४वाः । इह । हाऽ३१ उवा२३ । ज्योऽ२३४ तीः । सर्वेषां स्तोभानां प्रक्षेपणम् । पूर्वगीतासु तिसृष्वेव हीषीप्रभृतिस्तोभानां निवृत्तिरित्यर्थः ॥ for तृतीये …. अनुध्दारः

तमसोऽर्के योनावाद्ययोर्मागायतोद्घातानिघातौ ॥ १७ ॥

वि· & भा· सहोदैर्धतमसे योनावाद्यामुत्तरयोः स्तोत्रीययोः मागायता उद्घातनिघातौ प्रति भवत इति वाक्यशेषः । कस्माद्भेदेनोपन्यासः। योनावन्त्ययोरित्युच्यते। धर्मभेदात् । आद्यायामुद्धातं प्रति मागायाता उत्तरयोर्निघाते प्रतीत्यतो भेदेनोपन्यासः। उद्धात इत्युच्चं प्रतीत्यर्थः । निघात इति नीचं प्रतीत्यर्थः । आद्यायां (ऊ. क्षु. ८७०) सोममिन्द्र । मा माशब्दो उच्चप्रत्ययः । मादोयुजियः । यशब्दो नीचप्रत्ययः । सुमेमघवन् । व-शब्दो नीचप्रत्ययः । पर्वभेदं कृत्वा आतमनोऽनुस्मरणार्थं केनापि कृतम् ॥ १४ ॥

वि. इति फुल्लविवरणे षष्ठप्रपाठकस्य नवमः खण्डः ॥ ९ ॥

भावशेषाः परिसमाप्ताः ॥

---

1. A²M¹-²TS¹ अन्त्ययोः for आद्ययोः
2. भा. after आद्यायाम् adds:- इत्यर्थः; भा· अन्त्ययोः for उत्तरयोः; KS²My¹ योनौ दीर्घतमसोऽर्के आद्ययोः पादयोः मागायतापर्व उच्चनीचौ भवतः दाइवः पवते कृत्वियः । दाइषः नामाजुमादियः । for सहो.... ०शेषः । (L. 3)
3. भा. after अन्त्ययोः adds: च; T उभयभेदाभ्यां S¹ इयं भेदाद्याद्यायां for धर्मभेदादाद्यायां; My¹ om. कस्माद् .. केनापि कृतम् ॥ (L. 7)
6. भा. प्रत्यायमादो for मादो; भा. शब्दो नीचे वर्तते for यशब्दो नीचप्रत्ययः; वि· om. सुमे .... नीचप्रत्ययः ।
7. B⁴ पर्वभेदं P पर्वाणां भेदं for पर्वभेदं
8. S¹A²M¹-²TKS² फुल्लभाष्ये (KS² पुष्पभाष्ये; M¹-² फुल्लसूत्रभाष्ये) for फुल्लविवरणे and om· षष्ठ० .... खण्डः
9. K भावशेषाः परिसमाप्ताः ओं A² भावाः परिसमाप्तः, M¹-² भावाः समाप्ताः S¹ भावाः परिसमाप्ताः, T· भावपरिच्छेदः समाप्तः for भावशेषाः परिसमाप्ताः S¹ after परिसमाप्ताः ॥ adds:-ओं शुभमस्तु । शिवाय परब्रह्मणे नमः । हरिः ओम् । भवनामसंवत्सरं कटकमासं शुक्लपक्षं .... स्वामिदीक्षितेन स्वहस्तलिखितम् । .... हरिः ओम् ॥

भा. इति पुष्पसूत्रभाष्ये दशमस्य प्रपाठकस्य नवमी कण्डिका ॥ ९ ॥

दी. **हाउहाउहाउ ।** **औहोवाएहियाहाउ ।** **धर्ता** (अ. १.३.३१) इति **दीर्घतमसोऽर्के** आद्ययोर्मागायतयोः पर्वणः **उद्घातनिघातौ** उच्चनीचौ भवतः । **दाइवःपवते कृत्वियः** । इति मागायते पर्वणि **त्वियः** इत्युच्चनीचौ । **दाइवानामनु** । इति मागायते पर्वणि **मादियः** इत्युच्चनीचौ । अन्यस्मिन् दीर्घतमसोऽर्के **सार्जानो अत्योनस** इति पर्ववत् स्वरो भवति । **सहोदैर्घतमसे** (उ. क्षु. ८७०) तु **तमसे** चान्धात् द्वितीयेऽनेकं सर्वत्रायोनौ **प्रथमे** । **दे** (पु. सू. १०.४.८) इति सूत्रेणोहे आन्धात् परे पर्वणि द्वितीये स्वरे बह्वक्षरं नीचं भवति । **मादोयुजियः** । **सुमेमघवन्** । एवमादीनि । न योनौ ॥ ७ ॥

इति फुल्लदीपे दशमप्रपाठकस्य नवमः खण्डः ॥ ९ ॥

भावशेषाः परिसमाप्ताः ॥

दशमः खण्डः

अथ प्रस्तावः

अथोहगीतीनां प्रस्तावोद्देशः ॥ १ ॥

---

3. My² after ०मनु । इति om. मागायते
8. S⁴ after नवमः खण्डः॥ adds:- इति दशमः प्रपाठकः समाप्तः ॥
12. S⁴ प्रस्तावसूत्रम् for प्रस्तावः
13. A² उद्गीथः for उद्देशः

वि. & भा. कोऽस्याभिसंबन्धः । उच्यते । भावाः परिसमाप्ताः । तेषां च भावानां भक्तिसंबन्धेन लक्षणमेवमुक्तम् । **स्तावोपान्त्यं द्व्ये** (पु. सू. ५.१.२९) । **थेषूक्ते** (पु. सू. ५.१०.१) **तरे हारादिः** (पु. सू. ५.४.१) **उपायद्वितीयं काण्वे योनौ** (पु. सू. ५.३.४८) । **निधने हीषीस्थं सर्वत्र** (पु. सू. ३. १. १२) इति । अतस्तासां भक्तीनां विज्ञानार्थमाह **अथोहगीतीनाम्** इति । यद्येवं सर्वभक्तीनामेव लक्षणोद्देशो वक्तव्यः । कुतः । यस्मात् सर्वभक्तिसंबन्धेन भावनामुद्देशः कृतः । अथ कस्मात् प्रस्तावस्यैव केवलस्य लक्षणमुद्दिश्यते इति । उच्यते । एवमेतत् । किं तर्हि । सूत्रकारपञ्चविधोपग्रन्थकारादिभिः प्रतिहारनिधनयोर्लक्षणमुक्त्वा ततः **अथातः प्रतिहारस्य** (प्र. हा. सू. १.१) इति महता प्रपञ्चेन पुनः प्रतिहारस्य प्रतिसामानुक्रमणं कृतम् । न त्वेवं प्रस्तावोद्देशः कृतः । उपग्रन्थकारेण प्रस्तावलक्षणं नैवोक्तम् । सूत्रे पाञ्चविध्ये च लक्षणमात्रमुपदिष्टम् । न तु प्रतिहारवद्विस्पष्टमुक्तम् । अतो विस्पष्टीकरणार्थम् आद्यत्वान्मुख्यत्वाच्च प्रस्तावस्य विशेषलक्षणम्

---

1. M1-2 om. उच्यते । भावाः; KS1-2A2TMy1 एतेषां for तेषां.
2. भा. om. एवम्.
3. वि. after थेषूक्ते adds:- द्वे सव्यम्.
6. M1-2 भक्तीनाम् for भावानाम्; S2 उपदेशः for उद्देशः; KS1A2M-2T om. कृतः
7. S1A2KTMy1 केवलं for केवलस्य; KS1My1 before लक्षणम् add: पदार्थस्य, T पदस्यार्थ and A2 पदास्यर्थस्य; S2 लक्षणोद्देशः क्रियते for लक्षणमुद्दिश्यते; M1-2A2T om. उद्दिश्यते इति
8. वि उक्तम् for उक्त्वा; भा. om इति
9. भा. महाप्रपञ्चेन for महता प्रपञ्चेन and om. पुनः प्रतिहारस्य; KS1A2 before प्रति add: न; P. om. न त्वेवं .... ०कारेण; B4V2 प्रस्तावस्य यतः (V2 यत्) कृतम् for प्रस्तावोद्देशः कृतः
10. M1-2 न for च; A2TS1 om. च; A2TS1-2 om. न तु .... उक्तम्.

आह । उद्गीथोपद्रवौ तु परिशेषसिद्धौ । तस्मादाह-**अथोहगीतीनां प्रस्तावोद्देश** इति । अथ भावानामनन्तरम् ऊहगीतीनां साम्नां प्रस्तावोद्देशः । उद्देशो लक्षणम् । प्रस्तावस्य लक्षणं वक्ष्याम इत्यर्थः । तदेतत् प्रतिज्ञासूत्रम् ॥ १ ॥

दी. **अथ** भावकथनानन्तरम् **ऊहगीतीनां** प्रस्तावस्योद्देशो लक्षणमुच्यते ॥ १ ॥

स्तोभः पुरस्तादन्तर्वा प्रस्तोतुः ॥ २ ॥

वि· & भा. तस्य प्रस्तावस्य **पुरस्तात्** यः **स्तोभः** स **प्रस्तोतुर्**भवति । प्रस्तावाङ्ग भवतीत्यर्थः । **अन्तर्वा** । अन्तः-शब्दो मध्यवाची । मध्ये च प्रस्तावस्य यः स्तोभः सः प्रस्तोतुर्भवति । तौ प्रशस्ताविल्यर्थः । यथा पुरस्तात् स्तोभः आश्वसूक्त-पूर्वयौक्ताश्व-ऐडा-यास्य-अभिनिधनकाण्व-अदारसृद्-इडानांसंक्षारादिषु । मध्ये च यथा गौषूक्त-सौमेध-माधुच्छन्दस-वाचःसामा-आतीषादीय-हाविष्कृतादिषु । क्वचिदुभयम् । यथाभावे (!) ॥ २ ॥

दी· तस्य प्रस्तावस्य **पूरस्तात्** पूर्वः **स्तोभः** **प्रस्तोतुर्**भवति । प्रस्तावाङ्गं

---

2. $S^{1-2}A^{2}M^{1-2}T$ विभाग्यानन्तरम् for भावानन्तरम्; $M^{1-2}TS^{1-2}$ प्रस्तावोद्देश वक्ष्याम इति । for प्रस्तावोद्देश:; $M^{1-2}TS^{1-2}$ om. प्रस्तावस्य .... इत्यर्थः; भा. after लक्षणम् adds: उच्यते·

6. M^{1-2} प्रस्तावाङ्गः वि. om· प्रस्तावाङ्ग for प्रस्तोतु: ।; भवतीत्यर्थः । अन्तवा ।

7· $A^{2}TS^{1-2}$ वा for च

8. भा प्रस्तावाङ्ग for प्रतोतु:; भा. om. तौ प्रशस्ताविल्यर्थः; M_{s}-^{2}T after यथा add:- प्रस्तावे; My^{3} यौक्ताश्वादिषु for यौक्ताश्व .... संक्षारादिषु·

9. My_{s} om· ०सौमेध०

10· My^{1} om· क्वचिदुभयं यथाभावे; My^{1} सामादिषु for सामाती ... ०ष्कृतादिषु

भवतीत्यर्थः । **अन्ववौ** । अन्तःशब्दो मध्यवाची । प्रस्तावस्य मध्ये स्तोभः प्रस्तोतुः
२ ३र४ ५ २
भवति । पुरस्तात् स्तोभस्योदाहरणम् । आश्वसूक्ते **आऔहोवाहाइ** । **तुवँसोमा** (ऊ. द॰ १९१) इति प्रस्तावे आद्यः स्तोभोऽङ्गं भवति । एवं पूर्वयौक्ताश्व-ऐडायास्यअभिनिधनकाण्व-अदारसृत्-इडानांसंक्षारादिषु । मध्ये स्तोभस्योदाहरणानि । गौषूक्ते **असाव्यंशुमौँ** ।
१र २१ र
र २ र १
हौहोवाहाइ । **दाया** (ऊ. सं. २८१) इति प्रस्तावस्य मध्ये स्तोभोऽङ्गं भवति । एवं सौमेध-माधुच्छन्दस-वाचस्साम-आतीषादीय-हाविष्कृतादिषु । क्वचिदुभयमादौ मध्ये च ॥ २ ॥

अन्ते च ॥ ३ ॥

वि. & भा. **अन्ते च** प्रस्तावस्य यः स्तोभः स प्रस्तावाङ्गं भवति । यथा पौरुमद्ग-औध्र्वसद्मान-श्यैत-द्विनिधनायास्यादिषु ॥ ३ ॥

४ ३ ४ ५ २
दी. प्रस्तावस्यान्ते स्तोभः प्रस्तावाङ्गं भवति । उदाहरणं श्यैते **अभिप्रवस्सुरा** ।
३ २ ३र४र५
धसाऽ३४ औहोवा । इति प्रस्तावान्ते स्तोभोऽङ्गं भवति । एवं पौरुमद्ग-औध्र्वसद्मन-द्विनिधना-यास्यादिषु ॥ ३ ॥

आविधाद्यः ॥ ४ ॥

---

3 & 5. M[4]y[2]E प्रस्तावाङ्गं for अङ्गं

8. S[2]A[2]M$_{\varepsilon}$-[2]TS[1] om. यथा

11. MyS[2] प्रस्तावाङ्गं for अङ्गं; My[2-3] om. भवति.

12. S[4] after (ना) दिषु adds: in brackets: द्विनिधन आयास्यमिति साम्प्रतमिका-यास्यमुच्यते

वि. पूर्वसूत्रस्यापावादः । अकारः प्रतिषेधार्थः । प्रस्तावात् परा या विधा तस्या आदौ यः स्तोभो विधाङ्गभूतः स प्रस्तावाङ्गं न भवति । यथाथर्वण-वार्षाहर-पञ्चनिधन-वैरूपादिषु ॥ ४ ॥

भा. किं सर्व एव प्रस्तावान्त्यः स्तोभः प्रस्तावाङ्गं भवति । न । अविधाद्यः । अकारः प्रतिषेधार्थः । विधाद्यस्तु उद्गिथाङ्गमेव भवति । किमुक्तं भवति । प्रस्तावात् परा या विधा तस्यादौ यः स्तोभो व्यवस्थितः तस्या अङ्गभूतः स न प्रस्तावाङ्गं भवति । किं तर्हि । तद्विधाङ्गमेव भवति । उद्गीथाङ्गमित्यर्थः । यथा आथर्वण-वार्षाहर-ऐडस्वर-पञ्चनिधन-वैरूप-ऐडसाकमश्वादिषु । संकृतिनि च प्रस्तावपक्षे ॥ ४ ॥

दी. अकारः प्रतिषेधे । विधायाः सर्वपादेषु सदृशगीतेः आद्यः स्तोभो न

२ र र र

प्रस्तावाङ्गं भवति । किंतु उद्गीथाङ्गमेव भवतीत्यर्थः । उदाहरणं मराये हाउहाउहाउ ।

१ २ १ १ २ र र र

आग्नीम् । नराः । घिति । भिररण्ये । ण्यो । ण्योः । इति प्रस्तावानन्तरं हाउहाउहाउ इति स्तोभो न प्रस्तवाङ्गम् । विधाया आद्यत्वात् उद्गीथाङ्गमेव । यथा आथर्वण-वार्षाहर-ऐडस्वर-पञ्चनिधन-वैरूप-ऐडसाकमश्वादिषु ॥ ४ ॥

उद्गातुस्तु काण्वर्षभपावमानजनित्राणाम् ॥ ५ ॥

वि. **काण्व-ऋषभपावमान-जनित्राणाम्** अविधाद्यत्वात् प्रस्तावाङ्गमित्येव प्राप्ते

---

2. $A^{2}M_{६}$-$^{2}TS_{६}$-^{2} यथाथर्वणादिषु for यथा .... वैरूपादिषुः
10. My^{2} om· भवति; My^{2} प्रस्तावाङ्गः for प्रस्तावाङ्गं
12. S^{6} after प्रस्तावाङ्गम् adds:· शाङ्गनीयम् and E. भवति·
15· M^{1}-^{2} om. काण्व .... उद्गातुस्तु

उद्गातुस्तु भवति । उद्गीथाङ्गमेवेत्यर्थः ॥ ७ ॥

भा. तुशब्दः सर्वलक्षणप्राप्तनिवर्तकः । एतेषु सामसु पूर्वलक्षणेन अविधाद्यत्वात् प्रस्तावाङ्गत्वे प्राप्ते उद्गातुर्भवति । उद्गीथाङ्गं भवतीत्यर्थः ॥७ ॥

दी. काण्वादीनां साम्नाम् अविधाद्यत्वात् प्रस्तावाङ्गत्वे प्राप्ते उद्गातुर्भवति । काण्वे
५ २ ४र ५ १र
वयमूऽ२त्वातदिदर्थाः इति प्रस्तावानन्तरम् ऐहिहाऽ२इ इति स्तोमस्तु उद्गातुर्भवति । कुतः ।
२२र र
फुल्लकारवचनात् । ऋषभपावमाने हाहाउ पवमाना (ऊ. द. १८०) इति प्रस्तावानन्तरं
२ ५ २ ४५ ४र
हाऽ३ । हाऽ३इ इति स्तोभस्तु उद्गातुर्भवति । जनित्राद्ये इन्द्रक्राऽ२तुन्न आभरा
२१
(ऊ. सं. ३६५) इति प्रस्तवानन्तरं हुवेहोऽ२इ इति स्तोभस्तु उद्गातुर्भवति ॥ ५ ॥

हुवादिर्वासिष्ठे ॥ ६ ॥

वि. पूर्ववदविधाद्यत्वात् कृत्स्नस्यापि स्तोभस्य प्रस्तावाङ्गत्वे प्राप्ते एकदेशस्यउद्गी-
४३४र५
थात्ङ्गत्वमुपदिश्यते । हुवादिः स्तोभः उद्गीथाङ्गं भवति । वयमेन-वासिष्ठे हुवेहोऽ२इ ॥ ६ ॥

भा. इहापि पूर्वलक्षणेन कृत्स्नस्तोभस्य प्रस्तावाद् द्वित्वे प्राप्ते एकदेशस्य उद्गीथाङ्ग-
१ २
त्वमुपदिश्यते । हुवादिः स्तोभः उद्गातुर्भवति । वयमेनवासिष्ठे हुवेहोइ । एवमुद्गातुर्भवाति ॥ ६ ॥

वि. वयमेनमिदा । हिया ओऽ२३४वा । इयाहाइ (ऊ. अ. ६३७) इति

---

5. My² om. इति प्रस्तावानन्तरम्; E om. कुतः .... भवति. (L. 7)

9. A²T वासिष्ठेषु for वासिष्ठे.

वासिष्ठे एतत्प्रस्तावानन्तरं हुवेहोऽ२इ इति स्तोभस्तु उद्गातुर्भवति। कुतः। हुवादिरिति वचनात् ॥ ६ ॥

पद्योऽनादेशे ॥ ७ ॥

वि. & भा. सर्वत्र पद्यः पादः प्रस्तावो भवत्यनादेशे। आदेशे तु यथादेशम्। यथा सदृशगीतीषु सर्वेषु पादो भवति। ऐडयाम-माण्डव-त्रासदस्यव-प्रगायतायोनिवद्वैश्व-ज्येतिर-अयंपूषा कौञ्च-प्रवद्भार्गव-उद्वद्भार्गव दैवोदास-वाङ्निधनक्रौञ्च-लौश-ऐडकाव-यज्ञसारथि-परित्याकूपार-वैधृतवासिष्ठ-शौखण्डिनानि पदविभाग्यानि। एतेषु पादः प्रस्तावो भवति। वासिष्ठ-स्वारयाम-आष्टादंष्ट्र-संक्रोश-वैश्वामित्र-चतुर्थवैदन्वत-प्लव-निहव-अर्कपुष्प- सामराज-मार्गीयव पार्थ-बार्हत - द्यौतान-त्रैष्टुभनित्र-संपा - त्रैष्टुभ-आनुष्टुभवात्सप्र-स्वारत्वाष्ट्रीसामद्वय-स्वारयाम - वैश्वज्योतिषप्रथमोत्तम-वाजजित्-कुत्सस्याधिरथीय-अरिष्ट-स्वाशिरामर्क-अग्नेरर्क-दीर्घतमसोऽर्क-भर्ग-अपत्य-भ्राज-विकर्ण-भास-अग्नेर्व्रतोत्तर-वार्कजम्भ-पञ्चनिधनवामदेव्योत्तर-मरुतांसंस्तोभ - उद्भिद् -

---

1. My² om. तु
4. भा. after सर्वत्र adds:- सर्वसामसु; भा om. पाद: and अनादेशे
5. A²M¹-²TS¹-² ०भक्तिषु for ०गीतिषु; भा. एव for पादो भवति; A²M¹-²T S¹-² om. त्रासदस्यव; KS¹-² My¹ om. योनिवत्; A²M¹-²T योनि, भा. योनिधन for योनिवद्
7. वि. पर्या for परित्या०; T. ऊहपाद: for पाद:
8. A²M¹-²S¹-² om. प्लवनिहव .... आनुष्टभ; My¹ om. ०मार्गीयव०
9. My, om. स्वरयाम
10. A²M¹-²TS¹-² om. अग्नेरर्क
11. KS¹-² आभ्राज for भ्राज; A²M¹-²TS₈-² धेनु० for ०संस्तोभ० and om. उद्भित्

बलभित्-ससह-सामत्रिकाद्योभयत:संसर्पोत्तरोभयाश्विनोर्व्रतद्वय - अपांव्रतद्वय - पूर्वगवांव्रत-अग्निमीयामानि सस्तोभपदविभाग्यानि। एतेषु आद्यस्तोभसहितः पादः प्रस्तावो भवति। उत्तरेषु स्तोभविभाग्यत्वादुर्द्ध(थाङ्गम् एवेत्युक्तम्। अन्यानि स्तोभविभाग्यानि तेषु वक्ष्यति। **स्तोभ उपायान्तः पदनिधनेषु** (पु. सू. १०. ११. १३) इति। विषमभक्तिष्वामहीयवादिषु कथमिति चेत्। उच्यते। विषमभक्तिष्वपि पद्य एव प्रस्तावो भवति। किं सर्वेष्वेव। न। यान्यस्यां खण्डिकायां विषमभक्तीन्युच्चारितानि तद्वर्जम् अन्येषु सर्वेषु विषमभक्तिषु पद्यः प्रस्तावो भवति। यथा आमहीयव-रौरव-यौधाजय-वामदेव्य-नौधस-कालेय-संहित-सफ-पौष्कल-श्यावाश्व-आन्धीगवादीनि। यत्र पुनः पदैकदेशोऽभ्यासः तत्र कथमिति। यथा मराय-वात्सप्र-शैखण्डिन-दीर्घतमसोऽर्कादिषु। उच्यते। तत्रापि साभ्यास एव पादः प्रस्तावो भवति। कुतः। कृत्स्नपादाभ्यासे वचनारम्भात् पादोऽभ्यस्त इति। तेन पारिशेष्यात् एकदेशाभ्यासे साभ्यासः पादः प्रस्तावो भवतीति सिद्धम्॥ ७॥

---

1 M^{1}-^{2}T उक्त for ससह; My^{1} om. ०उत्तर०; भा. अपांव्रतोभय for अपांव्रतद्वय;

2. B^{4} आद्यः स्तोभः संहितः for आद्यस्तोभसहितः;
   वि. पाद० for पादः

3. भा. उत्तरस्य for उत्तरेषु; वि. भवति for एवेत्युक्तम्

5. $A^{2}M^{1}$-$^{2}TS^{1}$-^{2} एवं for अपि

6. $A^{2}M^{1}$-$^{2}TS^{1}$-^{2} om. विषमभक्तीनि; S^{1}-^{2} उक्तानि for उच्चारितानि; $A^{2}M^{1}$-^{2}T S_{1}-^{2} तेभ्यः for तद्वर्जम्; वि. om. सर्वेषु

7. वि. आमहीयवश्यावाश्वादीनी for आमहीयव .... आन्धीगवादीनि

8. B^{4} किम् for कथम्; वि. after इति adds:- चेत्

9. My^{1} वात्सप्रादिषु for वात्सप्र .... अर्कादिषु; $B^{4}K$. सामाभ्यासः for साभ्यासः My^{1} om. तत्रापि;

11 R इति adds:- च

दी. सर्वसामसु **पद्य:**। पादे भव: पद्य: । पाद: प्रस्तवो भवति । **अनादेशे** अवचने। यत्र वचनं नास्ति तत्र पाद: प्रस्तावो भवतीत्यर्थ: । यत्र वचनं तत्र तु वचनेन पाद: प्रस्तावो भवति । यथा सदृशगीतिषु सर्वेषु पादेषु पृथक् पादानि भजेरन् । **प्रत्यन्तादिति।** पदविभाग्यानि । यथा ऐडयाम-माण्डव-त्रासदस्यव-प्रगायतायोनिवद्रैश्वज्योतिष-अयंपूषाक्रौञ्चाद्य-प्रवद्भार्गव-उद्वद्भार्गव-दैवोदास-वाङ्निधनक्रौञ्च-लौश-ऐडकाव यज्ञसारथि-पर्याकूपार-वैधृतवासिष्ठ-शौस्वण्डिनानि पदविभाग्यानि । एतेषु पाद: प्रस्तावो भवति ॥

अथ सस्तोभपदविभाग्यानि । वासिष्ठ-स्वारयाम-आष्टादंष्ट्र-पंक्रोश-महावैश्वामित्र-चतुर्थ-वैदन्वत-प्रथमनिहव-पुष्पसामराज-पार्थ-बार्हत-द्यौतान-तृतीयजनित्र-सम्पावैयश्व-त्रैष्टुभ-बात्सप्र-स्वार-त्वाष्टीसामद्वय-स्वारयाम-वैश्वज्योतिष-प्रथमोत्तमवाजजित् - कुत्सस्याधिरथीय-अरिष्ट-स्वाशिरामर्क-अग्नेरर्क-दीर्घतमसोऽर्क-भर्ग-अपत्य-भ्राज-विकर्ण-भास-अग्नेर्व्रतोत्तर-वार्कजम्भोत्तर-पञ्चनिधनवामदेव्योत्तर-मरुतांसंस्तोभ-उद्भिद्-बलभिद्-सतद्द-सामत्रिकाद्य-उभयत:संसर्पोत्तरोभय-अश्विनोर्व्रतद्वय-अपांव्रत-अग्नि-मीयामानि सस्तोभपदविभाग्यानि । एतेषु आद्यस्तोभसहित: पाद: प्रस्तावो भवति । एभ्योऽन्यानि स्तोभविभाग्यानि । तेषु वक्ष्यति । **स्तोभ उपयान्त: पदनिधनेषु** (पु.सू. १०·११·१३) इति । विषमभक्तिषु आमहीयवादिषु । कथमिति चेत् । उच्यते । विषमभक्तिष्वपि पद्य एव प्रस्तावो भवति । **किं सर्वेष्वेव** । न । अन्यस्यां खण्डिकायां विषमभक्तिन्युच्चारितानि तद्वर्जम् अन्येषु सर्वेषु विषमभक्तिषु पद्य: प्रस्तावो भवति । यथा आमहीयव-रौरव-यौधाजय वामदेव्य-नौधस-कालेय-संहित-सफ-पौष्करु-श्यावाश्व-आन्धीगवादिषु । यत्र पुन: पदैकदेशोऽ

---

10. My[2-3] ०जम्भ for जम्भोत्तर०

12. S[4] अग्निमीया इमानि for अग्निमीयामानि;

14. My[3] कण्डिकायां for खण्डिकायां

भ्यासः तत्र कथमिति। यथा मराय-वात्सप्र-शौक्ष्णिडम-दीर्घतमसोऽर्कादिषु । उच्यते । तत्रापि साभ्यास एव पादः प्रस्तावो भवति । कुतः । कृत्स्नपादाभ्यासे वचनारम्भात् । पादोऽभ्यस्त इति । तेन पारिशेष्यादेकदेशाभ्यासे साभ्यासः पादः प्रस्तावो भवतीति च सिद्धम् ॥ ७ ॥

द्व्यक्षरो वा संकृतिदार्ढच्युतयोः ॥ ८ ॥

वि. संकृतिदार्ढच्युतयोर्द्व्यक्षरः प्रस्तावो भवति। वा-शब्दात् पद्यो वा ॥ ८ ॥

भा. पद्यो वा वाशब्दात् ॥ ८ ॥

दी. एपारी (र. द. २४) इत्यादिसंकृतिनि द्व्यक्षरः प्रस्तावो भवति । एपारी । एवम् । वाशब्दात् पादो वा प्रस्तावो भवति । एपारी । तोषिश्वताऽ२३होऽ२३इ । सुताऽ-२३म् । अविधाव: (यु. सू. १०. १०. ४) इति वचनात् । हाओवा इत्यादिस्तोभाः उद्गातुर्भवन्ति । न प्रस्तावाङ्गम् । इन्द्रा । इहा । येन्दोमरूऽ२त्वताइ (ऊ. अ. ६२६) इति दार्ढच्युते द्व्यक्षरः प्रस्तावो भवति । इन्द्रा । इहा । इत्यन्तर्निधनम् । वाशब्दात् पद्यो वा प्रस्तावो भवति । इन्द्रा । इहा । अन्तर्निधनम् । येन्दोमरूऽ२त्वताइ । प्रस्तावः । इहा । अन्तर्निधनम् ॥ ८ ॥

चतुरक्षरो वा सुरूपाजिगैडसाकमश्वानाम् ॥ ९ ॥

---

6. M^{1-2} om. संकृतिदार्ढच्युतयोः
13. EMy^{2-3} om. प्रस्तावः

वि. एतेषां चतुरक्षरो वा प्रस्तावः सुरूपैडसाकमश्वयोः स्तोभाविधाद्यत्वात् प्रस्तावाङ्गं भवति । अन्ते च । अविधाद्यः (पु.सू. १०. १०. ३-४) इति वचनात् ॥ ९ ॥

भा. एतेषां सुरूपादीनां चतुरक्षरो वा प्रस्तावो भवति । सुरूपैडसाकमश्वयोः सस्तोभोऽविभाग्यत्वात् प्रस्तावाङ्गं भवति । अन्ते च । अ विधाद्यः (पू. सू. १०.१०.३-४) इति वचनात् ॥ ९ ॥

दी. सुरूपाद्ये पवस्वदा॒ऽ२इ । इया॒ऽ२इया (ऊ. द. १५७) इति चतुरक्षरः स्तोभान्तः प्रस्तावो भवति । अन्ते च । अविधाद्यः (पु. सू. १०. १०. ३-४) इति वचनात् । वाशब्दात् पद्यो वा प्रस्तावो भवति । पवस्वद॒ऽ२इ । इया॒ऽ२इया । वआयुषाऽ२क्र । एवं पद्यः । आजिगे उच्चातेजा (ऊ. द. २०९) इति चतुरक्षरः प्रस्तावः । पद्यो वा । उच्चातेजा । तमान्धसाः । एवम् । ऐडसाकमश्वे अध्वर्योआऽ३ । होऽ३होऽ३१ (ऊ. द. १४५) इति चतुरक्षरः स्तोभान्तः प्रस्तावः । अन्तेचाविधाद्यः (पु. सू. १०.१०.३–४) इति वचनात् । पद्यो वा । अध्वर्यो आऽ३ । हौऽ३होऽ३१ । द्रिभिःसुताऽ३म् । हौऽ३होऽ३१इ । एवम् ॥ ९ ॥

सदेवतो वा राजनशाकरर्षभयोः ॥ १० ॥

---

10. My² om. उच्चातेजा पद्योवा

12. My²⁻³ om. प्रस्तावः; E. om. अन्ते .... वचनात्.

14. E. om. हौऽ३होऽ३इ.

15. T. ऋषभशाकरयोः for शाकरऋषभयोः

वि. एतयोः **सदेवतः** पादः प्रस्तावो भवति । पादः प्राप्त एव गृह्यते । **पद्योऽनादेशे** (पु. सू. १०. १०. ७) इति विशेषणार्थः परिसंख्यानतया देवतार्थ आरम्भः । देवतासूत्रे अस्तोभत्वात् वचनारम्भः । अन्ये तु अधीयते सदेवतो वा राजनशाक्करर्षभयोः इति । एतयोर्विकल्पः । सदेवतो वा । देवतां विहाय वा ॥ १० ॥

भा. **राजनशाक्करर्षभयोः सदेवतः** पादः प्रस्तावो भवति । पादः प्राप्त एव गृह्यते । **पद्योऽनादेशे** (पु. सू. १०. १०. ७.) इति विशेषेणार्थपरिसंख्यानतया देवतार्थ आरम्भः । देवतासूत्रे अस्तोभत्वात् वचनारम्भः । अन्ये त्वधीयते सदेवतो वा राजनशाक्करर्षभयोरिति । तेषां विकल्पः । सदेवतो वा । देवतां विना वा ॥ १० ॥

दी. **राजनशाक्करर्षभयोः सदेवतो** देवतासहितः पादः प्रस्तावो भवति । वाशब्देन देवतारहितो वा पादः प्रस्तावः । राजने **हिम्** (त्रिः) । **हों** (त्रिः) **इः** (त्रिः) **ओंहा** (त्रिः) **औहोइ** (त्रिः) **तदिदासा** । **भुव** । **नेषुज्येष्ठाम्** । (र. सं. ६७) इति सस्तोभः पादः । ततो देवताः । **वयोवृहत्** (त्रिः) **विभ्राष्टये विधर्मणे** (त्रिः) ॥ अविभाग्यपक्षे तु सस्तोभः पादः प्रस्तावः । न देवताः । शाक्करर्षभे **ओऽ१२म्** (त्रिः) ।

---

1. T. साम्नयोः for एतयोः; A[2]M[1-2]TS[1-2] प्रस्ताव एव दृश्यते for पादः प्राप्त एव गृह्यते.
2. M[1-2] संख्यानाभावात् for °संख्यानतया; A[2] विशेषणार्थ for विशेषणार्थः
3. S[1-2] देवतासु उद्गाता स्तोभमिति, T देवतासूद्गाता स्तोभंवो, M[1-2] देवताभावो for देवतासूत्रे अस्तोभत्वात्; M[1-2] om. सदेवतो वा ...... ऋषभयोः
7. V[2]B[4] अधीयन्ते for अधीयते
8. PV[2] एतेषां for इति । तेषां

पवाएस्वश्राएजस।एतय आ । शंयोः (द्विः) (र. द. १५) इति देवतासहितः प्रस्तावः ।
भाविभाव्यपक्षे तु उभयतःस्तोभः पादः प्रस्तावः । ततः शंयोरिति देवतानिधनम् ॥ १० ॥

द्विपात्संजयनानदगौशृङ्गरात्रिदैवोदासानाम्॥ ११ ॥

वि. & भा. एतेषां साम्नां द्वौ द्वौ पादौ प्रस्तावो भवति ॥ ११ ॥

३र४र ५ र
दी. संजयादीनां द्वयोः द्वयोः पादयोः प्रस्तावः । संजये **आते अग्नइधी** ।
२ ४ ५ २ ४र५४ ५
माऽ३हाइ । **द्युमन्ताऽ३न्देवअजरम्** (ऊ. द. ९६) इति द्विपात्प्रस्तावः । नानदे
३४ ५र४ र ३२ १ र ५ र ४ ५
प्रत्यस्मैपिपी । **षताऽ३इ** । **वाऽ२३४इ** । **श्वानिविदुषे** । **भारा** (ऊ. ए. ३७५)
३र४र३ ४ ५ ३ २ १
इति द्विपात्प्रस्तावः । गौशृङ्गे **आजागृविर्विप्रः** । **ऋताऽ३म्** । **माऽ२३४** ।
र र र ४
तीनांसोमाः । **पूना** (ऊ. क्षु. ९१९) । अत्र प्रास्ताविकं गीतमेव । कुतः ।
वैच्छन्दसेषु गीतं प्रास्ताविकमेव स्यात् (पु. सू. १०. ११. २१) इति वचनात् ।
योनौ तरणिरित्सिषा । **सतीऽ३वाऽ२३४** । **जंपुरन्ध्या** । **युजा** (ग्रा. ६. १.
४३४ ३ ५ १
२३८. ३) अत्र द्विपात् प्रस्तावः । रात्रिदैवोदासे **अयंतइन्द्रसोऽ४मः** । **नाऽ२३४इ** ।
र५र ४५४ ५
पूतो अधिबर्हिषी (ऊ. द. २२) । अत्र द्विपात् प्रस्तावः ॥ ११ ॥

---

1. सदेवतः for देवतासहितः
4. वि. om. साम्नां; वि. प्रस्तावौ भवतः for प्रस्तावो भवति
10. E एवम् for एव

कावश्रौतकक्षार्षभत्र्यन्तायास्यैडौक्ष्णोरन्ध्रैडसौपर्ण-मौक्षमार्गीयवजरावोधीययद्वाहिष्ठीयोत्सेधवाभ्र-स्वारसामराजपौरुमीढपूर्ववारवन्तीयवार्त्रतुरयण्ववैरूप-ह्रस्वाबृहदोपशामहादिवाकीर्त्यानां वान्तः ॥ १२ ॥

वि. एतेषां वाशब्दान्तः प्रस्तावः । अन्येषां महावैष्टम्भादीनामग्रहणात् **पद्योऽन्नादेशे** (पु. सू. १०. १०. ७) इति पादः प्रस्तावः । गृहीतकावादीनां केषांचित् पादं व्यतीत्य प्रस्तावः । केषांचिदर्धपादं प्रस्तावः । अतो वैलक्ष्यण्यात् पृथग्ग्रहणं युक्तम् ॥ १२ ॥

भा. एतेषां कावादीनां विंशतीनां वाशब्दान्तः प्रस्तावो भवति । **स्तोभश्च** यथान्यायं भवति । **अन्ते च । अविधाद्यः** (पु. सू. १०. १०. ३-४) इति अनेन न्यायेन । यथा त्र्यन्तायास्यैडौक्ष्णोरन्ध्रैडादीनां सहस्तोभेन वाशब्दान्तः प्रस्तावो भवति । महावैष्टम्भश्यैतद्विनिधनायास्यसौभरसत्रासाहीयश्रुध्यवरुणसामसदोविशीयाभीवर्त्तवाभ्रादीनां वान्तत्वेऽप्यग्रहणम् । न्यायसिद्धत्वात् । **पद्योऽन्नादेशे** (पु. सू. १०. १०.७) इति **अविधाद्य** (पु.सू.१०. १०.४) इति स्तोभस्य प्राप्तेरिति । अन्तग्रहणं कावादीनां केषांचित् पदमतिरिच्य

---

5. A2M[1]-[2] om. एतेषां; A[2]M[1]-[2] वाकारान्तः, S[2] वान्तः for वाशब्दान्तः; TS[1] om. एतेषां वाशब्दान्तः

7. My[1] अर्धपाद: for अर्धपादं

14. PV[2] प्राप्तिः for प्राप्तेः

प्रस्तावो भवति । केषांचिदर्द्धपादं प्रस्ताव: । अतो वैलक्षण्यात् कावादीनां पृथग्ग्रहण-
मुक्तम् ॥ १२ ॥

२ १
दी. कावादीनां वाशब्दान्त: प्रस्तावो भवति । कावे अभ्योवा (ऊ.द. १३) । इति
२ २२१ २२ १ २२ १२
वान्त: प्रस्ताव: । श्रौतकक्षे इन्द्रायमद्वनेसुतम् । इन्द्रायमोवा (ऊ. द. २१) । अत्र वान्त:
२ १ २२ २ १२ २ १ २
प्रस्ताव: । आर्षभे अभित्वावृषभासुते । सुतँसृजोवा (ऊ. द. २५) । अत्र वान्त:
२२ २ २ १२
प्रस्ताव: । त्र्यन्तायास्ये पुनानस्सोमधाहाउहोवा (ऊ. द. ४१) । अत्र वान्त:
२१ २२ २ २१ २
प्रस्ताव: । ऐडमौक्ष्णोरन्ध्रे मृज्यमानस्सुहस्त्या । समुद्रेवोवा (ऊ. द. १०३) ।
२ २२१ २
अत्र वान्त: प्रस्ताव: । ऐडसौपर्णे उच्चातेजोवा । (ऊ. ए. ५१२) अत्र वान्त:
१२२१२२१२ २ १२२२१
प्रस्ताव: । दक्षणिधनमौक्षे यस्तेमदोवरेणियः औहोवा (ऊ. द. १३०) । अत्र वान्त:
प्रस्ताव: । मार्गीयवे तद्वौहोवा । अत्र वान्त: प्रस्ताव: । जराबोधीये
२ २ २ २२ १२ १ २ १
जराबोधोवा (ऊ. अ. ५३७) । अत्र वान्त: प्रस्ताव: । यद्वाहिष्ठीये परित्य॒हर्यत॒हरिम् ।
२ १ ४२ ३ ४२ ३२४५२
परित्यँहोवा (ऊ. द. २००) । अत्र वान्त: प्रस्ताव: । उत्सेधे पुनानस्सोमधारया ।
३२ ३२४ ५
प: । वसाऽ३४औहोवा (ऊ. द. २११) । अत्र वान्त: प्रस्ताव: । वाभ्रे
३ ४ ५ २ २ १ ५
सोमउष्वाणस्सो । हाऽ३हाऽ६इ । तूऽ२३४ । भिस्तृभोवा (ऊ. द. ८७) ।
२ १ २
अत्र वान्त: प्रस्ताव: । स्वारसामराजे पवौहोवा (ऊ. सं. २६३) अत्र वान्त: प्रस्ताव: ।

---

8. S² वृषापवोवा for उच्चातेजोवा

15. S² before स्वारसामराजे adds:- शौक्ते सखा । य आयोऽ२३४वा । अत्र वान्त: प्रस्ताव:

पौरुमीढे पवमा। नाभाऽ३४औहोवा (ऊ. सं. ३५४)। अत्र वान्तः प्रस्तावः। पूर्ववारवन्तीये आश्वा। औहोऽ२३४वा (ऊ. क्षु. ९०४)। अत्र वान्तः प्रस्तावः। वार्त्रतुरे अयापवोवा (ऊ. क्षु. ९१०)। अत्र वान्तः प्रस्तावः। यण्वे अर्षासोमधु-मत्तमः। एऽ२। अभिद्रोणानि। रोरुवोवा (र. द. ११)। अत्र वान्तः प्रस्तावः। पञ्चनिधनवैरूपे यद्यावइन्द्रतेशतम्। ए। शतंभूमीरुत। स्योवा (र. द. ७)। अत्र वान्तः प्रस्तावः। ह्रस्वाबृहदोपशवैरूपे यद्यावइन्द्रतेशतम्। ए। शतं भूमीरुत। स्योवा (र. क्षु. १६३)। अत्र वान्तः प्रस्तावः। योनौ इदं द्वितीयं वैरूपं भवति। महादिवाकीर्त्यै हाउहाउहाउ। ज्योतिः [त्रिः]। आयुः [द्विः]। आयूऽ३४औहोवा (अ. ६. १. २६८)। अत्र वान्तः प्रस्तावः ॥ १२ ॥

कृष्टाद्वृष्णि ॥ १३ ॥

वि. **वृष्णि कृष्टात्** परो वाशब्दः प्रस्तावान्तो भवति। इन्द्राऽ३ ओऽ२३४वा ॥ १३ ॥

भा. **वृष्णि कृष्टात्** परः यो वाशब्दः तदन्तः प्रस्तावो भवति। वाशब्द-बहुत्वात् कृष्टात् पर इति विशेषणार्थमाह **कृष्टाद्वृष्ण** इति। इन्द्रा२३उ२३२३वा। एवमन्तः ॥ १३ ॥

---

10. S[4] after प्रास्ताव: adds in brackets:- महादिवाकीर्त्यस्य प्रस्ताविके देवते परिहरेत् (२०-२-१२) इति द्राह्यायणसूत्रे विंशे पटले द्वितीये खण्डे। प्रतिहारसूत्रे च तस्याद्ये देवते विपरिहरेदाद्यन्तसमाधये (१४-५) इति वचनात् ॥

दी· वृष्णि कृष्टात् कर्षणात् परो यो वाशब्दः तदन्तः प्रस्तावो भवति ।
३ २र३र२ २र ३र २ २र
वाशब्दबहुत्वात् कृष्टात् पर इति विशेषणार्थमुक्तम् । अभाओव । प्रवा ओबा । सुरा
२ र २ १ २ १ ३ २ १ ५
ओबा । धाऽ३ । ओ । सऽ३ । ओइ । इन्द्राऽ३ । ओऽ२३४बा । (र. प्रा.१३७)

अत्र कृष्टात् परो वान्तः प्रस्तावः ॥ १३ ॥

द्विर्वा वारवन्तीये ॥ १४ ॥

वि· & भा· पूर्वे वारवन्तीये (ऊ. क्षु. ९०४) द्वौ वाशब्दौ । तत्राद्ये वाशब्दे प्राप्ते विकल्पमाह । द्विर्वा वाशब्दान्तः प्रस्तावः सकृद्वेति ॥ १४ ॥

दी· पूर्वे वारवन्तीये (ऊ. क्षु.९०४) द्वौ वाशब्दौ । तत्राद्ये प्राप्ते विकल्पमाह । पूर्वे वारवन्तीये द्विर्वाशब्दान्तः प्रस्तावो भवति । सकृद्वाशब्दान्तो वा
१ २ ३र ५ १ र ३र ५
प्रस्तावः । आश्वा । औहोऽ२३४वा । नात्वा । औहोऽ२३४वा (ऊ.क्षु.९०४)
१ २ ३र ५
अत्र द्विर्वाशब्दान्तः प्रस्तावः । आश्वा । औहोऽ२३४वा । इति वा पूर्ववान्तः प्रस्तावः ॥ १४ ॥

आत्मानि च महादिवाकीर्त्ये ॥ १५ ॥

---

7 भा· om· वाशब्दे; वि· विकल्पः । द्विर्वा सकृद्वेति for विकल्पमाह । .... सकृद्वेति.

11· EL[1]My[2]-[3]R om. आश्वा । .... पूर्ववान्तः प्रस्तावः

वि. पूर्वसूत्रेणादावेको वान्तोऽनेन सूत्रेण द्वितीयो विहितः। आदावात्मनि च द्विर्वाशब्दः प्रस्तावो भवति समुच्चयेन। न तु विकल्पः ॥ १५ ॥

भा. पूर्वेण सूत्रेणादावेवैको वान्तः प्रस्तावः प्राप्तः। अनेन सूत्रेणात्मनि च द्वितीयो विहितः। आदावात्मनि च द्विर्वाशब्दान्तः प्रस्तावो भवति। समुच्चयेन। न तु विकल्पः ॥ १५ ॥

दी. महादिवाकीर्त्ये आत्मनि च (अ. ६. १. २६५) सप्तमेऽनुगाने वाशब्दान्तः प्रस्तावो भवति। औहौहोवाहोइ (द्विः) औहौहो वा हाऽ३१वार३। अत्र वाशब्दान्तः प्रस्तावः ॥ १५ ॥

यान्तो दाशस्यत्यभासशाम्मदगायत्र्यासितानाम् ॥ १६ ॥

वि. एतेषां या-कारान्तः प्रस्तावो भवति। ऐडकौत्सादीनामग्रहणम्। पद्योऽन्यादेशे (पु. सू. १०. १०. ७) इति अविघाद्यः। (पु. सू. १०. १०. ४.) अन्ते च (पु. सू. १०. १०. ३) इति स्तोभसमाप्तिः पूर्ववत् ॥ १६ ॥

भा. एतेषां चतुर्णां दाशस्पत्यादीनां याशब्दान्तः प्रस्तावो भवति। ऐड-

---

1. A²M¹-² after सूत्रेण add:- आत्मनि च

2. T. समुच्चयः for समुच्चयेन; S¹-²A²T. om. न तु

10. A²M¹-²T om. एतेषां; M¹-²S¹-² यकारान्तः for याकारान्तः; A² अग्रहणात् for अग्रहणम्

कौत्सादीनां यान्तत्वेऽप्यग्रहणादुक्तः परिहारः । कावश्रौतकक्षार्षभ-(पु. सू. १०, १०, ११) इत्येतसिमन् सूत्रे ॥ १६ ॥

२ र रर र १२
दी. दाशस्पत्यादीनां यान्तः प्रस्तावो भवति । दशस्पत्ये इन्दुरौहोवाहाईया
५ २ ४ ५ ४ ५
(ऊ. द. ९५) । अत्र यान्तः प्रस्तावः । भासे पव स्वाऽ३३दाइ । वाः । ईया (ऊ. द.
३४५र र र २ ३ ५
१५८) । अत्र यान्तः प्रस्तावः । शामन्दे तुवँसोमासिऐ । हीएहीऽ२३४ या । (ऊ. द.
३४र५ र र २ २ ५
१९२) अत्र याशब्दान्तः प्रस्तावः । गायत्र्यासिते यस्तेमदोवरे । इयाऽ३४३ईऽ३४या
(ऊ. अ. ५६५) अत्र याशब्दान्तः प्रस्तावः ॥ १६ ॥

जारान्तो वीङ्कवसिष्ठप्रियपञ्चाणाम् ॥ १७ ॥

वि. & भा. एतेषां त्रयाणां वीङ्कादोनां जारान्तः प्रस्तावो भवति ॥ १७ ॥

दी. वीङ्कादीनां जारापर्वान्तः प्रस्तावो भवति । वीङ्के यदीन्द्रचित्रमइ । हनाऽ३ ।
२१ ४५४५
आस्ती । अत्र जारापर्वान्तः प्रस्तावः । वसिष्ठप्रिये इमामीऽ२३ । द्रसुतंपिब ।
५ ४ ४ ३ ५ २
ज्येष्ठाम् (ऊ. द. ८१) इति जारापर्वान्तः प्रस्तावः । पञ्चे प्रसोऽ४म । दाऽ३
५र ३२ ४ ५
इववी । तया३इ । साइन्धूः (ऊ. सं. २३५) इति जारापर्वन्तः प्रस्तावः ॥ १६ ॥

वारान्तो वैश्वामित्रे ॥ १८ ॥

वि. गतमेतत् । अत्र सफपौष्कलादीनामग्रहणे स एव परिहारः ॥ ७ ॥

---

9. वि. om. त्र्याणां वीङ्कादीनाम्; M¹-²S¹-²T. भवति प्रस्ताव एषः for प्रस्तावो भवति.

15. KMy¹ वारान्तः प्रस्तावो भवति for गतमेतत्

भा. सफपौष्कलाकूपारादीनां वारान्तत्वेऽप्यग्रहणम् । अत्रापि स एव परिहारः ॥ १८ ॥

३४ र र ३ ४५ २ ३ ५
दी. वैश्वामित्रे प्रसुन्वानायअन्धसः । मर्त्तोनाऽ२३४वा (ऊ. स. ७२७) इति वारापर्वान्तः प्रस्तावः । वारावाऽ२३४न्ताम् । इति वारापर्व भवति ॥ १८ ॥

हाउकारान्तः सन्तनिजमदग्न्यभीवर्तकार्तयशाकारान्तत्वाष्ट्रीसाम्नाम् ॥ १९ ॥

वि. हाउकारान्तः प्रस्तावो भवति । पृश्निपौरुमद्गादीनां पूर्ववत् ॥ १९ ॥

भा. एतेषां साम्नां हाउकारान्तः प्रस्तावो भवति । पृश्निदावसुनिधनासितच्यावनहाविष्कृतपौरुमद्गगौतमादीनां हाउकारान्त [ना] मप्यग्रहणं पूर्ववत् ॥ १९ ॥

दी. सन्तनिप्रभृतीनां हाउकारान्तः प्रस्तावो भवति । हाउ-शब्दः अन्ते यस्य
१ २
सः हाउकारान्तः । सन्तनिनि असाहाउ (ऊ. द. ९०) इति हाउ-शब्दान्तः प्रस्तावः ।
२र र र
जमदग्नेरभीवर्ते । पिबासुतस्यरसिनोमत्स्वाहाउ (ऊ. स. ७१५) । अत्र हाउ-शब्दान्तः
२र र
प्रस्तावः । कार्तयशे पुरोहाहाउ (ऊ. द. १३४) । अत्र हाउशब्दान्तः प्रस्तावः ।

---

7. A^2T before पूर्ववत् add: ग्रहणं; and M^{1-3} अग्रहणं

12,13. E हाउकारान्तः for हाउशब्दान्तः

२१र २रर १ २   १ २

आकारान्तत्वाष्ट्रीसाम्नि पुरोजितीवोऽन्धसः । सुताहाउ । इति हाउ-शब्दान्तः प्रस्तावः ॥ १९ ॥

जाराग्निन्दूतोपक्रमाणां ते एवाविभाग्यानाम् ॥ २० ॥

वि. उपक्रम आरम्भः । जारोपक्रमाणामग्निन्दूतोपक्रमाणां च । अविभाग्यानां साम्नां ते जाराग्निंदूते एव प्रस्तावौ भवतः । सुज्ञानौशनादिषु विभाग्यानां पादः प्रस्तावो भवति । जाराग्निंदूतोपक्रमाणाम् यथा मरायारिष्टभर्गमहावैश्वामित्रादिषु ॥ २० ॥

इति फुल्लविवरणे दशमस्य प्रपाठकस्य दशमः खण्डः ॥ १० ॥

भा. जराग्निंदूतया च (°दूतयोश्च ?) यान्युपक्रम्यन्ते तानि जाराग्निंदूतोपक्रमाणि । तेषां ते एव पर्वणि (णी ?) प्रस्तावो भवति । जारोपक्रमेषु जारा । अग्निंदूतोपक्रमेष्वग्निंदूता । यथा त्रैष्टुभौशनाद्यवैदन्वतादीर्घगूर्दगायत्रपार्श्वशाक्वरर्षभाथर्वणमवर्णरेवतीनित्यवत्सा[रायो]वाजीयारण्येगेयश्येनादिषु । श्येनः यज्ञीयस्य चोत्तरयोः । एतेषु जाराप्रस्तावो भवति ।

---

4. S[1]-[2] विभाग्यानां for अविभाग्यानां

5. A[2]M[1]-[2]T अन्ते for ते; M[1]-[2] om जाराग्निंदूते

9. B[4] दूतयानि for °दूतयोश्च यानि; B[4]V[2]; °क्रमान्ते for °क्रम्यन्ते

11. B[4] वाजीय अरण्येगेयः, V[2] वाजीयरथ्य आग्नेयेयः P वाजीयरथ्य अरण्येगेयद् for वाजीयारण्येगेयश्येनादिषु

सुज्ञानत्वाष्ट्रीसामाद्यपार्श्वपूर्वमानवाग्नेस्त्रिणिधनेषोवृधीयवाजदावर्यौक्ष्णोरन्ध्राद्यादारसृदीङ्खयन्तीत्वाष्ट्रीसामवात्सबाभ्रवकाशीतभारद्वाजाच्छिद्रयिष्ठबृहद्भारद्वाजवाशपूर्ववैष्णवौपगवपूर्वात्रेयपूर्व - वार्षाहराद्यस्वरद्वयदेवस्थानाथर्वणातीषङ्गान्तरिक्षबार्हद्गिराङ्गोवैरूपव्याहृतिसामानि । एतेषु सामसु अग्निंदूता प्रस्तावो भवति । किमविशेषेणैव जाराग्निंदूतयोः प्रस्तावार्थमिति । न । अविभाग्यानां साम्नाम् एव धर्मो भवति । जाराग्निंदूते प्रस्तावः । विभाग्यानां तु अग्निंदूता-सदृशो जारासदृशश्च पाद्य एव प्रस्तावो भवति । यथा मरायशार्ङ्गदीर्घतमसोऽर्कारिष्टभर्गमहा-वैश्वामित्रादिषु ॥ २० ॥

इति पुष्पसूत्रभाष्ये दशमस्य दशमी कण्डिका ॥ १० ॥

दी. जारा वा आग्निंदूता वा पर्वण उपक्रमः आरम्भो येषां ते जाराग्निंदूतोपक्रमाः । तेषां **जाराग्निंदूतोपक्रमाणाम्** । कथंभूतानाम् । **अविभाग्यानाम्** । विषमभक्तिनी ते एव द्वे पर्वणी प्रस्तावो भवति । **जारोपक्रमेषु** जारापर्व प्रस्तावो भवति । **अग्निन्दूतोपक्रमेषु** अग्निंदूतापर्व प्रस्तावो भवति । उदाहरणम् । औशने **प्रातू** (ऊ. द. ४) इति जारोपक्रमं पर्व । एवं वैदन्वत-दीर्घ-गूर्द-गयात्रपार्श्व-शाक्वरवर्ण-रैवत-नित्यवत्सा-रायोवाजीय-अरण्येगेयश्येनादिषु । **अग्निंदूतापर्वोदाहरणम्** । सुज्ञाने **इन्द्रमच्छा** (ऊ. द. ४७) इत्यग्निन्दूतोपक्रमं पर्व । एवं त्र्यन्तत्वाष्ट्रीसाम - पूर्वमानव - अग्नेस्त्रिणिधन - इषोवृधीय-वाजदावर्यै-पूर्वौक्ष्णोरन्ध्र - अदारसृन्-ईङ्खयन्ती - त्वाष्ट्रीसाम - वाश - बाभ्रव - काशीत - भारद्वाज-अच्छिद्रयिष्ठ - बृहद्भारद्वाज - वार्श - पूर्ववैष्णव - औपगवपूर्व- वार्षाहराद्य - स्वरद्वय-देवस्थान - आथर्वण - अतीषङ्ग - अन्तरिक्ष - बार्हद्गिर - अङ्गोवैरूप - व्याहृतिसामा -

---

6. B[4]V[2]P. °सहितो जारासहितश्च for °सदृशो जारासदृशश्च

11. S[4] °भक्तिन ते च, L[1] भक्तिना ते for °भक्तिनी ते

दिषु ॥ २० ॥

इति फुल्लदीपे दशमप्रपाठकस्य दशमः खण्डः ॥ १० ॥

एकादशः खण्डः

यौक्ताश्वैडयास्यत्रैशोकक्रौशश्नौष्ठोद्वंशपुत्र-दैर्घतमससिमानां निषेधवैराजानां द्वयक्षरः ॥ १ ॥

वि.&भा. एतेषां **यौक्ताश्वादीनां** दशानां द्वयक्षरः प्रस्तावो भवति । अत्र सहोदैर्घग्रहणं जारोपक्रमत्वे सिद्धेऽपि आदेरवृद्धत्वात् कृतम् । स्तोभश्चैतेषु प्रस्तावाङ्गं भवति यथान्यायम् ॥ १ ॥

दी. **यौक्ताश्वादीनां** दशानां साम्नां द्वयक्षरः प्रस्तावो भवति । एतेषु स्तोभश्च प्रस्तावाङ्गं भवति यथान्यायम् । पूर्वयौक्ताश्वे औहोहोहाइ । वृषा (ऊ. द. ३९) ।

---

5. A^2M^{1-2} ऐडायास्य for ऐडयास्य
7. A^2TS^{1-2} om. एतेषां; M^{1-2} om. एतेषां....यथान्यायम्; A^2TS^{1-2} स्पष्टम् for भवति and om. अत्र....यथान्यायम्
8. K उक्तम् for कृतम्
10. My^3 om. साम्नां
11. $L^1My^{2-3}E$ om. पूर्व०

अत्र द्व्यक्षरः प्रस्तावः । यौक्ताश्वोत्तरे **वृषा औहोंहोहाइ** (ऊ. सं. २४४) । अत्र द्व्यक्षरः प्रस्तावः । ऐडायास्ये **आइपुना** (ऊ. द. ४०) । अत्र द्व्यक्षरः प्रस्तावः । त्रैशोके **विश्वोहाइ** (ऊ. द. ७३) । अत्र द्व्यक्षरः प्रस्तावः । क्रोशे **प्राणाः** (ऊ. द. ९२) । अत्र द्व्यक्षरः प्रस्तावः । श्नौष्टे **औहोहाइ । अयोहाइ** (ऊ. द. ११८) । अत्र द्व्यक्षरः प्रस्तावः । उद्वंशपुत्रे **प्रवाः** (ऊ) द. १२०) । अत्र द्व्यक्षरः प्रस्तावः । सहोदैर्घतमसे **हाउपिबा** (ऊ. क्षु. ८७०) । अत्र द्व्यक्षरः प्रस्तावः । सिमानां निषेधे **असो । वाहाइ** (ऊ. क्षु. ९२९) । अत्र द्व्यक्षरः प्रस्तावः । महावैराजे **होइयाहोइयाहोइयाऽ२४३पिब** (ऊ. द. १०) । अत्र द्व्यक्षरः प्रस्तावः ॥ १ ॥

अभ्यस्तौ द्व्यक्षर आनूपैटतसौहविषवैष्णवोत्तरपयोन्तस्वराणाम् ॥ २ ॥

वि. एतेषां द्वे द्वे अभ्यस्ते अक्षरे प्रस्तावो भवति ॥ २ ॥

भा. आनूपादीनां द्व्यक्षरः अभ्यस्तः प्रस्तावो भवति । द्वे द्वे अक्षरे अभ्यस्ते आद्ये प्रस्तावो भवति ॥ २ ॥

दी. आनूपादीनां **अभ्यस्तो द्व्यक्षरः** प्रस्तावो भवति । आद्ये द्वे द्वे अक्षरे अभ्यस्ते प्रस्तावो भवतीत्यर्थः । आनूपे **सोमाःसोमाः** (ऊ. द. ८६) अत्राभ्यस्तो द्व्यक्षरः

---

1. My²-₆L¹E om. यौक्ताश्वोत्तरे वृषा औहोहो....प्रस्तावः ।

15. A² after आनूपे adds: बाभ्रयश्वे

१ २ १ २
प्रस्तावः ऐटते अध्व । एआध्वा । (ऊ. द. १४४) । अत्र अभ्यस्तो द्व्यक्षरः
१ २
प्रस्तावः । सौहविषे प । येंपारी (ऊ. द. २२०) । अत्राभ्यस्तो द्व्यक्षरः
१२२ २ १
प्रस्तावः । वैष्णवोत्तरे सोमाः । सोमाः (ऊ. स. ७७९) अत्राभ्यस्तो द्व्यक्षरः प्रस्तावः
१ २ १ २
स्वराणामन्तिमस्वरे पयोनिधने याज्ञा याज्ञा (र. सं. ३९) । अत्र अभ्यस्तो द्व्यक्षरः प्रस्तावः ॥ २ ॥

अग्निंदूताभ्यस्ता मध्यमक्रौञ्चस्य ॥ ३ ॥

२ २ २
वि. अयंपूषायां मध्यमक्रौञ्चे अग्निंदूताभ्यस्ता प्रस्तावो भवति । सखायो
२ २
दाइ । सखायोदाइ ॥ ३ ॥

भा. यथान्यायं मध्यमक्रौञ्चस्य अग्निंदूताभ्यस्ता प्रस्तावो भवति ॥ ३ ॥

दी. मध्यमक्रौञ्चे सखायोंदाइ । सखायोदाइ । अत्र अभ्यस्ता अग्निंदूता प्रस्तावो भवति ॥ ३ ॥

---

6. My[2] क्रौञ्चे for क्रौञ्चस्य
7. A[2]M[1-2]T अयंपूषा for अयंपूषायां; A[2]M[1] [2]TS[1-2] om. अग्निंदूताभ्यस्ता प्रस्तावो भवति । ; My[1] trans. अग्निंदूता ... भवति afrer दाइ ।

पादोऽभ्यस्तो वषडन्ताभ्यस्ताकूपारराजनपयसाम् ॥ ४ ॥

वि· वषट्कारनिधनाभ्यस्ताकूपारराजनपयसामभ्यस्तः पादः प्रस्तावो भवति । राजनस्येह पुनर्ग्रहणं विशेषणार्थम् । तत्रोक्तम् । सदैवतत्वमेवात्राभ्यासत्वाम् । **दद्राणायां** (ऊ. ग्रा. ८४४) तु वषडन्ते वैच्छन्दसत्वादेकदेशाभ्यासः ॥ ४ ॥

भा॰ एतेषां वषडन्तादीनां चतुर्णां पादः अभ्यस्तः प्रस्तावो भवति । राजनस्येह पुनर्ग्रहणं विशेषणार्थम् । तत्रोक्तम् । सदेवतः पादो भवति । इह त्वयं विशेषः । साभ्यासः पादो भवतीति । दद्राणायां तु वषडन्ते विच्छन्दसत्वादेकदेशाभ्यसः ॥ ४ ॥

दी· वषडन्तादीनां चतुर्णामभ्यस्तः पादः प्रस्तावो भवति । वषट् निधनमन्ते यस्य
　　　　　　　　४ ३ ४२३ ४१२　　२ २　४ २५४२ ५
तद् वषडन्तम् । तस्मिन् वषडन्ते । **विधुन्दद्राणँसमने** । **बहूनाऽ३म्मनेबहूनाम्** (ऊ. ग्रा.
८४४) । अत्र विच्छन्दसत्वात् पञ्चाक्षराभ्यासः । अभ्यस्तान्तः प्रस्तावः । **पुनावषडन्ते**
४ २३४२　३२४५२　　　२ २　४२ ५४२ ५
पुनानस्सोमधारया । **पुनानाऽ३स्सोमधारया** । अत्राभ्यस्तः पादः प्रस्तावो भवति ।
　　　　　३ ४२ २ १२४१२　　१　　　　२ २
अभ्यस्ताकूपारे **इन्द्रायसोमपातवे** । **आऽ२३४इ** । **न्द्रायसौहोऽ५मपातवाइ** ।
अत्राभ्यस्तः पादः प्रस्तावः । राजने **हिम्** (त्रिः) हो (त्रिः) । **हुँः** (त्रिः) **ओहा** (त्रिः) **औहाइ** (त्रिः) **तदिदासा** । **भुव** । **नेषुज्येष्ठाम्** (र. सं. ६७) अत्राभ्यस्तः पादः

---

2. S[4] om वषट्कार .... पयसाम्
3. KS[1]-[2]T विशेषणार्थः My[1] विशेषार्थं for विशेषणार्थम्
4. A[2]M[1]-[2]TS[1]-[2] om. तु; A[2]M[1]-[2]TS[1]-[2] एव for एकदेश०
10. L[1]EMy[2,3] om. पुनावषडन्ते .... भवति (L. 11)
12. S[4] द्विरभ्यस्ताकूपारे for अभ्यस्ताकूपारे

प्रस्तावो भवति । इह सूत्रे राजनस्य पुनर्ग्रहणं विशेषणार्थम् । तत्रोक्तम् । **सदेवतः पादः प्रस्तावो भवति** (पु. सू. १०. १०. १०) इति । इह त्वयं विशेषः । अभ्यस्तः पादः
२ र र २ १ २र १
प्रस्तावो भवतीति । पयसि **परिसुवानोगाऽ३इरिष्ठाः । परिसुवा । नोगिरिष्ठाः ।**
१ र र २
परिसुवानोगाऽ३इरिष्ठाः । (र. अ. १२०) इत्यभ्यस्तः पादः प्रस्तावः ॥ ४ ॥

द्वादशाक्षराणि च रैवतर्षभे ॥ ५ ॥

वि. रैवतऋषभे साभ्यासः पादोऽधिकानि द्वादशाक्षराणि च प्रस्तावो भवति । षट्त्रिंशदक्षर ऋषभस्य रैवतस्य (द्रा. श्रौ. १८. २. २४) इति ॥ ५ ॥

भा. रैवतर्षभे च पादः अभ्यस्तः । द्वादश चैतानि अक्षराणि प्रस्तावो भवति । षट्त्रिंशदक्षरर्षभस्य रैवतस्य (द्रा. श्रौ. १८. २. २४) इति ॥ ५ ॥

दी. रैवतऋषभे अभ्यस्तः पादो **द्वादशाक्षराणि च** प्रस्तावो भवति । **सुरूपकृत्नु-मूतये** । (त्रिः) । **सुदुहामिवगोदुहे । जुहुमसाइ** (र. द. १८) अत्राभ्यासानन्तरं द्वादशाक्षरान्ते प्रस्तावः ॥ ५ ॥

---

4. S[4] after प्रस्तावः adds:- भवति
6. S[1]-[2]TA[2] after अधिकानि add:- च; S[1]-[2]TA[2] om. भवति.
12. S[4] after प्रस्तावः adds:- रैवतर्षभे षट्त्रींशत् (१.२.१) इति । (पञ्चविधसूत्रे द्वितीयखण्डे नवमसूत्रे) षट्त्रिंशादक्षरऋषभस्य रैवतस्य (18-2-24) इति । (द्राह्यायणसूत्रे अष्टादशपटले द्वितीये खण्डे) इति वचनात् षट्त्रींशदक्षरः । त्रिरभ्यस्तपादसहितद्वादशाक्षरान्तं षट्त्रिंशदक्षरः प्रस्तावो भवति ॥

त्र्यक्षरो बृहत्के ॥ ६ ॥

वि. & भा. **बृहत्के त्र्यक्षरः** प्रस्तावो भवति ॥ ६ ॥

दी. **बृहत्के तुवँही** (ऊ. द. ७६) । अत्र **त्र्यक्षरः** प्रस्तावो भवति ॥ ६ ॥

सोमसामगायत्रीक्रौञ्चवैरूपौदलगायत्र्यौशनसैन्धुक्षितमैधातिथरोहितकूलीयेहवदैध्मवाहेन्द्रस्ययशःकण्वबृहत्त्रैष्टुभश्यावाश्वशौक्तवार्षाहरवाजभृत्कार्णश्रावसानां चत्वारि ॥ ७ ॥

वि. **यस्ते-सोमसाम** (ग्रा. ८४६) **इदंहिक्रौञ्चम्** (ग्रा. २९२)। **प्रेष्ठमौशनम्** (ग्रा. ९)। **सोमसामादीनां** चत्वार्यक्षराणि प्रस्तावो भवति। स्तोभश्च यथान्यायमुत्तरः ॥ ७ ॥

भा. एतेषां **सोमसामादीनां** सप्तदशानां चतुरक्षरः प्रस्तावो भवति। स्तोभश्च यथान्यायमुक्तम् (क्तः ?) ॥ ७ ॥

दी. **सोमसामादीनां** सप्तदशनां साम्नां चतुरक्षरः प्रस्तावो भवति। स्तोभश्च

---

2. A^2M^{1}-$^2TS^4$ om. भवति
